अभिराजयशोभूषणम्



मिश्रोऽभिराजराजेन्द्रः

अभिराजयशोभूषणम्

अर्वाचीनसंस्कृतसाहित्यविविधप्रत्यग्रप्रवृत्तिपोषणपरम्

अभिनवकाव्यशास्त्रम्

रचनाकारः

महामहोपाध्यायस्समवाप्तराष्ट्रपतिसम्मानः

मिश्रोऽभिराजराजेन्द्रः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयकुलपतिचरः

वैजयन्त प्रकाशन

इलाहाबाद

अभिराजयशोभूषणम्

अर्वाचीनसंस्कृतसाहित्यविविधप्रत्यग्र-
प्रवृत्तिपोषणपरं पञ्चोन्मेषात्मकमभिनवकाव्यशास्त्रम्

828.1
मिश्र।अ।अ

रचनाकारः
महामहोपाध्यायस्समवाप्तराष्ट्रपतिसम्मानः
मिश्रोऽभिराजराजेन्द्रः

प्रथमसंस्करणम् : जुलाई 2006 ई०

कॉपीराइट © : लेखक

ग्रन्थमूल्यम् : पञ्चशतरूप्यकाणि

प्रकाशकः
वैजयन्तप्रकाशनम्
8 बाघम्बरीमार्गः, भरद्वाजपुरम्
इलाहाबादम् (उ०प्र०)

मुद्रक :
दूबे प्रिन्टर्स एण्ड ग्राफिक्स
५० अ, बलरामपुर हाउस
इलाहाबाद-२११००२

ABHIRĀJAYAŚOBHŪṢAṆAM

The New Sanskṛta Poetics Explaining the Various Fresh Tendencies of the Modern Sanskṛta Literature

Writer

Prof. Abhirāja Rajendra Mishra

Recipient of the Rāṣṭrapati Sammāna

Ex Vice-Chancellor, Sampurnanand Sanskṛta University

VARANASI, INDIA

Vaijayanta Prakashana

Allahabad

Abhirājayaśobhūṣaṇam

The New Sanskṛta Poetics Explaining the Various Fresh Tendencies of the Modern Sanskṛta Literature

Writer

Prof. Abhirāja Rajendra Mishra

Recipient of the Rāṣṭrapati Sammāna

Ex Vice-Chancellor

Sampurnanand Sanskṛta University

VARANASI (U.P. INDIA)

First Edition : July 2006 A.D.

Copyright © : The Author

Price of the Book : Rs. Five Hundred Only

Publisher

Vaijayanta Prakashan

8, Baghambari Road

Bharadwajapuram, Allahabad-6

Printed At

Dubey Printers

50-A, Balrampur House

Allahabad (U.P.)

नान्दीवाक्

अभिराजयशोभूषणं नाम मदुपज्ञमभिनवतमं संस्कृतकाव्यशास्त्रमिदानीं प्रकाश्यते। काव्यशास्त्रेऽस्मिन् मद्विरचिताः ५६७ कारिकाः गद्यवृत्तिसमन्विता वर्तन्ते। किञ्चोदाहरणपद्यान्यपि पञ्चाशीत्यधिकैकशतमितानि विलसन्ति येषु प्रायेण शताधिकपद्यानि मत्प्रणीतान्येव। सर्वाण्यप्युदाहरणपद्यानि समकालीनकवीनां रचनात एव सङ्कलितानीति विशेषः।

पञ्चोन्मेषा अत्र वर्तन्ते-परिचयोन्मेषः, शरीरतत्त्वोन्मेषः, आत्मतत्त्वोन्मेषः, निर्मितितत्त्वोन्मेषः, प्रकीर्णतत्त्वोन्मेषश्च। **परिचयोन्मेषे** काव्यप्रशंसा-प्रयोजन-हेतु-लक्षण-विभाजनविषयाः सङ्कलिताः। एभिर्विषयैः काव्यपरिचयस्सम्पाद्यते।

शरीरतत्त्वोन्मेषे काव्यशरीरत्वेन ख्यातयोः शब्दार्थयोः साङ्गोपाङ्गं व्याख्या-नमुपन्यस्तम्। तत्र शब्दार्थसम्बन्धः, शब्दशक्तिप्रकरणम्, रीतिवृत्तिप्रकरणम्, गुणालङ्कारप्रकरणञ्च यथाशास्त्रं यथापरम्परं यथाप्रत्यग्रचिन्तनञ्च समुपन्यस्तं मया।

तत्र लक्षणायाः सर्वाण्यप्युदाहरणानि नव्यानि, यथा संस्कृतपाठकानां चिन्तनं प्रक्रान्तयुगानुकूलं नव्यञ्च स्यात्। संस्कृतविचारप्रवाहस्याप्यभिनवत्वं प्रासङ्गिकत्वञ्चापि सिध्येताम्। तद्यथा-संसद् व्रवीति, अर्धोरुका अभ्यस्यन्ति, शुको माणवकः, पञ्चनदश्शूरः, कृष्णा दुह्यते इति। एवमेवाऽभिधामूलाया व्यञ्जनायाः सर्वाण्यप्युदाहरणानि मदुपज्ञान्येव। यथा-सभालचन्द्रो गङ्गाधरः, अभालचन्द्रो गङ्गाधरः, रामकृष्णौ, अहिनकुलौ, कालिकां वन्दे, सर्वं जानाति भर्ता, दयतां मयि सा शिवा, देवो मध्वरिर्जयेत्, विरोचनेन दिनं स्फीतम्, श्रमार्तस्य तरुर्मित्रम्, लक्ष्मणोऽटति केदारे, अदृष्टिः कौशिको दिने, पुण्डरीको वनेचरः इति। एभिरुदाहरणैः रूढोदाहरणानुशीलनजन्योद्वेगः पाठकानां विदुषाञ्चापि नवत्वपक्षधराणां शाम्यतीति विश्वसिमि।

अलङ्काराणां लक्षणानि पूर्वापेक्षया भाषादृष्ट्या सरलतराणि, अभिप्रायदृष्ट्या च स्पष्टतराणि कृतानीति स्वतः प्रामाण्येन निवेदये। तत्र पूर्ववर्तिलक्षणग्रन्थ-परिशीलनावाप्तो ममाऽनुभव एव प्रमाणम्। सहृदयानां कीदृशोऽनुभव इति पश्चादेव ज्ञातुं शक्यते।

गुण-दोष-चित्रकाव्य-गुणीभूतव्यङ्ग्यादिसन्दर्भा न विवेचिता मया, पिष्टपेषणभिया, सुज्ञातत्वधिया, कतिपयमहत्तराऽभिनवविषयविवेचनत्वरया च। तत्सर्वमन्यत्र समुपलभ्यत एव।

आत्मतत्त्वोन्मेषे विलसति मच्चिन्तनरसायनम्। रसालङ्काररीतिवक्रोक्त्यौ-चित्यानां कथं न काव्यात्मत्वं, कथम्पुनः प्रतीयमानार्थस्यैव काव्यात्मत्वमिति यथा मयोपन्यस्तं तद् गुरुकृपापीयूषपाकोद्भूतमेव किञ्चित्फलम्। सुधियो विद्वत्तल्लजाः कृपया पूर्वाग्रहं परित्यज्य निष्पक्षधिया शारदाऽनुरक्त्या च मत्परिश्रमं समीक्षन्ताम्।

सुकृतं दण्डिना विकृतञ्चानन्दवर्धनेन संस्कृतकाव्यशास्त्रम् इत्येके। कथञ्चिदपि तन्न। काव्यशास्त्रचिन्तनसाधुत्वोपस्थापने श्रेयस्करो विदर्भसम्प्रदायोऽश्रेयस्करश्च कश्मीरसम्प्रदाय इत्यपि चिन्तयितुं नोचितम्। यतो हि काव्यशास्त्रीयचिन्तने नैव दृश्यते मनागपि क्षेत्रवादः। भट्टनायकमहिमभट्टकुन्तकक्षेमेन्द्रादयस्सर्वेऽपि ध्वनिपरिपन्थिनः कश्मीराभिजना एवासन्।

ममाऽपि महती श्रद्धाऽऽनन्दवर्धनेऽभिनवद्वितीये। परन्तु न कथमपि तत्काश्मीराभिजनत्वादपितु तदुपकल्पितकाव्यात्मसिद्धान्तस्य सर्वविधसमञ्जसत्वात्। वाच्यार्थनिर्विशेषत्वादलङ्काररीतिवक्रोक्तयश्शरीरधर्मा एव काव्यस्य! अलङ्कारं वक्रोक्तिं वाऽन्यथा प्रख्याप्य कियानेव प्रयासः क्रियेत तदात्मत्वसिद्ध्यर्थं, तत्र न श्रद्दधाति सहृदयविवेकः। आभरतात्पण्डितराजं यावत्तयोर्वाच्यार्थस्वरूपमात्रस्यैवाऽनुमोदनत्वात्। औचित्यतत्त्वस्य चापि न स्वतन्त्रास्तित्वमित्यभिनवगुप्तः क्षेमेन्द्रोपाध्याय एव! ब्रह्मसमकक्षं रसतत्त्वञ्चापि काव्यार्थलक्ष्यभूतं सदेव ततोऽपि महत्तरं तत्त्वम्। सोऽपि न काव्यात्मा प्रत्युत काव्यात्मप्राप्तव्यं किमपि विलक्षणतत्त्वं मुक्तिकल्पम्।

एवं हि (वाच्यार्थ-लक्ष्यार्थ-व्यङ्ग्यार्थरूपेण व्यवस्थितस्य) **काव्यार्थस्य** यच्छ्रेष्ठतमं सहृदयश्लाघ्यं लावण्यप्रतिमं रूपं तदेव काव्यस्यात्मतत्त्वं यद्धि प्रतीयमानाख्यम्। यत्र काव्ये प्रतीयमानोऽर्थोऽयं विलसति सर्वोत्कर्षेण तदेव ध्वनिकाव्यमित्यानन्दवर्धनः। श्रेयस्करीयमेव चिन्तनधोरणीत्यभिराजः। तत्सर्वमस्मदुपाध्यायानां **श्रीमच्चण्डिकाप्रसादशुक्लानां** स्पर्शमणिकल्पवपुषां वात्सल्यमहिम्ना मयाऽभिराजराजेन्द्रेण श्लक्ष्णया परिस्फुटया भाषया, देशिकोचितनिरवद्यव्याख्यया च व्याख्यातमत्राऽभिराजयशोभूषणे। तेन प्रीयन्ताम्मे गुणपक्षपतिनस्सहृदयाः।

निर्मितितत्त्वोन्मेषेऽपि पदे-पदे दृश्यतेऽभिनवत्वम्। गद्यपद्ययोरत्र मूलस्रोतो निरूपितं मया। अनियताक्षर-प्रमाणनियताक्षरयोः, किञ्च चूर्ण-निबद्ध संज्ञयोर्गद्यपद्ययोर्विस्तृतं व्याख्यानमत्र मयाकृतम्। ततश्चानन्दवर्धनोद्दिष्टा **खण्डकथैवाऽद्यतनी लघुकथा, सकलकथा** चैवाद्यतनी **दीर्घकथेत्यपि** सप्रमाणं निरूपितम्मया। उन्मेषेऽस्मिन् उपन्यासैकाङ्किलहरीकाव्यादीनां लोकप्रियाऽभिनवकाव्यभेदानां युक्तियुक्तं लक्षणं मयोपन्यस्तम्। महाकाव्य-खण्डकाव्य-नाटिकादीनाञ्चापि साम्प्रतिकयुगानुकूलं संशोधितलक्षणं प्रदत्तम्मया यथा नव्यरचनाकाराणां मार्गस्सुगमो भवेत्। वस्तुत उन्मेषेऽस्मिन् पारम्परिकी एव गद्यपद्योभयकाव्यनिर्मितिः संशोध्य परिकल्प्य च प्रस्तुता मया येन काव्यशास्त्रमिदं प्रमाणभूतं स्यादभिनवरचनायाः।

प्रकीर्णतत्त्वोन्मेषेऽन्तिमे तु आद्यन्तं परिलक्ष्यते मदुपज्ञं मौलिकं चिन्तनम्। अत्र गीतितत्त्व-गलज्जलिका-छन्दोमुक्तकाव्यप्रकरणानि मयोपन्यस्तानि। गीतितत्त्वे गीतं, लोकगीतञ्च (Folk Songs) व्याख्यातम् ततश्च कजरी-नक्तक-प्रचरण-वटुक-रसिक-लाङ्गलिक-स्कन्धहारीय-औष्ट्रहारिक-फाल्गुनिक-चैत्रक-सूतगृह-

उत्थापनादिसंज्ञानां लोकगीतानां लक्षणोदाहरणपुरस्सरं व्याख्यानं कृतं वर्तते। राज्यान्तरप्रचलितानां रागिणी-नाटी-गर्बा-पण्डवानी-बाउल-अभङ्गादिलोकगीतानां पुनरुल्लेखमात्रम्।

लोकप्रियताया धुरि विद्यमानाया **गलज्जलिकाया:** पारसीकभाषा-सम्मतं संविधानकं प्रस्तूय तस्या विविधरूपाणि समुपन्यस्तानि मया। अन्ते च छन्दोमुक्तकाव्यस्य विस्तृतं प्रामाणिकञ्च सिद्धान्तं विशदीकृत्य, तस्यापि विविधरूपाणि समुदाहृतानि।

विगतशताब्दस्यान्तिमे दशके समायोजितासु कतिपयसंस्कृतसङ्गोष्ठीषु अभिनव-संस्कृतकाव्यशास्त्रविषयिणी चर्चा सञ्जाता। अस्मन्मित्रवर्यै: प्रो० राधावल्लभत्रिपाठिवर्यै: सागरविश्वविद्यालये एतादृश्य: सङ्गोष्ठ्य: समायोजिता:। प्रायेण सर्वैरेव समागतविद्वद्भि: प्रत्यग्रकाव्यशास्त्रस्य समर्थनं कृतम्। तत्र कारणद्वयमासीत्। प्रथमं तावदिदं यत्प्रतिष्ठापिते खलु साम्प्रतिकलोकतन्त्रेऽपगते च राजतन्त्रे नृपैकमात्रकृतीनां विषये किं क्रियेत? द्वितीयञ्चापि कारणमिदं यत्संस्कृतेऽप्यधुनाऽन्यभारतीयभाषोपयुक्ता लोकप्रिया: काव्यप्रकारा निर्मीयन्ते नव्यै: कविभि:। परन्तु तेषां कृते नोपलभ्यते कश्चित् काव्यशास्त्रावलम्ब:। अतएव कथा-नाट्यादिसम्बद्धानां नूतनकाव्यप्रकाराणामपि नियमनिर्देशार्थं किञ्चिदभिनवकाव्यशास्त्रमपेक्षितमेव।

तावता कालेन वाराणसेयै: आचार्यप्रवरै: प्रो० रेवाप्रसादद्विवेदिवर्यै: स्वोपज्ञा काव्यालङ्कारकारिका प्रकाशिता। जयपुरस्थै: डॉ० ब्रह्मानन्दशर्माभिश्चापि काव्यसत्यालोकाख्य: काव्यशास्त्रचिन्तनपर: स्वोपज्ञग्रन्थ: प्रकाशित:। काव्यलक्षण-काव्यात्मविषयिणी काऽपि नूतनचर्चा प्रवृत्ता सम्प्रति या हि ग्रन्थयोरनयोरुपनिबद्धाऽऽसीत्। शास्त्रार्थे सकृत्प्रवृत्ते सत्यन्येऽपि केचिदाचार्या: काव्यशास्त्रचिन्तनेऽग्रेसरीभूता:। तत्राचार्यशिवजीवोपाध्याय: (वाराणसी) आचार्य-राधावल्लभत्रिपाठी (सागर) आचार्यरहसविहारी द्विवेदी (जबलपुरम्) प्रमुखा:।

ममापि चेतसि समुत्था काऽपि काव्यशास्त्रचिकीर्षा। वस्तुतोऽस्याश्चिकीर्षाया बीजानि मन्मन:क्षेत्रे उप्तान्यासन् अस्मत्साहित्यशास्त्रोपाध्यायै: ध्वन्या-लोकाध्यापकै: परमाराध्यै: डॉ० चण्डिकाप्रसादशुक्लवर्यै:। अनुत्तम-प्रतिभमाचार्यानन्दवर्धनपादमवगमयितुं गुरुवर्यैर्दीपशिखाऽख्या काचिद् विलक्षणैव टीका कृता याऽधुना प्रकाशिता वाराणसीस्थविश्वविद्यालयप्रकाशनेन। टीकेयं लोचनस्थान् प्रमादान् सम्यक्तया शमयति।

तदेवोप्त बीजं विश्वविद्यालयीयाऽध्ययनकाले समयमवाप्य कन्दलितम्-**अभिराजयशोभूषण**रूपेण। संकल्पितकाव्यशास्त्रस्याऽस्य अभिराजयशोभूषणस्य प्रथम उन्मेष: परिचयाख्यो मया प्रणीतो यो हि मध्य-प्रदेश-संस्कृताकादमी मुखपत्रिकाया दूर्वाया २३ तमेऽङ्के प्रकाशितोऽभूत्। उन्मेषेऽस्मिन् काव्यप्रयोजन-

काव्यहेतुकाव्यलक्षण-काव्यविभाजनविषयकं मदभिनवचिन्तनमासीत्। तत्सर्वम-धीत्याऽन्येषामपि समवयस्कानां प्रसुप्तचिन्तनं प्रबुद्धं जातम्। अभिनव-चिन्तन-प्रवाहः कञ्चिदुदियाय संस्कृतरचनाधर्मितायाम्। प्रो० राधावल्लभ-त्रिपाठिनाऽभिनवकाव्यालंकारसूत्राभिधं साङ्गोपाङ्गं काव्यशास्त्रं प्रणीतम्।

परन्तु तावदेव सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयकुलपतित्वदायित्वं निर्वोढुं मय्युपगते सति त्रिपुरहरनगरीं वाराणसीम् अभिराजयशोभूषणकार्यं स्थगितं जातम्। २४ अप्रैल २००५ मिततिथौ तद्दायित्वान्मुक्तस्सन्नेव भूयोऽपि कार्येऽस्मिन् सन्नद्धोऽभूवम्। ग्रन्थं प्रपूर्य प्रकाशनार्थं दत्ता मुद्रणप्रतिः (Press Copy) सर्वमपि मुद्रणं प्रायेणाऽवसितम्। परन्तु तावदेव मया ग्रन्थस्यास्य हिन्दीरूपान्तरमपि कृतम्। पुनर्व्यवस्थायामस्यां विलम्बो जातः। अन्ततश्चेदानीं ग्रंथोऽयं प्रकाश्यते।

भवतु! नाऽहं संशप्तकपक्षधरः कस्यचित्काव्यात्मसिद्धान्तस्य! परन्तु काव्यविषयकं यच्छाश्वतं सत्यं तदेव मह्यं रोचते। परम्परां सर्वथाऽपहाय नव्यं किञ्चिदाख्यातुं नोचितम्। यतोहि परम्परा निर्मीयते सहस्रमितानां पूर्वसूरीणां चिन्तनैः। परम्परायां विद्यते यच्छाश्वतं सत्यं तदेवाऽभिप्रेतं मम। अतएव **शाश्वततावाद** एव मम काव्यशास्त्रसिद्धान्तः।

अभितो धरित्र्यां स्वर्गलोके च राजन्ते ये यशः कायाः कवयस्सहृदयाश्च तेऽभिराजाः। तेषां यश एव भूषणं यस्य तन्नूतनं काव्यशास्त्रम् **अभिराजयशो-भूषणम्**। एवं हि कवि-सहृदयोभययशस्करमिदं मदुपज्ञं काव्यशास्त्रमिति धिया विरचितम्मयेदम्। एतावन्मात्रं सविनयं विनिवेद्य प्रत्नसूरीन् प्रति, समकालीनान् आचार्यान् प्रति, समुदाहृतकवितल्लजान् प्रति च महान्तं कार्तज्ञ्यभारं प्रस्तुवन् विरमामि। किञ्च,

प्रणीयेदमभिराजयशोभूषणमञ्चितम्।
भूयः प्रवर्तये रुद्धां काव्यशास्त्रपरम्पराम्।।

सदुक्तिगुणलुब्धेन मया नूनमनुष्ठितम्।
साहसमकलिङ्गेन श्रियं हन्त लभे न वा।।

क्व सूर्या मम्मटाद्यास्ते क्व चाहं लघुदीपकः।
तुल्यं किन्तूभयोर्लक्ष्यं शारदासौधकाशनम्।।

प्रीयतां वागधिष्ठात्री कालिदासयशोधरा।
ममैतेन विलासेन सात्त्विकेनाऽनुरञ्जिता।।

गङ्गादशहरा — **विद्वद्वशंवदः**

शिमला, ६ जून २००६ ई० — **मिश्रोऽभिराजराजेन्द्रः**

***

अभिराजयशोभूषणम्

।।परिचयोन्मेषः।।

।। मङ्गलाचरणम्।।

क्वणन्मुखरवल्लकीनिनदमुग्धभृङ्गावली-
वितीर्णमधुगुञ्जितोच्छ्वसितभक्तहृन्मन्दिरा।
विदग्धवरटासना कवनशासना शारदा
भवेदमृतजीविनां मतिमतां यशोभूषणम्।।१।।

स्तम्बेरमवदनं तं क्रीडारञ्जितनगेन्द्रजासदनम्।
विघ्नारण्यदवाग्निं सिद्धिकलत्रं मुदा वन्दे।।२।।

जीवनसूत्रविधात्रीं क्रीडनकीकृतविरञ्चिहरिशम्भुम्।
शक्तिं वितरितशक्तिं नौमि मृडानीमनन्यपरतन्त्राम्।।३।।

भरतभामहरुद्रटदण्डिनो
ध्वनिकृदुद्भटवामनमम्मटान्।
सहृदयांस्तिलकाऽलककुन्तक-
क्षितिपभोजधनञ्जयशेखरान्।।४।।

मुकुललोल्लटशङ्कुकनायका-
भिनवरुय्यकमङ्खकवाग्भटान्।
अमरकेशवठक्कुरसागर-
प्रभृतिशास्त्रजुषो बुधतल्लजान्।।५।।

झनझनाहट से मुखरित वीणातंत्री के नादमाधुर्य से सम्मोहित भ्रमर-समूह द्वारा उत्पन्न मधुर गुञ्जारों से जिनके भक्तों के हृदयरूपी मन्दिर उच्छ्वसित हो उठे हैं, जो विवेक-सम्पन्न हंस की पीठ पर आसीन हैं, काव्यानुशासन करने वाली वह शारदा रसामृत का पान करने वाले प्रतिभा-पटिष्ट कविजनों का यशोभूषण बनें।।१।।

अपनी बालक्रीडाओं से नगेन्द्रनन्दिनी पार्वती के भवन को अनुरञ्जित करने वाले, विघ्नरूपी अरण्य के लिये दावाग्नि-तुल्य, सिद्धि नामक अर्धाङ्गिनी से संवलित उन गजवदन गणेश की प्रसन्नतापूर्वक वन्दना करता हूँ।।२।।

अपने जीवन-सूत्र का नियंत्रण करने वाली, ब्रह्मा, विष्णु एवं महेश को

भी खिलौना बना कर रखने वाली, शक्ति वितरित करने वाली, सर्व-तंत्र-स्वतंत्र शक्तिरूपा भगवती मृडानी को प्रणाम करता हूँ।।३।।

भरत, भामह, रुद्रट, दण्डी, ध्वनिकार आनन्दवर्धन, उद्भट, वामन, मम्मट, राजानक तिलक एवं अलक, कुन्तक, मालवेश्वर भोज, धनञ्जय, राजशेखर-।।४।।

मुकुल, लोल्लट, शंकुक, भट्टनायक, अभिनवगुप्त, रुय्यक, मङ्खक, वाग्भट, अमरचन्द्र सूरि, केशवमिश्र, गोविन्द ठक्कुर, सागरनन्दिन् प्रभृति काव्यशास्त्री प्रकाण्ड पण्डितगण।।५।।

क्षेमेन्द्रहेमचन्द्रौ च विद्यानाथधरावुभौ।
विश्वनाथजगन्नाथौ जयदेवाऽप्पयाभिधौ।।६।।

काव्यशास्त्राब्धिमन्थोत्थरत्नकल्पान् विकस्वरान्।
पूर्वसूरीनहं वन्दे यशोभूषणभूषितान्।।७।।

तत्तत्कृपालवोद्दीप्तबुद्धिदीपोऽहमानतः ।
अभिराजयशोभूषं काव्यशास्त्रं नवं दधे।।८।।

सञ्चिनोति यथा भृङ्गः पुष्पात्पुष्पाद्रसाऽसवम्।
करोमि सङ्ग्रहं तद्वद् यावद्भरतकाश्यपम्।।९।।

एष राजेन्द्रमिश्रोऽहं त्रिवेणीकविसंज्ञितः।
ग्रन्थारम्भे नवान् प्रत्नान् कोविदान्नौमि सादरम्।।१०।।

श्रीमदाद्याप्रसादाख्यं पितृव्यं बुधतल्लजम्।
आत्मानुप्राणकं वन्दे योगक्षेमैकचिन्तकम्।।११।।

यत्पदाब्जमधुप्रीत्या काव्ये शास्त्रे कृता रतिः।
श्रीचण्डिकाप्रसादं तं नौमि शुक्लान्वयं गुरुम्।।१२।।

क्षेमेन्द्र एवं हेमचन्द्र, विद्यानाथ एवं विद्याधर, विश्वनाथ एवं पण्डितराज जगन्नाथ, जयदेव एवं अप्पय दीक्षित।।६।।

काव्यशास्त्ररूपी सागर के मंथन से समुद्गत, देदीप्यमान रत्नतुल्य, यशरूपी भूषण से विभूषित उन पूर्वसूरियों की मैं वन्दना करता हूँ।।७।।

उपर्युल्लिखित उन समस्त आचार्यों के कृपा-लव से उद्दीप्त बुद्धिरूपी दीपक वाला मैं (अभिराजराजेन्द्र) विनम्रतापूर्वक **अभिराजयशोभूषण** नामक अभिनव काव्यशास्त्र का प्रणयन कर रहा हूँ।।८।।

जैसे (कोई) भ्रमर एक-एक पुष्प से रसासव का संचय करता है वैसे ही मैं भी आचार्य भरत से लेकर काश्यप (आचार्य रेवाप्रसाद द्विवेदी 'सनातन') तक के अभिप्रायों का संग्रह कर रहा हूँ।।९।।

त्रिवेणीकवि संज्ञा वाला राजेन्द्र मिश्र यह मैं ग्रंथ के प्रारंभ में नये-पुराने आचार्यों को सादर प्रणाम अर्पित कर रहा हूँ।।१०।।

अपने जीवन को अनुप्राणित करने वाले, योग एवं क्षेम के एकमात्र चिन्तक (अपने) पितृव्य विद्वत्प्रवर श्रीमान् आद्याप्रसाद मिश्र को प्रणाम करता हूँ।।११।।

जिनके चरणकमलों की मधुप्रीतिवश मैं काव्य एवं शास्त्र के प्रति उन्मुख हो सका उन (साहित्य) गुरुवर्य श्री चण्डिकाप्रसाद शुक्ल जी को नमन करता हूँ।।१२।।

मङ्गलारम्भं मङ्गलमध्यं मङ्गलान्तञ्च काव्यं प्रशंसति महाभाष्यकारो भगवान् पतञ्जलिरिति गृहीताऽप्तजननिर्देशो ग्रन्थकार आदौ मङ्गलाचरणं विधत्ते। तच्च मङ्गलाचरणं शारदागणपतिमृडानीविषयकं कमपि ग्रन्थ-कृदभीष्टं निगूढक्रमं स्वारस्यविलसितं प्रकटयति। भक्तहृन्मन्दिरेषु वीणारणनोन्मदभ्रमरनिचयप्रसारित-मधुरगुञ्जितैः कमपि विलक्षण-मेवोच्छ्वासं हर्षातिरेकं जनयन्तीं वाङ्निर्मित्यधिदेवतां हंसासनां शारदामेवादौ प्रणमति ग्रंथकारः। भक्तजनास्तावत् कवयस्सहृदयाः साहित्यानुरागिणः सुकुमारकलापक्षधरा वा।

ततः परं वन्द्यते गणपतिर्विघ्नारण्यदवाग्निकल्पः। दवाग्निना भस्मीभूते सत्येव विघ्नबाधाऽरण्ये मङ्गलमिति कृत्वा रौद्रगणपतिस्वरूप-स्मरणम्। यद्यपि ऋद्धिः सिद्धिश्चेति द्वे भार्ये विनायकस्य तथापि सिद्धिमात्रेऽवसितरुचिस्समृद्धि-विमुखो ग्रन्थकृद्गणपतिं सिद्धिकलत्रं प्रस्तौति।

ततश्चाऽभीष्टदेवतां सर्वतन्त्रस्वतन्त्रां त्रिदेवरचयित्रीं निरतिशय-वत्सलत्वात् पुत्रीकृताय यस्मै कस्मैचिदपि समुपायनीकृतनिरवद्यकवित्व-प्रतिभां शक्तिस्वरूपां मृडानीं जगन्मातरं स्तौति भूषणकारः।

एतदनन्तरं पूर्वसूरिप्रणामार्पणप्रसङ्गः। आभरतान्नाट्यशास्त्रकारात् काश्यपमाचार्यरेवाप्रसादद्विवेदं सनातनोपाह्वं यावत् सर्वान् प्रमुखानलङ्कार-शास्त्ररचयितॄन् प्रणमति ग्रन्थकारस्तत्तदनुकम्पाप्रकाशितबुद्धिदीपत्वात्। तत्र ध्वनिकृदाचार्य आनन्दवर्धनः। राजानकतिलक उद्भटविवेककारो रुय्यक-

जनकः। अलकोऽल्लटो वा काव्यप्रकाशांशविशेषपूरयितेति भणति रुय्यकः काव्यप्रकाशसङ्केतटीकायाम्। शेखरस्तु राजशेखरोऽवन्तिसुन्दरीजानिः काव्यमीमांसाकारः। नायको भट्टनायको हृदयदर्पणकारः। अमरकेशव-ठक्कुरसागराः काव्यकल्पलताकृदमरचन्द्रः अलङ्कारशेखरकारः केशवमिश्रः काव्यप्रदीपकर्ता गोविन्दठक्कुरो नाटकलक्षणरत्नकोशकृत्सागरनन्दी च। प्रभृतिशब्देनाऽन्ये काव्यशास्त्रकाराः सिंहभूपालशारदातनयभानुदत्तराम-चन्द्रगुणचन्द्ररूपगोस्वामिकर्णपूराशाधरनागेशविश्वेश्वराः सूच्यन्ते।

अभितः स्वर्गे भूलोके च समं राजन्त इति क्रान्तप्रतिभाः कवयस्स-हृदयाश्च। तेषां यश एव भूषा यस्य तादृग्गुणविशिष्टं नवं नूतनं प्रक्रान्तयुगोपयोगि काव्यशास्त्रं दधे। कियद्विततमिदं काव्यशास्त्रमिति विशदयति यावदिति। भरतान्नाट्यशास्त्रकारात् अलङ्कारकारिकाकारं काश्यपं रेवाप्रसादद्विवेदं यावत्।

महाभाष्यकार भगवान् पतञ्जलि आरंभ, मध्य एवं अन्त में मंगलाचरण से युक्त काव्य को प्रशस्त मानते हैं, इसलिये आप्तजनों का निर्देश शिरसा गृहीत कर ग्रंथकार ग्रंथ के प्रारंभ में मंगलाचरण प्रस्तुत कर रहा है। सरस्वती, गणपति एवं मृडानी-विषयक वह मंगलाचरण ग्रंथकार को अभीष्ट, रहस्यात्मक क्रम से युक्त, एक विशिष्ट स्वारस्य (आत्माभिप्राय) को प्रकट कर रहा है।

भक्तों के हृदयरूपी मन्दिरों में वीणानाद से उन्मद भ्रमर-समूह द्वारा प्रसारित मधुर गुञ्जारवों से किसी विलक्षण ही उच्छ्वास एवं हर्षातिरेक को उत्पन्न करने वाली, काव्यनिर्मिति की अधिदेवता हंसासना भगवती शारदा को ही सर्वप्रथम ग्रंथकार प्रणाम अर्पित करता है। भक्तजन हैं साहित्य के अनुरागी कवि एवं सहृदय (पाठक) जन अथवा सुकुमार कलाओं के पक्षधर लोग।

तदनन्तर वन्दना की जा रही है गणपति की जो विघ्नरूपी अरण्य के विनाशार्थ दावानल के समान हैं। दावानल के द्वारा ही विघ्न-बाधारूपी अरण्य के भस्मसात् होने पर लोककल्याण होना संभव है, इस अभिप्राय से यहाँ रौद्रगणपति का स्मरण किया जा रहा है। यद्यपि गणपति की दो पत्नियाँ हैं-ऋद्धि एवं सिद्धि। परन्तु 'सिद्धि' मात्र से परितुष्ट तथा ऋद्धि (धन-वैभव अथवा समृद्धि) के प्रति उदासीन ग्रंथकार भगवान् गणपति को सिद्धि-कलत्र (सिद्धि है भार्या जिनकी ऐसे) के ही रूप में प्रस्तुत कर रहा है।

इसके अनन्तर अभिराजयशोभूषणकार शक्ति-स्वरूपा, जगदम्बिका

मृडानी की वन्दना कर रहा है जो उसकी अभीष्ट उपास्य देवता हैं, सर्वतन्त्र-स्वतन्त्र हैं, ब्रह्मा, विष्णु एवं महेश (त्रिदेव) की भी रचयित्री हैं तथा निरवधि वत्सलता के कारण पुत्ररूप में अंगीकृत कर लिये गये जिस किसी को भी निरवद्य कवित्व-प्रतिभा प्रदान करने में पूर्ण समर्थ हैं।

इसके बाद आता है पूर्वाचार्यों को प्रणाम अर्पित करने का सन्दर्भ। नाट्यशास्त्रकार आचार्य भरत से लेकर 'सनातन' उपाधि वाले आचार्य रेवाप्रसाद द्विवेदी 'काश्यप' तक- अलंकारशास्त्र के समस्त प्रमुख रचनाकारों को ग्रंथकार प्रणाम अर्पित करता है, उन सब की अनुकम्पा-कृपा से प्रकाशित स्वबुद्धि-दीप वाला होने के कारण!

अब उन आचार्यों में ध्वनिकार हैं आचार्य आनन्दवर्धन। उद्भटविवेक (नामक उद्भटालंकार की टीका) के लेखक राजानक तिलक रुय्यक के पिताश्री हैं। राजानक अलक अथवा अल्लट काव्यप्रकाश के अंश-विशेष को पूर्ण करने वाले आचार्य हैं, ऐसा आचार्य रुय्यक बताते हैं (अपनी) काव्यप्रकाश की सङ्केतनाम्नी टीका में। शेखर हैं अवन्तिसुन्दरी के पति आचार्य राजशेखर, काव्यमीमांसा के प्रणयनकर्ता। नायक हैं-हृदयदर्पणकार आचार्य भट्टनायक। अमर हैं काव्यकल्पलताकार अमरचन्द्र। केशव हैं-अलङ्कारशेखर के कर्ता आचार्य केशवमिश्र। ठक्कुर हैं-काव्यप्रदीप के कर्ता गोविन्दठक्कुर तथा सागर हैं-नाटकलक्षणरत्नकोश के रचयिता सागरनन्दी। प्रभृति शब्द से सूचित होते हैं अन्यान्य काव्यशास्त्रकार जैसे सिंहभूपाल, शारदातनय, भानुदत्त, रामचन्द्र-गुणचन्द्र, रूपगोस्वामी, कर्णपूर, आशाधरभट्ट, नागेशभट्ट एवं विश्वेश्वर पण्डित।

अभितः अर्थात् दोनो ओर से, (जीवित रहते हुए) भूलोक में तथा (मृत्यु के अनन्तर) स्वर्गलोक में जो समान रूप से यशोभाजन बने रहते हैं, वे हैं क्रान्तप्रतिभा वाले कविगण एवं सहृदय (पाठक)गण। उनका (उज्ज्वल) यश ही है अलंकरण जिसका ऐसे विलक्षणगुण वाले, अभिनव, अर्वाचीनयुगोपयोगी काव्यशास्त्र का प्रणयन कर रहा हूँ। कितना विस्तृत है यह काव्यशास्त्र? इसका विवेचन किया जा रहा है 'यावत्' शब्द से। नाट्यशास्त्रकार भरत से लेकर **अलंकारकारिका** के लेखक आचार्य रेवाप्रसाद द्विवेदी 'काश्यप' तक।

।। काव्यप्रशंसाप्रकरणम्।।

अमृतमप्यतिशेते काव्यमिति सहृदयानामनुभवः। तथाऽह कश्चित्-

कान् पृच्छामस्सुराः स्वर्गे निवसामो वयं भुवि।
किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा।।

अविदितगुणाऽपि कविता यदि वशीकरोति श्रोतृन् तर्हि का कथा विदितगुणायाः? यथाऽह सुबन्धुः

अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला।।

अमृत का भी अतिशायी होता है काव्य, ऐसा सहृदयों का (अपना) अनुभव है। किसी ने कहा है-किनसे पूछें कि कविता का रस (अधिक) स्वादु होता है अथवा अमृत? क्योंकि देवता तो रहते हैं स्वर्ग में और हम रहते हैं पृथ्वी पर।

विना गुणों का ज्ञान हुए भी जब कविता श्रोताओं को वशीभूत करती ही है तो फिर उस कविता का क्या कहना, जिसका गुण (मर्म) पाठक को ज्ञात हो जाय! जैसा कि सुबन्धु ने कहा है-अविदित गुण (प्रकर्ष) वाली भी सत्कवि की अभिव्यक्ति (श्रोताओं के) कर्णकुहरों में मधु की धारा उँड़ेल देती है। ठीक यूँ ही, जैसे अनधिगत सौरभ्य वाली भी मालती पुष्पों की माला दृष्टि को अपहृत कर लेती है।

क्षयं याति जगद्रूपं नितरां पाञ्चभौतिकम्।
वाङ्मयं किन्तु तद्रूपं चिरस्थायि विकस्वरम्।।१३।।

केनापि कर्मणा स्वेन द्वित्रान् किमुत पञ्चषान्।
यद्वा जानपदानेव लोको रञ्जयति ध्रुवम्।।१४।।

कविः किन्तु निजैः काव्यैर्लोकोत्तरवचोऽन्वितैः।
भृशमाकृष्य बध्नाति चतुरस्रं महीतलम्।।१५।।

पञ्च महाभूतों से निर्मित यह संसार का विस्तार तो निश्चित रूप से क्षय को प्राप्त हो जाता है। परन्तु उसी सृष्टि का वाङ्मय रूप चिरस्थायी एवं विकस्वर (नित्योज्ज्वल) बना रहता है।।१३।।

मनुष्य निश्चित रूप से अपने जिस किसी भी कार्य (आचरण) से दो-तीन अथवा पाँच-छह जानपदों (नागर जनों) को ही अनुरंजित कर पाता है।।१४।।

परन्तु (प्रतिभा का धनी) कवि लोकोत्तर अभिव्यक्ति से अन्वित अपने काव्यों द्वारा समग्र महीतल को ही बरबस आकृष्ट कर बाँध लेता है।।१५।।

अचिन्त्यचिन्तने शक्तोऽप्यदृष्टदर्शने क्षमः।
स्वहस्तामलकीकृत्य ब्रह्माण्डं कविरीक्षते।।१६।।

गुह्यकेशमपि स्वैरं कविः काव्यैकशेवधिः।
आत्मारामतया जीवन्नतिशेते निरङ्कुशः।।१७।।

नृपत्वमपि किम्मूल्यं कवित्वे प्रातिभे सति।
किमर्थं कमलां पश्येद्यस्य सिद्धा सरस्वती।।१८।।

अलं धनैरलङ्कारैरलञ्चापि चिरायुषा।
कवित्वं भावुकत्वं वा देहि मे चतुरानन।।१९।।

त्रिवर्गेऽसंशयं सिद्धे काव्यनाट्योपसेवनैः।
तिष्ठत्येव स्वयंसिद्धस्तुर्यो विरहकातरः।।२०।।

अचिन्त्य के भी चिन्तन में समर्थ, अदृष्ट को भी (हस्तामलकवत्) प्रत्यक्ष कर देने में सक्षम कवि (समूचे) ब्रह्माण्ड को हाथ पर रखे आँवले की तरह देख लेता है।।१६।।

काव्यरूपी एकमात्र निधि (खजाने) वाला निरंकुश कवि, आत्माराम भाव से जीवन जीता हुआ गुह्यकेश कुबेर को भी पूर्णतः न्यक्कृत कर देता है।।१७।।

प्रतिभा-प्रसूत कवित्व के अक्षत रहते राजपद भी भला किस मूल्य का? जिसकी सरस्वती सिद्ध है वह (कवि) भला कमला (लक्ष्मी) की ओर क्यों देखे?१८।।

धन से क्या लेना-देना? अलंकारों तथा लम्बी आयु से भी भला क्या लाभ? हे चतुरानन विधाता! मुझे तो बस कवित्व अथवा भावुकता ही देना!!१९!!

काव्य एवं नाट्य के उपसेवन से धर्म-अर्थ-कामरूपी त्रिवर्ग के निस्सन्देह सिद्ध हो जाने पर चौथा पुरुषार्थ मोक्ष तो, अपने तीन सहचरों के वियोग से कातर होकर, अपने आप (निष्प्रयत्न) ही सिद्ध हो जाता है।।२०।।

वाजपेयमखैश्चापि भूरिदानसमन्वितैः।
लभ्यं नैव यशोऽक्षय्यं तथा कवितया यथा।।२१।।

बान्धवौ ननु शब्दार्थौ कविता प्राणवल्लभा।
रसो मुक्तिसुखं हन्त किमन्यदिह काङ्क्षितम्??२२।।

प्रभूत दान से समन्वित 'वाजपेय' यज्ञों के सम्पादन से भी वह अक्षय यश नहीं प्राप्त होने योग्य है जिस प्रकार कि कविकर्म द्वारा।।२१।।

कविता ही जिसकी प्राणवल्लभा हो, शब्द एवं अर्थ (समूह) ही जिसके बन्धु-बान्धव हों, रस ही जिसका मुक्तिसुख हो उस (कवि) के लिये भला और कोई वस्तु काम्य क्या होगी?२२।।

द्विविधं तावज्जगद्रूपं पाञ्चभौतिकं वाङ्मयञ्च। पाञ्चभौतिकं पृथ्व्याकाशाग्नि-वायुजलनिर्मितं जगद्रूपं यथा सृष्ट्युपक्रमे निर्मीयते तथैव प्रलीयतेऽपि युगान्तवेलायाम्। किञ्च, क्षणभङ्गुरैव भौतिकी सृष्टिरिति शून्यवादिनस्ताथागताः। परन्तु क्षणभङ्गुरे सत्यपि सृष्टिस्थूलरूपेऽवशिष्यते तद्विज्ञानमिति विज्ञानवादिनः।

शब्दार्थसमष्टिसंवलितं साहित्यमेव तद् विज्ञानमूलम्। वाङ्मयं साहित्यमित्युभेऽपि पर्यायभूते। यथा शब्दार्थयोः सहितयोर्भावः साहित्यं तथैव शब्दार्थसंवलनाया वाचः प्राचुर्यं वाङ्मयमिति सुखं वक्तुं शक्यते। यथाह महामाहेश्वरोऽभिनवगुप्तपादाचार्योऽधिलोचनम्-वक्तीति वाक्शब्दः। उच्यत इति वागर्थः। उच्यतेऽनयेति वागभिधाव्यापारः। इति।

संसार का यह स्वरूप दो प्रकार का है-पाञ्चभौतिक अर्थात् क्षिति जल पावक गगन एवं समीर से निर्मित उसका स्थूल रूप जो स्थावर-जंगम के रूप में दृष्टिगोचर हो रहा है, और दूसरा रूप है वाङ्मय अर्थात् शब्दार्थसमष्टिभूत साहित्य में उपनिबद्ध। पाञ्चभौतिक अर्थात् पृथ्वी आदि पञ्चमहाभूतों से निर्मित जगत् का रूप तो सृष्टि के प्रारंभ में जैसे निर्मित होता है, युगान्त वेला में उसी प्रकार प्रलीन (विनष्ट) भी हो जाता है। जैसा कि शून्यवादी बौद्ध दार्शनिकों ने भी कहा है कि भौतिकी सृष्टि क्षणभंगुर ही है। परन्तु सृष्टि के स्थूलरूप के क्षणभंगुर होते हुए भी उसका 'विज्ञान' शेष रह जाता है, ऐसा विज्ञानवादी (बौद्ध) दार्शनिक कहते हैं।

शब्द एवं अर्थ की समष्टि से युक्त साहित्य ही उस विज्ञान का आधार है। वाङ्मय एवं साहित्य-ये दोनों शब्द पर्यायभूत हैं। जैसे परस्पर सम्पृक्त शब्द एवं अर्थ का भाव ही '**साहित्य**' है उसी प्रकार शब्दार्थ की संवलना से युक्त वाणी का प्राचुर्य ही '**वाङ्मय**' है, ऐसा सरलतापूर्वक कहा जा सकता है।

अपनी (ध्वन्यालोक की) लोचन नाम्नी टीका में महामाहेश्वर आचार्य अभिनवगुप्तपाद ने भी कहा है-जो (अभिप्राय को) व्यक्त करता है वह शब्द ही वाक् है। जो अर्थ प्रकट किया जाता है (शब्द द्वारा) वह अर्थ भी वाक् है और जिस (शब्दशक्ति) के द्वारा शब्द अर्थ को प्रकट करता है वह अभिधाव्यापार भी वाक् ही है।

किञ्च वाङ्मयं जगच्चिरस्थायि विकस्वरञ्चेति यदुच्यते तदपि सत्यं जगतो ब्रह्मरूपत्वात्। यथाऽह भगवान् भर्तृहरिः,

ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृतं सर्वमात्राभ्यस्तास्वेव प्रविलीयते।।

अपराश्चापि काश्चन भर्तृहरि-कारिकाः शब्दब्रह्माद्वैतसिद्धान्तमिममव-गमयितुं प्रस्तूयन्ते-

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।
एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।
अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनेव वर्तते।।
अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षट् भावभेदस्य योनयः।।
एकस्य सर्वबीजस्य यस्य चेयमनेकधा।
भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः।।
शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममिदं विश्व व्यवर्तत।।

शब्दसंस्कारः एव परमात्मसिद्धिरिति वाक्यपदीयकारः। शब्द-संस्कारवानेव ब्रह्मामृतमश्नुते। यथोक्तम्-

तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।
तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते।।

लोकोत्तरवचःप्रकर्षैः कविः प्रसह्य सम्मोहयतेऽखिलं जगत्। यथाऽह शिवलीलार्णवकारो नीलकण्ठदीक्षितः-

पुनश्च, वाङ्मय के रूप में अवस्थित जो संसार चिरस्थायी एवं नित्यप्रकाशमान बताया जाता है वह भी सत्य ही है, संसार के ब्रह्ममय होने के कारण। जैसा कि (वाक्यपदीयकार) भगवान् भर्तृहरि ने कहा है-

शब्दनिर्मित स्वरूप तथा शब्द-शक्तियों का निबन्धन करने वाला यह परब्रह्म ही समूचे (नामरूपात्मक) जगत् के रूप में विवृत है और (अन्ततः) उसी में विलीन भी हो जाता है।

इस **शब्दब्रह्माद्वैत** सिद्धान्त को समझाने के लिये भर्तृहरि की कुछ और कारिकायें प्रस्तुत की जा रही हैं-

आदि एवं अन्त से विरहित, कभी भी विनष्ट न होने वाला ब्रह्मस्वरूप जो शब्द तत्त्व है उसी से अर्थस्वरूप जगत् का सारा विस्तार प्रकट होता है।

एक होता हुआ भी जो (विभिन्न) शक्तियों का आश्रय लेने के कारण 'भिन्न' प्रकाशित होता है, वह अपृथक्ता से संवलित होते हुए भी अपनी शक्तियों के माध्यम से पृथक्ता से सम्पृक्त सा दीखता है।

अध्याहित कला वाली जिसकी कालशक्ति का आश्रय प्राप्त कर जन्मादि छह विकार, मात्र भावभेद की योनिमात्र सिद्ध होते हैं।

वह शब्दब्रह्म एक ही है, सर्वबीज-स्वरूप है। परन्तु भोक्ता, भोक्तव्य तथा भोग के रूप में उस एक (अद्वैत) तत्त्व की ही अनेक रूप स्थितियाँ दीखती हैं।

आम्नायविद् आचार्यगण बताते हैं कि यह समूची सृष्टि उस शब्द (ब्रह्म) का ही परिणाम है। छन्दों से ही यह विश्व सर्वप्रथम प्रकट हुआ।

शब्द-संस्कार ही परमात्मतत्त्व की सिद्धि है-ऐसा वाक्यपदीयकार का कहना है। शब्दसंस्कारवान् व्यक्ति ही ब्रह्मामृत को प्राप्त कर पाता है। जैसा कि कहा गया है-इसलिये, जो शब्द-संस्कार है वही परमात्मतत्त्व की सिद्धि है। जो उस प्रवृत्तितत्त्व का ज्ञाता है वही उस ब्रह्मामृत को प्राप्त कर पाता है।

अपने लोकोत्तर वचः प्रकर्ष से कवि अनायास ही सारे जगत् को सम्मोहित कर लेता है। जैसा कि शिवलीलार्णव महाकाव्य के लेखक नीलकण्ठ दीक्षित ने कहा है-

यानेव शब्दान्वयमालपामो यानेव चार्थान्वयमुल्लिखामः।
तैरेव विन्यासविदग्धरीत्या सम्मोहयन्ते कवयो जगन्ति।।

त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गः। तस्य सिद्धिः काव्यादेव। तथा चाऽग्निपुराणम्-त्रिवर्गसाधनं नाट्यमिति। नाट्यमित्युपलक्षणं काव्यस्यापि। तत उक्तं ग्रन्थकृता त्रिवर्गेऽसंशयं सिद्धे काव्यनाट्योपसेवनैरिति। चतुर्थो

मोक्षपुरुषार्थः स्वयंसिद्धः प्रतिभाति। स्वसहचरभूतानां धर्मार्थकामानां विरहमसहमान इवेत्युत्प्रेक्ष्यते। लोक एवाऽत्र प्रमाणम्। नियतसहचराणां कश्चिदेकोऽपरेषां विरहं पार्थक्यं वा न सहते।

किञ्च, कवितयाऽक्षय्यं यशोऽवाप्तुं शक्यते। नामशेषतामुपगताः कियन्त एव चक्रवर्तिशास्तारः। परन्तु नित्यजीविता वाल्मीकिव्यासकालिदासादयः। यथाऽह भर्तृहरिः,

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः।
नास्ति येषां यशः काये जरामरणजं भयम्।।

यथा वाऽनन्तदेवानां मन्तव्यमिदम्,
याता यान्ति च यातारो लोकाः शोकाधिका भुवि।
काव्यसम्बन्धिनी कीर्तिः स्थायिनी निरपायिनी।।

जिन किन्हीं शब्दों को (हम) बोलते हैं तथा जिन किन्हीं अभिप्रायों का हम अपनी कविता में उल्लेख करते हैं उन्हीं (शब्दार्थों) के द्वारा हम कविगण, मात्र अभिव्यक्ति की चातुर्यपूर्णरीति के बल पर, सारे जगत् को सम्मोहित कर लेते हैं।

धर्म, अर्थ एवं काम इन तीनों का समवाय ही त्रिवर्ग कहा जाता है। उस त्रिवर्ग की सिद्धि काव्य से ही संभव है। जैसा कि अग्निपुराण में कहा गया है–नाट्य त्रिवर्ग (प्राप्ति) का साधनभूत है। यहाँ 'नाट्य' शब्द काव्य का भी उपलक्षण है, यह तथ्य भी अग्निपुराणकार ने ही बतायाहै–त्रिवर्ग के निस्सन्देह सिद्ध हो जाने पर। कैसे? काव्य एवं नाट्य के उपसेवन से। चौथा जो मोक्ष पुरुषार्थ है, वह अपने आप सिद्ध हुआ सा परिलक्षित होता है। अपने (नित्य) सहचरभूत धर्म, अर्थ तथाकाम के विरह (अलगाव) को न सह पाने के कारण। यह ग्रंथकार के द्वारा उत्प्रेक्षित किया जा रहा है। (कोई भी व्यक्ति अपने नित्य सहचरों से अलग कैसे रह सकता है? अतः काव्यनाट्य के सेवन से यदि धर्म, अर्थ एवं काम सिद्ध हो रहे हैं तो मोक्ष को भी सिद्ध हुआ ही मानिये, मित्रप्रीति के कारण)

इस विषय में लोक ही प्रमाण है। जिनमें नियत साहचर्य है उनमें कोई एक अन्यों का वियोग अथवा अलगाव नहीं ही सहता है।

पुनश्च, कविता द्वारा (ही) अक्षय्य कीर्ति प्राप्त की जा सकती है। कितने ही चक्रवर्ती महीपगण नामशेषता को प्राप्त हो गये। परन्तु वाल्मीकि, व्यास एवं कालिदासादि निरन्तर जीवित हैं। जैसा कि भर्तृहरि ने कहा है–

नित्य विजयशील हैं वे पुण्यवान् रससिद्ध श्रेष्ठ कविगण जिनके यशोविग्रह में वार्द्धक्य एवं मृत्यु से उत्पन्न होने वाले भय संलग्न नहीं हैं।

अथवा जैसा कि **अनन्तदेव** का यह मन्तव्य-

इस धराधाम में, शोक ही जिनके जीवन में अधिक रहा, ऐसे लोग चले गये, चले जा रहे हैं और (आगे भी) चले जायेंगे। परन्तु कभी भी दूर न होने वाली (कवियों की) काव्य सम्बन्धिनी कीर्ति सदैव स्थिर रहेगी।

।।काव्यप्रयोजनप्रकरणम्।।

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति प्राग्वदुक्तिदिशा काव्यप्रणयनेऽपि भवितव्यमेव केनचित्प्रयोजनेन। तत्रादौ पूर्वसूरीणां स्थापना अवलोक्यन्ते। तत्राप्यादौ नाट्यकाव्यैक्यपक्षधरस्याचार्यभरतस्य मतमुपस्थाप्यते। नाट्यशास्त्रस्य प्रथमाध्याय एव भणत्याचार्यः-

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति।।

धर्मार्थकाममोक्षाणामवाप्तिः कलावैचक्षण्यं कीर्तिः प्रीतिश्चैतानि काव्यप्रयोजनानीति भामहाचार्यः-

धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधु काव्यनिबन्धनम्।।

प्रीतिकीर्तिमात्रमङ्गीकरोति वामनः काव्यप्रयोजनत्वेन। तद्यथा-काव्यं सद्दृष्टार्थं प्रीतिकीर्तिहेतुत्वात् इति। एतदेव समर्थयते मालवेश्वरो भोजः। यथाऽहासौ सरस्वतीकण्ठाभरणे-

निर्दोषं गुणवत्काव्यमलङ्कारैरलङ् कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति।।

धर्मादिसाधनोपायो व्यवहारपरिस्पन्दसौन्दर्यमन्तश्चमत्कारश्चेति त्रयं कुन्तकाभिमतं काव्यप्रयोजनं परिलक्ष्यते। तद्यथा-

धर्मादिसाधनोपायः सुकुमारक्रमोदितः।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः।।

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते।।

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते।।

विना प्रयोजन को सामने रखे मन्द व्यक्ति भी अग्रेसर नहीं होता, इस प्राचीन उक्ति के अनुसार काव्य-रचना में भी कोई न कोई प्रयोजन तो होना (ही) चाहिये। इस सन्दर्भ में सर्वप्रथम, पूर्वाचार्यों की स्थापनाओं (मान्यताओं) को देखते हैं। उनमें भी सर्वप्रथम काव्य एवं नाट्य की एकता के पक्षधर आचार्य भरत का मत उपस्थित किया जा रहा है। नाट्यशास्त्र के प्रथम अध्याय में ही आचार्य कहते हैं-

यह नाट्य धर्मवर्धक, कीर्तिवर्धक, आयुष्यवर्धक, कल्याणकारी, बुद्धिविवर्धक तथा लोक को उपदेशकारक (मार्गदर्शक) होगा।

धर्म, अर्थ, काम एवं मोक्ष की प्राप्ति, चतुष्षष्टि कलाओं में पारंगतता, कीर्ति एवं लोकानुराग ही काव्य के प्रयोजन हैं ऐसा भामहाचार्य कहते हैं-

उत्कृष्ट कोटि की काव्यरचना (रचनाकार को) प्रदान करती है-लोकयश, लोकानुराग, कलाओं में विचक्षणता तथा पुरुषार्थ-चतुष्टय की सिद्धि!

आचार्य वामन काव्य-प्रयोजन के रूप में मात्र प्रीति एवं कीर्ति को स्वीकार करते हैं-सहृदयों द्वारा अनुशीलित अर्थ वाला होता है काव्य, प्रीति एवं कीर्तिरूप प्रयोजनों से युक्त होने के कारण।

मालवेश्वर भोजदेव भी इसी का समर्थन करते हैं। जैसा कि उन्होंने सरस्वतीकण्ठाभरण में कहा है-दोषों से रहित, माधुर्यादि गुणों से युक्त, अलंकारों से अलंकृत तथा रसों से समन्वित काव्य का प्रणयन करने वाला कवि कीर्ति एवं प्रीति (पाठकों का प्रेम) प्राप्त करता है।

धर्मादि पुरुषार्थों का साधनभूत उपाय, व्यवहार-निर्वाह की प्रशस्त रीति (का ज्ञान) तथा आन्तराह्लाद-यही तीन काव्यप्रयोजन आचार्य कुन्तक को भी अभीष्ट प्रतीत होते हैं-

सुकुमार पद्धति से अभिव्यक्त तथा धर्मादि पुरुषार्थों (की प्राप्ति) का साधनोपायभूत काव्यबन्ध अभिजातों (परिष्कृत अभिरुचि सम्पन्न जनों) का हृदयाह्लादकारक होता है।

श्रेष्ठकाव्य के परिशीलन से ही अभिनव औचित्य वाली वह आचरण पद्धति की प्रशस्तता प्राप्त हो जाती है जो हम औरों के साथ सम्पन्न करते हैं।

पुरुषार्थ-चतुष्टय में पारंगत जनो का जो चतुर्वर्ग का फलस्वाद है उसको भी अतिक्रान्त कर काव्यामृतरस द्वारा (एक विलक्षण) अन्तश्चमत्कार प्रदान किया जाता है।

वाग्भटस्तु प्राचां काव्यप्रयोजनषट्कं वर्णयन्नपि कीर्तीतराणि पञ्च साधनान्तरैः प्राप्तव्यानि मन्वानः कीर्तिमात्रैकप्रयोजने काव्ये श्रद्दधाति। स आह-वयं तु कीर्तिमेवैकां काव्यहेतुतया मन्यामह इति। चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि काव्यादेवेति साहित्यदर्पणकारः। तत्र कीर्तिपरमाह्लाद-गुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्येति प्रतिपादयन् पण्डित-राजोऽपि कीर्त्याह्लादानुकम्पात्रितयमेव काव्यप्रयोजनभूतं मनुते।

काव्यप्रकाशकारो मम्मटस्तु नाट्यशास्त्रोदितमेव काव्यप्रयोजनजातं सपरिष्कारं प्रस्तौति-

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परिनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।

अत्रोच्यते। कामं केषाञ्चित्कवीनां काव्यरचनयाऽर्थप्राप्तिस्सम्भवेत् न पुनस्सर्वेषाम्। न सर्वे कवयः प्रागधुना वा राजाश्रयिणः। अथ च धनप्राप्तिनिमित्तमेव काव्यं प्रणयतः कवेः क्व स्वाभिमानः क्व चाऽप्यलालाटिकत्वम्? दिल्लीश्वरो वा जगदीश्वरो वेत्युक्त्या दिल्लीश्वरं निजाश्रयदातारं शाहजहानं महामहिमशालिना जगदीश्वरेण सार्धं समीकुर्वन् पण्डितराजोऽपि च्युतगौरव एव परिलक्ष्यते। प्रकृत्यैव निरीहः कविः। निरीहाणामीशस्तृणमिव तिरस्कारविषय इत्यपि श्रुतमस्माभिः। मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः? आत्मारामतया जीवतां कवितल्लजानां क्वाऽपरितोषः?

आचार्य वाग्भट, प्राचीन आचार्यों को अभिमत छह काव्य प्रयोजनों को वर्णित करते हुए भी, उनमें से पाँच को साधनान्तर से प्राप्त होने योग्य मानते हुए, कीर्तिमात्र प्रयोजन वाले काव्य के प्रति श्रद्धा व्यक्त करते हैं। वह कहते हैं-हम तो एकमात्र कीर्ति को ही काव्य-प्रयोजन के रूप में स्वीकार करते हैं।

साहित्यदर्पणकार आचार्य विश्वनाथ कहते हैं-अल्पबुद्धि वालों को भी सरलतापूर्वक चतुर्वर्ग की फलप्राप्ति काव्य से ही होनी संभव है।

'कीर्ति, परमाह्लाद तथा गुरु, राजा एवं देवता का अनुग्रह आदि अनेक

प्रयोजन वाला होता है काव्य'-ऐसा प्रतिपादित करने वाले पण्डितराज जगन्नाथ भी कीर्ति, परमानन्द एवं त्रिविध अनुकम्पा को काव्य-प्रयोजन मानते हैं।

काव्यप्रकाशकार आचार्य मम्मट तो नाट्यशास्त्रकार द्वारा बताये गये काव्य-प्रयोजनों को ही (थोड़े) परिष्कार के साथ स्वीकार करते हैं-

काव्य होता है यश के लिये, अर्थप्राप्ति के लिये, व्यवहारज्ञान के लिये, शिवेतर (अमंगल) के विनाश के लिये, तात्कालिक आनन्दानुभूति के लिये तथा कान्तासम्मित उपदेश के लिये!

अब अपना मन्तव्य प्रस्तुत है। भले ही कुछ कवियों को काव्यरचना से अर्थप्राप्ति होनी संभव हो, परन्तु सबको नहीं होती। न पूर्व में ही सभी कवि राजाश्रयी होते थे, न आज ही राजाश्रयी हैं। और फिर, धनप्राप्ति मात्र के लिये काव्य-प्रणयन करने वाले कवि का स्वाभिमान कहाँ रहा औरकहाँ रही उसकी निरीहता? मेरे लिये तो दिल्लीश्वर हैं या फिर जगदीश्वर' इस उक्ति के द्वारा अपने आश्रयदाता दिल्लीश्वर शहंशाह शाहजहाँ की महामहिमशाली जगदीश्वर के साथ तुलना करते हुए पण्डितराज जगन्नाथ भी गौरवच्युत ही परिलक्षित होते हैं। कवि तो स्वभावतः निरीह (निराकांक्ष, निर्लोभ) होता है। ऐसे निरीहों के लिये तो राजे-महराजे भी तिनके के समान तिरस्कार के विषय हुआ करते हैं-यह भी हमने सुन रखा है। और, मन के परितुष्ट रहने पर भला कौन धनी है और कौन दरिद्र? आत्माराम जीवन जीने वाले श्रेष्ठ कवियों के जीवन में असन्तोष कहाँ?

शिवेतरक्षतिप्रसङ्गोऽपि क्वाचित्कः कादाचित्कश्च। देवाराधनपराणां स्तोत्रादीनां रचनया शिवेतरक्षतिः केषाञ्चित्कवीनामजायतेति स्वीकृतेऽपि तस्याः काव्यप्रयोजनौचित्यं सङ्कीर्णमेव परिलक्ष्यते। न च महाकाव्यखण्ड-काव्यचम्पू-दशरूपकादीनि सर्वाणि देवताराधनपराणि। प्रहसनं तु बण्डभण्डेतिवृत्तप्रधानम्। भाणोऽपि वेशवाटवर्णने पर्यवसितः। दामोदरगुप्तप्रणीते कुट्टनीमते कुट्टन्या एव चरितम्। क्षेमेन्द्रप्रणीते कला-विलासे स्वयुगीनसमाजस्य दुष्प्रवृत्तय एव वर्णिताः। एवं हि सहस्त्रधारता-मुपगते काव्यवर्ण्यविषये स्तोत्रमात्रसाध्या शिवेतरक्षतिः कथं काव्य-प्रयोजनीभवितुं शक्नोति?

काव्यपरिशीलनेन सद्यः परिनिर्वृतिरपि पाठकस्य श्रोतुर्वा सहृदय-तामपेक्षते। असहृदयः काव्यार्थावगमेऽशक्तो नातिपरिपुष्टविद्यासंस्कारश्च

कथं काव्यश्रवणसमकालमेव परिनिर्वृतिमुपगच्छेत्? विशेषतः प्रतीयमानार्थप्रधाने काव्ये नैतत्सम्भवति। यथा वा भणति धनददेवः-

कवयः परितुष्यन्ति नेतरे कविसूक्तिभिः।
नह्यकूपारवत्कूपा वर्धन्ते विधुकान्तिभिः।।

यथा वा शार्ङ्गधरपद्धतावुद्धृतं महाकविबाणभट्टपद्यम्-

मुखमात्रेण काव्यस्य करोत्यहृदयो जनः।
छायामच्छामपि श्यामां राहुस्तारापतेरिव।।

शिवेतर-क्षति का सन्दर्भ भी स्थानविशेष एवं समयविशेष में सीमित है। यदि यह मान भी लिया जाय कि देवाराधना से युक्त स्तोत्रादिकों की रचना से कुछेक कवियों का अमंगल टल गया तो भी उसका काव्यप्रयोजनौचित्य संकीर्ण ही प्रतीत होता है। महाकाव्य, खण्डकाव्य, चम्पू, दशरूपकादि सबके सब तो देवाराधनपरक हैं नहीं। प्रहसन तो बण्ड-भण्ड प्रधान (लुच्चे-लफंगों की प्रचुरता वाला) ही होता है। भाणकृतियाँ भी वेशवाट के वर्णन में ही पर्यवसित हैं। दामोदरगुप्त-प्रणीत **कुट्टनीमतम्** में तो कुट्टनी का ही चरित उपनिबद्ध है। क्षेमेन्द्रप्रणीत **कलाविलास** में स्वयुगीन (काश्मीरक) समाज की दुष्प्रवृत्तियाँ ही वर्णित हैं।

इस प्रकार, काव्यों का वर्ण्य-विषय (प्रतिपाद्य) हजारों धाराओं में विभक्त होने के कारण, स्तोत्रमात्र से साध्य शिवेतरक्षति को काव्य-प्रयोजन कैसे माना जा सकता है?

काव्य के परिशीलन (पारायण) से तात्कालिक आनन्द की अनुभूति भी पाठक अथवा श्रोता की सहृदयता की अपेक्षा करती है। जो अ-सहृदय है, काव्यार्थ को हृदयंगम कर पाने में अशक्त है, अत्यधिक परिपुष्ट विद्या-संस्कार वाला नहीं है, वह भला कैसे काव्य को सुनते ही सुनते आह्लादित हो उठेगा? विशेष कर, व्यङ्ग्यार्थ-प्रधान काव्य में तो यह संभव ही नहीं। जैसा कि **धनददेव** ने कहा है-

कवियों के सुभाषितों से (सहृदय) कवि ही परितुष्ट हो जाते हैं, और लोग नहीं। चन्द्रकिरणों के दर्शनमात्र से समुद्र की तरह कुएँ में उफान नहीं आ जाता।

अथवा जैसा कि शार्ङ्गधरपद्धति में महाकवि बाणभट्ट का यह पद्य उदाहृत किया गया है-असहृदय व्यक्ति मुख मात्र से काव्य पढ़ता है। परन्तु उस

काव्यार्थ की उसे समझ थोड़े न होती है! तारापति चन्द्रमा की निर्मल कान्ति को भी राहु कलंकित ही करता है। (मुँह लगा कर)

व्यवहारज्ञानं यद्युच्यते काव्यप्रयोजनं न तत्र कस्यापि वैमत्यम्। परन्तु काव्यानुशीलनेन व्यवहारज्ञानं कस्य जायते? प्रणेतुः कवेः पाठकस्य श्रोतुर्वा? न चन्द्रस्तथा चन्द्रिकासौख्यमनुभवति यथा लोकः। न प्रदीपः स्वयमेव प्रभयोपक्रियते। अनेन एतदुक्तं भवति यत्काव्येन व्यवहारज्ञानं पाठकस्यैव जायते न काव्यकारस्य। काव्यकारोऽपि पाठकीभूयैव व्यवहारज्ञानमवाप्तुं शक्नोतीति मन्मतम्। एवं सति, काव्यप्रणयने व्यवहारज्ञानस्यापि प्रयोजनत्वं सन्दिग्धमेव प्रतीयते।

यदुक्तमाचार्यमम्मटेन कान्तासम्मिततयोपदेशयुज इति तदप्यपेक्षा-बुद्ध्यैवेति मन्ये। वेदशास्त्रनीतिशास्त्रयोः प्रभुमित्रसम्मितोपदेशपरायण-योरपेक्षया कामं काव्यं कान्तासम्मितमुपदेशं दद्यात् परन्तु काव्यं सदपि रावणवधमहाकाव्यं भट्टिप्रणीतं प्रभुसम्मितपद्धत्यैव व्याकरणमनुशास्ति। राघवपाण्डवीये कविराजप्रणीते राघवनैषधीये हरदत्तसूरिप्रणीते राघव-पाण्डवनैषधीये चिदम्बरसुमतिप्रणीते किञ्च, मेघविजयोपाध्यायप्रणीते सप्तसन्धानमहाकाव्ये श्लेषप्रयोगग्रहिले क्व नु कान्तासम्मितोपदेशत्वम्?

एवं हि, यश एवैकं स्थिरमनवद्यञ्च प्रयोजनं परिलक्ष्यते काव्य-रचनायाः। यदाह वाग्भटः वयं तु कीर्तिमेवैकां काव्यहेतुतया मन्यामह इति तदेव ममाऽप्यभीष्टमिति वक्तुमुत्सहे। सततं कीर्तयन्तो मामिति श्रीमद्भगवद्गीतायां समुपदिशतो भगवतोऽपि यशस्येव पक्षपातः परिलक्ष्यते। मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद इत्यसौ स्वयमेवाऽपरत्र समुद्घोषयति।

यदि व्यवहारज्ञान को काव्य का प्रयोजन बताते हैं तो उसमें किसी की विमति नहीं। परन्तु काव्य के अनुशीलन से किसे व्यवहारज्ञान होता है? प्रणेता कवि को, पाठक को अथवा श्रोता को? चन्द्रमा स्वयं उस प्रकार चाँदनी के सुख का अनुभव नहीं करता जिस प्रकार कि लोक! दीपक स्वयं अपनी प्रभा से उपकृत नहीं होता है। (उपकृत तो होता है लोक जिसे वह प्रकाश देता है) इसका यही अभिप्राय निकला कि काव्यानुशीलन से व्यवहार-ज्ञान पाठकों को ही होता है न कि (स्वयं) काव्यकार को।

काव्यकार (कवि) को भी यदि व्यवहार-ज्ञान होना संभव है तो (अपने

ही) काव्य का पाठक बन कर ही-यह मेरा अपना मन्तव्य है। ऐसी स्थिति में, व्यवहार-ज्ञान का भी काव्य-प्रयोजनत्व सन्दिग्ध ही प्रतीत होता है।

और जो आचार्य मम्मट ने कहा कि कान्तासम्मित उपदेश की शिक्षा देना काव्य का प्रयोजन है तो मैं मानता हूँ कि वह भी अपेक्षा-बुद्धि से ही कहा गया है। प्रभुसम्मित तथा मित्रसम्मित शैली में उपदेश देने वाले वेदशास्त्र एवं नीतिशास्त्र की तुलना में भले ही काव्य कान्तासम्मित शैली में उपदेश देता हो परन्तु काव्य होते हुए भी, भट्टि-प्रणीत रावणवध महाकाव्य प्रभुसम्मित पद्धति से ही व्याकरण सिखाता है। कविराज-प्रणीत राघवपाण्डवीय में, हरदत्तसूरि-प्रणीत राघवनैषधीय में, चिदम्बर सुमति-प्रणीत राघवपाण्डवनैषधीय में, पुनश्च मेधविजयोपाध्याय-प्रणीत सप्तसन्धान महाकाव्य में, जो कि श्लेषालंकारप्रयोग-ग्रहिल है, भला कान्तासम्मित शैली के उपदेश का अवकाश कहाँ?

इस प्रकार, एकमात्र यश ही स्थायी तथा अनवद्य (असंकीर्ण) प्रयोजन परिलक्षित होता है काव्य-रचना का जैसा कि आचार्य वाग्भट ने कहा कि हम तो एकमात्र कीर्ति को ही काव्यप्रयोजनतया स्वीकार करते हैं, वही मेरा भी अभीष्ट मन्तव्य है, ऐसा मैं कहना चाहता हूँ।

निरन्तर मेरा कीर्तन करते हुए (जो भक्त मेरी उपासना करते हैं आदि) इस प्रकार श्रीमद्भगवद्गीता में समुपदेश देते हुए भगवान् कृष्ण का भी 'कीर्ति' के ही प्रति पक्षपात प्रकट होता है।

मेरे भक्त जहाँ मेरा गुणगान करते हैं, नारद! मैं वहीं रहता हूँ, ऐसा वह स्वयं उद्घोषित करते हैं एक दूसरे सन्दर्भ में।

किञ्च, परमार्थतस्तु यशोऽपि काव्यप्रयोजनत्वेनाङ्गीकर्तुं न युज्यते। एवंवादिनो न मे पूर्वपरम्पराविरोधे काऽप्यासक्तिर्मन्तव्या। सत्यप्रतिष्ठापने नाऽस्माभिर्गताऽनुगतिकैर्भाव्यम्। अन्यथाऽवरुद्धपरीवाहपल्वलकल्पं नित्यचिन्तनं शास्त्रं नामशेषतामुपयास्यति। तदयुक्तमित्याचार्याः सनातन-महाभागा नाट्यानुशासने-

मुनीनां भारतीयानां सम्मतो लोकसंग्रहः।
स्फीतो बुद्धिगुणस्तेषां काऽत्र ग्राह्यस्य वर्णना।।

नाऽस्माकं भारतीयानां चेतना म्रियते क्वचित्।
सा सदा वर्तमानस्य स्वागतादेव जीवति।।

मक्षिका मक्षिकास्थाने निवेशयितुमिष्यते।
केन वा तत्त्वविज्ञाननिविष्टमति चक्षुषा??

केन वा मूलविच्छेदोऽप्यादृियेत सुमेधसा।
स्वालक्षण्यं विना का नु प्रतिष्ठा शिल्पवेधसाम्।।

तस्मात् परम्परा सर्वैः पालनीया मनीषिभिः।
नवीनतमसामग्री-संग्रहे दर्शितादरैः।।

भूयस्स एवाह स्वोपज्ञे भरतदर्शने-

अतीतमात्रे सश्रद्धास्तिष्ठन्त्वत्र तु ते जनाः।
येषां सपिण्डनं नास्ति सत्त्वं येभ्यः शवेष्वपि।।

सन्ततिं तु वयं नूत्नप्रत्नाद्वैतप्रवाहिणीम्।
समाद्रियामहे काण्डच्छदद्रुमनयादृताः।।

पुनश्च, पारमार्थिक रूप से यश अथवा कीर्ति को भी काव्य-प्रयोजन के रूप में स्वीकारना उचित नहीं प्रतीत होता। जब मैं ऐसा कह रहा हूँ तो पूर्वपरम्परा के विरोध में मेरी कोई आसक्ति नही मानी जानी चाहिये। वस्तुतः सत्य की प्रतिष्ठापना में हमें गताऽनुगतिक (परम्परावादी) नहीं होना चाहिये। अन्यथा अवरुद्ध जलप्रवाह वाली बावड़ी की तरह शास्त्र भी, जिसमें नित्यचिन्तन (प्रवाह) होना चाहिये, विनष्ट ही हो जायेगा। ऐसा होना उचित नहीं है, जैसा कि आचार्य सनातन महोदय अपने नाट्यानुशासन में कहते हैं-

भारतीय मुनियों (विचारकों) के लिये लोकसंग्रह सम्मत विषय रहा है। उनकी बुद्धि में संकीर्णता नहीं। उनके लिये 'ग्राह्य' के प्रति वर्जना का भाव कैसा?

हम भारतीयों की चेतना कभी मरती नहीं है। वह 'वर्तमान' के स्वागत-अभिनन्दन से ही सदैव जीवित रही है।

तत्त्वविज्ञान में डूबी बुद्धिरूपी दृष्टि वाला भला कौन ऐसा (विद्वान्) होगा जो मक्खी के स्थान पर मक्खी रखना चाहेगा?

अथवा कौन ऐसा महामेधावी होगा जो मूल (परम्परा) के समुच्छेद का आदर करेगा? जो शिल्पवेधा हैं (कलापण्डित हैं) उनकी प्रतिष्ठा 'स्वालक्षण्य' के विना कहाँ?

इसलिये परम्परा का पालन तो समस्त मनीषियों को करना ही चाहिये। उन मनीषियों को जो नवीनतम सामग्री के संग्रह के प्रति आदर प्रदर्शित करते हैं।

स्वरचित ग्रन्थ **भरतदर्शन** में एक बार पुनः वह कहते हैं-

अतीत मात्र के प्रति वे लोग श्रद्धावान् बने रहें इस संसार में, जिनका सपिण्डन (वर्तमान पीढी से सम्बन्ध) संभव न हो, जिनके लिये शवों में भी सत्त्व विद्यमान रहता हो।

हम तो नूतन एवं पुरातन के अद्वैत-प्रवाह वाली परम्परा का समादर करते हैं-पर्ण, स्कन्ध एवं वृक्ष की सम्पृक्तता के प्रति आस्थावान् बन कर।

एवं हि, परम्पराऽनुपालनपरेणाऽपि मया स्वाभिप्रायोऽभिनवः प्रकाश्यते। तद्यथा-

न धनाय न पुण्याय व्यवहाराय नाऽपि वा।
न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः।।२३।।

वस्तुतस्तस्य कर्मैतत् संस्कारोत्थं स्वभावजम्।
यदकृत्वा क्षणं यावन्नासौ शमधिगच्छति।।२४।।

यथा नोत्पतितुं शक्तो भ्रमरो गुञ्जनादृते।
तथा कविरयं काव्यादृते शक्तो न जीवितुम्।।२५।।

काव्यमेतत्ततो मन्ये कविकर्म स्वभावजम्।
जन्मजन्मान्तराऽवाप्तदिव्यसंस्कारसत्फलम्।।२६।।

यन्निसर्गाद्बहिर्भूतं तद्भवेत्सप्रयोजनम्।
निसर्गे क्व पुनस्तस्य चर्चाऽनास्थाविवर्धिनी।।२७।।

पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।
परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते।।२८।।

न च काव्येतरत्कृत्यं किमप्येतादृशं भुवि।
यदत्र परलोके च यशश्शाश्वतमर्जयेत्।।२९।।

यच्च ध्वनिकारेणोक्तं सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यत्वलक्षणमिति तद्युक्तमेव। सहृदयानां हृदयाह्लाद एव काव्यप्रयोजनम्। परन्त्वसावाह्लादः सहृदयानां लोकोत्तराख्यानेन जायते, कवेराह्लादस्तु सहृदयसमज्योपायनीकृतयशोभिरेव, नान्यथा। यदि कीर्तिमात्रेण कवेराह्लादो नाभविष्यत्तर्हि सहृदयोत्थनिन्दामपि निपीय तेषामाह्लादप्रसङ्गः प्रसजेत्। तन्न। अत्र कौलीनोद्विग्नो महाकविभवभूतिरेव प्रमाणम्-

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।

उत्पत्स्यते हि मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी।।

तदयमत्र संक्षेपो यद् व्यवहारदृष्ट्या यश एव काव्यरचनाप्रयोजनभूतं तिष्ठति। परमार्थदृष्ट्या तु काव्यप्रणयनं कवेः स्वतः स्फूर्तं स्वाभाविक-कर्ममात्रम्। स्वाभाविकं कर्म न भवति कथमपि प्रयोजनसापेक्षम्।

इस प्रकार, परम्पराऽनुपालन के प्रति आस्थालु होते हुए भी मैं अपना अभिनव (व्यक्तिगत) अभिप्राय प्रस्तुत कर रहा हूँ। जैसा कि,

यह कवि न धन के लिये, न पुण्यलाभ के लिये, और न ही व्यवहारज्ञान के लिये, और न ही तात्कालिक आनन्द-प्राप्ति के लिये काव्य का प्रणयन करता है।।२३।।

वस्तुतः यह काव्यरचना उसका पूर्वजन्म के संस्कारों से प्रबुद्ध, स्वभावज कर्म है जिसे न सम्पन्न कर (जिससे विरत होकर) वह क्षण भर भी शान्ति का अनुभव नहीं कर सकता।।२४।।

जैसे विना गुञ्जन प्रकट किये भ्रमर उड़ पाने में समर्थ नहीं होता (वह गुनगुनाते हुए ही उड़ता है) उसी प्रकार यह कवि भी कविकर्म के विना जी नहीं सकता।।२५।।

इसलिये मैं इस काव्य को निसर्गजात कविकर्म मानता हूँ जो कि जन्म-जन्मान्तर से प्राप्त होने वाले दिव्य संस्कारों का श्रेष्ठ फल है।।२६।।

जो वस्तु (मनुष्य के) निसर्ग या स्वभाव से बहिर्भूत हो (नैसर्गिक या स्वाभाविक न हो) वह भले ही प्रयोजन से युक्त हो (अर्थात् अस्वाभाविक कार्य तो सप्रयोजन होगा ही) परन्तु स्वभावजन्य कार्य के सन्दर्भ में अनास्था बढ़ाने वाली उस प्रयोजन की कैसी चर्चा? (भूख, नींद, प्यास आदि नैसर्गिक हैं, इनका भला कोई प्रयोजन होता है?।।२७।।

परन्तु विद्वज्जन यदि काव्यरचना के सन्दर्भ में कोई प्रयोजन देखना ही चाहते हैं तो फिर (वह प्रयोजन) एकमात्र यश ही मुझे अभीष्ट प्रतीत होता है जो कि लोक एवं परलोक-दोनों में अभिप्रेत होता है।।२८।।

कविकर्म से इतर, कुछ भी ऐसा भूलोक में नहीं हैं जो कि इहलोक तथा परलोक में शाश्वत कीर्ति का अर्जन कर सके।।२९।।

और जो ध्वनिकार **आनन्दवर्धन** ने कहा–'सहृदयों के हृदयों का आह्लादन करने वाले शब्दों एवं अर्थों से समनुगत होना ही काव्यत्व का लक्षण है' वह ठीक ही कहा। सहृदयों का हृदयाह्लादन ही काव्य का प्रयोजन है। परन्तु सहृदयों का वह हृदयाह्लाद लोकोत्तर आख्यान (वर्णन) से ही संभव हो पाता है। कवि का आह्लाद तो सहृदयों (रसिकों) की गोष्ठी द्वारा की गई 'वाहवाही' (प्रशंसा अथवा कीर्ति) से ही होता है, अन्य किसी प्रकार से नहीं।

यदि कीर्तिमात्र (की प्राप्ति) से कवि को आह्लाद न होता तो सहृदयों द्वारा की गई निन्दाओं को भी सुनकर, उनको आह्लाद ही होता। परन्तु ऐसा नहीं है। इस सन्दर्भ में तो लोकनिन्दा से उद्विग्न महाकवि भवभूति ही प्रमाण हैं–

जो कुछेक लोग मेरे प्रति अवज्ञा (निन्दा) प्रकट कर रहे हैं, वे क्या कविता का अर्थ जानते भी हैं? मेरा प्रयत्न उनके प्रति नहीं है। अरे पैदा होगा कोई (मेरे काव्यमर्म को समझने वाला) मेरा समानधर्मा! क्योंकि निस्सीम है यह कालप्रवाह और बहुत विशाल है यह पृथ्वी!

तो फिर यही निष्कर्ष रहा कि व्यावहारिक दृष्टि से एकमात्र यश ही काव्यरचना का प्रयोजनभूत सिद्ध है। पारमार्थिक दृष्टि से तो काव्यरचना कवि का स्वतः प्रकट होने वाला, स्वाभाविक कर्ममात्र है और स्वाभाविक कार्य, किसी भी प्रकार, प्रयोजन-सापेक्ष नहीं होता।

यच्चाऽभिनवकाव्यालङ्कारसूत्रकृता राधावल्लभेनोक्तं मुक्तिस्तस्य प्रयोजनमिति (अभि० १।२।१) तत्कथं सम्भवतीति पृच्छामः। त्रिवर्गसाधनं नाट्यमिति प्रसिद्धम्। नाट्यमत्र काव्यस्याप्युपलक्षणम्। मोक्षसिद्धिस्तु काव्यनाट्याभ्यामानुषङ्गिक्येव न पुनस्साक्षाद्रीत्या। काव्यप्रयोजनैः सर्वैरपि सम्प्राप्तजीवनोपभोग्यैरेव भवितव्यम्। यशोऽर्थव्यवहारज्ञानशिवेतरक्षति-सद्यःपरिनिर्वृतिकान्तासम्मितोपदेशाख्यानि सर्वाण्यपि प्रयोजनानि इहजीवनोपभोग्यान्येव। किन्तु मुक्तिसौख्यं मरणानन्तरमेवोपभोक्तुं शक्यते। तत्कथं तस्याः काव्यप्रयोजनत्वं सम्भवतीति कोविदैश्चिन्त्यम्।

और जो अभिनवकाव्यालंकारसूत्रकार राधावल्लभ ने कहा–मुक्ति उस (काव्य) का प्रयोजन है, तो पूछता हूँ कि वह कैसे सम्भव है? नाट्य त्रिवर्ग (धर्म, अर्थ, काम) का साधन है, यह प्रसिद्ध है। यहाँ नाट्य काव्य का भी

उपलक्षण है। काव्य और नाट्य से मोक्ष की सिद्धि तो सीधे होती नहीं, परोक्षतः होती है। अतः समस्त काव्य-प्रयोजनों को, जो जीवन हमें प्राप्त है, उसी में भोगने योग्य होना चाहिये।

यश, अर्थप्राप्ति, व्यवहारज्ञान, अमंगलनाश, सद्यः आनन्दानुभूति तथा कान्तासम्मित उपदेश-ये सारे के सारे काव्य-प्रयोजन इस (अर्थात् हमें प्राप्त) जीवन में ही उपभोग्य हैं। किन्तु मुक्ति का सुख (तो) मृत्यु के बाद ही भोगा जा सकता है। तो फिर उस **मुक्ति** का **काव्यप्रयोजनत्व** कैसे सम्भव है? यह विद्वानो को सोचना चाहिये।

यच्चास्मदात्मीयप्रवरेण द्विवेदिना रहसविहारिणोत्प्रेक्षितम्-

असन्तं मार्गमुत्सृज्य सन्तं गमयितुं जनम्।
हृदाह्लादिकया वाचा प्रज्ञावान् काव्यमङ्कते।।

कविकीर्तिपुरस्कारस्वान्तःसुखसमीहया।
प्राक्कथावस्तुसंस्कारं सताञ्च चरिताङ्कनम्।।

नव्यकाव्यविधोन्मेषं व्यङ्ग्योक्तिं विकृतौ तथा।
राष्ट्रभक्तिं युगौचित्यं पर्यावरणचेतनाम्।।

राष्ट्रस्वातन्त्र्यवीराणां चरितं चाराध्यमीश्वरम्।
समुद्दिश्याधुना काव्यं कुर्वन्ति कवितल्लजाः।।

तत्राऽनेके बिन्दवो मम्मटोक्तव्यवहारज्ञान एवान्तर्भवन्ति। राष्ट्र-भक्त्यादीनि प्रयोजनानि पुनर्वयमप्यभिनन्दामः। तत्समर्थितमेव रेवा-प्रसादद्विवेदैरपि युगावश्यकतापूर्तेः धर्मरक्षाराष्ट्रदेवप्रबोधादीनामपि काव्यप्रयोजनत्वमिति दिशद्भिः।

मेरे आत्मीयप्रवर रहसविहारी द्विवेदी ने जो कहा कि असन्मार्ग को छोड़ सन्मार्ग पर लोक को, हृदयाह्लादक वाणी द्वारा, चलने के लिये प्रेरित करने हेतु प्रज्ञावान् काव्यरचना करता है। कविकीर्ति, पुरस्कार, स्वान्तःसुख की इच्छा, प्राचीन कथावस्तु के संस्कार, सच्चरिताङ्कन, नूतन काव्यविधा का उन्मेष, विकृतिसूचक व्यंग्योक्ति, राष्ट्रभक्ति, युगधर्म, पर्यावरणचेतना, राष्ट्र के स्वातंत्र्यवीरों का चरित तथा आराध्य ईश्वर को दृष्टि (प्रयोजन) में रखकर आज श्रेष्ठ कविगण काव्य प्रणीत कर रहे हैं।

इस विवरण में अनेक बिन्दु तो आचार्य मम्मट-प्रोक्त (प्रयोजन)

व्यवहारज्ञान में ही अन्तर्भूत हो जाते हैं। हाँ, राष्ट्रभक्ति आदि प्रयोजनों का हम भी स्वागत करते हैं। आचार्य रेवाप्रसाद द्विवेदी ने भी उसका समर्थन किया है यह कहते हुए कि युग की आवश्यकतापूर्ति के लिये धर्मरक्षा एवं राष्ट्रदेवता का प्रबोधन आदि भी काव्यप्रयोजन माना जा सकता है।

।।काव्यहेतुप्रकरणम्।।

सम्प्रति काव्यहेतुं व्याख्यास्यामः। काव्यन्तु जायते जातु कस्यचित्प्रतिभावत इति विवृण्वता भामहेन प्रतिभैव स्वीकृता काव्यहेतुत्वेन। काव्यादर्शकृद्दण्डी हेतुत्रयं विशदयति-

नैसर्गिकी च प्रतिभा श्रुतञ्च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः।।

हेतुषट्कं प्रस्तौति वामनः-तत्र काव्यपरिचयो लक्ष्यत्वम्। काव्यबन्धोद्यमोऽभियोगः। काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा। पदाधानोद्धरणमवेक्षणम्। कवित्वबीजं प्रतिभानम्। चित्तैकाग्र्यमवधानम्। तद्देशकालाभ्यामिति।

त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यास इत्याह रुद्रटः। काव्यप्रकाशकारस्तु हेतुत्रयं विशदीकुर्वन्नपि त्रयाणां हेतूनां सम्पृक्तिमङ्गीकरोति। तद्यथा-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे।।

इति त्रयस्समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः।

अब काव्यहेतु की व्याख्या करेंगे। 'विरले प्रतिभाशाली को ही कभी-कभार काव्य-प्रणयन की क्षमता प्राप्त होती है' इस प्रकार की व्याख्या करते हुए आचार्य भामह द्वारा प्रतिभा को ही काव्यरचना के हेतु रूप में स्वीकार किया गया है।

काव्यादर्शकार आचार्य दण्डी काव्यरचना के तीन हेतुओं की व्याख्या करते हैं-

नैसर्गिकी (संस्कारजन्य) प्रतिभा, अत्यन्त निर्मल शास्त्रज्ञान तथा निरन्तर किया गया अभ्यास-काव्यसम्पत् के ये तीन कारण हैं।

वामन छह हेतुओं को प्रस्तुत करते हैं-उनमें काव्यपरिचय कहते हैं **लक्ष्यत्व** को। काव्यरचना के उद्यम को **अभियोग** कहते हैं। काव्यरचना सिखाने वाले गुरु की सेवा-परिचर्चा को **वृद्धसेवा** कहते हैं। पदों के आधान (प्रयोग) एवं आदान को **अवेक्षण** कहा जाता है। कवित्व के बीज को **प्रतिभा** तथा चित्त की एकाग्रता को **अवधान** कहा जाता है। यह देश और काल के प्रभाव से बन पाता है।

शक्ति, व्युत्पत्ति तथा अभ्यास-यह तीन कारणभूत होता है, ऐसा कहते हैं आचार्य **रुद्रट**। काव्यप्रकाशकार **मम्मट** तो इसी हेतु-त्रय की व्याख्या करते हुए भी, तीनो हेतुओं की सम्पृक्ति (समेकता) स्वीकार करते हैं। जैसा कि-

शक्ति अर्थात् प्रतिभा, लोक-शास्त्र एवं (पूर्ववर्ती) काव्यादि के अवलोकन से प्राप्त नैपुण्य (व्युत्पत्ति) तथा काव्यज्ञ (गुरु) की शिक्षा के अनुकूल किया गया अभ्यास-वही काव्यरचना का हेतु है।

इस प्रकार, उस काव्य के उद्भव, निर्माण अथवा समुल्लास में ये तीनों मिथः सम्पृक्त होकर हेतु होते हैं न कि एक-एक कर (पृथक् रूप से) हेतु-त्रय होते हैं।

अपरे राजशेखरकुन्तकमहिमभट्टवाग्भटजयदेवप्रभृतयः प्रतिभामेवाद्वितीयां काव्यहेतुं स्वीकुर्वन्ति। सा शक्तिः केवलं काव्ये हेतुरिति यायावरीय इत्यधिकाव्यमीमांसम्। प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिरिति कुन्तकः। व्यक्तिविवेककारो महिमभट्टस्तावत्-

रसानुगुणशब्दार्थचिन्तास्तिमितचेतसः।
क्षणं स्वरूपस्पर्शोत्था प्रज्ञैव प्रतिभा कवेः।।

प्रतिभैव च कवीनां काव्यकरणकारणम्। व्युत्पत्त्यभ्यासौ तस्या एव संस्कारकौ न तु काव्यहेत्विति वाग्भटः। ततश्च चन्द्रालोककारो जयदेवो भणति-

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।
हेतुर्मृदम्बुसम्बद्धबीजोत्पत्तिर्लतामिव।।

तस्य च कारणं कविगता केवला प्रतिभेति रसगङ्गाधरकारः। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभेत्यग्निपुराणम्। लोचनटीकायां ध्वन्या-

लोकस्य महामाहेश्वरोऽभिनवगुप्तोऽपि प्रतिभामेव प्रशंसति काव्य-निर्माणप्रसङ्गे। तद्यथा-

प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा। तस्या विशेषो रसावेश-वैशद्यसौन्दर्य-काव्यनिर्माणक्षमत्वमिति।

अन्यान्य राजशेखर, कुन्तक, महिमभट्ट, वाग्भट तथा जयदेवप्रभृति आचार्य एकमात्र **प्रतिभा** को ही काव्य-हेतु स्वीकार करते हैं।

एकमात्र वह शक्ति ही काव्यरचना में हेतु होती है-ऐसा काव्यमीमांसा में लिखते हैं यायावरीय **राजशेखर।**

पुरातन एवं नवीन संस्कार से प्रौढ़ता को प्राप्त विलक्षण प्रतिभा ही कवित्व-रचना की (हेतुभूत) शक्ति है, ऐसा **कुन्तक** कहते हैं।

व्यक्तिविवेककार आचार्य **महिमभट्ट** का कथन है-

रसोद्रेक से संवलित शब्दार्थ की चिन्ता में डूबी चित्तवृत्ति वाले कवि की, क्षणमात्र के लिये स्वरूप-संस्पर्श करते ही सक्रिय हो उठने वाली 'प्रज्ञा' ही प्रतिभा है (जो काव्य-हेतु है) और वही प्रतिभा कवियों की काव्यरचना का कारण है। व्युत्पत्ति एवं अभ्यास तो उसी के संस्कारक (सहायक) हैं न कि (पृथक् या स्वतंत्र) काव्य हेतु-ऐसा **वाग्भट** कहते हैं।

इसके अनन्तर चन्द्रालोककार आचार्य **जयदेव** कहते हैं-श्रुत (व्युत्पत्ति) एवं अभ्यास से समन्वित (एकमात्र) प्रतिभा ही कविता के प्रति हेतु होती है, ठीक यूँ ही जैसे जल एवं मिट्टी से समन्वित बीजाङ्कुर लता के प्रति!

उस काव्य (रचना) का कारण है एकमात्र कवि की प्रतिभा, ऐसा कहना है **रसगंगाधरकार** का। कवित्व दुर्लभ होता है (और यदि कवित्व मिल भी जाय यथाकथंचित् तो) और कवित्व की प्रतिभा तो और भी अधिक दुर्लभ होती है ऐसा **अग्निपुराण** का कथन है।

ध्वन्यालोक की लोचनटीका में महामाहेश्वर अभिनवगुप्त भी, काव्यनिर्माण के सन्दर्भ में, प्रतिभा की ही प्रशंसा करते हैं। उन्हीं के शब्दों में-

प्रतिभा का अभिप्राय है अपूर्व वस्तु का निर्माण करने में समर्थ प्रज्ञा। उसी का विशेष (समुच्छलन) होता है-रसावेश के वैशद्य एवं सौन्दर्य से युक्त काव्य के निर्माण का सामर्थ्य!

केयमपूर्ववस्तुनिर्माणक्षमा प्रतिभा? समाधत्ते पृच्छामिमामभिनवगुप्त-

पादानां नाट्यगुरुः काव्यकौतुककृदाचार्यभट्टतौतः-

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाज्जीवद्वर्णनानिपुणः कविः।।

वस्तुतः काव्यप्रणयनहेतुर्द्विविधोऽङ्गीकरणीयः अलौकिको लौकिकश्च। तत्राऽलौकिको हेतुर्दैवायत्तः। स हेतुरेव प्रज्ञाप्रतिभाशक्ति-प्रभृतिपदवाच्यः। आचार्य आनन्दवर्धनोऽपि प्रतिभां दैवायत्तामेव मनुते-

सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।।

द्वितीयश्च लौकिको हेतुर्व्युत्पत्त्यभ्यासयुगलसमन्वितः प्रयत्नसाध्यः। एतौ द्वौ पुनः प्रतिभाया एव संस्कारकौ, न पुनः काव्यहेतू सर्वतन्त्रस्वतन्त्रौ। अनयोरभावेऽपि लोकोत्तरचमत्कारकारि वाग्वैदग्धीमण्डितं काव्यं प्रतिभा-मात्रबलेन समुद्भवितुं शक्यम्। परन्तु प्रतिभाया अभावे काव्यं न जातु प्रसरेत् प्रसृतं वोपहसनीयं स्यात्।

वस्तुतो नवनवोन्मेषवती प्रतिभैव कवित्वबीजम्। नेयं बुद्धिरिव तात्कालिकी। नेयं स्मृतिरिवाऽतीतमात्रविषया। न चापीयं मतिरिवागामिगोचरा। इयन्तावत् त्रैकालिकी समुच्छिन्नकालावरोधा काप्यनिर्वचनीयैव शक्तिर्यन्महिम्ना निखिलमपि ब्रह्माण्डं हस्तामलकवत् प्रत्यक्षमवभासते। प्रतिभागुणे प्राप्ते सति कवेर्वाणी निश्चप्रचमानन्त्यमुपयातीति भणत्यानन्दवर्धनः-

अपूर्व वस्तु के निर्माण में समर्थ यह प्रतिभा आखिर है क्या! इस प्रश्न का समाधान देते हैं अभिनवगुप्तपाद के नाट्यगुरु, काव्यकौतुक के लेखक, आचार्य भट्टतौत!

नित्य नवीन उन्मेषों से ओतप्रोत प्रतिभा को ही प्रज्ञा कहा जाता है। उसी प्रतिभा के अनुप्राणन से कवि जीवन्त वर्णना में निपुण हो जाता है।

वस्तुतः काव्यनिर्माण का हेतु द्विविध स्वीकार किया जाना चाहिये-अलौकिक (दिव्य) तथा लौकिक (मर्त्य) इनमें अलौकिक हेतु तो दैवायत्त (भाग्याधीन) होता है। उस दिव्य हेतु को ही प्रज्ञा, प्रतिभा एवं शक्ति आदि संज्ञाओं से बोधित किया जाता है। आचार्य आनन्दवर्धन भी प्रतिभा को दैवायत्त ही मानते हैं-

महाकवियों की नित्य प्रवहणशीला सरस्वती उसी अलोकसामान्य, परिस्फुरित होते हुए प्रतिभा-विशेष, रसमय अर्थसम्पत् को अभिव्यक्त करती है।

दूसरा हेतु **लौकिक** (मर्त्यकोटिक) होता है जो व्युत्पत्ति एवं अभ्यास के युग्म से समन्वित है तथा प्रयत्न-साध्य है। ये दोनों वस्तुतः प्रतिभा के ही संस्कारक (सहायक) हैं न कि सर्वतंत्र-स्वतंत्र काव्यहेतु-द्वय। इन दोनों के अभाव में भी, लोकोत्तर चमत्कार से श्रीमण्डित, वाग्वैदग्धी से संवलित काव्य-प्रतिभामात्र के सहयोग से-निर्मित हो सकता है। परन्तु प्रतिभा के अभाव में काव्य न तो कभी प्रसृत हो पाता है और प्रसृत हो भी गया (यथाकथंचित्) तो उपहसनीय बन जाता है।

वस्तुतः नित्य नवीन उन्मेषों से युक्त प्रतिभा ही कवित्व का बीज है। यह प्रतिभा **बुद्धि** की तरह तात्कालिकी नहीं (जो तत्काल उपस्थित विषयों का निर्णय करती है) न ही यह **स्मृति** की भाँति अतीत मात्र के विषयों में सीमित है। और न ही यह **मति** की तरह आगामि विषयों में सक्रिय होने वाली है। यह तो (भूत, भविष्य, वर्तमान के) कालावरोध को समुच्छिन्न कर देने वाली, त्रैकालिकी कोई अनिर्वचनीया ही शक्ति है जिसकी महिमा से समूचा ब्रह्माण्ड ही हाथ पर रखे नन्हें आँवले की तरह प्रत्यक्ष दीखने लगता है।

इस प्रतिभा का गुण (सद्भाव) प्राप्त होते ही कवि की वाणी निश्चित रूप से अनन्तता को प्राप्त कर लेती है-ऐसा कहते हैं आनन्दवर्धन!

ध्वनेरित्थं गुणीभूतव्यङ्ग्यस्य च समाश्रयात्।
न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः।।

इस प्रकार, ध्वनि तथा गुणीभूत व्यङ्ग्य का आश्रय ग्रहण करने मात्र से काव्यार्थ अविरामगतिक (अनन्तयात्र) बन जाता है बशर्ते कवि प्रतिभाशाली हो।

सनातनकविराचार्यो रेवाप्रसादोऽपि नाट्यानुशासने रसभोगाख्य-पञ्चमोन्मेषे कथयति-

सर्वेषामपि भावानां कलासु प्रतिभात्मता।
प्रातिभासिकसत्तात्मेत्युच्यतां दर्शनेषु सा।।

किञ्च-

प्रज्ञा बीजं कवित्वस्य शक्तिरूपा चिरन्तनी।
जन्मजन्मान्तरोपात्तसंस्कारप्रसवाऽमला।।३०।।

मृत्तिकाजलवायूनां सद्भावेपि यथाऽङ्कुरः।
बीजेऽसति धरागर्भे नैव जातु प्ररोहति।।३१।।

तथैवाऽचरितेऽभ्यासे भूयोभूयोऽप्यनारतम्।
लब्धेऽपि शास्त्रपाण्डित्ये शतशाखेऽतिविस्तृते।।३२।।

प्रज्ञां विना कवित्वस्य बीजं नैव प्ररोहति।
सत्यमेतद्दृषद्रेखाकल्पमूह्यं मनीषिभिः।।३३।।

यथा वा ममैव पद्यान्तरमरण्यान्याम् अवधारणामिमां द्रढयति-

नाऽहं करोमि कवितामिह शारदैव
साऽऽत्मानमञ्जयति मत्कवनच्छलेन।
गन्धं तनोति जलजं न निजप्रभावाद्
विस्फूर्जितं सकलमेव तदर्कलक्ष्म्याः।।

यथा वा खिस्ते बटुकनाथशास्त्रिणां पद्यमिदम्-

कवयतुतरां लोकः किञ्चित्कृतागमसञ्चरः
परिचितधरानर्थानेतान् नवानिव भावयन्।
जनयितुमलं स्निग्धां दुग्धाम्बुधेरिव वीचिका
शिवसति भवद्वीक्षा द्राक्षामयीं कविताझरीम्।।

तदलमधिकप्रतननेन। प्रतिभाया देवकृपोपनतत्वं सिद्धमेव।

सनातनकवि आचार्य रेवाप्रसाद भी नाट्यानुशासन में रसभोगनामक पंचम उन्मेष में कहते हैं-

कलाओं में, जो भी भाव व्यक्त होते हैं सबकी आत्मा प्रतिभा ही है। दर्शन-सम्प्रदायों में उसी को प्रातिभासिक सत्ता आत्मा कहा गया है।

पुनश्च,

शक्तिरूपा चिरन्तनी प्रज्ञा ही कवित्व का बीज है जो निर्मल एवं जन्म-जन्मान्तरोपात्त संस्कारों का प्रसवभूत होती है।।३०।।

जैसे मिट्टी, जल तथा वायु के सद्भाव रहने पर भी, पृथ्वी के गर्भ में विना बीज निक्षिप्त किये, अंकुर कभी उग नहीं पाता।।३१।।

ठीक उसी प्रकार निरन्तर, बार-बार अभ्यास करते रहने पर भी तथा सैकड़ों शाखाओं वाले, अत्यन्त विस्तृत शास्त्रों का पाण्डित्य प्राप्त कर लेने पर भी।।३२।।

एक प्रज्ञा (प्रतिभा) के अभाव में कवित्व का बीज अंकुरित नहीं हो पाता। विद्वानों के द्वारा यह सचाई पत्थर पर खिंची लकीर मान लेनी चाहिये।।३३।।

जैसा कि **अरण्यानी** (काव्यसंग्रह में संकलित) मेरा ही एक अन्य पद्य इस अवधारणा को पुष्ट करता है-

मैं स्वयं कविता नहीं लिखता। वस्तुतः स्वयं भगवती शारदा ही मेरी कविताई के बहाने अपने को इस संसार में प्रकाशित करती हैं। कमलपुष्प अपने व्यक्तिगत प्रभाव से परिमल नहीं बिखेरता है। वह सब तो बस, दिवसलक्ष्मी का ही विस्फूर्जन है।

अथवा जैसा कि बटुकनाथ शास्त्री खिस्ते का यह पद्य!

थोड़ा-बहुत आगमवाङ्मय में परिचित लोग कविता लिखा करें, चिरपरिचित उन-उन भावों को नये-नये रूपों में ढालते हुए। परन्तु क्षीरसागर की लहरियों के समान स्निग्ध, द्राक्षामयी कविताझरी की रचना कराने के लिये तो हे मृडानी! तुम्हारी कृपादृष्टि ही समर्थ है।

तो फिर, अधिक विस्तार नहीं। प्रतिभा का देवप्रदत्त होना सिद्ध ही है।

।।काव्यलक्षणप्रकरणम्।।

किं नु तत्काव्यमिति प्रसङ्ग आपतिते स्वोपज्ञं काव्यलक्षणं प्रस्तौति-

काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजम्।
परत्रेह च निर्व्याजं यशोऽवाप्तिप्रयोजनम्।।३४।।

शब्दार्थसङ्गमेनैव किञ्चिदाख्यातुमिष्यते।
ततश्चोभयसाहित्यं काव्यपर्यायगोचरम्।।३५।।

किञ्च, शब्दार्थसाहित्यं काव्यसंज्ञं भवेत्पुनः।
मनसा कर्मणा वाचा लोकोत्तरमसंस्तुतम्।।३६।।

सगुणत्वमदोषत्वं निष्प्रयत्नाऽप्यलङ्कृतिः।
प्रज्ञा चापि नवोन्मेषा लोकोत्तरत्वकारणम्।।३७।।

आख्यायते शब्दार्थसमष्ट्येत्याख्यानम्। अनेनाभामहान् मम्मटं यावच्छब्दार्थयोः काव्यत्वाङ्गीकरणस्याविच्छिन्नपरम्पराया अनुमोदनम्। यच्च महामहिमपण्डितराजैरुक्तं रमणीयार्थप्रतिपादकः शब्दः काव्यमिति तदपि व्याजान्तरेण शब्दार्थसमष्टेरेव काव्यत्वाङ्गीकरणम्। न तेनापि शब्द-मात्रस्य काव्यत्वमङ्गीकृतम्। किञ्च, रमणीयाऽर्थप्रतिपादनपरस्यापि शब्दस्याङ्गीकारे शब्दार्थावेव काव्यमिति स्फुटं भवति।

न कोऽप्येवंविधश्शब्दो योऽर्थविरहितः स्यात्। न चाऽप्यर्थः शब्दादृते सम्भवति। उभयोरविनाभावः। तदलं काव्यसंघटनाऽङ्गभूतयोः शब्दार्थयोरेकतरं प्रति स्वारस्यप्रदर्शनेन। वस्तुतः शब्दार्थावुभौ सम्भूयैव काव्यपदवीमारोहतो न पुनः पृथग्भूय। तथा च ध्वनिकार आनन्दवर्धनः- सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यत्वमिति।

वह काव्य क्या है? यह प्रसंग आ पड़ने पर (अब) स्वाभिमत काव्य-लक्षण प्रस्तुत किया जा रहा है-

लोकोत्तर आख्यान ही काव्य है, जो रसगर्भ (रसात्मक) हो, स्वभावज हो तथा इहलोक-परलोक-दोनों में सहज रूप से यशः प्राप्तिरूपी प्रयोजन वाला हो।।३४।।

शब्द एवं अर्थ की समष्टि से ही कुछ कहा (वर्णित किया) जा सकता है। इसलिये शब्द एवं अर्थ की समष्टि (साहचर्य, साहित्य) ही काव्य का पर्याय है।।३५।।

और फिर, काव्य संज्ञा वाला वह शब्दार्थ-साहित्य मन, वाणी एवं कर्म के स्तर पर लोकोत्तर एवं असंस्तुत (अपरिचित, विलक्षण) होना चाहिये।।३६।।

सगुणत्व (माधुर्यादि गुणों से युक्त होना) अदोषत्व (च्युत संस्कारादि दोषों से रहित होना) निष्प्रयास प्रयुक्त अलंकारों का सद्भाव तथा नवनवोन्मेषशालिनी प्रतिभा-यही (काव्य की) लोकोत्तरता के कारण हैं।।३७।।

शब्द एवं अर्थकी समष्टि द्वारा जो वर्णित किया जाय (आख्यात हो) उसे आख्यान कहते हैं। इस कथन से आचार्य भामह से लेकर मम्मट तक, शब्दार्थ-समष्टि को ही काव्य के रूप में अंगीकार करने की अविच्छिन्न परम्परा का अनुमोदन हो जाता है। जो पण्डितराज जगन्नाथ ने कहा कि रमणीय अर्थ का प्रतिपादक शब्द ही काव्य होता है वह भी प्रकारान्तर से शब्दार्थ-समष्टि को ही काव्य के रूप में अंगीकार करना हुआ। क्योंकि पण्डितराज ने भी केवल शब्द का ही काव्यत्व नहीं स्वीकार किया है (प्रत्युत रमणीय अर्थ के प्रतिपादक शब्द का) पुनश्च, रमणीयार्थ-प्रतिपादक शब्द के अंगीकार से भी 'शब्दार्थ-समष्टि ही काव्य है' यही भाव प्रकट होता है।

इस प्रकार का कोई शब्द है ही नहीं जो अर्थ-विरहित होता हो। नही ऐसा कोई अर्थ है जो शब्द के विना प्रवर्तित होता हो। दोनो में अविनाभाव है। तो

फिर, काव्यसंघटना के अंगभूत शब्दार्थ-युगल में से किसी एक के प्रति (कि मात्र शब्द ही काव्य है अथवा मात्र अर्थ ही काव्य है) स्वारस्य (पक्षपात) प्रदर्शित करना व्यर्थ है। वस्तुतः शब्द एवं अर्थ-दोनो मिल कर ही काव्य संज्ञा प्राप्त करते हैं, पृथग्भूत होकर नहीं। जैसा कि ध्वनिकार आनन्दवर्धन कहते हैं-सहृदयों को आह्लादित करने वाले शब्दार्थों की संघटना ही काव्य है।

तर्ह्यलं काव्यत्वप्रसङ्गे शब्दार्थयोरेकतरस्मिन् कस्मिन्नपि विवादजनयित्रीं प्रीतिं प्रदर्श्य। तस्मादुच्यते आख्यानमेव काव्यम्। तत्किं यत्किमप्याख्यानं काव्यपदवाच्यमुताहो विशिष्टमेवेत्याशङ्क्याह लोकोत्तरमिति। अनेन काव्यत्वे रमणीयार्थत्वपक्षधरस्य रसगङ्गाधरकारस्य मन्तव्यानुमोदनं जायते। तच्च लोकोत्तराख्यानं भवति रससिद्धम्। सद्यः परिनिर्वृतिकरेण रसेन प्रत्यङ्गानुविद्ध-मिति तात्पर्यम्। रससिद्धशब्दग्रहणेन वाक्यं रसात्मकं काव्यमिति स्थापनापराणां विश्वनाथमहापात्राणां भावानुमोदनम्।

काव्यं तावत्स्वतः स्फूर्तं भावोच्छलनं किमपि। काव्यं न तावद्विमृश्य विमृश्य ध्यायं ध्यायं शास्त्रमिव सायासं लिख्यते। प्राक्पश्चाद्वर्त्याग्रहविनिर्मुक्तमिदं भावोच्छलनं स्वतः स्फूर्तत्वाल्लोकोत्तरत्वाच्च भवत्येव स्वभावजम्। नेदं शास्त्रप्रभृतिवाङ्मयान्तरमिव कृत्रिमप्रयत्नसाध्यम्।

सम्प्रति काव्यस्य लोकोत्तरत्वं विवृणोति ग्रन्थकारः। सगुणत्वं रसाभिव्यञ्जकानां माधुर्यादिगुणानां साहचर्यम्। अदोषत्वं पदवाक्यरसा-दिदोषाणां मुख्यार्थहतिपर्यवसितानामभावः। निष्प्रयत्ना प्रयत्नरहिता स्वाभाविकी वाऽलङ्कृतिः। नवोन्मेषा नित्यस्फुरणा प्रज्ञा प्रतिभा। एतत्सर्वं सम्भूय काव्यलोकोत्तरत्वकारणम्।

तो फिर, काव्यत्व के प्रसंग में, शब्दार्थ-युगल में से किसी एक के प्रति विवाद पैदा करने वाली प्रीति का प्रदर्शन उचित नहीं। इसलिये कहा जा रहा है कि आख्यान ही काव्य है।

तो क्या, जिस किसी भी प्रकार का आख्यान काव्य होता है या फिर विशिष्टकोटिक? ऐसी आशंका करके कहा गया-लोकोत्तर (आख्यान ही काव्य है) लोकोत्तर कहने से काव्यत्व में रमणीयार्थता के पक्षधर रसगंगाधरकार आचार्य जगन्नाथ के मन्तव्य का समर्थन हो जाता है।

वह लोकोत्तर आख्यान (काव्य) रस-सिद्ध होता है। इसका तात्पर्य यह है कि तात्कालिक आनन्द प्रदान करने वाले रसोद्रेक से (वह काव्य) प्रत्यक्षर

अनुविद्ध होता है। 'रससिद्ध' शब्द के ग्रहण से 'रसात्मक वाक्य काव्य है' ऐसी स्थापना करने वाले विश्वनाथ महापात्र के भाव का अनुमोदन हो जाता है।

काव्य होता है स्वतःस्फूर्त कोई भावोच्छलन। क्योंकि काव्य सोच-सोच कर या डूब-डूब कर, शास्त्रों की तरह आयासपूर्वक नहीं लिखा जाता। पूर्ववर्ती तथा पश्चाद्वर्ती आग्रहों से विनिर्मुक्त यह भावोच्छलन (spontaneous flow) स्वतः स्फूर्त होने के कारण तथा लोकोत्तर होने के कारण होता ही है स्वभावजन्य! शास्त्रप्रभृति अन्यान्य वाङ्मयों की तरह यह काव्य कृत्रिम प्रयत्नों से साध्य नहीं ही होता।

अब ग्रंथकार काव्य की लोकोत्तरता का विवेचन कर रहा है। **सगुणत्व** का तात्पर्य है-रसाभिव्यञ्जक माधुर्यादि गुणों का साहचर्य। **अदोषत्व** का तात्पर्य है काव्य के मुख्यार्थभूत रस के विनाश में पर्यवसित पद, वाक्य एवं रसादि के दोषों का अभाव होना। निष्प्रयत्न अर्थात् प्रयासरहित, स्वभावतः समागत अलंकार। नवोन्मेषा अर्थात् नूतन स्फुरणों वाली प्रज्ञा अथवा प्रतिभा! ये सब मिलकर ही काव्य की लोकोत्तरता के कारण बनते हैं।

सामान्यग्राम्यकथनापेक्षया काव्यमेभिरेव गुणैरतिरिच्यते। ग्राम्यकथनेषु वार्ताभूतेषु न भवन्ति माधुर्यादयो गुणा, न भवन्ति हृदयावर्जकाः शब्दार्थालङ्कारा, न चापि सम्भवन्ति श्रुतिकटुनेयार्थादिदोषाणामभावाः। किञ्च, न दृश्यते तत्र मनागपि प्रतिभासंस्पर्शविलासः। कथन्नु जायेत तर्हि काव्येतराभिव्यक्तौ लोकोत्तरत्वम्? एवं हि, काव्यस्य लोकोत्तराभिव्यक्तीभावे समेषामेव सगुणत्वाऽदोषत्वसालङ्कारत्वादिधर्माणां मम्मटाभिमतानां सद्भावोऽपेक्ष्यत इति वाग्देवताऽवतारस्य मम्मटाचार्यस्याप्यभिप्रायो गृहीतः स्वोपज्ञकाव्यलक्षणे।

सम्प्रति रसगर्भं स्वभावजं लोकोत्तराख्यानं तत्काव्यमुदाहरति ग्रन्थकारः ज्ञानोपाह्वबच्चूलालावस्थिपद्येन-

निलिम्पा लिम्पन्तु प्रसभमभिकाश्चन्दनघनं
सुरीणां स्वर्णद्यां निधुवनधुवित्रं विधुवतु।
सुराधानी गन्धैर्मदयतु मुहुर्नन्दनवनं
यदम्बाया अङ्कः प्रथयति सुखं तद् दिवि कुतः।।

यथा वा खिस्तेबटुकनाथशास्त्रिणः पद्यमिदम्-

चलद्रुचिरहंसका परमहंससंसेविता
जडप्रकृतिधारिणी सकलजाड्यविध्वंसिनी।
पतन्त्यथ विहायसः शुभमतीन् नयन्ती दिवं
स्वतन्त्रगुणगौरवा जयति जह्नुराजात्मजा।।

अपने इन्हीं गुणों (सगुणत्व, अदोषत्व, सालंकारत्व तथा प्रतिभाजन्यत्व) के कारण काव्य सामान्य ग्राम्य कथन की तुलना में विलक्षण प्रतीत होता है। बतरस के स्रोतोभूत ग्राम्य कथनों में माधुर्यादि गुण नहीं होते हैं और न ही हृदयावर्जक शब्दों एवं अर्थों के अलंकार होते हैं और न ही उनमें संभव हो पाता है श्रुतिकटु एवं नेयार्थादि दोषों का अभाव? और फिर, उन ग्राम्य कथनों में तिलभर भी प्रतिभा-संस्पर्श का विलास कहाँ?

तो फिर काव्य से भिन्न अभिव्यक्ति में लोकोत्तरता आये कैसे? इस प्रकार, काव्य के लोकोत्तर अभिव्यक्ति बन पाने में-सगुणत्व, अदोषत्व, सालङ्कारत्वादि आचार्य मम्मटाभिमत समस्त धर्मों का सद्भाव अपेक्षित है। इस प्रकार **अभिराजयशोभूषणकार** ने स्वनिर्मित काव्यलक्षण में वाग्देवतावतार मम्मटाचार्य के भी अभिप्राय को आत्मसात् कर लिया है।

अब रसात्मक, निसर्गजन्य, लोकोत्तराख्यानभूत उस काव्य को ग्रंथकार उदाहृत कर रहा है ज्ञानोपाह्व आचार्य बच्चूलाल अवस्थी के पद्य द्वारा!

कामासक्त देवगण, सत्वरगति से सघन चन्दन का लेप करते रहें। स्वर्गंगा में देवांगनाओं का रतिव्यापार मृगचर्म का व्यजन झलते हुए, चलता रहे। देवताओं की राजधानी अमरावती भी सौरभभार से नन्दनवन को महकाती रहे। परन्तु वह सुख स्वर्गलोक में है कहाँ जो सुख परम्बा (रुद्राणी) के अंक में उपलब्ध है।

अथवा बटुकनाथ शास्त्री खिस्ते का यह पद्य!

चञ्चल रुचिर हंसकों वाली (अर्थात् रुनझुन बजते नूपुरों वाली तथा पक्ष में उड़ते हुए मनोहर हंसो वाली) परमहंसों (वीतराग संन्यासियों अथवा श्रेष्ठ हंसों) से संसेवित, जड प्रकृति (प्रकृतिलक्ष्मी अथवा जड प्रकृति वालों) को धारण करने वाली तथा समस्त जडताओं का विध्वंस करने वाली, स्वयमेव आकाशमण्डल से (नीचे पृथ्वी पर) गिरती हुई (भी) पवित्र बुद्धि वालों को (ऊपर) स्वर्ग में पहुँचाती हुई स्वतंत्र गुण-गौरव वाली महाराज जह्नु की पुत्री जाह्नवी (गंगा) विजयिनी बन रही हैं।

अत्रोदाहृते पद्यद्वये गुणादीनां सद्भावस्तु प्रत्यक्षमक्षिलक्ष्यीक्रियत एव। प्रतिभापरिपाकपरिणतं लोकोत्तरत्वमपि काव्यश्रियं पुष्णाति। सुराधान्या अमरावत्या गन्धमादनत्वमप्यतिशेते ऽम्बाया अङ्कपालीसौख्यमिति लोकोत्तराभिव्यक्तिः कवेः। एवमेव, विहायसः पतन्त्यपि जह्नुराजात्मजा गङ्गा शुभमतीन् दिवं नयन्त्युत्प्रेक्षिता कविनाऽग्रिमे पद्ये। नेदं लोके सम्भवति यदधः पतन् कोऽपि कमप्यधः पातसमकालमेवोपरि नयेत्। परन्त्वे-वमतिविलक्षणं लोकोत्तरमाचरितुं साधु प्रभवति भगवती सिद्धसिन्धुः। सोऽयमर्थः प्रतिभोल्लासहेतुक एव।

यदाह क्वचिदाचार्यस्सनातनो देवाप्रसादः-

अलम्भावो ह्यलङ्कारः स च सौन्दर्यतत्कृतोः।
विभक्तात्मा विभुर्जीवब्रह्मणोश्चिद्घनो यथा।।

एतेन चमत्काराधायकानां समेषामपि काव्यधर्माणाम् अलङ्कार इति महासंज्ञया संग्रहः। इयमेव हि नूतनानां काव्यविवेचकानां धोरणीति। तत्र न कस्यापि सहृदयस्य मतवैषम्यम्। यदि काव्यजीवातुभूतं ध्वन्यपरसंज्ञं प्रतीयमानार्थमप्यलङ्कारमेवाङ्गीकुरुते काव्यालङ्कारकारिकाकारस्तर्हि किमपक्रियते काव्यस्य काव्यलक्षणस्य वा? काव्यादर्शकारो दण्ड्यपि तदेव निगदति-

यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे।
व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः।।

ध्वनितत्त्वमपि तावदलम्भावात्मैव। परन्तु नाऽयमलम्भावः शब्दार्थोत्कर्षाधानमात्रपर्यवसायीति विशेषः। अलम्भावोऽयं काव्यात्मतया प्रतिष्ठितस्तिष्ठति ध्वनिप्रस्थाने। सनातनमतं भूयोऽपि सविस्तरं निरूपयिष्यामः काव्यात्मविवेचनसन्दर्भे।

अलम्भावस्तु पूर्णता (अभिनवकाव्यालङ्कारसूत्रम्-२।३।१) अलमिति पूर्णता। तस्या भावः सत्ता वाऽलम्भावः। तेन अलम्भावः काव्य एवोन्मिषति। तत्प्रत्ययः प्रमातर्यपि स्यादिति सविस्तरं स्वोपज्ञाभिनवकाव्यशास्त्रे नैकत्र निरूपयन् सुहृद्वर्यस्त्रिपाठिराधावल्लभोऽपि अलङ्कारः काव्यजीवनम्(अभिनव० २।१।१) इति सूत्रविशेषेणाऽलङ्कारमेव काव्यं काव्यजीवितञ्च मन्वानस्सनातन-सगन्ध एव प्रतीयते।

तन्मतमपि यथावसरं सविस्तरं निरूपयिष्यामः।

यहाँ उदाहृत किये गये दोनो पद्यों में माधुर्यादि गुणों का सद्भाव तो प्रत्यक्ष दीख ही रहा है, प्रतिभा के परिपाक से परिणत लोकोत्तरता भी काव्य-सौन्दर्य का पोषण कर रही है। सुराधानी अमरावती की गन्धमादनता का भी अतिशय कर रही है अम्बा की सुखमयी अंकपाली-यह कवि की लोकोत्तर अभिव्यक्ति है। इसी प्रकार (स्वयं तो) आकाश से नीचे गिरती हुई भी जाह्नवी गंगा शुभमति जनों को ऊपर स्वर्ग में उठा रही हैं-ऐसी उत्प्रेक्षा कवि ने अगले पद्य में की है। ऐसा लोक में संभव नहीं होता कि नीचे गिरता हुआ कोई व्यक्ति, नीचे गिरने की अवधि में ही किसी और को ऊपर उठा सके। परन्तु ऐसी विलक्षण लोकोत्तरता प्रदर्शित करने में पूर्णसमर्थ हैं भगवती देवनदी गंगा! यह विलक्षण अभिप्राय कवि-प्रतिभा के उल्लास से ही संभव हो सका है।

आचार्य **रेवाप्रसादद्विवेदी 'सनातन'** ने जो कहीं पर (स्वोपज्ञ काव्यालंकारकारिका) कहा है कि अलम्भाव ही अलंकार है और वह सौन्दर्य तथा उसके कर्ता के अर्थ में द्विधा विभक्त है ठीक यूँ ही जैसे चिद्घन विभु जीव एवं ब्रह्म के रूप में!

इस कथन से चमत्काराधायक समस्त काव्यधर्मों का संग्रह महासंज्ञा **अलंकार** से ही हो जाता है। यही है नये काव्यसमीक्षकों की परम्परा। इस विषय में किसी भी सहृदय का मतभेद नहीं। यदि काव्यात्मभूत तथा ध्वनिरूप दूसरी संज्ञावाले प्रतीयमानार्थ को भी काव्यालंकारकारिकाकार अलंकार ही मानते हैं तो इससे काव्य की अथवा काव्यलक्षण की क्या हानि है? काव्यादर्शकार आचार्य दण्डी भी तो वही कह चुके हैं-

अन्यान्य आगमों में जो सन्ध्यङ्ग, वृत्त्यङ्ग तथा लक्षणादि के रूप में सविस्तर वर्णित किया गया है वह सब हमें अलंकार रूप में ही अभीष्ट (स्वीकार) है।

ध्वनितत्त्व भी तो अलम्भाव का द्योतक आत्मा ही है। परन्तु यह **अलम्भाव** शब्दार्थ के उत्कर्षाधान-मात्र में पर्यवसित नहीं होता, यही विशेष बात है। यह अलम्भाव काव्य की आत्मा के रूप में प्रतिष्ठित होकर ध्वनि-सम्प्रदाय में समाद्दत है। आचार्य सनातन के मत को हम पुनः, काव्यात्म-विवेचन के सन्दर्भ में सविस्तर निरूपित करेंगे।

अलम्भाव तो पूर्णता है (अभिनवकाव्यालंकारसूत्र-१।३।१) अलम् का अर्थ है पूर्णता। उसका भाव अथवा अस्तित्व ही **अलम्भाव** है। इसलिये

अलम्भाव काव्य में ही प्रकट होता है और उसका प्रत्यय (अनुभव) प्रमाता में भी होना संभव है-इस प्रकार अपने अभिनव काव्यशास्त्र में, अनेक सन्दर्भों में विस्तारपूर्वक निरूपित करने वाले सुहृद्वर्य राधावल्लभत्रिपाठी भी 'अलंकार काव्य की आत्मा है (अभिनव० २।१।१) इस सूत्रविशेष से अलंकार को ही काव्य एवं काव्यात्मा मानते हुए आचार्य सनातन के ही सगन्ध (समानधर्मा) प्रतीत होते हैं।

उनके मत का भी निरूपण यथावसर (काव्यात्मोन्मेष में) विस्तारपूर्वक किया जायेगा।

यच्चाचार्यब्रह्मानन्दशर्मणा प्रतिपादितं स्वोपज्ञे काव्यसत्यालोके-

शब्दार्थवर्तिसत्यस्य सुन्दरं प्रतिपादनम्।
काव्यस्य लक्षणं ज्ञेयं सत्यस्यात्र विशेषता।।

तत्किमिदं काव्यलक्षणं काव्यानुशंसनं वा? यदि सत्यान्वेषणमेव काव्योपयोगित्वं तर्हि सत्यप्रतिष्ठैकप्रतिपाद्यानां शास्त्राणां क्षेत्रमेव काव्यनिगीर्णं परिलक्ष्यते। किञ्च-

तत्तेजस्तरणेर्निदाघसमये तद्वारि मेघागमे
तज्जाड्यं शिशिरे मदेकशरणैः सोढं पुरा यैर्दलैः।
आयातस्त्वधुना फलस्य समयः किन्तेन मे तैर्विना
स्मृत्वा तानि शुचेव रोदिति गलत्पुष्पैर्मधूकद्रुमः।।

पद्येऽस्मिन् सत्यं किमपि प्रतिष्ठितं सत्यस्य वा कस्यचित् भङ्गीभणितिमण्डितं समुपन्यसनम्? वसन्ततौ गलत्पुष्पं मधूकद्रुममपि निभालयते कविः पश्चात्तापाश्रुपातनपरायणं कृतज्ञगृहपतिचरम्। नाऽत्र बलीयस्त्वं कस्यापि सत्यस्य। कार्तज्ञ्यसंवेदनाया लोकोत्तरचमत्कार-संवलिताऽभिव्यक्तिरेवाऽत्र काव्यसर्वस्वम्। यदि नाम सुन्दरपदेन लोकोत्तरत्वप्रतिपादनमभीष्टं काव्यसत्यालोककर्तुस्तर्हि न मे काऽपि विप्रतिपत्तिः। तथात्वे सति कारिकेयं काव्यलक्षणं मदुपज्ञं स्पृशन्तीव परिलक्ष्यते।

और जो आचार्य ब्रह्मानन्द शर्मा ने अपने ग्रंथ काव्यसत्यालोक में प्रतिपादित किया है-शब्द एवं अर्थ में रहने वाले सत्य के रमणीय प्रतिपादन को ही काव्य का लक्षण जानना चाहिये। यहाँ सत्य का ही वैशिष्ट्य है।

तो क्या यह काव्य का लक्षण हुआ अथवा काव्य की प्रशंसा? यदि सत्य की खोज ही काव्य की (एकमात्र) उपयोगिता है तो फिर एकमात्र सत्य की ही प्रतिष्ठापना के लिये समर्पित शास्त्रों का क्षेत्र ही काव्य द्वारा निगीर्ण दीख रहा है। पुनश्च,

ग्रीष्म ऋतु में सूर्य का वह (दुस्सह) तेज, वर्षा ऋतु में वह (धारासार) वृष्टि और शीतकाल में वह ठिठुरन-जो एकमात्र मेरे सहारे जीवित मेरे पत्र-समूहों ने पहले सही। आज जब (वसन्त ऋतु में) फल का समय भी आया तो उनके अभाव में, उस फलसमृद्धिसे मुझे क्या लेना-देना? मानो उन्हीं झरे हुए (बिछड़े हुए) पत्तों को स्मरण करता हुआ, महुवे का पेड़ वेदनाहत होकर, झरते हुए फूलों के बहाने (अश्रुपात करता) रो रहा है।

इस पद्य में कोई सत्य प्रतिष्ठित है अथवा किसी सत्य का भंगी-भणिति-मण्डित समुपन्यास (अभिव्यक्ति) वसन्तऋतु में झरते फूलों वाले मधूकवृक्ष को भी कवि देख रहा है पश्चात्ताप के आँसू गिराने वाले किसी कृतज्ञ गृहपति के रूप में। यहाँ पर किसी सत्य का समुत्कर्ष नहीं है प्रत्युत कृतज्ञतारूप संवेदना की लोकोत्तर चमत्कार से संवलित अभिव्यक्ति ही यहाँ कविता का प्राणतत्त्व है। यदि (अपने काव्यलक्षण में प्रयुक्त) सुन्दर शब्द से **काव्यसत्यालोककार** को लोकोत्तरता का प्रतिपादन ही अभीष्ट हो तो फिर मुझे कोई विप्रतिपत्ति नहीं। वैसा होने पर उनकी यह कारिका मेरे ही काव्यलक्षण का संस्पर्श करती हुई सी परिलक्षित हो रही है।

यच्चाचार्यशिवजीवोपाध्यायः प्रतिपादयति स्वोपज्ञे साहित्यसन्दर्भे-

यदर्थं सस्पृहो लोको यदाप्तुं परमोत्सुकः।
यदाप्य परिभुज्यापि सोत्कण्ठस्तद्धि सुन्दरम्।।

निर्गलद्रसनिर्व्यूढं गुणालङ्कारसञ्चितम्।
निर्दुष्टं भावभूयिष्ठं काव्यसाहित्यमेव तत्।।

सौन्दर्याधायकं काव्यसाहित्यञ्चेत् प्रतिष्ठितम्।
तदन्यन्निखिलं शास्त्रं किमग्राह्यमसुन्दरम्।।

नैतदुह्यं यतः शास्त्रोच्चयस्तत्त्वप्रमाणकः।
काव्यसाहित्यमेकान्तं सौन्दर्यज्ञानसाधकम्।।

वस्तुनि क्वचिदप्येतत्सौन्दर्यं सत्तिरोभवत्।
येनाविष्क्रियते तच्च साहित्यं कविकर्मजम्।।

तत्र सौन्दर्यतत्त्वं नाम लोकोत्तराख्यानमेवेति मन्ये। तच्च सौन्दर्यं जीवातुकल्पं मन्वानोऽप्याचार्यो निर्गलद्रसनिर्व्यूढं गुणालङ्कारसञ्चितं निर्दुष्टं भावभूयिष्ठमेव शब्दार्थसाहित्यं काव्यपदवाच्यमङ्गीकुरुत इत्यभिराजोपकार एव। सौन्दर्यप्रतिष्ठायां न मे विमतिः। किञ्च, शास्त्रोच्चयस्तत्त्वप्रमाणकः काव्यं पुनः सौन्दर्यज्ञानसाधकमित्युक्तवताऽचार्येण प्रकारान्तरेण सत्य-प्रतिष्ठापनमात्रं काव्यलक्षणवैशिष्ट्यमङ्गीकुर्वाणस्य काव्यसत्यालोककारस्य मतं निरस्तमिति विस्तरेणाऽलम्।

आचार्य शिवजीवोपाध्याय ने अपने साहित्यसन्दर्भ में जो प्रतिपादित किया है-जिसके लिये समाज सस्पृह होता है, जिसे पाने के लिये परम उत्सुक रहता है और जिसे पाकर, भोग कर भी उत्कण्ठित ही बना रहता है-वह सुन्दर तत्त्व ही है।

निस्यन्दित होते हुए रस से ओतप्रोत, गुणों एवं अलंकारों से संचित, दोषों से रहित तथा भावों (संवेदनाओं) से भूयिष्ठ काव्यसाहित्य ही वह (सुन्दर तत्त्व) है।

यदि सौन्दर्याधायक काव्यसाहित्य की ही प्रतिष्ठा हो गई तो क्या उससे इतर सारा का सारा शास्त्र असुन्दर तथा अग्राह्य हो जायेगा?

ऐसा नहीं समझना चाहिये क्योंकि शास्त्रसमूह तत्त्वों के प्रमाणक हैं। जबकि काव्यसाहित्य स्पष्टतः सौन्दर्य-ज्ञान का साधक है।

कहीं पर भी किसी वस्तु में विद्यमान होता हुआ भी यह तिरोभूत सौन्दर्य जिसके द्वारा आविष्कृत किया जाता है वह कविकर्मज साहित्य ही है।

आचार्य उपाध्याय के इस विवरणमें विद्यमान सौन्दर्यतत्त्व लोकोत्तर की वर्णना ही है, ऐसा मैं मानता हूँ। उस सौन्दर्य को काव्यात्मा मानते हुए भी आचार्य जो निर्गलद्रसनिर्व्यूढ, गुणालंकार-संचित, दोषरहित तथा भावभूयिष्ठ शब्दार्थ-समष्टि को काव्यपदवाच्य मान रहे हैं तो इससे अभिराज का उपकार ही हुआ। सौन्दर्य की प्रतिष्ठा में मेरा वैमत्य नहीं। पुनश्च, शास्त्रसमूह तत्त्वों का प्रमाणक है और काव्य सौन्दर्य-ज्ञान का साधक है, ऐसा प्रतिपादित करते हुए आचार्य शिवजीवोपाध्याय ने प्रकारान्तर से, सत्यप्रतिष्ठापन मात्र को काव्यलक्षण का वैशिष्ट्य मानने वाले काव्यसत्यालोककार के मत को ही निरस्त कर दिया। अब (इस सन्दर्भ का) अधिक विस्तार नहीं।

यच्च त्रिपाठिना राधावल्लभेनोक्तम्-लोकानुकीर्तनं काव्यम्। अनुकीर्तनं चतुर्विधम्। तेनास्य पूर्णता। पूर्णता चालङ्कारः। तेन अलङ्कार एव काव्यमिति तत्सर्वं पूर्वपरम्पराऽपुष्टत्वात् गौरवान्मानाभावाच्च चिन्त्यमेव। कुत इत्युच्यते।

यद्यपि काव्यशब्दो दृश्यश्रव्यभेदविभक्तत्वात्समेषामेव गद्यपद्यबन्धानां सूचकस्तथापि पूर्वाचार्यैः स्वीकृतमेव काव्यनाट्ययोः स्वरूपवैशिष्ट्यविषयकमन्तरम्। आभरताद्विश्वेश्वरपण्डितं यावत् किञ्चाऽद्यतनाचार्यसमवायं यावत्काव्यनाट्यमध्यगोऽयं विशेषो यथावदङ्गीकृतः। तदस्माभिरपि नव्यैर्यथाशास्त्रं स विशेषोऽङ्गीकरणीय एवाऽनवस्थापरिहारदृशा।

लोकानुकीर्तनं तावन्नाट्यस्वरूपं न पुनस्तत्प्रतियोगिकाव्यस्वरूपम्। तत्र नाट्यशास्त्रमेव प्रमाणम् -त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् (ना० १।१०७) लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् (ना० १।११२) लोकस्य चरितं नाट्यम् (ना० ३६।६) सविस्तरं भूयोऽपि-

लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम्।
लोकाध्यात्मपदार्थेषु प्रायो नाट्यं व्यवस्थितम्।।

तदध्यात्माभिसम्भूतं छन्दःशास्त्रसमन्वितम्।
लोकसिद्धं भवेत्सिद्धं नाट्यं लोकात्मकं त्विदम्।।

लोकस्य चरितं यत्तु नानावस्थान्तरात्मकम्।
तदङ्गाभिनयोपेतं नाट्यभित्यभिधीयते।।

तस्माल्लोकप्रमाणं हि ज्ञेयं नाट्यं प्रयोक्तृभिः।।ना०अ० २६।।

एवं हि लोकानुकीर्तनमात्रजीविते सति नाट्ये यदि काव्यमपि लोकानुकीर्तनमेव समुच्येत तर्हि को नु निर्णायकभेदोऽङ्गीकरिष्यते विपश्चिद्भिः पाठकैर्वा काव्यनाट्ययोः? अतएव काव्यं पूर्वव्याख्यानपरम्परामपरित्यज्यैव व्याख्येयं लक्षणीयं वेति ममाभिप्रायः। अन्यथाऽऽचार्याणां मतस्वातन्त्र्येण पाठकानां बुद्धिभ्रम एवोदेष्यति। किञ्च,

धरित्र्यामटितुं शक्यं वर्त्मनां परिवर्तनैः।
किन्तु व्योमावलम्बेन भूमियात्रा न सम्भवा।।

पितृकल्पं भवेच्छास्त्रं विदुषां प्रतिभावताम्।
अतस्तैः शास्त्रमर्यादा पालनीया प्रयत्नतः।।

अन्यथा बुद्धिविस्फोटे सञ्जातेऽतिभयङ्करे।
विचारा बहिरागन्तुं के न शक्ता दृषन्निभाः।।

अतएव लोकानुकीर्तनं काव्यमिति कामं तटस्थलक्षणं भवेत्काव्यस्य न पुनस्तस्य स्वरूपलक्षणमिति दिक्।

काव्यं यथा परिभाषितं द्विवेदिना रहसविहारिणा तद्विषये न मे कापि विप्रतिपत्तिः। तद्यथा-

सुहृदां हृदयाह्लादे लोकोद्बोधे च सङ्गता।
प्रज्ञावतः कवेः सद्वाक् काव्यमित्यभिधीयते।।

और जो राधावल्लभत्रिपाठी ने कहा है-लोकानुकीर्तन काव्य है। अनुकीर्तन चार प्रकार का होता है। उस (अनुकीर्तन) से इस (काव्य) की पूर्णता है। पूर्णता अलंकार है। इसलिये अलंकार ही काव्य है-तो वह सब (पाँच सूत्रों में अभिव्यक्त सिद्धान्त) समीक्षायोग्य है-पूर्वपरम्परा से अपुष्ट होने के कारण, गौरव (मतस्वातन्त्र्य) के कारण तथा मानाभाव के कारण। कैसे? इसका उत्तर दिया जा रहा है।

यद्यपि **काव्य** शब्द दृश्य एवं श्रव्य भेदों में विभक्त होने के कारण सब प्रकार के गद्यपद्य-बन्धों का सूचक है, फिर भी पूर्वाचार्यों द्वारा **काव्य एवं नाट्य** के बीच स्वरूपवैशिष्ट्य-विषयक अन्तर स्वीकार ही किया गया है। आचार्य भरत से लेकर विश्वेश्वर पण्डित तक, या यह कहा जाय कि अद्यतन अलंकारशास्त्रियों तक -काव्य एवं नाट्य के बीच विद्यमान वह अन्तर (विशेष) यथावत् (जैसा पूर्वाचार्यों द्वारा बताया गया है) स्वीकार किया गया है।

इसलिये, हम लोगों सरीखे **नव्यों** द्वारा भी शास्त्रसम्मत वह (काव्य एवं नाट्य का मध्यवर्ती) अन्तर स्वीकार ही किया जाना चाहिये-अनवस्था दोष के परिहार की दृष्टि से!

लोकानुकीर्तन तो **नाट्य** का स्वरूप है न कि उसके प्रतियोगी **काव्य** का स्वरूप! इस सन्दर्भ में नाट्यशास्त्र ही प्रमाण है-नाट्य इस सम्पूर्ण त्रैलोक्य का भावानुकीर्तन है (ना० १।१०७) लोकवृत्त का अनुकरण करने वाला यह नाट्य मेरे द्वारा किया गया है (ना० १।११२) लोक का चरित (ही) नाट्य है (ना० ३६।६)।

विस्तार के साथ पुनः कहा गया है-

प्रमाण त्रिविध बताये गये हैं-लोक, वेद तथा अध्यात्म। प्रायः नाट्य (इनमें से) लोक एवं अध्यात्म-पदार्थों में व्यवस्थित है।

अध्यात्म से ओतप्रोत, छन्दःशास्त्र से समन्वित यह लोकात्मक नाट्य लोकसिद्ध होने पर ही सिद्ध (सफल, सार्थक) होता है।

नाना अवस्थान्तरों से संवलित यह जो लोक का चरित हैं, अंगाभिनयों से युक्त वही नाट्य कहा जाता है।

इसलिये रंगकर्मियों को नाट्य लोक-प्रमाणित ही जानना चाहिये।

-नाट्य० अ० २६

इस प्रकार लोकानुकीर्तन ही जिसका सर्वस्वभूत है ऐसे **नाट्य** के समानान्तर **काव्य** को भी **लोकानुकीर्तन** ही कह दिया जाय तो काव्य एवं नाट्य के बीच विद्वानों अथवा पाठकों द्वारा कौन (दूसरा) **निर्णायक भेद** स्वीकार किया जायेगा?

अतएव पूर्व व्याख्यान-परम्परा का परित्याग किये विना ही काव्य का व्याख्यान अथवा लक्षण प्रस्तुत किया जाना चाहिये, ऐसा मेरा अभिप्राय है। अन्यथा (अद्यतन) आचार्यों के मतस्वातन्त्र्य से पाठकों की बुद्धिभ्रान्ति ही उत्पन्न होगी। पुनश्च,

मार्गों को बदल-बदल कर जमीन पर चलना तो संभव है। परन्तु आसमान का सहारा लेकर भूमि-यात्रा संभव नहीं।

प्रतिभा-परायण विद्वानों के लिये शास्त्र माता-पिता के समान होता है। अतः आचार्यों द्वारा शास्त्रों की मर्यादा प्रयत्नपूर्वक पालित की जानी चाहिये।

अन्यथा अत्यन्त भयावह बुद्धिविस्फोट होने पर, शिलाखण्ड-सरीखे कौन विचार बाहर नहीं निकल आयेंगे?

अतएव लोकानुकीर्तन को काव्य का **तटस्थ** लक्षण भले मान लिया जाय, परन्तु **स्वरूप** लक्षण नहीं माना जा सकता।

रहसविहारी द्विवेदी ने जिस प्रकार काव्य को परिभाषित किया है उस विषय में मुझे कोई संशय नहीं है। उन्हीं के शब्दों में-

सहृदयों के हृदयाह्लादन एवं लोक के उद्बोधन में संगत प्रतिभाशाली कवि की सद्वाक् ही काव्य कही जाती है।

॥काव्यशाखाप्रकरणम्॥

काव्यं सहृदयास्वाद्यं कोविदास्वाद्यमेव च।
लोकास्वाद्यमिति ख्यातं त्रिविधं रोचते मम।।३८।।

सृष्टिस्सारस्वती पूता प्रोच्यते यदि वाऽधमा।
मध्यमा चेति तन्मन्ये वाङ्मयं गौरवं हतम्।।३९।।

व्यङ्ग्यार्थाऽवगमे शक्ता यतस्सहृदया बुधाः।
पण्डिताश्चापि लक्ष्यार्थे वाच्ये लोकाः समादृताः।।४०।।

ततस्सहृदयास्वाद्यमाद्यं काव्यविभाजनम्।
भाति प्रीततमं हृद्यं स्फुरद्व्यङ्ग्यार्थजीवितम्।।४१।।

उत्तमं यदि चेदं स्याद्यदि वाऽप्युत्तमोत्तमम्।
न तत्र काचिदापत्तिर्वैषम्यं न मतस्य वा।।४२।।

सहृदयास्वाद्यमिदानीमुदाह्रियते सव्याख्यम्। वस्तुतः काव्यस्य त्रैविध्येऽस्मिन् क्रमवतां सहृदयकोविदलोकानां प्राधान्यमेव निर्णायकं तत्त्वम्। ये सहृदयास्ते न कोविदा इति न। ये कोविदास्ते न सहृदया इत्यपि न। वस्तुतः सत्यपि कोविदत्वे सहृदयत्वं यत्र महीयते ते सहृदयास्तैश्चास्वाद्यं काव्यमुत्तमकोटिकं सहृदयास्वाद्यमित्युक्तम्। एवमेव सहृदयत्वापेक्षया यत्र कोविदत्वस्यैव प्राधान्यं ते कोविदास्तैश्चास्वाद्यं काव्यं कोविदास्वाद्यम्। सहृदयत्वकोविदत्वपरिपाकवञ्चितैः सामान्यमनीषैर्लोकैरास्वाद्यं काव्यं लोकास्वाद्यमिति त्रितयं व्याख्यातम्। मध्यमाधमसंज्ञयोर्ग्रन्थकारस्यौदासीन्यमिति सुस्पष्टम्। काव्यं सदपि व्याहरणं किमपि यदि मध्यमाऽधमसंज्ञं तर्हि पामरालपनमेव वरं न पुनः काव्यम्। काव्यीभवदेव वचः प्रसरणमुत्तमं जायते।

काव्य सहृदयास्वाद्य, कोविदास्वाद्य तथा लोकास्वाद्य-इन तीन रूपों में विभक्त मुझे रास आता है।।३८।।

यदि पवित्र सारस्वती सृष्टि (शब्दार्थ समष्टिमयी कविता) को अधम एवं मध्यम कहा जाता है तो मैं समझता हूँ कि वाणी के गौरव का नाश ही हो गया।।३९।।

चूँकि सहृदय बुधजन व्यङ्ग्यार्थ के अवगम में समर्थ होते हैं, पण्डित लोग भी लक्ष्यार्थ एवं सामान्य जन वाच्यार्थ के प्रति समादरभाव रखते हैं।।४०।।

अतएव काव्य का प्रथम (विभाजित) स्वरूप है-सहृदयास्वाद्य! जो कि परिस्फुरित होते हुए व्यङ्ग्यार्थरूपी प्राणतत्त्व वाला, रमणीय तथा प्रीततम प्रतीत होता है।।४१।।

अब यही सहृदयास्वाद्य काव्य यदि (अन्य आचार्यों की दृष्टि में) उत्तम अथवा उत्तमोत्तमकोटिक हो तो फिरउसमें न मेरी कोई आपत्ति है और न ही मतवैषम्य।।४२।।

सम्प्रति व्याख्या-सहित सहृदयास्वाद्य काव्य को उदाहृत किया जा रहा है। वस्तुतः काव्य की इस त्रिविधता में प्रथम, द्वितीय एवं तृतीय क्रम से आये हुए सहृदय, कोविद एवं लोक का प्राधान्य ही निर्णायक तत्त्व है। जो सहृदय हैं वे कोविद (पण्डित) नहीं हैं-ऐसा नहीं है। जो पण्डित हैं वे सहृदय नहीं है-ऐसा भी नहीं हैं।

वस्तुतः कोविदत्व (पाण्डित्य) के रहते हुए भी जिनमें सहृदयता सर्वोपरि होती है वही सहृदय हैं और उन्हीं के द्वारा आस्वाद्य काव्य को उत्तमकोटिक **सहृदयास्वाद्य** काव्य कहा गया है। इसी प्रकार, सहृदयता की अपेक्षा जिन (पाठकों) में पाण्डित्य का ही प्राधान्य होता है वे कोविद होते हैं और उन्हीं के द्वारा आस्वाद्य (पसन्द किया गया) काव्य **कोविदास्वाद्य** काव्य है। सहृदयत्व एवं कोविदत्व के परिपाक से वञ्चित सामान्य मनीषा वाले लोक के द्वारा आस्वाद्य काव्य को **लोकास्वाद्य** कहते हैं। इस प्रकार, तीनो ही काव्यरूपों की व्याख्या सम्पन्न हुई।

(काव्य की) मध्यम एवं अधम संज्ञाओं के प्रति ग्रंथकार का औदासीन्य है, यह तो सुस्पष्ट ही है। काव्य होते हुए भी कोई अभिव्यक्ति यदि '**मध्यम एवं अधम**' नामों से जानी जाती है तो फिर पामरों का वार्तालाप ही अच्छा है, न कि काव्य! वस्तुतः काव्यत्व की गरिमा से श्रीमण्डित होता हुआ ही कोई वाक्प्रसार 'उत्तम' बन जाता है।

सहृदयाऽस्वाद्यं काव्यं यथा वेङ्कटरामराघवस्य-

वृन्ते यान्ति पिपीलिकाः कतिपया रोहावरोहश्रमं
कीटाः केचन मूढमेव च दले स्वापं समातन्वते।
केऽप्यन्ये शलभा विधूय वदनैस्ताम्यन्ति किञ्जल्लका-
नेकः केवलमेष सून! मधुपो लेढि त्वदीयं मधु।।

यथा वा रसिकविहारिजोशिनां पद्यमिदम्-

तीक्ष्णा सा बडिशी तवास्ति नयनं मीनाननच्छेदने
राधे! कामशरानुविद्धहृदयो मत्स्यो यया बध्यते।

श्रीकृष्णस्य मनोझषः स्मरजलस्पन्दी यथाऽऽकृष्यते
तद्वन्मे स्मरतन्त्रचित्तशफरः शीघ्रं तयाऽऽकृष्यताम्।।

अत्र प्रथमोदाहृतपद्ये विलसति सारूप्यनिबन्धनाऽन्योक्तिर्यस्यां प्रतीयमानार्थस्य प्राधान्यं वरीवर्ति। पण्डितराजोऽपि पद्येष्वेतादृशेषु निर्विशङ्कं ध्वनिसद्भावमङ्गीकुरुते। अत्र गुणग्रहणशीलस्य विवेकवतः कस्य-चिन्महापुरुषस्य प्रस्तुतभूतस्य वर्णना प्रस्तूयते कविना व्यञ्जनामुखेन। अप्रस्तुतभूतो मधुपोऽत्र वाच्यमुखेनोपस्थापितः। द्वितीये पद्येऽपि कवेर्देवविषया रतिर्विलसति। तत्रापि पुनः बडिशीमत्स्यादिसंविधानकाश्रयमहिम्नाऽतिशय-दैन्यसमर्पणोद्धुरस्य कवेर्महीयसी भक्तिः कामप्यपूर्वां श्रियं धत्ते।

यथा वा ममैव जानकीजीवनमहाकाव्ये पद्यमिदम्-

पल्यङ्कतल्पशयितो रघुवंशभानुः पूर्वप्रतीतिवशगस्तनुजौ स्वपार्श्वे।
सम्मार्गयन् निशि न तौ समवाप्य विद्ध उन्निद्र एव रजनीं क्षपयाञ्चकार।।
-जा०जी० १९।६६

सहृदयास्वाद्य काव्य का उदाहरण वेङ्कटराम राघव का यह पद्य है-

कुछ चीटियाँ हैं जो चढ़ने-उतरने का परिश्रम करती वृन्तों (डंठलों) पर चंक्रमण करती रहती हैं। और कुछ तो ऐसे कीड़े हैं जो पंखड़ियों पर सोते रहते हैं। कुछ और भी टिड्डे हैं जो मुँह मार-मार कर परागधूलियों को झाड़ते रहते हैं। परन्तु हे पुष्प! एकमात्र यह भ्रमर ही है जो तुम्हारे मधु का पान करता है।

अथवा रसिकविहारी जोशी का यह पद्य (सहृदयास्वाद्य का उदाहरण है)

हे राधिके! तुम्हारा नेत्र मछली के गलफड़े को बींधने वाली वह तीखी कटिया (वंशी) है जिसके द्वारा कामशर से अनुविद्ध हृदय वाला मत्स्य मारा जाता है। जैसे स्मर-जल में उछल-कूद करने वाला श्रीकृष्ण का मनरूपी मत्स्य (तुम्हारे उस नेत्र रूपी कटिये से) आकृष्ट किया जाता है उसी तरह से मेरा भी चित्तशफर मायामोह में समासक्त है।.शीघ्र ही उसे (भी) अपनी ओर खींचो।

यहाँ प्रथम उदाहृत पद्य में सारूप्य-निबन्धना अन्योक्ति विद्यमान है जिसमें व्यङ्ग्यार्थ का सद्भाव है। पण्डितराज जगन्नाथ भी इस प्रकार के पद्यों में, विना किसी शंका-सन्देह के ध्वनितत्त्व की उपस्थिति स्वीकार करते हैं। इस कविता में गुणग्रहणशील किसी विवेक-सम्पन्न महापुरुष का प्रकरणोपात्त वर्णन प्रस्तुत किया जा रहा है व्यङ्ग्यमुखेन। अप्रस्तुतभूत भ्रमर यहाँ वाच्यमुखेन उपस्थित किया गया है।

दूसरे पद्य में भी कवि की देवविषयिणी रति का पल्लवन है। उसमें भी बंशी (कटिया) तथा मत्स्यादि के संविधानक की महिमा से, अतिशय दैन्य समर्पित करने वाले कवि की महीयसी भक्तिभावना, कुछ विलक्षणकोटिक ही शोभा उत्पन्न कर रही है।

अथवा जैसे मेरा ही जानकीजीवन महाकाव्य का यह पद्य!

पलंग की तूलशय्या पर लेटे हुए रघुवंश-भानु (श्रीराम) ने, रात में पूर्व-प्रतीति के वशीभूत होकर (पहले तो) लव-कुश को अपने पास खोजा और जब उन्हें नहीं पाया तो (पुत्र मोहवश) जागते ही जागते रात बिता दी।

अञ्जितव्यभिचारिणो निदर्शनमिदम्। अत्र शिक्षाग्रहणार्थं प्राचेतसाश्रम-मुपगतयोः पुत्रयोः कुशलवयोरनुपस्थितौ पल्यङ्कतल्पे वात्सल्यमेदुरहृदयस्य पितुश्श्रीरामचन्द्रस्य पूर्वप्रतीतिवशात्स्वपार्श्वे तदन्वेषणप्रयासः प्रयासेऽपार्थे सति चोन्निद्रतयैव रजनीसमापनमिति वर्णनया चिन्ताख्यव्यभिचारिभावस्य व्यञ्जनयाऽवगमः। ध्यानं चिन्तेहितानाप्तेः शून्यताश्वासतापकृदिति धनञ्जयः। पद्येऽस्मिन् विद्धोन्निद्रपदाभ्यां तयोश्च तापशून्यतयोः सम्यक्तयाऽभिव्यक्तिः।

कोविदास्वाद्यं यथा ममैव धारामाण्डवीयकाव्यस्य मालवेश्वरवर्णनपरं पद्यमिदम्-

धत्ते यो वारिधारां तमिह सविनयं मन्महे भोजमेघं
धत्ते यो वाऽरिधारां तमिह सविनयं मन्महे भोजभूपम्।
धत्तेऽयोवारिधारां तमिह सविनयं मन्महे भोजखड्गं
धत्ते यो वा रिधारां तमिह सविनयं मन्महे भोजदेशम्।।

अत्र वारिधारां दधतो भोजमेघस्य, अरिधारां शत्रुसैन्यं विदलतो भोजभूपस्य, अयोवारिधारां दधतो भोजखड्गस्य, रिधाराञ्च दधतो भोजदेशस्य परिकल्पनया सभङ्गाऽभङ्गश्लेषमहिम्ना च जायत एव कश्चित्कोविदानन्दविशेषः।

यह अञ्जित व्यभिचारीभाव का निदर्शन है। इस पद्य में, शिक्षा ग्रहण करने के लिये प्राचेतस (वाल्मीकि) आश्रम में गये हुए अपने पुत्रों-लव तथा कुश की अनुपस्थिति में, वात्सल्य-परिपूर्ण हृदय वाले पिता श्रीराम का, पूर्व प्रतीति-वश पलंग पर बिछी शय्या पर अपने आस-पास, बच्चों को खोजने का प्रयास और प्रयास के व्यर्थ हो जाने पर, उचटी हुई नींद वाली खुली आँखों से ही रात को बिता देना। इस वर्णन से चिन्ता नामक व्यभिचारी भाव का व्यञ्जना वृत्ति से बोध होता है।

ईहित अर्थात् आकांक्षित (व्यक्ति, वस्तु) की अनुपलब्धि का ध्यान ही चिन्ता है जो शून्यता, उच्छ्वास तथा सन्ताप को जन्म देता है-ऐसा आचार्य धनञ्जय कहते हैं। इस पद्य में विद्ध तथा उन्निद्र पदों द्वारा उस ताप एवं शून्यता की सम्यक् रूप में अभिव्यक्ति हो रही है।

कोविदास्वाद्य काव्य का उदाहरण जैसे मेरे ही **धारामाण्डवीय** काव्य का यह पद्य जिसमें मालवेश्वर भोजदेव का वर्णन किया गया है-

जो वारिधारा को धारण करता है उस भोजदेवरूपी मेघ को, जो शत्रु-मण्डली को नियंत्रित करता है उस भोजभूपति को, जो धाराजल को धारण करता है उस भोजदेव के खड्ग को तथा जो रि-धारा (रेवा अर्थात् नर्मदा की धारा, जलप्रवाह) को धारण करता है उस भोजदेश (मालवभूमि) को मैं सविनय अभिनन्दित करता हूँ।

यहाँ जलधारा धारण करते भोजमेघ की, अरिधारा अर्थात् शत्रु-सैन्य का विदलन करते भोजभूप की, अयोवारिधारा (तलवार की धार का पानी) धारण करते भोज के खड्ग की तथा नर्मदा के जलप्रवाह को धारण करते भोज के देश की परिकल्पना के कारण, सभंग एवं अभंग श्लेष की सुन्दरतावश कोई विशिष्टकोटिक कोविदानन्द उत्पन्न हो रहा है।

यथा वा पद्यमिदं रसिकविहारिणः-

रागो मे जङ्गमीतान्ननु भजनविधौ निर्विकल्पे समाधौ
कामो जाहातु वृत्तिं न च विषयविषे मन्मनो बम्भ्रमीतात्।
प्रज्ञा रंरन्तु शास्त्रे मयि विमलकृपा सर्वतो लालसीतात्
कृष्णो राधाप्रियो मां भवजलधिनिधेः किम्पचं तातरीतात्।।

अत्रापि यङ्लुगन्ताक्रियापदानां समुचितप्रयोगाज्जायते कोविदाकर्षिणी काऽपि साहित्यविच्छित्तिः।

समप्राधान्यं यत्र वाच्यार्थव्यङ्ग्यार्थयोस्तत्रापि कोविदास्वाद्यतैव। यथाऽस्मद् गुरुचरणानामाचार्यबच्चुलालावस्थिनां पद्येऽस्मिन्-

पश्यन्त्या हृदयं निविश्य सहसा घोरन् मनश्चोरयन्
को व्याधिस्तव भामिनीति सहसं पृच्छन् स्पृशन् नाडिकाम्।
जिज्ञासुर्मनसो गतिं हृदि करं कृत्वा कचानामृशन्
मुग्धाया दयितो दयामिव दधद् गोपीविटः पातु वः।।

यथा वा तेषामेव पद्यान्तरे-

चाणूरं प्रणिहत्य वेगमहितश्चोत्पत्य मञ्चाद् द्रुतं
कंसं शोणितकर्दमे क्षितितले सम्पात्य मृद्नन् मुहुः।
यावत्प्राणवियोजनं स्मितमुखो निश्चोतयन् पीडयन्
रङ्गस्थैरभिनन्दितः स भगवानव्यादभव्याशयात्।।

अथवा जैसे रसिकविहारी जोशी का यह पद्य-

मेरा राग (आसक्ति, विषयभोगासक्ति) समाप्त हो जाय। भजन विधि एवं निर्विकल्पक समाधि में काम अपना प्रभाव न दिखाये। विषयरूपी विष में मेरा मन मूर्च्छित न हो। (मेरी) प्रज्ञा शास्त्रों में निरन्तर रमण करे, मेरे प्रति देवकृपा सर्वतोमुखेन बनी रहे और राधाकान्त श्रीकृष्ण मुझ को भवसागर से पार कर दें।

इस पद्य में भी यङ्लुगन्त क्रियापदों के समुचित प्रयोग से, कोविदों को आकृष्ट करने वाली कुछ विलक्षण ही साहित्य-सुषमा उत्पन्न हो रही है।

जहाँ वाच्यार्थ एवं व्यङ्ग्यार्थ का समप्राधान्य हो वहाँ पर भी कोविदास्वाद्यता ही माननी चाहिये। जैसे हमारे गुरुवर्य आचार्य बच्चूलाल अवस्थी के इस पद्य में-

निर्निमेष नयनों से देखती (नायिका के) हृदय में सहसा प्रविष्ट होकर, उसके मन को चुराते हुए 'भामिनि! तुम्हें क्या रोग है?' इस प्रकार सहास पूछते हुए तथा उसकी नाड़ी-परीक्षा करते हुए, हृदय पर हाथ रख कर मन की गति को जानने का यत्न करते हुए, केशों का संस्पर्श करने वाले, भोली-भाली बल्लवी के प्रति दया दरशाते कान्तस्वरूप गोपीवल्लभ कृष्ण आप की रक्षा करें।

अथवा जैसा कि उन्हीं द्वारा प्रणीत एक अन्य पद्य में-

फुर्ती के साथ चाण्डूर का वध करके, शीघ्रता से मञ्च से कूद कर मामा कंस को खून से सने भूतल पर पटक कर बारम्बार उपमर्दित करते हुए, प्राणान्त होने तक उसे मुस्कराते हुए निचोड़ते एवं पीड़ित करते, रंगस्थ जनसमूह द्वारा अभिनन्दित वह भगवान् कृष्ण अमंगलों से आपकी रक्षा करें।

प्रथमपद्ये रतिभावे व्यङ्ग्ये सत्यपि सर्वस्यापि संविधानकस्य कल्पितमात्रत्वात्सौन्दर्यं वाच्यार्थमात्रे निरुद्धं प्रतिभाति। सर्वोऽपि रतिरसायनाऽनुभवो मुग्धाङ्गनायाः काल्पनिक एव न पुनर्यथार्थः।

द्वितीयपद्येऽपि शौर्यपराक्रमोत्साहाधिक्ये व्यङ्ग्ये सत्यपि निखिलमपि

काव्यसौन्दर्यं रङ्गाभिनन्दितस्य कृष्णस्य शत्रुमर्दनपरायणस्योत्पतन-सम्पातनमर्दननिश्चोतनपीडनप्राणवियोजनादिक्रियासु वाच्यार्थाश्रयिणीष्वेव चकास्तीति समप्राधान्यं वाच्यव्यङ्ग्ययोः।

लोकास्वाद्यं काव्यं यथा सृहदुत्तमानां त्रिपाठिराधावल्लभानाम्-

धम्मिल्लं स्वं घनवनगतं सस्मितं धुन्वती सा
स्कन्धे धृत्वा हरितहरितं शाद्वलानां दुकूलम्।
प्रातःकाले जलधिजपयश्शुल्लुके स्वे प्रगृह्य
माताऽऽयाता तनयवदनक्षालनार्थं समीपम्।।

कविप्रणीतधरित्रीदर्शनलहर्या. पद्येऽस्मिन् सान्द्रकाननहरितदूर्वात-लिच्छकमण्डितायाः सागरजलपरीतायाः शार्मण्यधरित्र्या लोकोत्तरवर्णनं समेषामेव सहृदयानां प्रतिभाऽप्रतिभाजुषां पाण्डित्याऽपाण्डित्य-समुल्लसितानां हृदयं प्रसह्य बध्नातीति लोकास्वाद्यमिदं काव्यम्।

यथा वा तदुपज्ञाया एव जनतालहर्याः पद्यमिदम्-

वत्सत्वेऽतिबुभुक्षितां स्वजननीं दूरस्थितामीक्षते
याऽऽपीनं विनिपीड्य दोहनपरैर्दोहुह्यते यौवने।
वार्द्धक्ये बहुखेदिता च वधिकैः सूनागृहं नीयते
सैषा गौरिव भारतीयजनता व्याहन्यते निर्दयम्।।

भारतजनतायाः कृते बुभुक्षाप्रसह्यदोहनखेदाद्यनन्तरं सूनागृहं नीयमानाया धेनोर्बिम्बग्रहणं प्रतिभाप्रकर्षपरिणतं सविशेषं लोकास्वाद्यतां भजते। तदयमत्र संक्षेपः।

प्रथम पद्य में रतिभाव के व्यङ्ग्य होते हुए भी, सम्पूर्ण संविधानक के कल्पनाश्रित मात्र होने के कारण काव्यसौन्दर्य उसके वाच्यार्थमात्र में सीमित दिखाई पड़ता है। मुग्धाङ्गनागोपी का सारा का सारा रति-रसायन का अनुभव काल्पनिक ही है न कि यथार्थ।

दूसरे पद्य में भी शौर्य, पराक्रम एवं उत्साहाधिक्य के व्यङ्ग्य होते हुए भी सारा का सारा काव्यसौन्दर्य रङ्ग द्वारा अभिनन्दित तथा शत्रुमर्दन में जुटे श्री कृष्ण के ऊपर उछलने, नीचे कूदने, मर्दन, निचोड़न, पीडन तथा प्राणवियोजनादि कृत्यों में ही प्रतिबिम्बित हो रहा है, जो कि वाच्यार्थ के माध्यम से प्रकट है, अतः इस पद्य में वाच्यार्थ एवं व्यङ्ग्यार्थ समप्राधान्य स्थिति में है।

लोकास्वाद्य काव्य का उदाहरण जैसे प्रिय मित्र **राधावल्लभ त्रिपाठी** का यह पद्य–सान्द्र जल में भींगे अपने जूड़े को, मुस्कान के साथ झाड़ती–फटकारती, कन्धे के ऊपर हरी–हरी घासों का दुकूल डाले, अपने चुल्लक (गागर) में सागर–जल लिये हुए माँ, बेटे का मुँह धोने के लिये, उसके पास पहुँची।

कविप्रणीत **धरित्रीदर्शनलहरी** के इस पद्य में सघन वन की हरित दूर्वा के गलीचे से श्रीमण्डित तथा सागरजल से परिवेष्टित जर्मनी देश की धरती का लोकोत्तर वर्णन समस्त सहृदयों के–चाहे वे प्रतिभाशाली हों अथवा नहीं, पाण्डित्य से श्रीमण्डित हों अथवा नहीं–हृदय को बरबस बाँध लेता है, अतः यह काव्य लोकास्वाद्यकोटिक है।

अथवा जैसे उन्हीं राधावल्लभ त्रिपाठी प्रणीत **जनतालहरी** का यह पद्य–

बछिया होने की स्थिति में जो अत्यन्त बुभुक्षित अपनी माँ को दूर बँधी हुई देखती है। युवावस्था में थनों को आहत कर–कर जो दोहन करने वालों द्वारा दुही जाती है, वृद्धावस्था में अत्यन्त कष्ट पाती हुई जो कसाइयों द्वारा बूचड़खाने में लाई जाती है (वधनिमित्त) उसी गाय की तरह यह भारतीय जनता भी, निर्दयतापूर्वक, मारी जा रही है।

भारत की जनता के लिये, भूख–प्यास, जबर्दस्ती दोहन तथा संतापादि के बाद बूचड़खाने में ले जाई जाती गाय के बिम्ब का आदान, जो कि प्रतिभा के प्रकर्ष से परिणत है तथा वैशिष्ट्ययुक्त है, लोकास्वाद्यता को परिपुष्ट कर रहा है। अब निष्कर्ष प्रस्तुत किया जा रहा है।

कामं सहृदयाऽस्वाद्यं काव्यं व्यङ्ग्यार्थमण्डितम्।
तथैव कोविदाऽस्वाद्यं पाण्डितीपरिपाकजम्।।४३।।

निश्चप्रचं धराऽभोगेऽल्पसंख्यत्वात्सचेतसाम्।
कोविदानाञ्च सत्काव्यं लोकास्वाद्यं महीयते।।४४।।

लोकास्वादवती नूनं कवितानर्तकी नवा।
स्वभावोक्त्या रसज्ञानां चित्तमाकृष्य नृत्यति।।४५।।

या वक्राऽतिशयोदात्तैर्वर्णनैर्गुणगुम्फितैः।
लोकं रञ्जयति प्राज्यं सा कविता मता मम।।४६।।

न व्यङ्ग्यार्थवती तस्मात्केवलं श्रेयसे कवेः।
न चापि कविता श्लाध्या केवलं भक्तियोगिनी।।४७।।

शारदासत्कृपावाप्ता नवाऽभिप्रायमेदुरा।
अक्लिष्टपदबन्धाऽढ्या लोकसंस्पर्शचिन्मयी।।४८।।

लोकास्वाद्याऽपि कविता संवेदनमनोरमा।
गाहते हृदयं गाढं पाठकानामनुत्तमा।।४९।।

किञ्च, वापीसरित्कूपसागरौघेषु सत्स्वपि।
यस्य यत्र तृषा शाम्येत्तस्य तत्रैव जीवनम्।।५०।।

काव्यं नाम न केवलं सचेतसां कोविदानां वा कृते। यद्येवमङ्गीक्रियेत तर्हि परिमितसंख्यत्वात्तेषां काव्यक्षेत्रमेव संकुचितं स्यात्। वस्तुतः समग्र-लोकस्यानुरञ्जनकरं काव्यमिदम्। तत्रापि लोकस्तावन्मुख्यो यतो हि नासौ व्यङ्ग्यार्थमात्रेण सहृदय इव, पाण्डित्यमात्रेण कोविद इव प्रसीदति। किन्तर्हि? लोकस्तु स्वभावोक्तिश्रवणकातरः। लोकस्तु माधुर्यादिगुणगुम्फितैः वक्राति-शयोदात्तवर्णनैरेव प्रह्वीभवति। वक्रादिपदैः वक्रोक्त्युदात्ताद्यलङ्काराः सूच्यन्ते। अलङ्कारास्त्वेते लोकास्वाद्यकाव्यस्य जीवातुभूताः। अत्र कारिकासंख्या-५०, स्वोपज्ञोदाहरणश्लोकसंख्या च-३.

इतिश्रीमद्गौतमगोत्रोत्पन्नस्य भभयाख्यमिश्रवंशावतंसस्य श्रीमद्दुर्गा-
प्रसादाभिराजीतनूजस्य पण्डितप्रकाण्डश्रीमदाद्याप्रसाद-
मिश्रभ्रात्रीयस्य त्रिवेणीकविसंज्ञितस्याभिराजराजेन्द्रस्या-
भिनवे काव्यशास्त्रेऽभिराजयशोभूषणे
परिचयोन्मेषाख्यः प्रथमोंशः।

सहृदयास्वाद्य काव्य भले ही व्यङ्ग्यार्थ से मण्डित हो और उसी प्रकार, कोविदास्वाद्य काव्य (भले ही) पाण्डित्य के परिपाक से समुद्भूत हो।।४३।।

तथापि भू-मण्डल में सहृदयों तथा पण्डितों की संख्या निश्चित रूप से अल्पीयसी होने के कारण 'सत्काव्य' लोकास्वाद्य की ही प्रतिष्ठा है।।४४।।

लोकास्वाद प्रदान करने वाली कवितारूपी नवयौवना नर्तकी निश्चित रूप से स्वभावोक्तियों द्वारा, रसज्ञों के चित्त को आकृष्ट कर, नृत्य करती है।।४५।।

माधुर्यादि गुणों से गुम्फित तथा अतिशय उदात्त वर्णनो से भंगिमा को प्राप्त जो लोक (समाज) का यथेष्ट अनुरंजन करती है मेरी दृष्टि में वही कविता 'कविता' है।।४६।।

इसलिये, मात्र व्यङ्ग्यार्थ-संवलित कविता ही कवि के लिये श्रेयस्करी

नहीं होती और नही मात्र लक्ष्यार्थ से युक्त कविता प्रशंसनीय होती है।।४७।।

भगवती सरस्वती की सत्कृपा से प्राप्त, नूतन अभिप्रायों से ओतप्रोत, सरल पदबन्धों से भरी-पुरी, लोकवृत्तों के संस्पर्श से जीवन्त।।४८।।

मनोरम संवेदना वाली उच्चकोटि की **लोकास्वाद्य** कविता भी पाठकों के हृदय में गहरे उतर जाती है।।४९।।

और फिर, बावड़ी-नदी-कूप एवं सागर-समूहों के होते हुए भी जिसकी प्यास जहाँ बुझ जाय, वहीं उसका जीवन है।।५०।।

काव्य केवल सहृदयों एवं पण्डितों के ही लिये नहीं होता। यदि ऐसा स्वीकार कर लिया जाय तो उनकी परिमित संख्या होने के कारण, काव्य का क्षेत्र ही, अत्यन्त संकुचित हो जायेगा। वस्तुतः यह काव्य तो समस्त लोक का ही अनुरंजन करता है। उसमें भी मुख्यता तो लोक (साधारण समाज, जनता जनार्दन) की ही है। क्योंकि वह सहृदयों की तरह व्यङ्ग्यार्थ मात्र से अथवा पण्डितों की तरह पाण्डित्य मात्र से आह्लादित नहीं होता है। लोक तो होता है स्वभावोक्ति श्रवण-कातर! लोक तो माधुर्यादि गुणों से गुम्फित, भंगीभणितियों तथा अतिशय उदात्त वर्णनों से ही मुग्ध होता है। वक्रादि पदों द्वारा यहाँ वक्रोक्ति, अतिशयोक्ति तथा उदात्तादि अलंकारों को संकेतित किया जा रहा है। ये सभी अलंकार **लोकास्वाद्य** काव्य के प्राणतत्त्व हैं।

इस उन्मेष में कारिकाओं की संख्या ५० तथा स्वरचित उदाहरण श्लोकों की संख्या तीन है।

इस प्रकार, गौतमगोत्रोत्पन्न 'भभया' नामक मिश्रवंश के भूषणस्वरूप, महाभागवत पं० रामानन्द मिश्र के पौत्र, श्रीमान् पं० दुर्गाप्रसादमिश्र एवं अभिराजी देवी के (मध्यम) पुत्र, पण्डितप्रकाण्ड श्रीमान् आद्याप्रसादमिश्र के भ्रातृव्य, त्रिवेणीकवि अभिराजराजेन्द्र के अभिनव काव्यशास्त्र अभिराजयशोभूषण में परिचयोन्मेष नामक यह प्रथम खण्ड परिपूर्ण हुआ।

***

अभिराजयशोभूषणम्

॥वपुस्तत्त्वोन्मेषः॥

॥अथ शब्दार्थप्रकरणम्॥

व्यतीतलक्षवर्षाणां सृष्टिस्साऽद्य न लक्ष्यते।
वपुषा, किन्तु शब्देन गोचरैव स्थिताऽखिला।।१।।

अदृष्टाः पूर्वदृष्टा वा साम्प्रतं दृष्टिगोचराः।
अण्डजाः पिण्डजाश्चैवोद्भिज्जाः स्वेदजा अपि।।२।।

केवलं शब्दमात्रेण सत्तावन्तो महीतले।
ब्रह्मकल्पस्ततोऽनादिनिधनश्शब्द उच्यते।।३।।

किमन्यद् ब्रह्मसत्तापि केवलं शब्दसंश्रिता।
तस्यैव परिणामोऽयं संसारो यस्समुच्यते।।४।।

क्षणभङ्गुरमिदञ्जगत्। अद्य दृग्गोचरीक्रियमाणं वस्तु श्वो न दृश्यते। तर्हि विनष्टस्याऽदृश्यमानस्य संसारस्य ज्ञानं कथं जायते? तदुच्यते। शब्दमात्रेण। शब्द एव तत्तद्वस्तुप्रतिपादकत्वात् तत्तद्वस्तुतादात्म्याऽवाप्ति-क्षमत्वाच्च सर्वं ज्ञापयति। एवं हि, वस्तुविशेषो वस्तुविशेषज्ञानञ्चेत्युभयमपि शब्दस्यैव परिणमनम्। तद्यथा वाक्यपदीयकारः

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमाद्ऋते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममिदं विश्वं व्यवर्तत।।

ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृतं सर्वमात्राभ्यस्तास्वेव प्रविलीयते।।

बीते हुए लाखों वर्ष की यह सृष्टि (संसार) आज भौतिक रूप में (अपने यथार्थ रूप में) तो नहीं दीख रही है परन्तु वाङ्मय के माध्यम से वह पूरी की पूरी सृष्टि आज भी परिलक्षित हो रही है।।१।।

चाहे अनदेखे हों, या पहले देखे गये हों या फिर वर्तमान में दृष्टिगोचर हो रहे हों, वे सारे के सारे अण्डज, पिण्डज, उद्भिज्ज और स्वेदज प्राणी।।२।।

इस पृथ्वीतल पर (आज) अपनी संज्ञामात्र से अस्तित्व में हैं। इसीलिये शब्द को आदि एवं अन्त से परे ब्रह्म के समकक्ष बताया गया है।।३।।

और अधिक क्या, स्वयं ब्रह्म की सत्ता भी केवल शब्द के माध्यम से ज्ञात है। उसी शब्द-ब्रह्म का यह परिणाम है जिसे संसार कहा जाता है।।४।।

यह जगत् क्षणभंगुर है। आज देखी जाती हुई वस्तु अगले दिन नहीं दीखती। तो फिर (पूर्व में) विनष्ट हुए अथवा दृष्टिगोचर न होते हुए संसार का ज्ञान कैसे हो जाता है? उसे बताते हैं। मात्र शब्द द्वारा। शब्द ही है जो उन-उन वस्तुओं का प्रतिपादक (बोधक) होने के कारण, उन-उन वस्तुओं के साथ तादात्म्य स्थापित कर लेने की क्षमता के कारण सब कुछ ज्ञापित कर पाता है। इस प्रकार, वस्तुविशेष और वस्तु विशेष का ज्ञान-दोनों शब्द का ही परिणाम है। जैसा कि **वाक्यपदीयकार** ने कहा है-

शब्द-तत्त्व के रूप में, आदि एवं अन्त से हीन जो अविनाशी ब्रह्म विद्यमान है उसी से सृष्टि-प्रक्रिया प्रवृत्त होती है, जैसे शब्द से अर्थ (प्रवृत्त होता है)

संसार में कोई ऐसा प्रत्यय (पदार्थ या भाव) है ही नहीं जो शब्द द्वारा सम्बोध्य न हो। सारा का सारा ज्ञान शब्द से ही अनुविद्ध होकर भासता है।

आम्नायविद् विद्वान् जानते हैं कि यह सारा संसार शब्द का ही परिणाम है। प्रारंभ में (सृष्टि के आदि में) छन्दों से ही यह विश्व अस्तित्व में आया।

शब्द निर्मिति-स्वरूप तथा शब्द-शक्तियों का निबन्धन करने वाला यह ब्रह्म समस्त मात्राओं से ही प्रकट हुआ है और उन्हीं (मात्राओं) में विलीन भी हो जाता है।

सुस्पष्टम्। अयं घट इत्युच्चारिते सति प्रयुक्तेन शब्दयुगलेन यद्घटज्ञानं भवति तज्ज्ञानं घटप्रकारकवस्तुविशेषतादात्म्यावगाहि। अन्यथा वस्तुज्ञानं वस्तुनो भिद्येत। अनयैव प्रक्रियया सर्वं शब्देन भासते। कथं भासते? शब्दस्याऽर्थभावेन विवर्तनत्वात्। प्रत्येकं शब्दः कमप्यर्थविशेषमभिधत्ते लक्षयति व्यनक्तिवा। यथा गौरिति शब्दः सास्नादिमन्तं पशुविशेषं घट इति घटाख्यं पात्रविशेषमभिधत्ते।

शब्दा लोके भवन्त्येव सार्थकाश्चाऽप्यसार्थकाः।
तथापि सार्थकैरेव व्यवहारः प्रवर्तते।।५।।

अर्थवन्तो हि ये शब्दाः काव्ये शास्त्रे प्रयोजिताः।
तेषामर्था हि कोशाद्यैः पूर्वत एव निश्चिताः।।६।।

अर्थप्रकाशनोद्देश्या यथा शब्दाः प्रकीर्तिताः।
अर्थाश्चापि तथा सर्वे शब्दमूला न चान्यथा।।७।।

उभयोरविनाभावसम्बन्धो हि विकस्वरः।
तस्मादङ्गीकृतः पूर्वसूरिभिस्तत्त्वपारगैः।।८।।

अत्यन्त स्पष्ट है। 'यह घट है' ऐसा उच्चारित करने पर, प्रयुक्त किये गये शब्द-युगल (अयं-घटः) द्वारा जिस घट का ज्ञान होता है वह ज्ञान घटरूप वस्तु-विशेष से तादात्म्य प्राप्त कर लेता है। यदि ऐसा न होता तो वस्तु का ज्ञान वस्तु से भिन्न हो जाता। इसी प्रक्रिया के द्वारा सब कुछ शब्द से ही भासित होता है। कैसे भासित होता है? शब्द के अपने अभिप्राय रूप में प्रवृत्त होने के कारण। प्रत्येक शब्द किसी अर्थ-विशेष को बोधित करता है, लक्षित करता है अथवा प्रकाशित करता है। जैसे 'गौः' शब्द गलकम्बलमान् पशुविशेष को (बोधित करता है) घट शब्द घटनामक पात्र-विशेष को बोधित करता है।

लोक में सार्थक शब्द भी होते हैं और असार्थक भी। फिर भी, सार्थक शब्दों से ही लोकव्यवहार प्रवर्तित होता है।।५।।

अर्थों से युक्त जो शब्द काव्य एवं शास्त्र में प्रयोजित होते हैं उनके अर्थ कोशादि ग्रंथों द्वारा, पहले से ही निश्चित किये होते हैं।।६।।

जैसे शब्दों का (एकमात्र) उद्देश्य होता है अर्थ (अभिप्राय) का प्रकाशन करना उसी प्रकार समस्त अर्थ भी शब्दमूलक (शब्द से निसृत) ही होते हैं, अन्य प्रकार के नहीं।।७।।

शब्द एवं अर्थ-दोनो का असन्दिग्ध अविनाभाव इसीलिये तत्त्वपारंगत पूर्व- सूरियों (प्रातिशाख्यादिकर्ताओं) द्वारा स्वीकार किया गया है।।८।।

अतात्त्विको यथा भेदो मतो नीरतरङ्गयोः।
तथा शब्दार्थयोर्भेदो नाऽत्र कश्चिद्धि संशयः।।९।।

केवलेऽपि यथाऽख्याते ब्रह्मशब्दे निसर्गतः।
मायया उपहितं ब्रह्म स्वयमेवाऽवबुध्यते।।१०।।

शब्दब्रह्मपदेनापि तथैवाशु प्रकाश्यते।
शब्दस्यार्थवतश्चैव ब्रह्मत्वं ननु निश्चितम्।।११।।

शब्दार्थयोः सहितयोस्तादृग्गुणविशिष्टयोः।
भावस्साहित्यमाख्यातं वाङ्मयं यत्समुच्यते।।१२।।

वेदाः सर्वे पुराणानि शास्त्रैतिह्यपुराकथाः।
काव्यनाट्यानि किञ्चैव साहितीसृतयोऽखिलाः।।१३।।

साहित्यं निखिलं लोके गोचरं वाऽप्यगोचरम्।
शब्दार्थयोः समष्ट्यैव मण्डितं नाऽत्र संशयः।।१४।।

साहित्यं तादृशं नौमि वैधसीसृष्टिदर्पणम्।
यस्मिन्नहो पुरातीतं प्रत्यक्षं परिलक्ष्यते।।१५।।

यत्साहित्यमहिम्नैव गौतमादिमहर्षयः।
कवयः कालिदासाद्या जेजीव्यन्ते निरन्तरम्।।१६।।

मोहध्वान्तमपाकर्तुं सन्नद्धां स्मितकाङ्कुरैः।
साहित्यदेवतां वन्दे वरटस्थां सरस्वतीम्।।१७।।

याऽन्तः प्रविश्य निर्माति सामान्यमपि मानवम्।
महाकवीश्वरं वन्द्यं तामहं नौमि शारदाम्।।१८।।

॥इति शब्दार्थप्रकरणम्॥

जैसे जल और तरंग का भेद अतात्त्विक (मिथ्या) माना गया है, इसी प्रकार शब्द एवं अर्थ में भी कोई भिन्नता नहीं। इसमें कोई संशय है ही नहीं।।९।।

जैसे स्वभावतः केवल 'ब्रह्म' शब्द के उच्चारण करने पर माया से उपहित ब्रह्म का स्वयमेव बोध हो जाता है।।१०।।

उसी प्रकार 'शब्द-ब्रह्म' पद से भी अर्थवान् शब्द के ब्रह्मत्व का निश्चित रूप से झटिति प्रकाशन हो जाता है।।११।।

उस प्रकार के वैशिष्ट्य से युक्त, मिथः सम्पृक्त शब्द एवं अर्थ का भाव ही साहित्य कहा गया है जिसे 'वाङ्मय' भी कहा जाता है।।१२।।

समस्त वेद एवं पुराण, शास्त्र-इतिहास-पुराकथायें, काव्य एवं नाट्य यहाँ तक कि समस्त साहित्यविधायें।।१३।।

लोक में गोचर (ज्ञात) अथवा अगोचर (अज्ञात) समस्त साहित्य शब्द एवं अर्थ की ही समष्टि से मण्डित है-इसमें संशय नहीं।।१४।।

वैधसी सृष्टि (ब्रह्मा की बनाई सृष्टि) के दर्पणभूत, उस प्रकार के साहित्य को

नमन करता हूँ जिसमें प्राचीन काल में घटित अतीत (भी) प्रत्यक्षवत् परिलक्षित होता है।।१५।।

जिस साहित्य की महिमा से ही गौतमादि महर्षि तथा कालिदासादि कविगण निरन्तर जी रहे हैं।।१६।।

अपनी मन्द मुस्कान के प्रसार-मात्र से अज्ञानान्धकार को विनष्ट करने के लिये (सतत) सन्नद्ध (समुद्यत) रहने वाली साहित्य-देवता हंसवाहिनी सरस्वती को प्रणाम करता हूँ।।१७।।

जो (सरस्वती) अन्तःकरण में प्रविष्ट होकर सामान्य मनुष्य को भी महाकवीश्वर बना देती है उस वागधिष्ठात्री शारदा को प्रणाम करता हूँ।।१८।।

शब्दार्थ-प्रकरण (यहाँ समाप्त हुआ)

॥अथ शब्दशक्तिप्रकरणम्॥

शक्तिशक्तिमतोरैक्यं सम्मतं हि विपश्चिताम्।
सृष्टिगूढरहस्यानि व्याख्येयानि न तद् विना।।१९।।

शिवोऽपि शवतां याति यदभावेऽप्यकिञ्चनः।
शक्तिं तां नितरां वन्दे सृष्टिमूलां महेश्वरीम्।।२०।।

शक्यते हि ययेत्येव व्युत्पत्त्या शक्तिरिष्यते।
संवलितस्तया शक्त्या यः कोऽपि शक्तिमान्भवेत्।।२१।।

शक्त्या ह्लादयते चन्द्रः शक्त्या तापयते रविः।
शक्त्या दाहयते वह्निः शक्त्या शीतयते जलम्।।२२।।

शक्त्या शोषयते वायुः शक्त्याऽऽकर्षति मेदिनी।
शक्त्यैव क्रियते किञ्चित् शोभनं वाऽप्यशोभनम्।।२३।।

शब्दब्रह्ममये चास्मिन् वाङ्मयेऽपि तथैव भोः।
शक्त्यैव निजया शब्दः स्वाभिप्रायं प्रकाशते।।२४।।

तिस्र एव भवन्तीह ताः शब्दस्य शक्तयः।
अभिधा प्रथमा तत्र लक्षणाव्यञ्जने ततः।।२५।।

अथाऽभिधा-

तत्राद्यामभिधामेव मुख्यामाख्यान्ति कोविदाः।
लोकस्संवदति प्रायो मिथो मुख्यतयाऽनया।।२६।।

निश्चितस्यैव शब्दस्य निश्चितार्थेन केनचित्।
निश्चितो यो हि सम्बन्धस्सङ्केतस्स समुच्यते।।२७।।

शक्ति और शक्तिमान् का ऐक्य विद्वज्जनों को स्वीकार है। विना उसे स्वीकार किये सृष्टि के गूढ रहस्यों को व्याख्यात कर पाना कठिन है।।१९।।

जिसके अभाव में अकिञ्चन हुआ शिव भी **शवता** को प्राप्त हो जाता है, सृष्टि-रचना के मूल में विद्यमान उस महेश्वरी **शक्ति** की निरन्तर वन्दना करता हूँ।।२०।।

जिसके द्वारा सका (समर्थ हुआ) जाय, इसी व्युत्पत्ति के द्वारा शक्ति का अर्थ समझ में आता है (अर्थात् वही शक्ति है) उस शक्ति से जो कोई भी सम्पृक्त हो वही शक्तिमान् है।।२१।।

(अपनी ह्लादिनी) शक्ति से ही चन्द्रमा आह्लादित करता है (अपनी तापिनी) शक्ति से ही रवि सन्तप्त करता है (अपनी दाहिका) शक्ति से ही अग्नि दग्ध करता है और अपनी (शैशिरी) शक्ति से ही जल शीतल करता है।।२२।।

(अपनी शोषिणी) शक्ति से ही वायु शोषण करता है (सुखाता है) (अपनी आकर्षिणी) शक्ति से ही धरित्री आकृष्ट करती है। वस्तुतः शक्ति के ही द्वारा शोभन अथवा अशोभन कुछ भी किया जा सकता है।।२३।।

शब्द-ब्रह्ममय इस वाङ्मय में भी, ठीक उसी प्रकार, शब्द अपनी शक्ति से ही अपने अभिप्राय (अर्थ) का प्रकाशन करता है।।२४।।

शब्द की वे शक्तियाँ तीन ही होती हैं इस लोक में, उनमें प्रथम तो है- अभिधा तथा अन्य दो हैं लक्षणा एवं व्यञ्जना।।२५।।

इन तीनों शब्द-शक्तियों में पहली अभिधा को ही विद्वजन **मुख्या** भी मानते हैं (क्योंकि) समाज प्रायः पारस्परिक संवाद (वाग्व्यवहार) मुख्यतः इसी के माध्यम से सम्पादित करता है।।२६।।

निश्चित ही (अर्थात् किसी एक विशिष्ट) शब्द का किसी निश्चित अर्थ के साथ जो निश्चित (स्थिर) सम्बन्ध होता है उसे **संकेत** (सम्बन्ध) कहा जाता है।।२७।।

सङ्केतितस्स एवार्थो बोध्यतेऽभिधया पुनः।
शब्दोऽत्र वाचको ज्ञेयो वाच्यश्चार्थोऽपि मुख्यभाक्।।२८।।

केन सङ्केतसम्बन्धो वाच्यवाचकमध्यगः।
निश्चितोऽयं किमर्थं वा तदिदानीं समुच्यते।।२९।।

ईश्वरेच्छाभिजातोऽयं सम्बन्ध इति केचन।
अपरे शब्दशास्त्रज्ञैः कल्पितं तं हि मन्वते।।३०।।

वाच्योऽर्थोऽयं पदेनानेनेति प्राञ्चो महर्षयः।
कोशादिमाध्यमेनैव निरचैषुर्हितैषिणः।।३१।।

सिद्धशब्दार्थसम्बन्धस्येदृशी सा परम्परा।
सम्प्रवृत्ता ततश्चैव पोषितोत्तरसूरिभिः।।३२।।

ईश्वरेच्छा महर्षीच्छा बुधेच्छा वाऽथ मन्यताम्।
तयेच्छयैव सङ्केतसम्बन्धोऽयं नियन्त्रितः।।३३।।

सङ्केतितं तमेवार्थं लोकसंवादगोचरम्।
आददानाऽभिधा शक्तिः शब्दशास्त्रे महीयते।।३४।।

शब्दशास्त्रे व्याकरणे महीयते माहात्म्यं भजते। वस्तुतोऽभिधेयार्थ एव मुख्यो लौकिकश्चार्थः। लक्ष्यार्थव्यङ्ग्यार्थौ पुनरमुख्यावलौकिकौ एव। मुख्यार्थे बाधिते सत्येव लक्ष्यार्थस्य मुख्यार्थसम्बद्धस्य लक्षितार्थस्य कस्यचित्सम्भावना समुदेति। एवमेव मुख्यार्थे साकाङ्क्षेऽपर्याप्ते सत्येव देशकालाद्यौचित्यवशाद् व्यङ्ग्यार्थस्यापि सन्दर्भस्समापतति।

वही संकेतित अर्थ (सुनिश्चित अभिप्रायं) अभिधा शक्ति द्वारा बोधित किया जाता है। इस (प्रक्रिया) में शब्द वाचक होता है और अर्थ भी, जिसे मुख्यार्थ कहते हैं, वाच्य होता है।।२८।।

वाच्य (अर्थ) एवं वाचक (शब्द) के बीच विद्यमान यह संकेत सम्बन्ध किसके द्वारा निश्चित किया गया अथवा किस निमित्त किया गया, अब उसे बताते हैं।।२९।।

कुछेक विद्वानो का कहना है कि (शब्द एवं अर्थ के बीच विद्यमान) यह (सुनिश्चित) सम्बन्ध परमेश्वर की (ही) इच्छा से उत्पन्न हुआ है। अन्य विद्वज्जन इसे शब्दशास्त्रज्ञों (वय्याकरणों) द्वारा कल्पित कियागया मानते हैं।।३०।।

अमुक अर्थ अमुक पद के द्वारा वाच्य (बोध्य) है, लोकहितैषी प्राक्तन महर्षियों ने कोशादि ग्रंथों के माध्यम से ऐसा निश्चय किया।।३१।।

सिद्ध (सुनिश्चित) शब्दार्थ-सम्बन्ध की इस प्रकार की वह परंपरा तभी से चल पड़ी जिसे परिपुष्ट किया परवर्ती वय्याकरणों ने।।३२।।

अब चाहे उसे ईश्वर की इच्छा मानें या महर्षियों की इच्छा या फिर वय्याकरणों की इच्छा! उसी इच्छा के द्वारा यह संकेत-सम्बन्ध नियंत्रित है।।३३।।

लौकिक वाग्व्यवहार में दिखाई पड़ने वाले उसी संकेतित अर्थ को आत्मसात् करने वाली अभिधा शक्ति शब्दशास्त्र (व्याकरण) में प्रतिष्ठित है।।३४।।

शब्दशास्त्र अर्थात् व्याकरण में प्रतिष्ठित है। वस्तुतः (अभिधा से आने वाला) अभिधेय अर्थ ही **मुख्य** अथवा **लौकिक** अर्थ है। लक्ष्यार्थ तथा व्यङ्ग्यार्थ तो **अमुख्य** अथवा **अलौकिक** ही हैं। मुख्यार्थ के बाधित होने की स्थिति में ही लक्ष्यार्थ अर्थात् मुख्यार्थ से (यथाकथञ्चित्) सम्बद्ध किसी लक्षित अर्थ की संभावना बन पाती है। इसी प्रकार मुख्यार्थ के **साकाङ्क्ष** (सहृदयचित्तविश्रान्त्यक्षम) अथवा **अपर्याप्त** होने की स्थिति में ही, देश-कालादि के औचित्यवश व्यङ्ग्यार्थ का भी सन्दर्भ आ पाता है।

एवं हि लौकिको मुख्यार्थ एवाऽभिधेयार्थसङ्केतितार्थाऽपरसंज्ञोऽलौकिकयोरमुख्यार्थभूतयोर्लक्ष्यार्थव्यङ्ग्यार्थयोः समवतरणसम्भावनापीठमिति मत्वोक्तं शब्दशास्त्रे महीयत इति। सकलमेव वेदपुराणशास्त्रकाव्यादिवाङ्मयं प्रायेणाभिधेयार्थमयमेव परिलक्ष्यते, न तावल्लक्ष्यार्थमयं न चापि व्यङ्ग्यार्थमयम्। सम्प्रति प्रस्तूयन्ते वाच्यार्थनामान्तराणि।

बोध्यते योऽनयैवाऽर्थस्स मुख्योऽर्थः प्रकीर्तितः।
स वाच्यस्सोऽभिधेयार्थस्सङ्केतार्थोऽप्यसौ पुनः।।३५।।

यथा गौरिति शब्दस्य सास्नादिमच्चतुष्पदे।
सङ्केतो निश्चितस्तस्माद् गौर्न गर्दभवाचकः।।३६।।

तत्र वाच्यार्थोदाहरणं यथा ममैव जानकीजीवनमहाकाव्ये-

न च ससार पुरो न च पृष्ठतो न खलु दक्षिणतो न च वामतः।
उपरि नैव ददर्श न वाऽप्यधो ह्यचलमूर्तिरिवाजनि जानकी।।

सीताराघवयोः प्रथमसङ्गमे त्रपाभारभङ्गुराया जानक्याः स्थितिः। अत्र सर्वाण्यपि सुबन्ततिङन्तपदानि स्वसङ्केतितार्थान् प्रददति। अतएव सुस्पष्टोऽत्र वाच्यार्थः।

इस प्रकार, लौकिक मुख्यार्थ का ही दूसरा नाम अभिधेयार्थ एवं संकेतितार्थ (भी) है जो कि अलौकिक तथा अमुख्यार्थभूत लक्ष्यार्थ एवं व्यङ्ग्यार्थ के समवतरण का सम्भावना-पीठ बनता है-वही मानकर (कारिका में) कहा गया है कि शब्दशास्त्र में प्रतिष्ठित है। सारा का सारा वेद-पुराण, शास्त्र एवं काव्य का वाङ्मय प्रायः अभिधेयार्थमय (वाच्यार्थ-प्रचुर) ही परिलक्षित होता है, न कि लक्ष्यार्थमय और न ही व्यङ्ग्यार्थमय! अब वाच्यार्थ के अन्य नामों (पर्यायों) को प्रस्तुत करते हैं-

इस (अभिधा) के द्वारा ही जो अर्थ बोधित किया जाता है उसे **मुख्यार्थ** कहा जाता है। वह (शब्दों द्वारा) वाच्य होता है। उसी को **अभिधेयार्थ** अथवा **संकेतार्थ** भी कहते हैं।।३५।।

जैसे 'गौ' शब्द का संकेत सास्नादिमान् चतुष्पद (पशु) में निश्चित (नियत) है इसीलिये 'गौ' शब्द गर्दभ का वाचक (कथमपि) नहीं है।।३६।।

वाच्यार्थ का उदाहरण, जैसे मेरे ही **जानकीजीवन** महाकाव्य में-

न आगे बढ़ पाई, न पीछे। न दाहिनी ओर और नही बाईं ओर। न ऊपर देखती रही अथवा नही नीचे। जनकनन्दिनी सीता (अकस्मात् राघव के समक्ष आ पड़ने पर) मूर्ति सी स्थिर बन गई।

सीता और राघव के प्रथम संगम में लज्जा के भार से अवनत जानकी की स्थिति का यह चित्रण है। यहाँ समस्त सुबन्त एवं तिङन्त पद अपने संकेतित अर्थ को प्रस्तुत कर रहे हैं। अतएव वाच्यार्थ यहाँ सुस्पष्ट है।

अथ लक्षणा-

लक्षणाऽथ द्वितीया सा शब्दशक्तिर्निरूप्यते।
कोविदानां प्रिया किञ्च त्रिस्थूणा या समुच्यते।।३७।।

लक्ष्यते चेदमुख्यार्थो मुख्यार्थे बाधिते सति।
रूढेः प्रयोजनाद्वाऽपि यया सा लक्षणा मता।।३८।।

मुख्याऽर्थोऽभिधीयत एव। सङ्केतसम्बन्धमाश्रित्य काव्यप्रयुक्तैः शब्दैः साक्षाद्रीत्योच्यत इत्यर्थः। अमुख्य एव काव्यार्थो यथोचितं लक्ष्यते व्यज्यते वा। यतो ह्यमुख्यार्थे शब्दानां न भवति सङ्केतः। तस्मादमुख्यार्थो न भवति कदापि सङ्केतितार्थः। सेयं लक्षणा त्रिस्थूणा। त्रिभिराधारस्तम्भैधृतेत्यर्थः। तत्र मुख्यार्थस्य बाधेति प्रथमा स्थूणा। मुख्यार्थेन सहाऽमुख्यार्थस्य कश्चिद्

पञ्चविधाऽन्यतमो विशिष्टसम्बन्ध इति द्वितीया स्थूणा। प्रक्रियायामस्यां कस्याश्चिद्रूढेः प्रयोजनस्य वा सद्भाव इति तृतीया स्थूणा। त्रिस्थूणावलम्बनत्वादेव लक्षणेयमारोपिता क्रियाऽङ्गीक्रियते, न पुनस्स्वाभाविकी।

यथा संसद् ब्रवीतीति प्रयोगे लक्षणा। अत्र सम्यग्रूपेण सीदन्त्यस्यामिति व्युत्पत्त्या संसच्छब्दो भवनार्थकः। सभाभवनं परिषद्वेति। सा च संसद् वक्तुं न शक्नोतीति मुख्यार्थबाधः। अतएव-

अब वह दूसरी शब्दशक्ति लक्षणा निरूपित की जा रही है जो कोविदों (पण्डितों) को प्रिय है, साथ ही साथ, जिसे **त्रिस्थूणा** कहा जाता है।।३७।।

मुख्यार्थ के बाधित होने पर यदि रूढि अथवा प्रयोजनवश अमुख्य अर्थ लक्षित होता है तो जिस (शब्दशक्ति) के द्वारा वह लक्षित होता है उसे **लक्षणा** कहते हैं।।३८।।

मुख्य अर्थ तो वाच्य ही होता है। अर्थात् संकेत-सम्बन्ध का आश्रय लेकर वह काव्य में प्रयुक्त शब्दों द्वारा, साक्षाद् रीति से अभिहित होता है। अमुख्य काव्यार्थ ही, जैसा उचित हो (प्रसंगानुसार) लक्षित अथवा व्यञ्जित होता है। क्योंकि अमुख्य अर्थ में शब्दों का (नियत) संकेत नहीं होता। इसीलिये अमुख्यार्थ (अर्थात् लक्ष्यार्थ अथवा व्यङ्ग्यार्थ) कभी भी सङ्केतितार्थ नहीं होता है।

यह लक्षणा **त्रिस्थूणा** है। अर्थात् यह तीन आधार-स्तम्भों पर थमी हुई है। इसमें पहली स्थूणा (स्तम्भ अथवा थून) है-मुख्यार्थ-बाधा। दूसरी स्थूणा है-मुख्यार्थ के साथ अमुख्यार्थ (लक्ष्यार्थ) का, पाँच प्रकार के (शास्त्रोक्त सम्बन्धों में से) कोई एक विशिष्टकोटिक सम्बन्ध। और तीसरी स्थूणा है-इस प्रक्रिया में किसी रूढ़ि अथवा प्रयोजन का सद्भाव।

त्रिस्थूणा के अवलम्बनवश ही यह लक्षणा **आरोपिता** क्रिया मानी जाती है न कि स्वाभाविकी।

जैसे **'संसद् कहती है'** इस प्रयोग में लक्षणा है। इस उदाहरण में 'सम्यक् रूप से जिसमें (लोग) बैठते हैं' इस व्याख्या के साथ संसद् शब्द भवनार्थक है। सभाभवन अथवा परिषद्। वह संसद् (सभाभवन) तो बोल पाने में समर्थ है नहीं। अतः मुख्यार्थ का बाध हुआ। अतएव,

अभिधेयेन सारूप्यात्सामीप्यात्समवायतः।
वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता।।

इति नियमात्संसदा सह समवायसम्बन्धेन सम्बद्धत्वात्सांसदरूपोऽर्थो ग्रहीतुं शक्यते। एवंकरणे सति सार्वभौमराष्ट्रसर्वोच्चविधायिकात्वात्संसद्वचनस्यावश्यङ्करणीयत्वमेवाऽत्र प्रयोजनम्।

यथा वा पञ्चनदश्शूर इत्यस्मिन् प्रयोगे पञ्चनदशब्दस्स्वार्थेऽसम्भवन् भूखण्ड-विशेषादिरूपे संवलितानात्मनिवासिनो युद्धविशारदान् बोधयति। कोऽत्र हेतुः? रूढिरिति। चिरकालादेवाऽक्रमणकारिभिर्यवनशककुषाण-खसहूणतुरुष्कादिभिस्सार्धं तुमुलसङ्गरनिरतत्वात्पञ्चनदवासिनां युद्धशूरत्वं सर्वथा रूढमेव।

लक्षणैवोदिता भक्तिर्गुणवृत्तिरपि ध्रुवम्।
तस्माल्लक्ष्यार्थ एवैष भाक्तो गौणोऽपि सम्मतः।।३९।।

लक्षणापर्यायत्वेन प्रयुक्ता भक्तिस्सर्वथाऽन्वर्थनाम्नी प्रतीयते। यतो हि सर्वमपि वैशिष्ट्यं लक्षणाप्रयोगस्य भक्तिशब्दोऽयं चरितार्थयति। तथा हि, मुख्यार्थस्य भङ्गो भक्तिः। तत आगतोऽर्थो भाक्तः। ततश्च भज्यते सेव्यते कोविदेनेति भक्तिर्धर्मोऽभिधेयेन सारूप्यादिपञ्चविधसम्बन्धरूपः। तत आगतोऽर्थो भाक्तः। गुणवृत्तेः शब्दस्याऽर्थभागस्तैक्ष्ण्यादिर्भक्तिः। तत आगतोऽर्थो भाक्तः। अन्ते च सामीप्यादिसम्बन्धे तैक्ष्ण्यादिगुणे वा श्रद्धातिशयोऽपि भक्तिः। तत आगतोऽर्थो भाक्तः।

वाच्यार्थ के साथ-सारूप्य, सामीप्य, समवाय, वैपरीत्य तथा क्रियायोग (सम्बन्ध होने) के कारण लक्षणा पाँच प्रकार की मानी जाती है।

इस नियम से संसद् के साथ समवाय-सम्बन्ध से सम्बद्ध होने के कारण सांसद रूप अर्थ यहाँ ग्रहण किया जा सकता है। ऐसा करने पर प्रयोजन होगा-सार्वभौम राष्ट्र की सर्वोच्च विधायिका होने के कारण संसदीय घोषणा की अवश्यङ्करणीयता!

अथवा जैसे पञ्चनद (पंजाब) शूर (बहादुर) है इस प्रयोग में पञ्चनद शब्द स्वार्थ में असम्भव (बाधित) होता हुआ, भूखण्ड-विशेषादि के रूप में स्वयं से सम्बद्ध अपने युद्धविशारद निवासियों को बोधित करता है। यहाँ हेतु क्या है? रूढ़ि ही हेतु है। चिरकाल से ही आक्रमणकारी यवनों, शकों, कुषाणों, खसों, हूणों तथा तुर्कों आदि के साथ भयावह युद्ध करते-करते पंजाबियों की युद्धशूरता सर्वथा रूढ हो उठी है।

लक्षणा ही, निश्चित रूप से, भक्ति अथवा गुणवृत्ति भी कही गई है। इसलिये यह लक्ष्यार्थ ही **भाक्त** अथवा **गौण** अर्थ भी माना गया है।।३९।।

लक्षणा के पर्याय रूप में प्रयुक्त **भक्ति** (शब्द) सर्वथा सार्थक नाम वाली प्रतीत होती है। क्योंकि लक्षणा के प्रयोग की समस्त विशेषताओं (औपचारिकताओं) को यह **भक्ति** शब्द ही चरितार्थ करता है। जैसे कि मुख्यार्थ का **भंग** (बाधा) ही भक्ति है। अतः उससे आने वाला अर्थ **भाक्त** अर्थ हुआ। इसके अनन्तर जो कोविद (विद्वान्) द्वारा भजा जाय, सेवित किया जाय वह **धर्म** ही भक्ति है जो कि वाच्यार्थ के साथ सम्बद्ध पञ्चविध सम्बन्ध-रूप होता है। उससे आने वाला अर्थ **भाक्त** हुआ। गुणवृत्ति अर्थात् (संकेतार्थ की बजाय अपने) गुण द्वारा अर्थ का प्रकाशन करने वाले शब्द का जो तैक्ष्ण्यादि रूप अर्थ भाग है (सिंहो माणवकः आदि प्रयोग में) वही भक्ति है। उससे आने वाला अर्थ **भाक्त** हुआ। और अन्त में सामीप्यादि सम्बन्ध में अथवा तैक्ष्ण्यादि गुण में श्रद्धातिशय होना भी भक्ति है। उससे आने वाला अर्थ **भाक्त** हुआ।

शुको माणवक इत्यत्र शुकशब्दस्सङ्केतितार्थेऽसम्भवन्नपि आत्मगुणेन वाचालत्वरूपममुख्यमर्थं प्रतिपादयति। ततश्च वाचालो माणवक इति सङ्गतार्थः कश्चिदुदेति। तदत्र लक्षणाया गुणवृत्तित्वं सम्यक्तया स्फारीभवति।

तदेवं गुणैः सामीप्यादिभिर्धर्मैस्तैक्ष्ण्यादिभिश्च वृत्तिरर्थान्तरे यस्य स शब्दः, तैर्गुणधर्मोपायैर्वृत्तिर्वा शब्दस्य यत्र सोऽर्थः, गुणद्वारेण वा वर्तनं गुणवृत्तिरमुख्योऽभिधाव्यापार इति शब्दार्थव्यापारात्मकं त्रितयमेव गुणवृत्तिपदेन बोधितं भवति।

सेयं द्विधा बुधैः ख्याता साऽद्या लक्षणलक्षणा।
उपादानवती चान्या संक्षेपेण निगद्यते।।४०।।

यत्रार्पणं निजार्थस्य लक्ष्यार्थान्वयसिद्धये।
उपलक्षणभूतत्वादेषा लक्षणलक्षणा।।४१।।

यत्राऽत्मान्वयसिद्ध्यर्थममुख्यार्थोऽपि कश्चन।
मुख्येनाऽक्षिप्यते ख्याता सैवोपादानलक्षणा।।४२।।

संसद् ब्रवीतीत्यत्र पञ्चनदश्शूर इत्यत्र च लक्षणलक्षणा। उभयत्रापि संसत्पञ्चनदशब्दावुपलक्षणभूतौ लक्ष्यार्थस्य। तत्रापि प्रथमे उदाहरणे लक्षणलक्षणा प्रयोजनमूला। द्वितीये चोदाहरणे सा रूढिमूला।

बच्चा सुआ (टुइयाँ) है इस प्रयोग में शुक शब्द सङ्केतित (पक्षिविशेष) अर्थ में बाधित होता हुआ भी अपने गुण द्वारा **वाचालता** रूप अमुख्य अर्थ को प्रतिपादित कर रहा है। इसलिये **बच्चा वाचाल** (**मुखर**) है इस प्रकार का कोई संगत अर्थ प्रकट हो रहा है। ता फिर वहाँ (इस उदाहरण में) लक्षणा का **गुणवृत्ति** होना सम्यक् रूप से स्पष्ट हो रहा है।

तो इस प्रकार-गुणों अर्थात् सामीप्यादि धर्मों अर्थात् तैक्ष्ण्यादि के द्वारा (संकेतार्थ की बजाय) अर्थान्तर में हो वृत्ति जिसकी वह **शब्द**, उन गुणों एवं धर्मों के उपायों से शब्द की वृत्ति (सम्प्रेषण) हो जिसमें वह **अर्थ** तथा गुणों द्वारा होने वाला **वर्तन** अर्थात् गुणवृत्ति-रूप अमुख्य अभिधाव्यापार-इस प्रकार शब्द, अर्थ एवं व्यापारपरक तीनों ही अर्थ **गुणवृत्ति** पद से बोधित हो जाता है।

वह यह लक्षणा आचार्यों द्वारा दो प्रकार की बताई गई है, जिनमें प्रथम है-**लक्षणलक्षणा** और दूसरी है-**उपादानवती**। संक्षेप में (इन्हें) बताया जा रहा है।।४०।।

लक्ष्यार्थ के अन्वय की सिद्धि के लिये जहाँ अपने-अपने (भी) अर्थ को अर्पित कर दिया जाता है (लक्ष्यार्थ का) उपलक्षणभूत होने के कारण इसे **लक्षणलक्षणा** कहते हैं।।४१।।

और जहाँ अपने अन्वय की सिद्धि के लिये कोई अमुख्य भी अर्थ मुख्यार्थ के द्वारा आक्षिप्त (उपादत्त) कर लिया जाता है उसी को **उपादान लक्षणा** कहा जाता है।।४२।।

संसद् कह रही है तथा पञ्चनद शूर है-इन उदाहरणों में लक्षणलक्षणा है। दोनो ही उदाहरणों में **संसद्** और **पञ्चनद** शब्द (अपने) लक्ष्यार्थ (सांसद तथा पञ्जाबी जनता) के उपलक्षणभूत हैं। इनमें भी, पहले उदाहरण में लक्षणलक्षणा **प्रयोजनमूला** है जबकि दूसरे में **रूढिमूला**।

अथ कृष्णा दुह्यते इत्यत्र अर्धोरुका अभ्यस्यन्तीत्यत्र च वर्तत एवोपादानलक्षणा, आदौ रूढितः पश्चाच्च प्रयोजनवशात्। अत्र दोहाऽभ्यसनक्रिययोः कर्तृत्वे कृष्णार्धोरुकावक्षमावचेतनतयेतिकृत्वा सङ्गत्यर्थं धेनुप्रभृतयः रक्षिप्रभृतयश्चाक्षिप्यन्ते। अत्र मुख्यार्थयोरप्यात्मोपादानमित्यलमतिविस्तरेण। लक्षणाप्रपञ्चोऽयं प्रपञ्चप्रियैः पूर्वाचार्यैः साटोपं प्रपञ्चितमेव स्वोपज्ञालङ्कारशास्त्रग्रन्थेषु। तत्रैव द्रष्टव्यं भूरिविस्तररसिकैः।

अथ व्यञ्जना-

योऽर्थः सहृदयश्लाध्य उच्यते न च लक्ष्यते।
वर्षयेव मृदागन्धः केवलं व्यज्यते पुनः।।४३।।

लावण्यप्रतिमस्सोऽर्थो व्यङ्ग्यार्थः कोविदैर्मतः।
प्रत्याय्यते शब्दशक्त्या निपुणं व्यञ्जनाख्यया।।४४।।

व्यञ्जना प्रतिभामूला शब्दशक्तिर्विलक्षणा।
सूते या ज्योतिरुन्मेषान् दामिनीव नवाशयान्।।४५।।

अब **कृष्णा दुही जा रही है** इस उदाहरण में तथा **अर्धोरुक** (हॉफ पैण्ट) **अभ्यास कर रहे हैं** इसमें **उपादानलक्षणा** ही है। प्रथम उदाहरण में **रूढि** के कारण तथा दूसरे में **प्रयोजन** के कारण। यहाँ **दोहन** तथा **अभ्यसन** क्रियाओं के कर्तृत्व (सम्पादन) में, अचेतन होने के कारण, **कृष्णा** तथा **अर्धोरुक** असमर्थ हैं अतएव अर्थ को संगत बनाने के लिये (कृष्णा के साथ) धेनु आदि तथा (अर्धोरुक के साथ) सिपाही आदि का आक्षेप कर लिया जाता है (अर्थात् काली गाय दुही जा रही है, **अर्धोरुक** रक्षीगण अभ्यास कर रहे हैं) यहाँ अमुख्यार्थों का भी उपादान किया जा रहा है। इस प्रकार, अब अधिक विस्तार नहीं, लक्षणावृत्ति का यह विस्तार, प्रपञ्च-प्रिय पूर्वाचार्यों द्वारा, अपने अलंकारशास्त्रीय ग्रंथों में खूब बढ़ा-चढ़ा कर वर्णित किया गया है। भूरि विस्तार के प्रेमी पाठकों को वहीं देखना चाहिये।

सहृदयों द्वारा प्रशंसित जो अर्थ, न तो बोधित किया जाता है नही लक्षित, प्रत्युत जो वर्षा के द्वारा मिट्टी की (तिरोहित) गन्ध के समान, केवल व्यक्त (प्रकाशित) किया जाता है।।४३।।

लावण्य-प्रतिम वही अर्थ आचार्यों द्वारा **व्यङ्ग्यार्थ** कहा गया है तथा व्यञ्जना नामक शब्दशक्ति के द्वारा भलीभाँति अनुभूत कराया जाता है।।४४।।

प्रतिभा से जन्मी व्यञ्जना (एक) विलक्षण शब्दशक्ति है जो विद्युल्लता के समान नये-नये आशयों (रूपों अथवा अभिप्रायों) वाले ज्योतिरुन्मेषों (प्रभाभासों अथवा नूतनाभिप्रायों) की सृष्टि करती है।।४५।।

अभिधारुचिका लोकाः पण्डिता लक्षणानुगाः।
व्यञ्जनाजीविताः प्राज्ञाः कवयः क्रान्तदर्शिनः।।४६।।

येन लोकोत्तरार्थेन काव्यं खलु महीयते।
व्यञ्जनाहेतुकस्सोऽपि नाऽन्यथाऽवाप्तुमिष्यते।।४७।।

काव्ये यदा स वाच्यार्थो भात्युन्मत्तप्रलापवत्।
त्रिस्थूणस्सोऽपि लक्ष्यार्थो घटते नैव युक्तितः।।४८।।

महाकविप्रणीतत्वात्तस्मिन् काव्ये बुधास्तदा।
व्यङ्ग्यमर्थं विचिन्वन्ति व्यञ्जनाशक्तिभासितम्।।४९।।

तत्र शब्दः स्ववाच्यार्थमर्थश्चात्मानमप्यसौ।
गौणं विधाय संव्यङ्क्तो व्यङ्ग्यार्थं तं विलक्षणम्।।५०।।

वाच्यवाचकयोर्भिन्नस्तन्महिम्नैव सन्नपि।
देशकालानुरोधेन यतस्सोऽयं प्रतीयते।।५१।।

तस्मात्प्रतीयमानार्थसंज्ञामपि समागतः।
विद्वज्जनसमज्यायां प्रातिभोऽयं महीयते।।५२।।

(सामान्यजन) समाज तो अभिधा में रुचि रखता है, पण्डित लोग लक्षणा के अनुगामी होते हैं (परन्तु) क्रान्तदर्शी कवि एवं प्राज्ञजन व्यञ्जना को ही सर्वस्व मानते हैं।।४६।।

जिस लोकोत्तर अर्थ से काव्य महिमान्वित होता है वह भी व्यञ्जनावृत्ति से ही मिल पाता है, किसी और प्रकार से प्राप्त नहीं हो पाता।।४७।।

जब काव्य में वह (प्रसिद्ध) वाच्यार्थ उन्मत्तप्रलापवत् प्रतीत होने लगे और त्रिस्थूण (तीन शर्तों की पूर्ति से संभव) लक्ष्यार्थ भी, युक्तितः न घट पाये।।४८।।

तब (किसी) महाकवि द्वारा प्रणीत (अतएव निरर्थक न) होने के कारण, उस काव्य में सहृदयजन व्यञ्जना शक्ति से भासित होने वाले व्यङ्ग्यार्थ को खोजते हैं।।४९।।

उस काव्य में शब्द अपने वाच्य अर्थ को तथा वह अर्थ भी स्वयं को गौण बना कर उस विलक्षण व्यङ्ग्य अर्थ को व्यक्त (प्रकाशित) करने लगते हैं (समवेत भाव से)।।५०।।

(इस प्रकार) वाच्य एवं वाचक से भिन्न होता हुआ भी, उन्हीं की (शाब्दी व्यञ्जना में शब्द की तथा आर्थी व्यञ्जना में अर्थ की) महिमा से चूँकि यह व्यङ्ग्यार्थ, देश-कालादि के अनुरोधवश प्रतीत हो पाता है।।५१।।

इसीलिये विद्वज्जनों के समवाय में, प्रतिभाप्रसूत यह अर्थ प्रतीयमानार्थ की भी संज्ञा को प्राप्त कर प्रतिष्ठित होता है।।५२।।

उच्यते न च लक्ष्यते इत्यत्र देहलीदीपकन्यायेन नकार उभयमपि विशिनष्टि। नोच्यते न च लक्ष्यत इत्यभिप्रायः। अभिधेयार्थ एव साक्षात्सङ्केतितः काव्यप्रतिपादितैः शब्दैरुच्यते। एवमेव लक्ष्यार्थोऽपि गङ्गायां घोष इति प्रसिद्धोदाहरणे गङ्गातटरूपो गङ्गायामित्यनेन पदेनोपलक्षणीभूतेन लक्ष्यत एव। एवमुभयतोऽपि व्यावृत्तिर्व्यङ्ग्यार्थस्य। यतो हि व्यङ्ग्यार्थः केवलं व्यज्यते। क्वचित्तमोगह्वरे विलीनस्सन् प्रकाश्यते। कथम्? मृदागन्धो वर्षयेव। यथा मृल्लोष्टे विद्यमानोऽपि गन्धो वर्षाभावे नोत्तिष्ठति अप्रत्यभिज्ञात एव विलीनस्तिष्ठति तथैव प्रतीयमानार्थोऽयं शब्दार्थान्तराले विलसन्नपि प्रतिभाप्रकर्षसंस्पर्शाभावे देशकालाद्यनुरोधाभावे नाऽभिव्यज्यते।

लावण्यप्रतिमोऽयं व्यङ्ग्यार्थः। तद्यथाऽह ध्वन्यालोककारः-

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धाऽवयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।

तद्यथा रमणीगात्राङ्गसौष्ठवपृथङ्निर्वर्ण्यमानलावण्यानुभूत्यर्थं सहृदयत्वमपेक्ष्यते न पुनर्दृष्टिमात्रं तथैव व्यङ्ग्यार्थानुभूत्यर्थमपि सहृदयत्वमात्रमपेक्ष्यते न पुनः पाण्डित्यं लोकशास्त्रकाव्याद्यवेक्षणजन्यम्। सहृदयत्वं नाम किम्? अत्राह महामाहेश्वरोऽभिनवगुप्तपादाचार्यः-येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते हृदयसंवादभाजस्सहृदयाः इति।

न बोधित होता है, न लक्षित-इस कथन में नकार देहली-दीपकन्याय से दोनों को ही ग्रहण कर रहा है। इसका अभिप्राय है कि (वह व्यङ्ग्यार्थ) न वाच्य होता है, न ही लक्ष्य! साक्षात् संकेतित अभिधेयार्थ ही कविता में प्रयुक्त किये गये शब्दों द्वारा बोधित होता है। इसी प्रकार, प्रसिद्ध उदाहरण गंगायां घोषः में गंगातट-रूप लक्ष्यार्थ भी, उपलक्षणीभूत गङ्गायाम् पद के द्वारा लक्षित ही किया जाता है। इस प्रकार, दोनो ही से व्यङ्ग्यार्थ की व्यावृत्ति (पृथक्ता) है।

क्योंकि व्यङ्ग्यार्थ तो केवल अभिव्यक्त होता है (न कि बोधित अथवा लक्षित) कहीं अन्धकार के गर्भ में छिपा-बैठा सा प्रकाशित होता है। कैसे? वर्षा के द्वारा (प्रकाश्यमान) मिट्टी की गन्ध के समान! जैसे मिट्टी के ढेले में छिपी हुई भी गन्ध, वर्षा के अभाव में उठ नहीं पाती (ढेले से बाहर नहीं आ पाती) अनभिव्यक्त (अननुभूत) रहती हुई ही छिपी बैठी रह जाती है ठीक उसी प्रकार

यह प्रतीयमानार्थ भी शब्दार्थ के भीतर विद्यमान होते हुए भी, प्रतिभा-प्रकर्ष के संस्पर्श के अभाववश, देश-कालादि के अनुरोध के अभाव में अभिव्यक्त (प्रकाशित) नहीं हो पाता।

लावण्य के समान है यह व्यङ्ग्यार्थ। जैसा कि ध्वन्यालोककार आचार्य आनन्दवर्धन ने कहा है-

प्रतीयमान अर्थ तो महाकवियों की वाणी में विद्यमान कोई विलक्षण ही वस्तु (तत्त्व) है जो अंगनाओं में (विद्यमान उनके) प्रसिद्ध (प्रत्यक्ष दीखने वाले आँख, कान, नासा, मुखादि) अंगों से (सर्वथा) अतिरिक्त लावण्य तत्त्व की भाँति प्रतिभासित होता है।

तो फिर जैसे रमणी के शरीर में अंग-सौष्ठव (सौन्दर्य) से पृथक् दिखाई पड़ने वाले **लावण्य** की अनुभूति के लिये भी सहृदयतामात्र की अपेक्षा होती है, न पुनः (सौन्दर्य परखने वाली) दृष्टि की-ठीक उसी प्रकार व्यङ्ग्यार्थ की भी अनुभूति के लिये सहृदयता मात्र की अपेक्षा होती है न कि लोक-शास्त्र काव्यादि के परिशीलन से प्राप्त पाण्डित्य की!

वह **सहृदयता** क्या है? इस सन्दर्भ में महामाहेश्वर अभिनवगुप्तपादाचार्य कहते हैं-काव्यानुशीलन के अभ्यासवश मनरूपी दर्पण के निर्मल हो जाने पर जिन्हें वर्णनीय पात्रों के साथ तन्मय हो जाने की योग्यता (क्षमता) प्राप्त हो जाती है, उन पात्रों के हृदय से संवाद (तादात्म्य) स्थापित करने वाले वे ही सहृदय हैं।

किञ्च, काव्यार्थस्य लोकोत्तरत्वं व्यङ्ग्यार्थेनैव सिध्यति न तावद् वाच्यार्थेन लक्ष्यार्थेन वा। तद्यथा-

आदाय मांसमखिलं स्तनवर्जमङ्गा-
न्मां मुञ्च वागुरिक! याहि कुरु प्रसादम्।
अद्यापि घासकवलग्रसनाऽनभिज्ञो
मन्मार्गवीक्षणपरस्तनयो मदीयः।।

पद्येऽस्मिन् वागुरिकशरप्रहारनिहताया अपि कस्याश्चिद्धरिणवध्वा यद् विलक्षणवात्सल्यं घासकवलग्रसनानभिज्ञं द्व्यहीनं त्र्यहीनं वा वत्सकं प्रति प्रतिभोद्भुरेण कविना प्रकाशितं तदेव लोकोत्तरत्वम्। अन्यथा वाच्यार्थोऽस्य पद्यस्योन्मत्तप्रलापकल्प एव। न खलु मृता हरिणी स्तन्यं

पाययितुं क्षमा, न चापि वागुरिकमनुनेतुं समर्था? न चापि पद्येऽस्मिन् मुख्यार्थबाधादिप्रसङ्गो येन लक्ष्यार्थसम्भावना स्यात्। परन्तु प्रक्रान्तमतिमहाकविनिबद्धत्वात्पद्येनानेनावश्यमेव सार्थकेन भवितव्यमेव। सा सार्थकताऽत्र व्यञ्जनयैव सम्भवति।

यथा दर्शितमिथ्यापराक्रमेषु सर्वेष्वपि भूपेषु रामो बभञ्ज पिनाकाख्यं शैवं धनुस्तथैव पराभूतायामभिधायां लक्षणायाञ्च व्यञ्जनाशक्तिरेव पिनाककल्पं प्रतीयमानार्थमुत्थाप्योत्तोलयितुं क्षमा। तदेवाह साहित्यदर्पणकारः-

विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च।।

पुनश्च, काव्य की लोकोत्तरता (विलक्षणता) व्यङ्ग्यार्थ से ही सिद्ध होती है न कि वाच्यार्थ अथवा लक्ष्यार्थ से! जैसे कि,

मात्र स्तनभाग को छोड़कर, मेरे अंगों से सारा मांस लेकर हे बहेलिये! मुझे छोड़ देना। चले जाना, मुझ पर कृपा करना (मात्र स्तनभाग को क्यों छोड़कर?) आज भी घास के कौर को निगल पाने की विधि न जानने वाला (दो ही तीन दिन पहले उत्पन्न) मेरा शावक (छौना) मेरे लौटने की राह देख रहा होगा।

इस पद्य में बहेलिये के शर-प्रहार से मारी गई भी, किसी हिरनी की जो विलक्षण वत्सलता-घास का ग्रास निगलने की विधि न जानने वाले, दो या तीन दिन पहले ही उत्पन्न मृगशावक के प्रति-प्रतिभापटिष्ठ कवि द्वारा प्रकाशित की गई है, वही है लोकोत्तरता! अन्यथा तो इस पद्य का वाच्यार्थ उन्मत्त के प्रलाप जैसा ही है। (क्योंकि) मरी हुई हिरनी न दूध पिलाने में समर्थ हो सकती है और नही बहेलिये से अनुनय-विनय करने में! और नही इस पद्य में मुख्यार्थ-बाध आदि का प्रसंग है कि जिससे लक्ष्यार्थ की ही संभावना बन सके। परन्तु प्रक्रान्त-मति (किसी) महाकवि की रचना होने के कारण इस पद्य को सार्थक तो होना ही चाहिये। वह सार्थकता यहाँ व्यञ्जनावृत्ति से ही संभव हो पाती है।

जैसे झूठा पराक्रम दिखा चुकने वाले समस्त राजाओं के बैठ जाने पर, दाशरथि राम ने पिनाक नामक शिव-चाप को भग्न कर दिया उसी प्रकार अभिधा एवं लक्षणा के पराभूत हो जाने पर (एकमात्र) व्यञ्जना शक्ति ही पिनाक सरीखे प्रतीयमानार्थ को उत्थापित कर उत्तोलित करने में (अर्थात् काव्यगर्भ से बाहर लाकर सहृदयों को आस्वादित कराने में) समर्थ होती है।

साहित्यदर्पणकार (आचार्य विश्वनाथ) ने यही बात कही है-

अभिधा आदि के विरत (विश्रान्त) हो जाने पर जिस (शक्ति) के द्वारा दूसरा (विलक्षण) अर्थ बोधित कराया जाता है शब्द एवं अर्थादि की वही वृत्ति व्यञ्जना कही जाती है।

पद्येऽस्मिन् वाचकाः शब्दा वाच्यार्थान् वाच्यार्थाश्चाप्यात्मानमुपसर्जनीकृत्य कमपि विलक्षणमेवार्थं मिथस्सहयोगेन व्यङ्क्तः। स एव व्यङ्ग्यार्थः। काव्येऽस्यैव व्यङ्ग्यार्थस्य प्राधान्ये सति ध्वनिरिति यथावसरं व्याख्यास्यामः।

यत्रार्थसहकारेण शब्द एव प्रधानतः।
व्यञ्जकत्वं बिभर्त्येषा सा शाब्दी व्यञ्जना मता।।५३।।

भूयोऽपि साऽभिधामूला संयोगादिनियन्त्रिता।
अपरा लक्षणामूला कथिता लक्षणाश्रिता।।५४।।

शाब्दीव्यञ्जनायामर्थसहकारिताऽऽर्थीव्यञ्जनायाञ्च शब्दसहकारिता भवत्येव शब्दार्थशरीरत्वात्काव्यस्य। तत्रापि शाब्दी व्यञ्जना द्विविधा-अभिधामूला लक्षणामूला च। अनेकार्थस्य शब्दस्य संयोगादिमहिम्ना प्रकृतोपयोगिनि कस्मिंश्चिदर्थे नियन्त्रिते सति ययाऽन्यस्यार्थस्यावगतिर्जायते साऽभिधाश्रया व्यञ्जनेत्यवगन्तव्यम्। तत्राऽर्थनियन्त्रणहेतवो यथा-

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।।

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।

सभालचन्द्रो गङ्गाधर इत्यत्र भालचन्द्रयोगेन गङ्गाधरश्शिव एव न पुनर्हिमालयः। अभालचन्द्रो गङ्गाधर इत्यत्र तद्विप्रयोगेनापि शिव एव। रामकृष्णौ इत्यत्र रामो बलराम एव न पुनर्दाशरथिर्जामदग्न्यो वा, रामकृष्णसाहचर्यवशात्। अहिनकुलौ इत्यत्र नकुलस्सर्पारिः न खलु शिवः सर्पनकुल-विरोधिताप्रसिद्धिवशात्। कालिकां वन्दे इत्यत्र कालिका भगवती महिषासुरमर्दिनी न पुनर्मेघमाला। मेघजाले च कालिकेत्यमरः। प्रकरणं यथा सर्वं जानाति भर्तेत्यत्र भर्ता स्वामी न पुनः पतिः। लिङ्गं नाम धर्मविशेषस्तद्यथा-दयतां मयि सा शिवेत्यत्र शिवा शम्भुगृहिणी पार्वती

दयारूपधर्मावलम्बनत्वात् न पुनर्जम्बुकी। देवो मध्वरिर्जयेदित्यत्र देवशब्दसन्निधिवशात् मधुर्दैत्यविशेषो न पुनर्माक्षिकम्। ततश्च मध्वरिर्विष्णुः। सामर्थ्यं यथा-विरोचनेन दिनं स्फीतमिति। चन्द्राग्न्यर्का विरोचना इत्यमरः। तथापि दिवसस्फीतत्वे सूर्यस्यैव सामर्थ्यात् विरोचनोऽत्र सूर्य एव, न चन्द्राग्नी। औचित्यं यथा-श्रमार्तस्य तरुर्मित्रम्। अत्र मित्रशब्दोऽध्व-खेदापहरणौचित्यवशात् हितकृदर्थे प्रयुक्तः। देशो यथा लक्ष्मणोऽटति केदारे इति। अत्र केदाररूपदेशविशेषयोगात् लक्ष्मणो बक एव न पुनस्सौ-मित्रेयः। कालो यथा अदृष्टिः कौशिको दिन इत्यत्र दिवसान्धप्रसिद्धि-वशात्कौशिक उलूक एव न पुनर्विश्वामित्रः। व्यक्तिः स्त्रीलिङ्गादिवैशिष्ट्यम्। तद्यथा पुण्डरीको वनेचरः। अत्र पुंल्लिङ्गे प्रयुक्तत्वात्पुण्डरीको व्याघ्रः। स्वरास्तावदुदात्ताऽनुदात्तस्वरितादयो वेदप्रयुक्तेषु शब्देषु समस्तपद-नियामकत्वादर्थनिर्णायका अपि भवन्तीति सुज्ञातमेव। तदुदाहरणं यथा-इन्द्रशत्रुर्विवर्धस्वेति। अत्रेन्द्रशत्रु-पदस्याद्युदात्तत्वादन्तोदात्तत्वाच्च समास-भेदादर्थभेदो दृश्यते। परन्तु काव्यमार्गे स्वरो न गण्यत इति नयेन प्रसङ्गोऽयमत्रैव परिह्रियते।

(ऊपर उदाहृत किये गये) इस पद्य में (सारे के सारे) वाचक शब्द (अपने) वाच्यार्थों को तथा वाच्यार्थ भी स्वयं को उपसर्जित कर (गौण बना कर) पारस्परिक सहयोग से किसी विलक्षण ही अर्थ को प्रकाशित कर रहे हैं। वही है व्यङ्ग्यार्थ! काव्य में इसी व्यङ्ग्यार्थ की प्रधानता होने पर ध्वनि होती है, इसे यथावसर हम निरूपित करेंगे।

जहाँ मुख्यतः शब्द ही, अर्थ की सहायता प्राप्त कर व्यञ्जकता को सम्पादित करता है (व्यंजक बनता है) उसे **शाब्दी** व्यञ्जना कहा जाता है।।५३।।

आगे वही शाब्दी व्यञ्जना संयोगादि से नियंत्रित होने पर **अभिधामूला** कही जाती है तथा लक्षणा पर आश्रित दूसरी (शाब्दी व्यञ्जना) **लक्षणामूला** कही जाती है।।५४।।

शाब्दी व्यञ्जना में (शब्द के साथ) अर्थ की सहकारिता तथा आर्थी व्यञ्जना में (अर्थ के साथ) शब्द की सहकारिता होती ही है क्योंकि काव्य तो होता ही है शब्दार्थ-रूपी शरीर वाला! उसमें भी शाब्दी व्यञ्जना दो प्रकार की होती है-अभिधामूला तथा लक्षणामूला। अनेक अर्थ वाले शब्द का कोई एक अर्थ जब **संयोगादि** के अनुरोधवश प्रकरणोपात्त (प्रासंगिक) किसी अर्थ में

नियन्त्रित हो जाता है तब दूसरे (श्लेषपरक) अर्थ की जिसके द्वारा प्रतीति होती है उसी को अभिधामूला व्यञ्जना समझना चाहिये।

इस प्रसंग में अर्थ का नियंत्रण करने वाले हेतु हैं-

संयोग, विप्रयोग, साहचर्य, विरोधिता, अर्थ, प्रकरण, लिङ्ग, अन्य शब्द की सन्निधि, सामर्थ्य, औचिती (औचित्य) देश, काल, व्यक्ति तथा (उदात्त-अनुदात्त-स्वरितादि) स्वर आदि शब्दार्थ के अनवच्छेद (नैरन्तर्य) में विशेषस्मृति के हेतु होते हैं।

(अब इन सभी हेतुओं का उदाहरण दिया जा रहा है) जैसे **भालचन्द्र से युक्त हैं गंगाधर।** यहाँ भालचन्द्र के **योग** से गंगाधर का अर्थ शिव ही है, (गंगा को धारण करने वाला) हिमालय पर्वत नहीं।

भालचन्द्र से विरहित हैं गंगाधर, यहाँ भी भालचन्द्र के **विप्रयोग** (अभाव) वश गंगाधर का अर्थ शिव ही है।

राम और कृष्ण, यहाँ राम का अर्थ बलराम ही है न कि दशरथनन्दन राम अथवा जामदग्न्य परशुराम (क्यों?) राम और कृष्ण के (नियत) **साहचर्य** वश!

साँप और नेवला यहाँ नकुल का अर्थ (सर्प-वैरी) जन्तु-विशेष से है न कि शिव (अविद्यमानं कुलं अथवा न कुलं यस्य स नकुलः) से। क्योंकि साँप और नेवले का (ही) विरोध शाश्वतिक होता है।

कालिका की वन्दना करता हूँ, यहाँ कालिका का अर्थ है भगवती महिषासुरमर्दिनी, न कि (काली) घनघटा। मेघजाल को कालिका कहते हैं ऐसा अमरकोष में कहा गया है।

भर्ता (स्वामी) सब जानते हैं, यहाँ भर्ता का अर्थ है **स्वामी** न कि पति। क्योंकि **प्रकरण** ही है राजा एवं भृत्य का।

लिङ्ग कहते हैं धर्मविशेष को। उदाहरणार्थ **वह शिवा मुझ पर कृपा करें** इस वाक्य में शिवा का अर्थ है शम्भुप्रिया पार्वती, दयारूप धर्म का अवलम्बन होने के कारण! न कि जम्बुकी (सियारिन)।

देव मध्वरि की जय हो, यहाँ पर देवशब्द की **सन्निधि** के कारण मधु का अर्थ है मधुनामक दानव-विशेष, नकि शहद। अतः मध्वरि का अर्थ है मधु दैत्य के अरि भगवान् विष्णु।

सामर्थ्य का उदाहरण जैसे-**विरोचन से दिन प्रकाशमान है।** चन्द्र,

अग्नि एवं सूर्य को विरोचन कहते हैं-ऐसा अमरकोष का वचन है। फिर भी दिन की उज्ज्वलता या प्रकाशमानता में सूर्य का ही सामर्थ्य होने के कारण, विरोचन का अर्थ यहाँ **सूर्य** है, न कि चन्द्र अथवा अग्नि।

औचित्य का उदाहरण जैसे-**श्रमार्त के लिये वृक्ष ही मित्र है।** यहाँ मित्र शब्द, मार्गश्रम के अपहरण के औचित्यवश **हितकारी** (मित्र) के अर्थ में प्रयुक्त है न कि सूर्य के अर्थ में।

देश का उदाहरण जैसे-**केदार (खेत) में लक्ष्मण (बगुला) घूम रहा है।** यहाँ पर केदाररूप (क्यारी) देशविशेष के योग से लक्ष्मण का अर्थ **बक** ही है न कि सुमित्रानन्दन (रामानुज) लक्ष्मण।

काल का उदाहरण जैसे-**कौशिक (उल्लू पक्षी) को दिन में दृष्टि नहीं होती।** यहाँ दिवसान्धता की प्रसिद्धिवश (दिवा पश्यति नोलूकः काको रात्रौ न पश्यति) कौशिक का अभिप्राय **उल्लू** पक्षी से ही है नकि (कुशिक-गोत्रोत्पन्न) विश्वामित्र से।

व्यक्ति का तात्पर्य है स्त्रीलिङ्गादि का वैशिष्ट्य। **पुण्डरीक वन में संचरण करता है,** इस उदाहरण में पुंलिङ्ग में प्रयुक्त होने के कारण (ही) पुण्डरीक का अर्थ है व्याघ्र (अन्यथा नपुंसक में प्रयुक्त होने पर पुण्डरीक का अर्थ होता कमलपुष्प)।

उदात्त, अनुदात्त तथा स्वरितादि स्वर तो वेद-प्रयुक्त शब्दों में, समस्त-पद के नियामक होने के कारण, अर्थ के भी निर्णायक होते हैं। उसका उदाहरण है-**इन्द्रशत्रु उत्पन्न हो।** यहाँ इन्द्रशत्रु पद आद्युदात्त तथा अन्तोदात्त होने की स्थिति में पृथक् समस्तपद के रूप में पृथक् अर्थ प्रदान करता है। (आद्युदात्त होने पर इन्द्रशत्रु में षष्ठी तत्पुरुष समास होगा और तब इन्द्रशत्रु का अर्थ होगा वृत्रासुर। परन्तु अन्तोदात्त होने पर इसमें बहुव्रीहि समास होगा और तब इसका अर्थ देवराज इन्द्र से होगा।)

परन्तु काव्यपरम्परा में (वैदिक) स्वरों (के प्रयोग) का विचार नहीं किया जाता, इस न्याय से यह प्रसंग यहीं छोड़ा जा रहा है।

एवं हि एकस्मिन्नर्थेऽभिधाशक्त्या नियन्त्रिते योऽपरोऽर्थो व्यञ्जनयाऽव-गम्यते स व्यङ्ग्यार्थो भवत्यभिधामूलः। उदाहरणं यथा ममैव-

सत्त्वोर्जितो विजनसौधनिवाससौख्यो
दुर्वारसञ्चरण आश्रितगाढनिद्रः।

शत्रुद्विपेन्द्रमदहृन्ननु निस्सपत्नोऽ
प्येकस्त्वमेव नरसिंह! भुवि प्रशस्तः।।

राजस्तुतिप्रकरणेऽस्मिन् वाच्यार्थे नृपविशेषनरसिंहपक्षेऽभिधया नियन्त्रिते सति व्यञ्जनाशक्त्यैव सिंहपक्षीयोऽर्थो बोध्यते। समेषामेव शब्दानां श्लिष्टत्वादुभावप्यर्थौ सुस्पष्टावेव।

एवमेव संसद्ब्रवीतीति प्रयोगेऽपि यदवश्यङ्करणीयतादिप्रयोजनं निगूढं तिष्ठति तस्य प्रत्यायनमपि व्यञ्जनयैव भवतीति लक्षणाश्रयत्वात्सा लक्षणामूला।

इस प्रकार अभिधा शक्ति द्वारा प्रदत्त एक अर्थ के (प्रकरण-विशेष में) नियंत्रित हो जाने पर जो दूसरा अभिधेयार्थ (श्लेषपरक) व्यञ्जनाशक्ति द्वारा प्रतीत कराया जाता है वह व्यङ्ग्यार्थ अभिधामूलक होता है।

उदाहरण-स्वरूप मेरा ही यह पद्य-

आत्मबल से सम्पन्न, शान्त राजभवन में रहने का सुख प्राप्त करने वाले, अकुतोभय संचरण वाले, प्रगाढ़ (सुख की) नींद सोने वाले, शत्रुरूपी गजराज के मद (अभिमान) को चूर्ण कर देने वाले, शत्रुरहित हे (महाराज) नरसिंह! एकमात्र आप ही पृथ्वीतल पर प्रशंसनीय हैं।

राजस्तुति के इस प्रकरण में, अभिधा द्वारा वाच्यार्थ के नृपविशेष नरसिंह के पक्ष में नियंत्रित हो जाने पर, व्यञ्जना द्वारा ही सिंहपरक दूसरा (वाच्यार्थ) प्रतीत होता है। समस्त शब्दों की श्लिष्टता के कारण दोनो ही अर्थ सुस्पष्ट ही हैं।

दूसरा अर्थ होगा-वन्य जीवों में ऊर्जासम्पन्न (सत्त्वेषु ऊर्जितः) अरण्यरूपी राजभवन में निवास का सुख प्राप्त करने वाले, बेरोक-टोक पर्यटन करने वाले, प्रगाढ़ नींद में डूबे रहने वाले, शत्रुभूत गजराज के मद को हर लेने वाले, अजातशत्रु, वीरपुरुष-सरीखे हे सिंह! एकमात्र तुम्हीं भूतल में प्रशंसा के पात्र हो!

इसी प्रकार संसद् घोषित करती है इस प्रयोग में भी जो अवश्यङ्करणीयतादिरूप प्रयोजन निगूढ़ (छिपा हुआ) है उसकी प्रतीति भी व्यञ्जना से ही होती है। अतएव लक्षणा का आश्रय लेने के कारण इसे लक्षणामूला (शाब्दी व्यञ्जना) कहते हैं।

वक्तृबोद्धव्यवाक्याऽन्यसन्निधानाऽर्थसम्पदाम्।
देशकालप्रकरणकाकुचेष्टासहायिनाम्।।५५।।

वैशिष्ट्याद्व्यङ्ग्यमर्थं सा बोधयन्त्यर्थसम्भवा।
शब्दसाहाय्यमहिता व्यञ्जनाऽऽर्थी समुच्यते।।५६।।

वक्तृवैशिष्ट्यं यथा ममैव-

प्राप्ता सोमवती गृहे न पुरुषाः श्वश्रूर्ननान्दाऽज्जुकाः
स्नातुं यान्ति सहैव हन्त सकला भागीरथीं पावनीम्।
नीरक्षं भवनञ्च रक्षितुमसावद्यैव नन्दात्मज-
स्स्नेहं विनियोजितस्सखि! ततो दूयेऽहमेकाकिनी।।

अत्र मुदितविदग्धा नन्दात्मजे बद्धप्रगाढरतिः कापि गोपिका सखीं प्रति स्वविवशां स्थितिं प्रस्तौति। परन्तु वक्तृवैशिष्ट्यात्तस्या नेदिष्ठं निर्विघ्नरतिसुखं व्यज्यते।

बोद्धव्यवैशिष्ट्यं यथा ममैव-

क्रीणन्तीमवलोक्य मामभिमतान्याभूषणान्युन्मदा
जायन्ते सकलाः स्त्रियो मम गृहे व्यर्थो भवत्युद्यमः।
मध्याह्ने मणिहार एष रसिकस्तस्मान्मयाऽऽमन्त्रितः
सर्वेष्वेव बहिर्गतेषु सखि हे त्वामप्यहं मन्त्रये।।

अत्र बोद्धव्यवैशिष्ट्याच्चौर्यसुरतसुखाभिलाषकातरा काऽपि व्यङ्ग्यमुखेनाहूयते कयाचित् तुल्यनिसर्गया नायिकया।

अन्यसन्निधिवैशिष्ट्यं यथा ममैव-

कामं सन्तु गृहे कुटुम्बिन उत प्रेष्याश्च लालाटिका
गाढस्वापमुपैति नो वपुरिदं सञ्चङ्क्रमैर्विघ्नितम्।
अस्मिन् केलिवने नितान्तविजने शून्ये विहङ्गैरपि
बन्धुर्भाति निकुञ्जगर्भविलसद्गाढाऽन्धकारो मम।।

अत्र निकुञ्जगर्भविलसद्गाढान्धकारसन्निधिवशात् विहङ्गाभाव-सन्निधिवशाच्च केलिवनमिदं विश्रब्धसुरतव्यापारयोग्यमिति व्यङ्ग्य-मुखेनावगम्यते।

वक्ता, बोद्धव्य (समझने वाला) वाक्य, अन्यसन्निधान, अर्थसम्पद्, देश, काल, प्रकरण, काकु (विशिष्ट कण्ठध्वनि) तथा चेष्टादि सहायकों के वैशिष्ट्यवश जब वही व्यञ्जना शब्द की सहकारिता से युक्त होकर अर्थ के माध्यम से, व्यङ्ग्य अर्थ की प्रतीति कराती है तो उसे आर्थी व्यञ्जना कहते हैं।

वक्तृवैशिष्ट्य का उदाहरण जैसे मेरा ही यह पद्य!

सोमवती अमावस्या आ गई। घर में न पुरुष लोग हैं, न सासजी, न ननदरानी और नही बड़ी-बूढ़ी आजी लोग। हाय, सबकी सब पवित्र गंगाजी में डुबकी लगाने, एक ही साथ जा रही हैं। मकान एकदम बेसहारा (सुनसान) हो गया है और उसकी रखवाली के लिये आज ही वह नन्दबाबा का छोरा 'भैया-बाबू' कह कर नियुक्त कर दिया गया है। सखि! निपट अकेली मैं संताप ढो रही हूँ।

यहाँ कोई **मुदित विदग्धा** नायिका (गोपिका) जो नन्दसूनु कृष्ण के प्रति प्रगाढ़ रतिभाव रखती है, सखी के प्रति अपनी विवशताभरी स्थिति का निवेदन कर रही है। परन्तु वक्तृवैशिष्ट्य (अर्थात् कृष्ण-प्रेयसी होने) के कारण उसका शीघ्र ही सम्पन्न होने वाला निर्विघ्न रति-सुख व्यङ्ग्य हो रहा है।

बोद्धव्य-वैशिष्ट्य का (भी) उदाहरण, जैसे मेरा ही यह पद्य! मनचाहे गहनों को मुझे खरीदती देख, मेरे घर में सारी महिलाओं को नशा सा छा जाता है, और मेरा सारा काम बिगड़ जाता है। इसीलिये, मैने इस मिठबोले मनिहार को, दुपहरी में (प्रायः) सबके बाहर जाने के समय, बुला रखा है। हे सखि! तुम्हें भी आने का न्यौता दे रही हूँ।

यहाँ बोद्धव्य (सखी) के वैशिष्ट्यवश चौर्यसुरत के सुखाभिलाष के लिये उतावली कोई (पुंश्चली) सखी, जो नायिका के समान चरित वाली ही है, व्यङ्ग्यमुखेन बुलाई जा रही है।

अन्य की सन्निधि के वैशिष्ट्य का उदाहरण, जैसे मेरा ही (यह) पद्य! भले ही घर में कुटुम्बियों अथवा मुँह ताकते रहने वाले नौकरों-चाकरों का जमघट बना रहे। परन्तु (इन सबकी) आवाजाही से विघ्नित यह देह गहरी नींद कहाँ ले पाती है? एकदम जनशून्य, पंछियों से भी रहित इस केलिवन में, झुरमुटों के भीतर पसरा गहबर अँधेरा ही मुझे (अपना) भाई-बन्धु प्रतीत होता है।

इस पद्य में **कुञ्ज के भीतर पसरे प्रगाढ़ अन्धकार** की सन्निधि के कारण तथा **पक्षियों के अभाव की (भी) सन्निधि** के कारण व्यङ्ग्यमुखेन यह प्रतीति हो रही है कि 'यह केलिवन निश्चिन्त होकर संभोगसुख प्राप्त करने योग्य (स्थान) है।'

देशकालप्रकरणवैशिष्ट्यमपि यथा ममैव,

ज्वालाभिः कवलीकृते क्वचिदहो सान्द्रे वनालीकुले
वह्निं वर्षति घस्मरे च तपने ज्येष्ठेऽपि काष्ठाङ्गते।
संस्थातुं न दिशन्ति कं क्षणमहो शैलाजिरे शीतले
वासन्ता ननु देवभूमिशिमलातापङ्क्षषा वायवः।।

अत्र शीतलशैलाजिर-वसन्त-विश्रामादिवैशिष्ट्यवशात् निर्विघ्न-कामोपभोगार्थं कयाचिन्नायिकया कश्चित्प्रच्छन्नकामुको निर्भरमामन्त्र्यते।

काकुस्तावद् विशिष्टकण्ठध्वनिः। तद्वैशिष्ट्यं यथा गजाननशास्त्रि-करमरकरप्रणीते पद्येऽस्मिन्-

या जाता भवतां सदा सुखकरी संसेवनीया सदा
तां रे भारतवासिनस्त्यजथ किं गीर्वाणवाणीं शुभाम्।
जीर्णा सम्प्रति सा न चापि फलदा त्याज्येति चेत्पृच्छ्यते
प्राप्ता यद्यपि जीर्णतां स्वजननी पुत्रस्य सेव्या न किम्??

अत्र पुत्रस्य सेव्या न किमित्यत्र काकुवैशिष्ट्यात् पुत्रस्य सेव्यैवेति व्यङ्ग्यमुखेनाऽवगम्यते।

चेष्टावैशिष्ट्यं यथा मम

वशंवदो वटुः कश्चिन्मध्येकक्षं स्वदेशिकम्।
उद्यम्य तर्जनीं स्वीयामिङ्गितज्ञमदर्शयत्।।

अत्र तर्जन्युत्थापनं मेहनेच्छाप्रतीकभूतं चेष्टितमितिकृत्वा वटुना व्यङ्ग्यमुखेन मेहनेच्छा प्रकटिता।

देश, काल तथा प्रकरण का भी वैशिष्ट्य मेरे ही पद्य में द्रष्टव्य है!

(जंगल में लगी आग की) ज्वालाओं द्वारा कहीं-कहीं सघन वनराजियों को निगल लिये जाने पर तथा जेठ के महीने में सीमातिक्रान्त भयावह सूर्य द्वारा आग बरसने पर-देवभूमि शिमला की ये तापहारिणी वासन्ती हवायें, शीतल पर्वत की खोहों में, छन भर विश्राम करने के लिये, किसे नहीं प्रेरित करतीं?

यहाँ शीतल पर्वतकन्दरा, वसन्त एवं विश्रामादि के वैशिष्ट्यवश, किसी (पुंश्चली) नायिका द्वारा कोई प्रच्छन्न कामुक कामोपभोगार्थ, निश्चिन्तभाव से आमंत्रित किया जा रहा है (व्यञ्जनामुखेन)।

काकु कहते हैं विशिष्ट प्रकार की कण्ठध्वनि को। उस वैशिष्ट्य का उदाहरण है गजानन शास्त्री करमरकर-प्रणीत यह पद्य-

जो सदैव आप सब को सुख प्रदान करने वाली रही, सदैव सेवा करने योग्य रही। हे भारतवासियों! उस पवित्र देववाणी (संस्कृत) को क्यों उपेक्षित कर रहे हो? 'अब वह जीर्ण हो चली, फलदा भी नहीं रही-इसलिये त्याज्य है' यदि ऐसी सोच है आपकी तो पूछता हूँ कि भले ही अपनी जन्मदात्री माँ बूढ़ी हो जाय (परन्तु) क्या वह बेटे के लिये सेवायोग्य नहीं होती?

इस पद्य में **क्या पुत्र के लिये सेवायोग्य नहीं होती?** यह अंश काकु के वैशिष्ट्य से व्यञ्जनया इस अर्थ की प्रतीति कराता है कि 'पुत्र के लिये (बूढ़ी हुई भी) माँ सेवा-योग्य होती ही है।'

चेष्टा-वैशिष्ट्य का उदाहरण जैसे मेरा यह पद्य!

किसी अज्ञाकारी (विनयशील) छात्र ने, भरी कक्षा में अपनी तर्जनी उठाकर, चेष्टा-वैशिष्ट्य जानने वाले अध्यापक को दिखाया।

यहाँ तर्जनी उठाकर दिखाना मेहनेच्छा (पेशाब) का प्रतीकभूत चेष्टित है, इस अभिप्राय से छात्र ने व्यङ्ग्यमुखेन अपनी मेहनेच्छा प्रकट की।

अथ तात्पर्यवृत्तिः-

स्वरव्यञ्जनसंयोगाद् वर्णो निर्मीयते खलु।
वर्णानाञ्चापि योगेन जायते शब्दनिर्मितिः।।५७।।

स शब्दः प्रातिपदिकमव्युत्पन्नः समुच्यते।
व्युत्पन्नश्चापि सुप्तिङ्भ्यां स एव पदमुच्यते।।५८।।

पदानां मेलनैर्वाक्यं वाक्यानामपि मेलनैः।
सञ्जायते महावाक्यं यच्च काव्यं निगद्यते।।५९।।

पदानां योग्यताऽऽकाङ्क्षासन्निधित्रितयं विना।
अशक्यं वाक्यनिर्माणं तस्मात् त्रयमपेक्षितम्।।६०।।

अथ वाक्याङ्गभूतानां पदानामर्थयोजनम्।
विना वाक्यार्थसम्बोधः कथं तद्धि समुच्यते।।६१।।

पदानां पृथगर्थानां या परस्परयोजिका।
वाक्यार्थस्य च निर्मात्री वृत्तिः काप्यपरैव सा।।६२।।

तात्पर्याख्यां विदन्त्येनां पदार्थान्वयबोधिनीम्।
वृत्तिं कौमारिलाः सर्वेऽभिहितान्वयवादिनः।।६३।।

प्राभाकरास्तदन्ये तेऽन्विताभिधानवादिनः।
नैव वृत्तिमिमां वाक्ये मन्वते कल्पनाश्रिताम्।।६४।।

शब्दशक्तिर्न तात्पर्या कामं वृत्तिर्भवेदसौ।
वाक्ये पृथक्पदार्थानां केवलं योजिकैव सा।।६५।।

तद्विषयको विस्तारोऽवेक्षणीयोऽथ पाठकैः।
ग्रन्थेषु मम्मटादीनां किमाप्यं पिष्टपेषणैः।।६६।।

स्वर और व्यञ्जन के संयोग से **वर्ण** बनता है और वर्णों के भी योग से **शब्द** का निर्माण होता है।।५७।।

(अक्षरसमवायभूत) वह शब्द अव्युत्पन्न प्रातिपदिक कहा जाता है। वही (अव्युत्पन्न प्रातिपदिक) सुप् एवं तिङ् प्रत्ययों से व्युत्पन्न होकर **पद** कहा जाता है।।५८।।

पदों के मेलन से **वाक्य** और वाक्यों के भी मेलन से **महावाक्य** बनता है जिसे **काव्य** भी कहा जाता है।।५९।।

(वाक्यगत) पदों की (पारस्परिक) योग्यता, आकांक्षा एवं योग्यता की तिकड़ी के विना वाक्यनिर्माण (सर्वथा) असंभव है अतः तीनों का होना अपेक्षित है।।६०।।

वाक्य के अंगभूत पदों का विना अर्थ समन्वित हुए **वाक्यार्थ** का ज्ञान कैसे होगा? अब उसे बताते हैं।।६१।।

पृथक्-पृथक् अर्थ वाले पदों को जो परस्पर जोड़ती है (आंकाक्षा, योग्यता एवं सन्निधि के बल पर) और (सम्पिण्डित) वाक्यार्थ का निर्माण करती है वह कोई और ही वृत्ति है।।६२।।

पदार्थों का अन्वय बताने वाली उसी (वृत्ति) को आचार्य कुमारिलभट्ट के अनुयायी सभी **अभिहितान्वयवादी** आचार्य **तात्पर्या** के नाम से जानते हैं।।६३।।

उनसे पृथक् आचार्य प्रभाकर के अनुयायी **अन्विताभिधानवादी** आचार्य कल्पनाश्रित इस वृत्ति को वाक्य में (उपयोगी) नहीं मानते हैं।।६४।।

बहरहाल, **तात्पर्या** (अभिधादि की तरह) शब्द की शक्ति तो नहीं ही है। वृत्ति वह भले ही हो। वाक्य में बिखरे हुए पदों के अर्थों को वह मात्र (परस्पर) जोड़ने वाली है।।६५।।

पाठकों को तद्विषयक विस्तार आचार्य मम्मट आदि के ग्रंथों में देखना चाहिये। पिष्टपेषण से क्या मिलने वाला है??६६।।

वाक्यनिर्माणे प्रयोज्यानां सुप्तिङन्तपदानां मध्ये यावद्योग्यताऽऽकाङ्क्षासन्निधिगुणा न स्युस्तावद् वाक्यनिर्माणमशक्यमेव। सत्स्वप्येतेषु गुणेषु यदा वाक्यं निर्मितं, तदापि वाक्यार्थबोधे काठिन्यम्। कुत इति चेत्समुच्यते। अभिधया प्रत्येकं पदस्य पृथग् वाच्यार्थे प्रस्तुते सत्यपि समेषां पदार्थानामन्वयाऽभावे कथं खलु वाक्यार्थबोधः? मीमांसकाः कुमारिलभट्टानुयायिनोऽभिहितान्वयवादिनो वदन्ति यत्तात्पर्यनाम्नी काऽपि वृत्तिः पृथक् पदार्थानिमान् मिथस्संयोज्य सम्पिण्डितं वाक्यार्थं प्रस्तौति। अन्यथा पदार्थज्ञाने सत्यपि वाक्यार्थबोधाभावे व्यवहारप्रवृत्तिरेव न स्यात्।

यद्यपि पदार्थद्वारेणैव वाक्यार्थाऽवगमस्तथापि वाक्यार्थबोधकाले पृथक्पदार्थबोधो विलीयते। व्यङ्ग्यार्थसन्दर्भे तथ्यमिदमुपन्यस्यति प्रकारान्तरेण ध्वनिकारोऽपि। तद्यथा-

यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।
वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः।।

स्वसामर्थ्यवशेनैव वाक्यार्थं प्रथयन्नपि।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते।।

तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्।
बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते।।-ध्वन्या० १।१०-१२

एवं हि पृथक् पदार्थानां खण्डशोऽवबुद्धानां मिथस्सन्दर्भसमन्वयार्थमायाति तात्पर्यवृत्तिः प्रस्तौति चाऽखण्डावबोधात्मकं तात्पर्यार्थं वाक्यार्थसंज्ञम्। परन्तु प्रभाकरमतानुयायिनो मीमांसकाः पृथक्पदानामपि मिथस्सन्दर्भसमन्वितमखण्डावबोधात्मकमेव ज्ञानं स्वीकुर्वन्ति। मिथस्सन्दर्भान्वितानामेव पदानामभिधानं भवति वाक्य इति तेषाम्मतम्। अतएव वाक्यार्थबोधे स्वाभाविके न कापि वृत्तिरपेक्षितेत्यलं भूयः प्रतननेन।

।।इति शब्दशक्तिप्रकरणम्।।

वाक्य के निर्माण में प्रयुक्त किये जाने वाले सुबन्त (संज्ञादि) तथा तिङन्त (क्रियादि) पदों के मध्य जब तक योग्यता, आकाङ्क्षा एवं सन्निधि-रूप गुण नहीं होंगे तब तक वाक्य का बन पाना असंभव ही है। इन गुणों के होने

पर भी जब वाक्य बन गया तब भी (सम्पिण्डित अथवा एकीभूत) **वाक्यार्थ** के बोध में कठिनाई होती है। कैसे? इस बात को बताते हैं।

अभिधा के द्वारा प्रत्येक पद का अलग-अलग वाच्यार्थ प्रस्तुत कर देने पर भी समस्त पदार्थों के अन्वय के अभाव में भला वाक्यार्थ का बोध कैसे होगा? कुमारिल भट्ट के अनुयायी जो **अभिहितान्वयवादी** आचार्यगण हैं, वे कहते हैं कि **तात्पर्या** नामवाली कोई वृत्ति है जो इन बिखरे हुए **पदार्थों** को परस्पर जोड़ कर सम्पिण्डित **वाक्यार्थ** को प्रस्तुत कर देती है। यदि ऐसा न हो तो पदों के (पृथक्) अर्थों का ज्ञान हो जाने पर भी वाक्यार्थ के ज्ञान के अभाव में व्यवहार में प्रवृत्ति ही नहीं हो पायेगी।

यद्यपि पदार्थ के द्वारा ही वाक्यार्थ का ज्ञान होता है फिर भी वाक्यार्थ के ज्ञान के समय पृथक् पदार्थ का ज्ञान विलीन हो जाता है। व्यङ्ग्यार्थ के सन्दर्भ में, इस तथ्य को, प्रकारान्तर से, **ध्वनिकार** भी उपन्यस्त करते हैं। जैसे कि-

जैसे पदार्थ के द्वारा वाक्यार्थ की सम्यक्तया प्रतीति होती है उसी प्रकार वाच्यार्थ का ज्ञान हो जाने के बाद ही उस वस्तु (अर्थात् प्रतीयमानार्थ) का ज्ञान हो पाता है।

अपने सामर्थ्य के माध्यम से ही वाक्यार्थ को प्रस्तुत करता हुआ पदार्थ जैसे व्यापार की अवधि (ज्ञानकाल) में पहचान में नहीं आ पाता।

उसी प्रकार वाच्यार्थ के प्रति विमुख आत्मावाले अर्थात् वाच्यार्थ के प्रति अश्रद्धालु सहृदयों की तत्त्वार्थदर्शिनी बुद्धि में वह व्यङ्ग्यार्थ झटिति अवभासित हो जाता है।-ध्वन्या०१।१०-१२

इस प्रकार, पृथक्-पृथक् रूप से समझ में आये पदार्थों के परस्पर सन्दर्भ-समन्वयहेतु ही तात्पर्य वृत्ति आती है और वह अखण्डावबोध-स्वरूप **तात्पर्यार्थ** को प्रस्तुत करती है, जिसे **वाक्यार्थ** कहते हैं।

परन्तु प्रभाकरमतानुयायी मीमांसक पृथक् पदों का भी पारस्परिक सन्दर्भ-समन्वित अखण्डावबोधात्मक ज्ञान ही स्वीकार करते हैं। पारस्परिक सन्दर्भों से अन्वित ही (वाक्यगत) पदों का वाक्य में अभिधान होता है, ऐसा उनका मत है। अतएव वाक्यार्थ के बोध में, जो कि स्वाभाविक है (अयत्नसाध्य है) किसी (तात्पर्या नामक) वृत्ति की अपेक्षा नहीं। अब और विस्तार की आवश्यकता नहीं।

।।शब्दशक्ति का प्रकरण समाप्त हुआ।।

॥अथ रीतिवृत्तिप्रकरणम्॥

वपुस्तत्त्वसमीक्षायां ननु शब्दार्थयोरनु।
प्रस्तूयते यथाशास्त्रं रीतिवृत्तिविवेचनम्।।६७।।

प्रतितत्त्वं समीक्षायां दृष्टिभेदोऽवलोक्यते।
सम्प्रदायैकनिष्ठानां विदुषां काव्यशास्त्रिणाम्।।६८।।

तस्मात्पूर्वाग्रहोन्मुक्तैर्वचनैरेव सादरम्।
मूल्याङ्कनं तदीयानां मतानां कार्यमैषमः।।६९।।

रीतिं नैव गुणाद्भिन्नां वृत्तिं नाऽलङ्कृतेरपि।
मन्यते ध्वनिकारोऽसौ लोचनकृत्समर्थितः।।७०।।

एवं स्थितेऽपि पूर्वेषां मन्तव्यपरिशीलनम्।
वृत्तिरीतीतिहासार्थं युक्तियुक्तं प्रतीयते।।७१।।

स्थाने-स्थाने यथा काये विलसन्त्यस्थिसन्धयः।
संघटनाः पदानां तास्तद्वत्काव्येऽपि संस्थिताः।।७२।।

पदानां रचना कापि विशिष्टा यावलोक्यते।
काव्यात्मपदवीं रूढा सा रीतिरिति वामनः।।७३।।

गुणानुप्राणिता रीतिरङ्गीभूता कलेवरे।
साक्षाद्रसोपकर्त्रीयं गुणैरेव न संशयः।।७४।।

सम्बन्धं रीतिगुणयोर्नित्यमेव हि मन्यते।
रीतिपक्षधरो विद्वान् सूत्रकर्ता स वामनः।।७५।।

आदौ देशाश्रिता रीतिस्तद्भाषारुचिपोषिणी।
पश्चात्कवेर्निसर्गस्य बहिर्व्यक्तिरभूदियम्।।७६।।

प्रवृत्त्यभिधया ख्याता मुनिना भरतेन या।
सैव मार्ग इति प्रोक्ता दण्डिभामहकुन्तकैः।।७७।।

प्रवृत्तयश्चतस्रः स्युरादौ तिस्रश्च रीतयः।
पश्चाच्चतस्रः षड्वापि द्वादशापि निरूपिताः।।७८।।

दीप्तत्वान्मसृणत्वाच्च मध्यमत्वाच्च वृत्तयः।
अनुप्रासस्य तास्तिस्रः प्रख्याताः परुषादयः।।७९।।

परुषा परुषत्वे स्याल्लालित्ये ललिताभिधा।
मध्यमा मध्यमत्वेऽसौ कोमलापि समुच्यते।।८०।।

काव्य के वपुस्तत्त्व (शरीर) की समीक्षा में शब्द एवं अर्थ के बाद अब शास्त्रपरम्परानुसार रीति एवं वृत्ति का विवेचन किया जा रहा है।।६७।।

अपने-अपने सम्प्रदाय में श्रद्धा रखने वाले अलंकारशास्त्री विद्वानों का, प्रत्येक काव्यतत्त्व के सन्दर्भ में, समीक्षा (विचार-विमर्श) में दृष्टिभेद दीखता है।।६८।।

इसलिये, पूर्वाग्रह-मुक्त तथ्यों द्वारा ही, उनके मतों का, यहाँ सादर मूल्यांकन किया जाना चाहिये।।६९।।

ध्वनिकार उन आचार्य **आनन्दवर्धन** ने तो रीति को गुणों से भिन्न नहीं ही माना है। वृत्ति को (भी) अलंकार से पृथक् नहीं माना है। लोचनकार **अभिनवगुप्त** ने इसी मत का सामर्थन किया है।।७०।।

ऐसा (निर्णीत) होने पर भी, वृत्ति एवं रीति का इतिहास (विकासक्रम) जानने के लिये, पूर्ववर्ती आचार्यों के मतों का परिशीलन युक्तियुक्त प्रतीत होता है।।७१।।

जैसे शरीर में स्थान-स्थान पर अस्थिसन्धियाँ (हड्डियों के जोड़) होती हैं उसी प्रकार, काव्य में भी पदों की वे **संघटनायें** स्थित होती हैं।।७२।।

पदों की जो कोई विशिष्ट रचना (काव्य में) दृष्टिगोचर होती है, आचार्य वामन के मतानुसार वही **रीति** है जो कि काव्य की आत्मा के रूप में मान्य है।।७३।।

(माधुर्यादि) गुणों से अनुप्राणित तथा कलेवर (काव्य) में अंगीभूत यही रीति गुणों के माध्यम से साक्षात् रसोपकर्त्री होती है (इसमें) संशय नहीं।।७४।।

रीति के पक्षधर विद्वान्, काव्यालंकारसूत्र के कर्ता वह आचार्य **वामन** रीति एवं गुण के सम्बन्ध को नित्य ही मानते हैं।।७५।।

प्रारंभ में यह रीति देशाश्रित तथा (उन-उन देशों के कवियों की) भाषारुचि का पोषण करने वाली मानी गई। बाद में इसे कवि के निसर्ग की बाह्य अभिव्यक्ति के रूप में स्वीकार किया गया।।७६।।

जिसे महामुनि (नाट्यशास्त्रकार) भरत ने **प्रवृत्ति** के नाम से व्याख्यात किया था उसी को कालान्तर में दण्डी, भामह एवं कुन्तक ने **मार्ग** नाम दिया।।७७।।

(भरत-प्रोक्त) प्रवृत्तियाँ चार थीं। रीतियाँ (भी) प्रारंभ में तीन थीं। बाद में चार हुईं, छः भी हुईं अथवा बारह की संख्या में भी निरूपित की गईं।।७८।।

दीप्तत्व, मसृणत्व तथा इन दोनो के बीच की होने के कारण अनुप्रास की वे तीन वृत्तियाँ भी परुषादि के रूप में प्रसिद्ध हुईं।।७९।।

परुषता होने पर परुषा, लालित्य होने पर ललिता तथा मध्यम स्थिति होने पर उस (वृत्ति) को मध्यमा अथवा कोमला भी कहते हैं।।८०।।

का नाम रीतिः? रीङ्गतौ धातोः क्तिन्प्रत्यये कृते निष्पद्यते रीतिशब्दः। रीतिर्गतिर्मार्गो वा। अभिव्यक्तिमार्ग इत्यर्थः। यथाह दण्डी-अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम्-काव्यादर्शः १.४०। स एव पुनराहान्यत्र-तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः।-काव्यदर्शः १।१०१

प्रवृत्तिरीतिमार्गवृत्तिशब्दाः प्रायेण पर्यायभूताः सङ्कीर्णार्थाश्च। परन्तु प्रत्नोऽयं रीतिशब्द ऋग्वेदेऽपि समवाप्यते-महावरीतिः शवसा सरत् पृथक् (२।२७।२४) वाते वात्युर्या नद्येव रीतिः (२।३९।५) तामस्य रीतिं परशोरव (५।४८।४)।

यायावरीयो राजशेखरस्तु सुवर्णनाभं रीत्युद्भावकं मन्यते-रीतिनिर्णयं सुवर्णनाभ इति। शारदातनयोऽपि पञ्चाधिकशतमिता रीतीर्जानाति प्राचाम्।

नाट्यशास्त्रकारो भरतः प्रवृत्तिं परिचाययति-प्रवृत्तिरिति कस्मात्? उच्यते। पृथिव्यां नानादेशवेषभाषावार्ताः ख्यापयतीति प्रवृत्तिः (अ० १५) तत्तद्देशोचिता भाषाः क्रिया वेषाः प्रवृत्तय इति रसार्णवसुधाकरे (१।२९) राजशेखरसिंहभूपालावप्येवंमानिनौ। आवन्ती दाक्षिणात्या पाञ्चाल्यौड्रमागधीति चतस्रः प्रवृत्तयः। अनेनैतदुक्तं भवति यद् वचन-विन्यासमात्रपर्यवसिता रीतिः प्रवृत्तेरेकांशभूता।

दण्डिभामहकुन्तकाः रीत्यर्थे मार्गशब्दं व्यवहरन्ति। दण्डिभामहवामना रीतिं देशविशेषसम्बद्धामेव मन्यन्ते। यथाह वामनःविदर्भादिषु दृष्टत्वात्तत्स-माख्या (काव्या० १।२।११) परन्तु कुन्तकरुद्रटौ रीतीनां देशविशेषाश्रि-तत्वविरोधिनौ। न पुनर्देशैः किञ्चिदुपक्रियते काव्यानामिति रुद्रटः।

रीति है क्या? रीङ्गतौ धातु से (स्त्रीलिङ्ग में) क्तिन् प्रत्यय करने पर रीति शब्द निष्पन्न होता है। रीति का अर्थ है गति अथवा मार्ग। इसका आशय है-काव्याभिव्यक्ति का मार्ग? जैसा कि आचार्य दण्डी ने कहा-अभिव्यक्ति के अनेक मार्ग हैं जिनमें परस्पर सूक्ष्म भिन्नतायें हैं।-काव्यादर्श १।४०

उन्ही आचार्य दण्डी ने दूसरे स्थान पर पुनः कहा-एक-एक कवि में विद्यमान (अभिव्यक्ति के) उन भेदों को नहीं बताया जा सकता है।

-काव्या० १।१०५

प्रवृत्ति, रीति, मार्ग और वृत्ति शब्द प्रायः पर्यायभूत हैं तथा उनके (सुस्पष्ट) अभिप्राय भी साफ नहीं हैं। परन्तु अति प्राचीन यह रीति शब्द ऋग्वेद में भी प्राप्त होता है।

यायावरीय आचार्य **राजशेखर** तो **सुवर्णनाभ** को रीति का उद्भावक मानते हैं-रीति का निर्णय सुवर्णनाभ ने किया, ऐसा कहकर।

आचार्य शारदातनय भी प्राचीन आचार्यों की १०५ रीतियों की जानकारी रखते हैं। **नाट्यशास्त्रकार** आचार्य भरत **प्रवृत्ति** का परिचय देते हुए कहते हैं-प्रवृत्ति को प्रवृत्ति क्यों कहते हैं? बताते हैं। जो पृथ्वी में विद्यमान नाना देशों की वेषभूषा, भाषा और वार्ता-पद्धति को ख्यापित करती है, वही प्रवृत्ति है (अध्याय १५)

विभिन्न देशों की भाषाओं, क्रियाओं (आचरणों) तथा वेषभूषाओं को प्रवृत्ति कहते हैं ऐसा **रसार्णवसुधाकर** (१।२९) में बताया गया है।

राजशेखर तथा **सिंहभूपाल** भी ऐसा ही मानते हैं। आवन्ती, दाक्षिणात्या, पाञ्चाली तथा औड्र मागधी-ये चार प्रवृत्तियाँ हैं।

इसका यह तात्पर्य निकला कि वचन-विन्यासमात्र में पर्यवसित रीति प्रवृत्ति का एकांशभूत है (क्यों कि प्रवृत्ति मात्र विभिन्न देशों की भाषामात्र नहीं, प्रत्युत क्रिया तथा वेषभूषा भी है)।

दण्डी, भामह तथा कुन्तक रीति के (ही) अर्थ में **मार्ग** शब्द का प्रयोग करते हैं। दण्डी, भामह और वामन रीति को **देशविशेष** से सम्बद्ध ही मानते हैं। जैसा कि वामन ने कहा है-विदर्भादि में दृष्टिगोचर होने के कारण उनकी (वैदर्भी आदि) संज्ञा है (काव्या० १।२।११)।

परन्तु कुन्तक एवं रुद्रट, रीतियों की देश-विशेष से सम्बद्धता का विरोध करते हैं। रुद्रट (तो स्पष्टतः) कहते हैं-देशों से काव्यों का कुछ उपकार तो नहीं ही होता है।

भरतः प्रवृत्तिनाम्ना पूर्वोक्ताश्चतस्रो भामहदण्डिनौ मार्गनाम्ना गौड-वैदर्भाभिधां द्वितयीं वामनो वैदर्भीगौडीपाञ्चालीति तिस्रो रुद्रटस्सलाटीं चतस्रो राजशेखरो गौडीवैदर्भी-पाञ्चाल्यावन्तीमागधीति पञ्च भोजदेवो

गौडीवैदर्भीपाञ्चालीलाटीमागध्यावन्तिकेति षट् शारदातनयोऽपि गौडीवैदर्भी-पाञ्चालीलाटीसौराष्ट्रीद्राविडीति षडेव रीतीर्मन्यते। नरेन्द्रप्रभसूरिर्द्वादशरीतीरङ्गीकरोति। भामहो गौडीं दण्डी च वैदर्भीं श्रेष्ठां मनुते। वामनराजशेखरपरिमलगुप्तधनपालश्रीहर्षविल्हणनीलकण्ठ-दीक्षितादयो दण्डिपक्षधराः।

रीतिरिव वृत्तयोऽपि नाऽलङ्कारेभ्यो व्यतिरिक्ताः। तदनतिरिक्त-वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशितास्ता अपि गताः श्रवणगो-चरमित्यानन्दवर्धनो ध्वनिविरोधिपूर्वपक्षप्रस्तुतिप्रसङ्गे। तमेव सन्दर्भं व्याख्याति लोचनकारः-नैव वृत्तिरीतीनां तद् व्यतिरिक्तत्वं सिद्धम्। तथा ह्यनुप्रासानामेव दीप्तमसृणमध्यमवर्णनीयोपयोगितया परुषत्वललितत्व-मध्यमत्वस्वरूपविवेचनाय वर्गत्रयसम्पादनार्थं तिस्रोऽनुप्रासजातयो वृत्तय इत्युक्ताः। वर्तन्तेऽनुप्रासभेदा आस्विति। यदाह-

सरूपव्यञ्जनन्यासं तिसृष्वेतासु वृत्तिषु।
पृथक्पृथगनुप्रासमुशन्ति कवयस्तथा।।-लोचनटीका

।।इति रीतिवृत्तिप्रकरणम्।।

भरत प्रवृत्ति के नाम से पूर्वोक्त चार (आवन्ती, दाक्षिणात्या, पाञ्चाली, औड्र मागधी) भामह एवं दण्डी मार्ग के नाम से गौड तथा वैदर्भ-संज्ञक दो, वामन रीति के नाम से वैदर्भी, गौडीया तथा पाञ्चाली-तीन, रुद्रट लाटी को भी जोड़ कर-चार, राजशेखर गौडी, वैदर्भी, पाञ्चाली, आवन्ती तथा मागधी-पाँच तथा भोजदेव गौडी, वैदर्भी, पाञ्चाली, लाटी, मागधी तथा आवन्तिका-छह रीतियों को मानते हैं। शारदातनय भी गौडी, वैदर्भी, पाञ्चाली, लाटी, सौराष्ट्री तथा द्राविडी-इन छ ही रीतियों को मानते हैं।

नरेन्द्रप्रभसूरि बारह रीतियों को स्वीकार करते हैं। भामह गौडी को तथा दण्डी वैदर्भी को (दूसरी से) श्रेष्ठ मानते हैं। वामन, राजशेखर, परिमलगुप्त, धनपाल, श्रीहर्ष, विल्हण, तथा नीलकण्ठ दीक्षित आदि आचार्य दण्डी के पक्षधर हैं (अर्थात् वैदर्भी के प्रशंसक हैं)।

(गुणों से अभिन्न) रीतियों की ही तरह, वृत्तियाँ भी अलंकारों से व्यतिरिक्त नहीं हैं। ध्वनि-विरोधियों के पूर्वपक्ष को प्रस्तुत करते हुए आचार्य आनन्दवर्धन ने (स्वयं) कहा है-उन (अलंकारों) से अनतिरिक्त स्वरूप (या कार्य) है

जिनका ऐसी जो उपनागरिकादि वृत्तियाँ कुछेक आचार्यों द्वारा प्रकाशित की गई हैं उनका भी नाम हमने सुन रखा है।

उसी सन्दर्भ की व्याख्या करते हैं लोचनकार अभिनवगुप्त-वृत्तियों तथा रीतियों का (अलंकार तथा गुण से) व्यतिरिक्तत्व सिद्ध नहीं है। जैसा कि अनुप्रासों (वर्णसाम्यों) की ही दीप्त, मसृण तथा मध्यमवर्णनीय उपयोगिता से उनके परुषत्व, ललितत्व तथा मध्यम स्वरूप का विवेचन करने के लिये, वर्गत्रय के सम्पादनार्थ, अनुप्रास की ही तीन जातियों को वृत्ति कहा गया है। वृत्ति का अर्थ है-जिसमें अनुप्रास के भेद रहते हों। जैसा कि कहा गया है-

इन तीनो ही वृत्तियों में, समान रूप वाले व्यञ्जनों के न्यास वाले पृथक्-पृथक् (अर्थात् दीप्त, मसृण एवं कोमल) अनुप्रासों को कविगण प्रयुक्त करते हैं।

रीति एवं वृत्ति का प्रकरण, इस प्रकार समाप्त हुआ।

॥अथ गुणप्रकरणम्॥

अङ्गीभूतो रसः काव्ये गुणानां समुपाश्रयः।
अङ्गानि चापि शब्दार्थावलङ्कारा यदाश्रिताः।।८१।।

यथा शौर्यादयोऽस्माकं नितरामात्मनो गुणाः।
न जातुचन देहस्य तथा काव्येऽपि दृश्यते।।८२।।

आत्मनैव भवेच्छूर आत्मनैव च भीरुकः।
वपुषा न भवेद् वीरो वपुषा नापि निर्भयः।।८३।।

धनाढ्याश्च हतात्मानो दृश्यन्ते कृपणा भुवि।
निर्धनास्त्यक्तसर्वस्वा महासत्त्वतया खलु।।८४।।

नाऽभविष्यद् गुणो धर्मो हन्त केवलमात्मनः।
कः स्पृशेज्जन्तुशालायां निर्भरं निहतं हरिम्??८५??

यत्र यत्र तदात्मत्वं तत्र तत्रैव ते गुणाः।
अन्वयव्यतिरेकाभ्यामुभावन्योन्यमाश्रितौ।।८६।।

माधुर्यादिगुणाः काव्येऽप्येवमेव रसाश्रिताः।
सगुणावेव शब्दार्थौ सरसाविति निश्चितम्।।८७।।

गुणानां नित्यसम्बन्धो रसैः सार्धमिति ध्रुवम्।
रसाभिव्यञ्जकास्तस्मान्माधुर्यादिगुणाः स्मृताः।।८८।।

माधुर्यौजः प्रसादाख्यास्ते त्रयो न पुनर्दश।
तत्प्रपञ्चो हि बोद्धव्य आकरग्रन्थपङ्क्तिभिः।।८९।।

मन्वते केचिदाचार्या ननु शब्दार्थयोः पृथक्।
गुणान् विंशतिसंख्याकान् तत्परेषां न सम्मतम्।।९०।।

काव्य में गुणों का आश्रय-स्वरूप रस ही अंगीभूत (मुख्य) होता है। उसके अंग होते हैं शब्द एवं अर्थ, यदाश्रित (उत्कर्षाधायक) होते हैं अलंकार।।८१।।

जैसे शौर्यादि हमारी आत्मा के ही गुण होते हैं, कभी भी शरीर के नहीं। वैसा ही काव्य में भी दिखाई पड़ता है।।८२।।

(मनुष्य अपनी) आत्मा से ही शूर होता है। आत्मा से ही भीरु (डरपोक) होता है। शरीर से कोई वीर नहीं होता और नहीं शरीर से निर्भय होता है।।८३।।

धनकुबेर लोग समाज में आत्महीन तथा कृपण दिखाई पड़ते हैं परन्तु निर्धन (होते हुए भी कुछेक) अपनी महासत्त्वता के कारण सर्वस्व-त्यागी होते हैं।।८४।।

यदि गुण केवल आत्मा का ही धर्म न होता तो फिर जन्तुशाला में (रखे) मरे हुए शेर को (भी) विश्वस्तभाव से कोई कैसे छू पाता? (परन्तु लोग इसीलिये निर्भय होकर छूते हैं कि यह तो आत्महीन है, मरा हुआ है। क्या बिगाड़ लेगा भला!)

(तो फिर इस प्रकार) जहाँ-जहाँ वह आत्मत्व है वहीं-वहीं वे (शौर्यादि) गुण भी हैं (और जहाँ-जहाँ आत्मत्व नहीं, वहाँ-वहाँ गुण भी नहीं) इस अन्वय तथा व्यतिरेक से दोनों (आत्मा तथा गुण) अन्योऽन्याश्रित सिद्ध होते हैं।।८६।।

इसी प्रकार, काव्य में भी माधुर्यादि गुण रसाश्रित होते हैं। यदि शब्दार्थ सगुण हैं (गुणों से युक्त हैं) तो निश्चित रूप से सरस होंगे ही।।८७।।

रसों के साथ गुणों का नित्य सम्बन्ध है, यह ध्रुव है। इसीलिये माधुर्यादि गुण रसों के अभिव्यञ्जक माने गये हैं।।८८।।

माधुर्य, ओजस् तथा प्रसाद नामक वे गुण तीन ही हैं, न कि दस। आकर ग्रंथों (काव्यप्रकाशादि) की पंक्तियों से उनका विस्तृत विवरण जानना चाहिये।।८९।।

कुछ आचार्य-गण शब्द और अर्थ के पृथक्-पृथक् बीस संख्या वाले (अर्थात् दस शब्दगुण, दस अर्थगुण) गुणों को मानते हैं। परन्तु ऐसा औरों को मान्य नहीं।।९०।।

यथाऽऽत्मन उत्कर्षहेतवश्शौर्यादयो गुणास्तथैव माधुर्यादयोऽपि काव्याङ्गीभूतस्य रसस्य नियतधर्माः। गुणाश्चैते न कथमपि शरीरधर्मा इत्यपि निश्चितम्। हृष्टपुष्टाङ्गाः स्थूलशरीरा अपि भीरुका दृश्यन्ते। लघुवयसो बालका अपि निर्भयाः। यदि शरीरधर्मा एव गुणास्तर्हि पुष्टशरीरैः सर्वैरपि शूरैर्भवितव्यमेव। न तथेति। अतो गुणानामात्मधर्मतैव सिद्धा।

तत्र चित्तद्रवीभावमयो ह्लादो माधुर्यम्। चित्तस्य विस्ताररूपं दीप्तत्वमोजः। प्रसादश्च क्षिप्रव्यापनं चित्तस्य। शृङ्गारे करुणे शान्ते माधुर्यस्य, रौद्रवीरबीभत्सेषु चाप्योजसः समस्तरसेषु च प्रसादगुणस्य स्थितिर्ज्ञेया।

वर्गान्त्यवर्णैष्टवर्गरहितैरन्यैश्च कोमलवर्णै रणाभ्याञ्च माधुर्यगुणः। उदाहरणं यथा ममैव-

तरङ्गभ्रूभङ्गैर्नटपतिमुखेन्दुं प्रतिपलं
निकामं पश्यन्ती मसृणमरुदान्दोलिततनुः।
मुदा मन्दं मन्दं जलधिमुपयान्ती जलभरैः
स्वनन्ती गङ्गेयं त्रिपुरहरहर्म्ये विलसति।।

रकारसकाराभ्यां टवर्गैः वर्गप्रथमद्वितीयसंयुक्ताक्षरैस्तृतीयचतुर्थसंयुक्ताक्षरैश्च समुत्पद्यते ओजोगुणः। यथा ख्रिस्तेबटुकनाथशास्त्रिणः पद्यमिदम्-

वृन्दारण्योद्भवासु प्रचलदलिकुलस्पर्धिनेत्रोत्पलासु
व्यावल्गद् विभ्रमासु स्मितसितसुमनः सौरभामोदितासु।
तारुण्यश्रीफलासु प्रणयरससुधास्वादनायोत्सुकासु
क्रीडन् कान्तासु तासु प्रमदयतु मनः काननं कृष्णमेघः।।

प्रसादगुणोदाहरणं यथा जगन्नाथपाठकस्य पद्यमिदम्-

द्वारि द्वारि गतो गवेषितुमपि त्वां नो लभे कुत्रचित्
प्राप्तस्त्वं तु सदा निलीन इव मच्चेतोगृहाभ्यन्तरे।
यच्छुष्कं परितप्तमर्थरहितं सङ्कीर्णमासीत्पुरा
तत्पूर्णं विचलत्तरङ्गमधुना विस्तारि मे भासते।।

।।इति गुणप्रकरणम्।।

जैसे शौर्य आदि गुण आत्मा के उत्कर्ष-हेतु होते हैं उसी प्रकार माधुर्यादि गुण भी काव्य के अंगीभूत रस के नियत धर्म हैं। ये गुण शरीर के धर्म कथमपि नहीं है, यह भी सुनिश्चित है। हृष्ट-पुष्ट अंगों वाले, मोटे शरीर वाले लोग भी डरपोक दिखाई पड़ते हैं (परन्तु) अल्पवयस्क बच्चे भी निर्भय! यदि गुण

शरीर के ही धर्म होते तो फिर पुष्ट शरीर वाले सभी लोगों को बहादुर होना चाहिये था। परन्तु वैसा नहीं है। अतः गुणों की आत्मधर्मता ही सिद्ध होती है (न कि शरीरधर्मता)।

उनमें चित्त का द्रवीभावमय आह्लाद ही माधुर्य है। चित्त का विस्तारूप दीप्तत्व ओजस् है और चित्त का त्वरित गति से व्यापन ही प्रसाद है। शृङ्गार, करुण और शान्त (रसों) में माधुर्य की, रौद्र, वीर एवं बीभत्स (रसों) में भी ओजस् की तथा समस्त रसों में प्रसादगुण की स्थिति जाननी चाहिये।

टवर्ग-रहित (समस्त) वर्गों के अन्तिम वर्ण तथा अन्य कोमल वर्णों एवं रकार-णकार की उपस्थिति में माधुर्य गुण होता है।

उदाहरण, जैसे मेरा ही यह पद्य-

तरङ्गरूपी भ्रूभंगों से प्रतिपल नटपति (शिव) के मुखकमल को ललक के साथ निहारती, कोमल समीर से आन्दोलित शरीर वाली, जलभार से 'कलकल' ध्वनि करती तथा प्रसन्नतापूर्वक मन्द-मन्द गति से सागर की ओर अग्रेसर होती यह गंगा त्रिपुरहर शम्भु के भवन (कैलाशगिरि) में शोभित हो रही हैं।

रकार-सकार, टवर्ग तथा प्रत्येक वर्ग के प्रथम-द्वितीय संयुक्ताक्षर तथा तृतीय-चतुर्थ संयुक्ताक्षर के रहने पर ओजोगुण होता है।

जैसे बटुकनाथशास्त्री खिस्ते का यह पद्य

वृन्दावन में विलास करने वाली, सञ्चरणशील भ्रमरावली से स्पर्धा करती नेत्रोत्पलों वाली, हावभाव से ओतप्रोत, स्मित (मुस्कान) रूपी श्वेत पुष्प के सौरभ से आमोदित, यौवन-लक्ष्मीरूपी फल वाली, प्रणयरसामृत के आस्वादन-हेतु समुत्सुक उन गोपाङ्गनाओं के साथ क्रीडा करने वाला कृष्णरूपी मेघ मनरूपी कानन को आह्लादित करे।

प्रसाद गुण का उदाहरण जैसे जगन्नाथ पाठक का यह पद्य-

तुम्हें खोजने के लिये द्वार-द्वार गया (परन्तु) तुम्हें कहीं भी नहीं पा सका। तुम तो सदैव मेरे (ही) चित्तरूपी भवन के भीतर छिपे बैठे मिले (परिणामतः मेरा) जो मन पहले शुष्क (नीरस) परितप्त, निरर्थक तथा संकीर्ण था वह (तुम्हारी उपस्थिति मात्र से) अब परिपूर्ण, तरंगोच्छ्वसित तथा विस्तीर्ण लगने लगा है।

इस प्रकार गुण-प्रकरण समाप्त हुआ।

॥अथाऽलङ्कारप्रकरणम्॥

शब्दार्थसंश्रिता ये वै काव्यशोभां प्रतन्वते।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।९१।।

काव्यं चेन्निरलङ्कारं रसमात्रेण जीवति।
सालङ्कारमपि प्रायो नीरसं म्रियते खलु।।९२।।

यद्यप्यनित्यधर्मा हि प्रोक्ताः काव्यस्य सूरिभिः।
अलङ्कारा रसं सन्तं तथाप्याशूपकुर्वते।।९३।।

तत्र शब्दाश्रिताः शब्दालङ्कारा यमकादयः।
अर्थाश्रितास्तथैवाऽर्थालङ्कारा उपमादयः।।९४।।

मुनिना भरतेनादौ चत्वार उपकल्पिताः।
ते च कुवलयानन्दे सङ्गणिताः शताधिकाः।।९५।।

कल्पिताः पूर्वमाचार्यैः स्वेच्छयैव यथारुचि।
तथैवाऽद्यापि कल्प्यन्तेऽलङ्कारा नूतना इमे।।९६।।

तच्च सारस्वतं किञ्चिद् प्रातिभं धीविजृम्भणम्।
प्राप्यते कृतिना नूनं वीणापाण्यनुकम्पया।।९७।।

प्रमुखा येऽप्यलङ्काराः शब्दस्यार्थस्य सम्मताः।
त एव नवया शैल्या प्रस्तूयन्ते विदाम्मुदे।।९८।।

अब अलंकार का प्रकरण प्रारंभ हो रहा है।

शब्द एवं अर्थ का आश्रय लेकर जो काव्य की शोभा का संवर्धन करते हैं (शरीर शोभा-संवर्धक) हार आदि के समान वे अनुप्रास एवं उपमादि अलंकार कहे जाते हैं।।९१।।

काव्य यदि अलंकार-विहीन भी है तो रसमात्र (की उपस्थिति) से जीवित रहता है परन्तु सालंकार होने पर भी, रस के अभाव में, प्रायः नष्ट ही हो जाता है।।९२।।

यद्यपि आचार्यों द्वारा (अलंकार) काव्य के अनित्य धर्म बताये गये हैं तथापि अलंकार (काव्य में) विद्यमान रस को, त्वरित गति से उपकृत करते हैं।।९३।।

उनमें भी, शब्द का आश्रय लेने वाले यमकादि शब्दालंकार हैं तथा उसी प्रकार, अर्थाश्रित उपमादि अर्थालंकार हैं।।९४।।

नाट्यशास्त्रकार महामुनि भरत द्वारा प्रारंभ में चार (ही अलंकार) उपकल्पित किये गये थे परन्तु वे ही (चार) अप्पय-प्रणीत कुवलयानन्द में सौ से भी अधिक हो गये।।९५।।

पहले भी ये अलंकार आचार्यों द्वारा अपनी रुचि एवं इच्छा के ही अनुसार (विविधरूपों में) कल्पित किये गये। ठीक उसी प्रकार आज भी ये अलंकार नये-नये रूपों में कल्पित किये जा रहे हैं।।९६।।

यह सब कोई विलक्षण प्रतिभाप्रसूत सारस्वत बुद्धिविलास ही है जो कि वीणापाणि सरस्वती की कृपा से, किसी भाग्यशाली आचार्य को प्राप्त हो जाता है।।९७।।

बहरहाल, जो सर्वसम्मत शब्द एवं अर्थ के प्रमुख अलंकार हैं, विद्वान् (पाठकों) की प्रसन्नता के लिये, हम उन्हीं को, नूतन शैली अर्थात् नये लक्षण-उदाहरण के साथ प्रस्तुत कर रहे हैं।।९८।।

अत्रोच्यते किञ्चित्। अलङ्कारप्रकारणामुत्तरोत्तरवर्धमानत्वं परिलक्ष्यते भामहदण्डिरुद्रटमम्मटरुय्यक विश्वनाथजयदेवाप्पयपण्डितराजादीनां ग्रन्थेषु। तत्राऽलङ्काराणां सर्वसम्मतविभाजनं शब्दार्थदृष्टयैव कृतं दृश्यते। रुद्रट इदम्प्रथमतया वास्तवौपम्यातिशयश्लेषाख्येषु तुर्यवर्गेष्वलङ्कारान् व्यवस्थाप-यति। तदनन्तरं रुय्यकोऽप्यलङ्कारसर्वस्वकारः सादृश्यविशेषणगम्यार्थत्व-विरोधशृङ्खलान्यायगूढार्थविच्छित्तिमूलानलङ्कारान् पृथक् स्थापयति।

संस्कृतकाव्यशास्त्रपरम्परायां मालवेश्वरभोजदेवस्य विलक्षणमेव प्रतननप्रियत्वं पूर्वपरम्पराऽपहारपक्षधरत्वञ्च संलक्ष्येते। सरस्वतीकण्ठाभरणे तु पदे-पदे तन्मतस्वातन्त्र्यं सन्दृश्यते। गुणालङ्काररीतिरसादीनां सन्दर्भेष्वपि तस्य दृश्यते कश्चित् तृतीय एव पन्थाः। तत्र कोविदा एव प्रमाणम्।

इस सन्दर्भ में कुछ कहना है। अलंकार के भेदोपभेदों की उत्तरोत्तर वृद्धि दिखाई पड़ती है-भामह, दण्डी, रुद्रट, मम्मट, रुय्यक, विश्वनाथ, जयदेव, अप्पयदीक्षित तथा पण्डितराज आदि के ग्रंथों में। इन अलंकारों का सर्वसम्मत (जिसे प्रायः सभी आचार्यों ने स्वीकार किया है) विभाजन शब्दालंकार एवं अर्थालंकार के रूप में किया गया है।

सर्वप्रथम आचार्य रुद्रट ने वास्तव, औपम्य, अतिशय तथा श्लेष नामक चार वर्गों में अलंकारों को व्यवस्थापित किया। तदनन्तर अलंकारसर्वस्वकार

आचार्य रुय्यक ने सादृश्य, विशेषण, गम्यार्थ, विरोध, शृङ्खला, न्याय, गूढार्थ एवं विच्छित्ति को दृष्टि में रख कर तन्मूलक अलंकारों की पृथक् स्थापना की।

संस्कृत काव्यशास्त्र की परम्परा में मालवाधीश भोजदेव की विस्तारप्रियता तथा लीक से हटकर कुछ नया कहने की प्रवृत्ति दिखाई पड़ती है। सरस्वतीकण्ठाभरण में तो पद-पद पर उनका मत-स्वातंत्र्य दृष्टिगोचर होता है। गुण, अलंकार, रीति एवं रस आदि के सन्दर्भों में राजाभोज का (मुरारि की तरह) कोई तीसरा ही पंथ दिखाई पड़ता है। विद्वज्जन स्वयं प्रमाण हैं।

किञ्च,

श्लाध्यमारोहणं वृक्षे फलं लब्धुं सुधारसम्।
निष्फलारोहणं किन्तु मञ्चकस्यापि नो वरम्।।

वचोवागुरया बद्धाः सिद्धान्ता हरिणा इव।
शंसन्तोऽपि धियं भैल्लीं जायन्ते हि परासवः।।

प्रतिष्ठा क्व नु कार्यस्य सचेतोऽनुगमादृते।
छिद्रवत्सु यथा वेणू रागवत्त्वात्प्रशस्यते।।

पुनश्च, अमृतोपम स्वाद वाले फल को पाने के लिये तो (गगनचुम्बी), वृक्ष पर भी चढ़ जाना प्रशंसनीय है। परन्तु विना किसी प्रयोजन के मञ्च पर भी चढ़ना ठीक नहीं।

वाणीरूपी बन्धनरज्जु (जाल) से बाँधे गये सिद्धान्त, (जाल में फँसे) हरिणों की तरह, भील की बुद्धि का वैभव भले प्रकट करें, परन्तु निष्प्राण हो जाते हैं।

जब तक सहृदयों का समर्थन न मिले, कार्य की प्रतिष्ठा कहाँ हो जाती है? छेद वाले पदार्थ तो हजारों हैं, परन्तु रागमाधुर्य पैदा करने के कारण प्रशंसा केवल वेणु की ही होती है (लोकानुरंजन के कारण)।

अभिनवकाव्यालङ्कारसूत्रकारः स्फाटिकीं धियं विभ्राणस्त्रिपाठिराधा-वल्लभो यथाऽलङ्कारान् विवृणोति तत्सचेतसामाह्लादकरं सर्वथाऽभिनवञ्च। रूपणमपारम्परिकं क्वचिच्चाग्राह्यं सदपि निश्चप्रचमर्वाचीनसंस्कृतकाव्यो-पकारकमित्यहं मन्ये।

अलङ्काराः द्विविधाः-आभ्यन्तराश्च बाह्याश्च (अभिनव० २।४।१) इति स्थापनयाऽलङ्कारान् नव्यान् प्रतिपादयन् प्रतिभापरिपाकसमुल्लसितं

बुद्धिवैभवं प्रकटयत्यसौ। तत्सर्वं व्याख्यानं मूलग्रन्थ एव द्रष्टव्यम्। मया तावत्पूर्वपद्धत्यैव क्रियतेऽलङ्कारविवेचनम्।

अभिनवकाव्यालंकारसूत्रकार, स्फटिक-निर्मल बुद्धि के धनी राधावल्लभ त्रिपाठी जिस प्रकार अलंकारों को विवेचित करते हैं वह सहृदयों को आनन्दित करने वाला तथा नया प्रयास है। उनका अलंकार विभाग-निरूपण अ-पारम्परिक है और कहीं-कहीं अग्राह्य भी है तथापि निश्चित रूप से अर्वाचीन संस्कृत काव्य का उपकारक है, ऐसा मैं मानता हूँ।

अलंकार द्विविध हैं-आभ्यन्तर तथा बाह्य (अभि० २।४।१) इस स्थापना के साथ नये अलंकारों को स्थापित करते हुए वह प्रतिभोल्लसित बुद्धिवैभव को दर्शित करते हैं। वह सारा व्याख्यान मूलग्रंथ में ही देखना चाहिये। फिलहाल मैं पारम्परिक रीति से ही अलंकारों का विवेचन कर रहा हूँ।

तत्रादौ शब्दालङ्कारसन्दर्भे पुनरुक्तवदाभासः। तल्लक्षणम्-

भासते पुनरुक्त्येवाऽपाततोऽर्थो हि यत्र सः।
पुनरुक्तवदाभासोऽसौ भिन्नाकृतिशब्दभाक्।।९९।।

यथा मदुपज्ञं पद्यमिदम्-

स्मरमित्रवसन्तेऽस्मिन् कलकण्ठपिकाऽरवैः।
दूरकान्तावियोगिन्यस्ताम्यन्त्येव दिवानिशम्।।

अत्र स्मरमित्रवसन्तयोः कलकण्ठपिकयोर्दूरकान्तावियोगिन्योश्चापाततः पौनरुक्त्यं भासते, परन्तु विशेषणविशेष्यभावावगमात् तदपहारो जायते।

शब्दसाम्यमनुप्रासो विषमेष्वपि स्वरेषु यत्।
छेकादिभेदभिन्नोऽसौ बहुरूपो निगद्यते।।१००।।

अनुप्रासभेदप्रभेदप्रपञ्चस्साहित्यदर्पणादितोऽवगन्तव्यः। अत्रोदाहरणं यथा ममैव कविसम्मेलनाख्ये लघुरूपके-

हृद्यं हारि हरिप्रियं हितकरं हैयङ्गवीनं हृदि
प्रीतं पूततमञ्च गाङ्गसलिलं नेत्रद्वये राजते।
वीणानादझरी यदीयवदने श्रान्तेव विश्राम्यति
सोऽयं वागुपलालितो विजयते राजेन्द्रमिश्रोऽन्तिमः।।

यथा वा कविपुण्डरीकोपाह्वस्य सम्पूर्णदत्तमिश्रस्य सूक्तिपञ्चामृते-

श्रीसम्पूर्णसुवर्णसत्त्वललिता लावण्यपूर्णानना
पीनोत्तुङ्गपयोधराधरसुधाधाराधराधामिनी।
स्त्रीरत्नोत्तमसङ्गमार्चितधियं श्रीमन्त्रतन्त्रप्रियं
या मां मोदयते मदन्तरगता कस्यैचिदस्यै नमः।।

अलंकार-निरूपण के सन्दर्भ में सर्वप्रथम **पुनरुक्तवदाभास** (को लेते हैं) उसका लक्षण है-जहाँ वह अर्थ पुनरुक्ति के द्वारा भासित सा प्रतीत होता है, भिन्न आकृति वाले शब्दों का आश्रय लेने वाला वह **पुनरुक्तवदाभास** (अलंकार) कहा जाता है।।९९।।

उदाहरण है मेरे द्वारा प्रणीत यह पद्य-

काम के मित्रभूत इस वसन्त ऋतु में रसीले कण्ठ वाले कोकिलों के कूजन से प्रोषित पतियों वाली वियोगिनियाँ रात-दिन सन्तप्त हो रही हैं।

यहाँ स्मरमित्र तथा वसन्त में, कलकण्ठ तथा पिक में, दूरकान्ता तथा वियोगिनी (शब्द-युगल) में आपाततः पौनरुक्त्य भासित हो रहा है, परन्तु विशेषण-विशेष्य भाव के अवगम से उसका अपहार हो जाता है।

स्वरों की विषमता रहने पर भी, शब्द-साम्य को **अनुप्रास** कहा जाता है। छेक आदि भेदों में विभक्त वह अनेक रूपों वाला बताया गया है।।१००।।

अनुप्रास (अलंकार) के भेद-प्रभेद के विस्तार को **साहित्यदर्पण** आदि (ग्रंथों) से समझना चाहिये। यहाँ उदाहरण प्रस्तुत है मेरे ही **कविसम्मेलन** नामक लघु रूपक से!

जिसके हृदय में हृद्य (मनोरम) हारि (आकर्षक) हरिप्रिय (भगवान् कृष्ण को प्रिय) तथा हितकर (स्वास्थ्यवर्धक) हैयङ्गवीन (नवनीत) विद्यमान है तथा जिसके नेत्रयुगल में प्रीतिवर्धक, पवित्रतम गंगाजल (अश्रु) छलकता है और जिसके मुँह में वीणानाद की लहरी श्रान्त हुई सी विश्राम करती है, भगवती सरस्वती द्वारा उपलालित वह **राजेन्द्र मिश्र** (अब) अन्तिम कवि के रूप में प्रस्तुत हो रहा है।

अथवा जैसे **कविपुण्डरीक** पदवी वाले सम्पूर्णदत्तमिश्र के सूक्तिपञ्चामृत में (विद्यमान यंह पद्य)

श्रीसम्पन्न, सुवर्णतत्त्व के कारण ललित, लावण्यमय मुखमण्डल वाली, विशाल एवं समुन्नत पयोधर-युगल वाली, अधरसुधा की धारा को धारण करने

वाली, प्रकाशमयी तथा (निरन्तर) मेरे अन्तःकरण में विराजमान जो (भगवती पराम्बा) स्त्रीरत्न के उत्तम साहचर्य से समर्चित बुद्धि वाले तथा श्रीमंत्र एवं तंत्र के प्रणयी मुझ को आह्लादित करती है, उस किसी (भगवती रुद्राणी) को नमस्कार है।

शब्दार्थयोः पौनरुक्त्यं काव्ये यदवलोक्यते।
तात्पर्यमात्रतो भिन्नं लाटानुप्रास उच्यते।।१०१।।

उदाहरणं यथा मदुपज्ञं पद्यमिदम्-

कान्ताऽधररसात्तृप्तिर्येषां तेषां मुधा सुधा।
कान्ताऽधररसाऽतृप्तिर्येषां तेषां मुधा सुधा।।

समक्रमेणैवावृत्तिः स्वरव्यञ्जनसंहतेः।
सत्यर्थे पृथगर्थाया यमकं तन्निगद्यते।।१०२।।

यथा मम जानकीजीवनमहाकाव्ये-

विकचपाटलपुष्पकदम्बकं ह्युपरिसारितकङ्कणपाणिना।
मुकुलजालमुपेक्ष्य विचिन्वती वरतनू रतनूपुरका बभौ।।

अत्र रतनू इति स्वरव्यञ्जनसंहतेः पृथगर्थायास्तेनैव क्रमेणाऽवृत्तिः। पृथगर्थता कथम्? वरतनु-रतनूपुरकेति शब्दद्वययोगात्।

यथा वा त्रिपाठिनो भास्कराचार्यस्य साकेतसौरभमहाकाव्ये पद्यमिदम्-

जलजपुञ्जविजृम्भणमायिका मधुकरावलिकेलिनिदेशकाः।
परिमलस्नपिताखिलपादपक्षुपवनाः पवनाः परितो ववुः।।

यत्र श्लेषेण काक्वा वा वाक्यमन्यस्य गृह्यते।
अन्यार्थमन्यथा सैषा वक्रोक्तिर्द्विविधा मता।।१०३।।

उदाहरणं यथा मम विद्योत्तमानाटिकायाम्-

यास्याम्यन्यत एव, भामिनि! कथं गन्तुं क्व सन्धीयते
यत्राऽप्यस्तु भुजङ्गको न कुटिलो, दन्तैर्न दष्टम्मया।
किं दंशैर्विषमूर्च्छितां प्रकुरुते स्पृष्ट्वैव भोगी चिरं
निश्चिन्ता भव कालकूटहरणी त्वञ्चासि विद्योत्तमा।।

तात्पर्यमात्र से भिन्न, शब्द एवं अर्थ का जो पौनरुक्त्य काव्य में दिखाई पड़ता है उसे लाटानुप्रास कहा जाता है।।१०१।।

लाटानुप्रास का उदाहरण, जैसे मत्प्रणीत यह पद्य-

कान्ता (प्रियतमा) के अधररस से जिनकी तृप्ति हो चुकी है उनके लिये सुधा (अमृत) व्यर्थ है। कान्ता के अधररस से जिनकी तृप्ति नहीं हो सकी है, उनके लिये (भी) सुधा व्यर्थ है।

अर्थ के विद्यमान रहने पर, पृथक् अर्थवाली स्वर-व्यञ्जन संहति की, समान क्रम से आवृत्ति होने पर **यमक** अलंकार होता है।।१०२।।

उदाहरणार्थ, मेरे **जानकीजीवनम्** महाकाव्य का यह पद्य-

कंगन को ऊपर खिसका कर हाथ से, कच्ची कलियों के गुच्छों को छोड़कर पूर्णविकसित पाटल-पुष्प के समूह को तोड़ती हुई, रुनझुन बिछुओं वाली (कोई) सुन्दरी दिखाई पड़ी।

यहाँ रतनू में विद्यमान स्वर-व्यंजन संहति पृथक् अर्थ वाली है (दोनो आवृत्तियों में) और इसकी समान क्रम से आवृत्ति हुई है। पृथगर्थता कैसे? **वरतनू-रतनूपुरका** इन दो शब्दों की संघटना से!

अथवा जैसे भास्कराचार्य त्रिपाठी-प्रणीत **साकेतसौरभम्** महाकाव्य का यह पद्य-

कमलपुष्पों के समूहों को विकसित करने की सामर्थ्य वाले, भ्रमर-समूहों की केलियों के निदेशक तथा समस्त (बड़े) वृक्षों एवं (छोटे) पौधों को परिमल से नहला देने वाले पवन चतुर्दिक् बहने लगे।

जहाँ दूसरे द्वारा कहा गया अन्य अर्थ वाला वाक्य (श्रोता द्वारा) श्लेष अथवा काकु के द्वारा अन्यथा (अन्य प्रकार से) ग्रहण किया जाताहै, वहाँ **वक्रोक्ति** होती है जो दो प्रकार की होती है (श्लेष वक्रोक्ति तथा काकु वक्रोक्ति)।।१०३।।

उदाहरण जैसे मेरी **विद्योत्तमा** नाटिका में-

मैं कहीं और चली जाती हूँ। देवि! क्यों? कहाँ जाने की सोच रही हो? जहाँ पर कुटिल आचरण वाला कोई लम्पट न हो। मैने तो (तुम्हें) विषदन्तों से डँसा नहीं। डँसने की क्या जरूरत? भोगी (सुरतातुर) तो संस्पर्श मात्र से चिरकाल के लिये विषमूर्छित सी बना देता है। तुम निश्चिन्त रहो (तुम्हारे साथ ऐसा नहीं होगा क्योंकि) तुम तो कालकूट का प्रभाव नष्ट करने वाली उत्तम विद्या (विषापहारक मंत्र) हो।

अत्र विद्योत्तमोक्तान् भुजङ्गादिश्लिष्टशब्दान् देवदत्तोऽन्यथा गृह्णाति।

काक्वाश्रया वक्रोक्तिर्यथा ममैव मत्तवारण्याम्-

राष्ट्रशासनस्य शाश्वतीमदूरदर्शिताम्
डिण्डिमेन किन्न भूतले तनोति कार्गिलम्?
जम्बुकोऽपि सिंहकन्दरे सुखं समाविशेत्
सत्यमेतदुज्ज्वलीकरोति किन्न कार्गिलम्?
स्पन्दनानि चेतसां गुणीकरोति कार्गिलम्!
चिन्तनानि धीमतां जडीकरोति कार्गिलम्!!

अभिधानं बह्वर्थानां श्लिष्टैर्यत्र पदैर्मतम्।
तत्र श्लेषोऽष्टधा ज्ञेयो वर्णाद्यष्टसमाश्रितः।।१०४।।

श्लेषप्रपञ्चोऽयमाकरग्रन्थेष्वेव द्रष्टव्यः। तत्र सभङ्गश्लेषोदाहरणं यथा ममाभिराजसहस्त्रके (धारामाण्डवीयशतके)

धत्ते यो वारिधारां तमिह सविनयं मन्महे भोजमेघं
धत्तेऽयोवारिधारां तमिह सविनयं मन्महे भोजखड्गम्।
धत्ते यो वाऽरिधारां तमिह सविनयं मन्महे भोजभूपं
धत्ते यो वा रिधारां तमिह सविनयं मन्महे भोजदेशम्।।

अत्र यो वारिधाराम् इति, अयोवारिधारामिति, यो वाऽरिधारामिति, यो वा रिधारामिति भङ्गचतुष्टयेनैक एव शब्दश्चतुरोऽर्थान् प्रकाशयते। अभङ्गश्लेषोदाहरणमपि यथा ममैव-

कुमुदाऽम्भोजहेमन्तपीडितानामहो समः।
जायते सौख्यसन्दोहस्समवाप्य विरोचनम्।।

अत्र विरोचनशब्दश्चन्द्रसूर्याग्निवाचकः।

यहाँ (नायिका) विद्योत्तमा द्वारा कहे गये श्लेषपरक शब्दों (भुजंग, दंश, भोगी, विद्योत्तमादि) को (नायक) देवदत्त अन्य अर्थ में ग्रहण कर रहा है।

काकु पर आश्रित वक्रोक्ति का उदाहरण जैसे मेरी कृति मत्तवारणी का यह पद्य-राष्ट्र के शासनतंत्र की सदाबहार अदूरदर्शिता को क्या सारे संसार में, नगाड़ा पीट-पीट कर नहीं फैला रहा है कार्गिल? सियार भी सिंह की गुफा में आराम से घुस जाय, क्या इस सचाई को प्रकाशित नहीं कर रहा है कार्गिल? हृदय की धड़कनों को तेज कर रहा है कार्गिल! बुद्धिमानों की सोच को कुण्ठित कर रहा है कार्गिल!

जहाँ श्लिष्ट पदों के द्वारा अनेक अर्थों का अभिधान (अभिधया बोध) होता है वहाँ श्लेष अलंकार जानना चाहिये। वह वर्ण आदि आठ (तत्त्वों) पर आश्रित होने के कारण आठ प्रकार का होता है।।१०४।।

श्लेष अलंकार का यह विस्तार आकर ग्रंथों में ही देखना चाहिये। सभंग श्लेष का उदाहरण जैसे मेरे **अभिराजसहस्रकम्** (में संकलित धारामाण्डवीयशतक) में-

जो वारिधारा को धारण करता है ऐसे भोजरूपी मेघ को सविनय प्रणाम करता हूँ। जो (तलवार की) धारा के जल को धारण करता है उस भोजदेव के खड्ग को सविनय प्रणाम करता हूँ। जो शत्रुओं की भीड़ को तितर-बितर कर देता है उस भोज नरेश को सविनय प्रणाम करता हूँ तथा जो रेवा (नर्मदा) की धारा को धारण करता है उस भोजदेश (मालव) को सविनय प्रणाम कस्ता हूँ।

यहाँ पर जो वारिधारा को, अयो-वारिधारा को, अथवा जो शत्रुसमूह को, अथवा जो रेवा की धारा को-इस प्रकार चार भंगों (पदच्छेद) के द्वारा एक ही शब्द (यो वारिधारा) चार अर्थों को प्रकाशित कर रहा है।

अभंगश्लेष का भी उदाहरण जैसे मेरा (ही यह पद्य)

आश्चर्य है कि कुमुद, अम्भोज (कमल) तथा हेमन्त (शीत) से पीडितों को विरोचन को प्राप्त कर, एक जैसा सुख-सम्भार प्राप्त होता है।

यहाँ विरोचन शब्द चन्द्र, सूर्य तथा अग्नि का वाचक है (अतः कुमुदों का सुख चन्द्र से, कमलों कासूर्य से तथा शीतपीडितों का अग्नि से संभव होता है)।

सम्प्रत्यर्थालङ्काराः-

वैधर्म्यरहितं साम्यं यत्र वाच्यं क्वचिद् द्वयोः।
वाक्यैक्ये सोपमा पूर्णा चतुरङ्गसमन्विता।।१०५।।

चतुरङ्गसमन्विता सामान्यधर्मवाचकशब्दोपमेयोपमानयुक्तेत्यर्थः। वैधर्म्यरहितमित्यनेन व्यतिरेकाद् व्यावृत्तिः। साम्यं वाच्यमित्यनेन रूपकाद्व्यावृत्तिः। वाक्यैक्य इत्यनेनोपमेयोपमातः भेदस्तत्र वाक्य-द्वयत्वात्। द्वयोरित्यनेनाऽनन्वयाद्भेदस्तत्रैकस्यैव पदार्थस्य साम्योक्तित्वात्।

उदाहरणं यथाऽवस्थिनो बच्चूलालस्य प्रतानिन्याम्-

दूर्वेव प्रतिपर्व रोहतितरां दुग्धे सुधाधेनुवद्
रम्भेव प्रतिपत्रपत्रितगतिः सुस्वादु पम्फुल्यते।

मातेव प्रतिपालयत्यरिजने सिंहीव जागृज्यते
सेयं संस्कृतभारती सुमनसां सम्मानसे सज्जताम्।।

अत्र संस्कृतभारत्युपमेयम्। दूर्वासुधाधेनुरम्भासिंहीमात्रादय उपमानम्। रोहणदोहन-फुल्लनप्रतिपालनगर्जनादयस्साधारणधर्माः। इववदादयो वाचकशब्दाः। पूर्णोपमानिदर्शनमिदं पद्यम्।

यथा वा रसिकविहारिजोशिनः पद्यमिदम्-

राधे! ते करुणाकटाक्षलहरी नीलाम्बुजस्पर्धिनी
कालिन्दी प्रतिभाति कापि विमला सम्पत्सुधावर्षिणी।
किं वा मौक्तिककान्तिपुञ्जजयिनी सारस्वतेयीच्छटा
किं वा कैरविणीरुचां मदरिपुर्भागीरथीसन्ततिः।।

अत्रापि राधाकरुणाकटाक्षलहर्युपमेयम्। कालिन्द्युपमानम्। सम्पत्सुधावर्षा साधारणो धर्मः। प्रतिभातीति वाचकश्शब्दः। पूर्णोपमेयम्।

अब अर्थालङ्कारों का निरूपण किया जा रहा है।

जहाँ एक ही वाक्य में दो वस्तुओं का वैधर्म्य-रहित साम्य वाच्य हो रहा हो, वहाँ उपमा अलंकार होता है। चार अंगों से समन्वित उपमा पूर्णोपमा कही जाती है।।१०५।।

चतुरङ्ग-समन्विता अर्थात् सामान्य धर्म, वाचक शब्द, उपमेय तथाउपमान- इन चारों से युक्त। वैधर्म्यरहित कहने से उपमा का व्यतिरेक अलंकार से पार्थक्य बताया जा रहा है। 'साम्य वाच्य हो' ऐसा कह कर उसकी रूपक से पृथक्ता बताई गई है। 'एक ही वाक्य में' ऐसा कहने से उपमेयोपमा से उपमा की भिन्नता प्रकट है। क्योंकि उपमेयोपमा में दो (पृथक्) वाक्य होते हैं। 'दो वस्तुओं की' कहने से अनन्वय से उपमा का भेद बताया गया क्योंकि उसमें एक ही वस्तु की साम्योक्ति होती है।

उपमा का उदाहरण जैसे बच्चूलाल अवस्थी-प्रणीत प्रतानिनी में (यह पद्य)।

जो दूर्वा के समान पोर-पोर कन्दलित होती है, अमृतदात्री कामधेनु के समान दुही जाती है, रम्भा (कदली) के समान प्रतिपत्र गतिशील है तथा स्वादिष्ट फल देने के लिये बार-बार पुष्पित होती है, जो जननी की तरह पालन-पोषण करती है और शत्रुओं को देख सिंही की तरह बार-बार गर्जना करती है

वह संस्कृतभाषा सहृदयों के (देवताओं) सम्यक् मानस में (मानसरोवर में) शोभा प्राप्त करे।

यहाँ संस्कृतभारती उपमेय है। दूर्वा सुधाधेनु रम्भा सिंही तथा माता उपमान हैं। रोहण-दोहन फुल्लन प्रतिपालन गर्जन आदि साधारण धर्म हैं तथा इव-वत् आदि वाचक शब्द हैं। (इस प्रकार) यह पद्य पूर्णोपमा अलंकार का उदाहरण है।

अथवा जैसे रसिकविहारी जोशी का यह पद्य-

हे राधिके! नीलकमल से स्पर्धा करने वाली तथा वैभवरूपी सुधा की वृष्टि करने वाली तुम्हारी करुणा से ओतप्रोत कटाक्ष-लहरी कोई विमल कालिन्दी (यमुना) ही प्रतीत होती है। अथवा (तुम्हारी यह भ्रूभङ्गी) मोतियों के प्रभापुञ्ज को जीत लेने वाली सरस्वती की कमनीयता अथवा कुमुदिनियों की कान्तियों के दुरभिमान को चूर कर देने वाली भगवती भागीरथी की धारा (सी प्रतीत होती है)।

इस पद्य में भी राधा की करुणा-कटाक्षलहरी उपमेय है। कालिन्दी (सारस्वतेयी छटा तथा भागीरथी-सन्तति) उपमान है। सम्पत्सुधावर्षा साधारण धर्म है तथा वाचक शब्द है-प्रतिभाति। यह भी पूर्णोपमा है।

उत्तरोत्तरवाक्येषु यत्र स्यादुपमानता।
उपमेयस्य, सा प्रोक्ताऽलङ्कृती रशनोपमा।।१०६।।

उदाहरणं यथा स्वोपज्ञमेव पद्यमिदम्-

विन्ध्यायते मत्तगजो बृहत्त्वात्
गजायते मन्दरयेण वामा।
वामायते मञ्जुरवोऽपि हंसो
हंसायते शुक्लविभोऽथ चन्द्रः।।

एकस्यैवोपमेयस्योपमानं बहु दृश्यते।
यत्र मालोपमा सैव प्रोक्ता मालानुकारिणी।।१०७।।

उदाहरणं यथा सनातनरेवाप्रसादद्विवेदिप्रणीते उत्तरसीताचरित-महाकाव्ये-

शरत्सु हंसा दिवसेषु भास्करः सुधांशुरह्नो विगमेषु दीव्यति।
नृनाथ कालेष्वखिलेषु पावनं यशस्तु ते दीव्यति दीप्तमोजसा।।

अत्रैकस्यैव यशसस्त्रीण्युपमानानि हंसभास्करसुधांशुप्रभृतीन्युपस्थापितानि। तेन मालोपमाऽत्र। यथा वा मदुपज्ञे जानकीजीवनमहाकाव्ये-

कलेव चान्द्री स्फुटचारुशोभा ज्वलद्धुताशप्रतियातनेव।
लतेव मालेव धरासुतेव प्रमोहविद्धं विदधे जनं सा।।

अत्रापि एकस्या एव जानक्याः पञ्चोपमानानि समुदाहृतानि।

उत्तरोत्तर (अगले-अगले) वाक्यों में जहाँ उपमेय, उपमान बनता जाय, वह अलंकार **रशनोपमा** कहा जाता है।।१०६।।

उदाहरण, जैसे मेरा ही लिखा हुआ यह पद्य?

विशालता के कारण मतवाला हाथी विन्ध्य के समान प्रतीत हो रहा है। मन्दगति के कारण कामिनी गजराज के समान प्रतीत हो रही है। मीठा कलरव करने के कारण हंस भी कामिनी जैसा प्रतीत हो रहा है और धवल प्रभा वाला चन्द्रमा भी हंस-सरीखा प्रतीत हो रहा है।

जहाँ एक ही उपमेय के अनेक उपमान दृष्टिगोचर हों, माला का अनुकरण करने वाली वही अलंकृति **मालोपमा** कही गई है।।१०७।।

इसका उदाहरण प्रस्तुत है रेवाप्रसादद्विवेदी सनातन-प्रणीत **उत्तरसीताचरित-महाकाव्य** का यह पद्य-

हंस शरत्काल में, सूर्य दिन में और चन्द्रमा (भी) दिनान्त में (रात्रिवेला में) शोभित होता है (परन्तु) हे राजन्! ओजस् से समुज्ज्वल आपका पावन यश तो समस्त कालखण्डों में प्रकाशित हो रहा है।

यहाँ एक ही यश (उपमेय) के तीन उपमान-हंस, भास्कर तथा चन्द्रमा उपस्थापित किये गये हैं। इसके कारण यहाँ **मालोपमा** अलंकार है।

अथवा जैसा कि (उदाहरणान्तर) मेरे **जानकीजीवनमहाकाव्य** में-

परिस्फुट रमणीय शोभा वाली चन्द्रकला के समान, प्रज्वलित अग्नि की प्रतिमा के समान, लता, माला, अथवा पृथ्वी की पुत्री के समान उस कन्या ने समस्त जन-समवाय को प्रमोह-विद्ध बना दिया।

यहाँ भी (उपमेयभूता) एक ही जानकी के पाँच उपमान दिये गये हैं।

अनन्वयोऽसौ यत्र स्यादेकस्यैव हि वस्तुनः।
उपमेयोपमानत्वं वाक्येऽप्यपरिवर्तिते।।१०८।।

उदाहरणं यथा ममैव-

राजीवमिव राजीवं चन्द्रश्चन्द्र इवाऽमलः।
जाह्नवी जाह्नवीवाऽसौ त्वमिव त्वमसि प्रिये।।

पर्यायेण द्वयोर्यत्र वाक्ययोः परिलक्ष्यते।
उपमानोपमेयत्वं सोपमेयोपमा स्मृता।।१०९।।

उदाहरणं यथा मम-

वाणी मुक्तेव यस्यासीन्मुक्ता वाणीव निर्मला।
करपात्रयतीशानं वन्दे काशीविभूषणम्।।

अत्र वाणीमुक्तयोः पर्यायेणोपमानोपमेयत्वं सुस्पष्टमेव।

सदृशोऽसदृशाद्वापि जायतेऽनुभवादिह।
वस्तुनो या स्मृतिस्तद्वै स्मरणं विनिगद्यते।।११०।।

असदृशानुभवजन्यस्मरणोदाहरणं यथा राधावल्लभत्रिपाठिनोऽद्यापिलहर्याम्-

अद्यापि मे स्मृतिपथं सहसा प्रयान्ति
गाढान्धकारघनजालतडित्प्रभाभाः।
तेऽध्यापकाः प्रतिभया परितोष्यमाणा
शिष्यात्पराजयमपि स्वजयं वदन्तः।।

सदृशानुभवजन्यस्मरणं यथा ममैव मधुपर्ण्याम्-

यदा पर्येति भृङ्गो जलजकलिकाम्
मनोऽधीरं विधत्ते तव स्मरणम्।
यदा प्राच्यां प्रदोषे विधुर्दयते
मनो मुग्धं विधत्ते तव स्मरणम्!!

जहाँ अपरिवर्तित अर्थात् एक ही वाक्य में एक ही वस्तु का उपमेयत्व भी हो उपमानत्व भी, उसे अनन्वय अलंकार कहा जाता है।।१०८

उदाहरण, जैसे मेरा ही (यह पद्य)

कमलपुष्प कमलपुष्प के (ही) समान है, चन्द्र चन्द्र के ही समान निर्मल है। वह भगवती जाह्नवी (भी) जाह्नवी जैसी हैं। हे प्रिये! तुम भी तुम्ही हो।

जहाँ दो वाक्यों में (एक ही वस्तु का) बारी-बारी से उपमानत्व तथा उपमेयत्व परिलक्षित होता है उसे उपमेयोपमा कहा गया है।।१०९

उदाहरण, मेरा ही (यह पद्य)

जिसकी वाणी मौक्तिक के समान (निर्मल) थी और मोती (भी) जिसकी वाणी के समान निर्मल थी, काशी के विभूषण उन यतिराट् स्वामी करपात्री जी की वन्दना करता हूँ।

यहाँ वाणी और मुक्ता का पर्यायतः उपमानोपमेयत्व सुस्पष्ट ही है।

समान अथवा असमान अनुभव द्वारा किसी वस्तु की जो स्मृति होती है उसी को स्मरण अलंकार कहते हैं।।११०

असदृश अनुभवजन्य स्मरण का उदाहरण, जैसे राधावल्लभ त्रिपाठी-प्रणीत अद्यापिलहरी का यह पद्य-

प्रगाढ अन्धकार के सघन समूह में विद्युत्प्रभा के समान, छात्रों की प्रतिभा (मात्र) से परितुष्ट होने वाले (न कि दक्षिणादि से) तथा शिष्य से प्राप्त पराजय को भी अपनी विजय घोषित करने वाले, वे उपाध्याय सहसा मेरे स्मृतिपथ में आते हैं।

सदृश अनुभवजन्य स्मरण का उदाहरण जैसे मेरी ही मधुपर्णी का यह गीतांश-जब भ्रमर कमलपुष्प की कलिका पर मँडराने लगता है तब मेरा मन अधीर-भाव से तुम्हारा स्मरण करता है। जब सान्ध्यवेला में, पूर्व दिशा में चन्द्रमा उदित होता है तब मेरा मन मुग्धभाव से तुम्हारा स्मरण करता है।

निषेधहीने विषयेऽप्युपमेयान्यसंज्ञके।
आरोप उपमानस्य रूपकं हि समुच्यते।।१११।।

तत्रोदाहरणं यथा शिवजीवोपाध्यायविरचिते कुम्भशतके-

लीलाविलासितसरत्सलिला सरित्सा
वृन्दावनोदितमुकुन्दसुखं वहन्ती।
गोपीसहस्त्रगुरुकुम्भपयोधरोद्यत्-
धाराऽधिकुम्भमधिगङ्गमिहाविरस्ति।।

यथा वा जगन्नाथपाठकस्य पद्यमिदम्-

धूमोद्गारमवाप्य दृष्टिविरसं चिन्ताश्मसानस्थला-
ज्ज्योतिर्दीपगणादवाप्य निहितात् काङ्क्षासमाधावथ।
दौर्भाग्यानिलनेत्रवारिमिलितं सान्द्रासु सन्ध्यास्वदो
नो जाने क्वचिदन्तरन्तरतमे यत्किञ्चिदुज्जृम्भते।।

प्रकृतेऽप्युपमानस्य जायते यो हि संशयः।
कविप्रतिभयोत्थोऽसौ सन्देहो विनिगद्यते।।११२।।

उदाहरणं जगन्नाथपाठकस्यैव कापिशायिन्याम्-

गगनं मधुवेश्म किं शशी मधुकुम्भः किमयं समुद्गतः?
उडवः किमिमे च पायिनो निपतन्तः क्वचिदुत्थिताः क्वचित्।।

अत्र प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः। संशयमात्रपर्यवसितस्सन्देहो यथा ममैव विद्योत्तमानाटिकायाम्-

किमाकाशे चन्द्रावुदयमुपयातो सहभुवौ
प्रदीपौ प्रासादे युगपदथवाऽभां प्रतनुतः।
उपात्तौ मेदिन्यां मनसिजवसन्तौ किमु पुनः
कुमारौ सम्पश्यन्निति सपदि निश्चेतुमवशः।।

अत्र देवदत्ताऽग्निमित्रौ सार्धमेव पश्यन् सेनापतिः पुष्यमित्रशुङ्गस्सन्देग्धि।

निषेधहीन विषय में, जिसकी दूसरी संज्ञा उपमेय (भी) है, उपमान का आरोप ही रूपक कहा जाता है।।१११

इसका उदाहरण शिवजीवोपाध्याय-प्रणीत कुम्भशतक का यह पद्य है- महाकुम्भ पर्व के अवसर पर इस प्रयाग में जलभंगी से विलसित तथा अग्रेसरत् जलधारा वाली, वृन्दावन में उदित मुकुन्द के सुख का वहन करने वाली तथा हजारों गोपाङ्गनाओं के विशाल कुचकलशों से फूटी धारा वाली वह यमुना नदी भी गंगा से संगमित हो उठती है।

अथवा, जैसे जगन्नाथपाठक का यह पद्य-

आकांक्षा की समाधियों में चिन्तारूपी श्मसानस्थल से (उठे) दृष्टि को विरस बनाने वाले धूमबिम्ब को प्राप्त कर, पार्श्वस्थ दीपगणों से ज्योति प्राप्त कर, दौर्भाग्यरूपी वायु से उत्थापित नयनाश्रु से मिश्रित जो कुछ, प्रगाढ सन्ध्याओं में, हृदय के गह्वर में उत्पन्न होता है, वह क्या है? यह (मैं) नहीं जानता।

उपमेय में जो उपमान का संशय उत्पन्न होता है, कविप्रतिभा से समुत्थित वही सन्देह अलंकार कहा जाता है।।११२

उदाहरण जगन्नाथ पाठक की ही कापिशायनी का यह पद्य-

क्या आकाश ही मदिरालय है? यह समुदित चन्द्र ही क्या मधुकलश है? ये तारे ही क्या मधुपायी (लोग) हैं जो कभी (लड़खड़ा कर) गिरते हैं और कभी (सँभल कर) उठते हैं?

यहाँ प्रकृत (उपमेय) में अन्य (उपमान) का संशय कविप्रतिभाजन्य है। संशयमात्र में पर्यवसित सन्देह का उदाहरण जैसे मेरी विद्योत्तमा नाटिका में-

क्या एक ही साथ पैदा होने वाले दो (जुड़वाँ) चन्द्र आकाश में उदित हो गये हैं? अथवा राजप्रासाद में दो दीपक एक ही साथ प्रभापुञ्ज बिखेर रहे हैं? या फिर, काम और वसन्त पृथ्वी पर (एक साथ) अवतरित हुए हैं? दोनों कुमारों को देखता हुआ मैं तत्काल यह निश्चय कर पाने में विवश हो गया हूँ।

यहाँ देवदत्त (कालिदास) तथा अग्निमित्र को साथ-साथ देखते हुए सेनापति पुष्यमित्र शुङ्ग सन्देह-ग्रस्त हो उठते हैं।

यद्धि वस्त्वन्तरज्ञानं सादृश्यादन्यवस्तुनि।
कविप्रतिभयैवोत्थं भ्रान्तिमान्स समुच्यते।।११३।।

उदाहरणं यथा मदुपज्ञं पद्यमिदम्-

धेनुं स्वां मनुते जनोऽथ धवलां तां शोणवर्णाश्विनीं
क्षीराब्धिं ननु लम्बमानमुपरि द्रागीक्षते दैवगः।
वापीं हन्त गवेषयन्ति सिकतालीनां मरावङ्गना
भ्रान्तिं कस्य न पूर्णचन्द्ररजनी सेयं सृजत्यद्भुताम्।।

उल्लेखोऽनेकधोल्लेख एकस्यैव हि वस्तुनः।
ग्रहीतॄणां क्वचिद्भेदाद् विषयाणां क्वचित्पुनः।।११४।।

उदाहरणं यथाऽवस्थिनो बच्चूलालस्य प्रतानिन्याम्-

हिमार्तौ सप्तार्चिः प्रतपति तपे त्वं हिमरुचि-
स्त्वमौशीरी कुम्बा वहति दहनोष्णोऽपि पवने।
विपत्तौ सम्पत्तिः स्मरणविषयीभूय महसा
सुताय त्वं मातः सकलमनुकूलं कलयसि।।

अत्रैकस्या एव पराम्बाया विविधगुणयोगादनेकधोल्लेखः। यथा वा वसन्तत्र्यम्बकशेवडेप्रणीते गर्दभाख्याने पद्यमिदम्-

चौर्ये शर्विलकेन याति तुलनां क्रौर्ये यमो मूर्तिमान्
पीडायां शनिरक्षदेवनविधौ दौर्योधनो मातुलः।

आहारेषु बकासुरस्स शयने यः कुम्भकर्णः स्वयं
जीयाद् धावकवंशमण्डनमणिः काणस्स पृथ्वीपतिः।।

प्रतिषिध्योपमेयं चेदुपमानस्य निश्चयः।
आरोपापह्नवोद्भिन्ना द्विविधा साप्यपह्नुतिः।।११५।।

सादृश्य के कारण जो अन्य वस्तु में (उससे भी) अन्य वस्तु का ज्ञान होता है कविप्रतिभा से ही समुत्थित, उसे भ्रान्तिमान् अलंकार कहते हैं।।११३।।

उदाहरण, जैसे मत्प्रणीत यह पद्य-

लालरंग की उस घोड़ी को एक व्यक्ति अपनी सफेद रंग की गाय समझ रहा है। दैवज्ञ (ज्यौतिषी) अकस्मात् अपने ऊपर लटकते हुए क्षीरसागर को देख रहा है। स्त्रियाँ मरुभूमि में, बालुका में कहीं खोई बावली को खोज रही हैं। पूनम की ऐसी चाँदनी किस-किस की अद्भुत भ्रान्ति नहीं सिरज रही है?

कहीं ग्रहीताओं के भेद से और कहीं विषयों के भेद से, एक ही वस्तु के अनेकशः उल्लेख को उल्लेख अलंकार कहा जाता है।।११४।।

उदाहरण, जैसे बच्चूलाल अवस्थी-प्रणीत **प्रतानिनी** में (यह पद्य)

शीत ऋतु में (तुम) सूर्य हो, जेठ की तपन में तुम हिमरुचि चन्द्र हो। आग सरीखी गरम हवाओं (लू) के बहने पर तुम्ही उशीर-निर्मित परदा हो। विपत्ति में सम्पत्ति हो। हे माँ! अपने प्रतापवश स्मरण का विषय बन कर तुम (अपने) पुत्र के लिये सब कुछ अनुकूल बना देती हो।

यहाँ एक ही पराम्बा का, विविध गुणों के योगवश, अनेकधा उल्लेख किया गया है।

अथवा जैसे वसन्तत्र्यम्बकशेवडे-प्रणीत **गर्दभाख्यान** का यह पद्य-

जो चोरी में (मृच्छकटिक में उल्लिखित चोर) शर्विलक के साथ तुलनीय है, क्रूरता में मूर्तिमान् यम है, पीड़ा देने में शनि है, जुआ खेलने में दुर्योधन का मामा (शकुनि) है, भोजन करने में बकासुर जैसा तथा गहरी नींद सोने में जो स्वयं कुम्भकर्ण है-धोबियों के वंश का अलंकारमणि विजयी हो वह काना राजा!

यदि उपमेय का प्रतिषेध करके उपमान की स्थापना की जाय तो आरोप एवं अपह्नव से उद्भिन्न (विभक्त) वह दो प्रकार की अपह्नुति होती है।।११५

उदाहरणं यथा ममैव-

घना नैवाकाशे तिमिररुचयो विन्ध्यशिखरा
न चेमा दामिन्यो धवलसितवर्णाः सुरभयः।
घनच्छन्नश्चन्द्रोऽपि न गिरिगुहान्ते मृगपति-
र्न घोषोऽम्भोदानामपितु गुरुनादो मृगपतेः।।

उपमानप्रतिषेधादुपमेयस्य स्थापनम्।
निश्चयोऽसावलङ्कारः कोविदैरभिधीयते।।११६।।

तदुदाहरणं मदुपज्ञं पद्यमिदम्-

नाऽयं पार्वणचन्दिरोऽस्ति गगने, वामामुखं मञ्जुलं
नाऽसौ कोऽपि शशोऽपि तस्य, तिलकं भाले हि कास्तूरिकम्।
कस्मात्त्वं ननु निर्निमेषनयनस्ताम्यंस्तथोत्कण्ठितो
भ्रातर्भ्रान्तचकोर! पश्यसि निराहारस्तदाकाङ्क्षितम्।।

यत्र सम्भावना दृष्टा प्रस्तुतस्य हि वस्तुनः।
अप्रस्तुतस्य रूपेण सोत्प्रेक्षा द्विविधा मता।।११७।।

उत्प्रेक्षाविस्तार आकरग्रन्थेभ्यो ज्ञेयः। उदाहरणं यथा ममैवाऽरण्यान्याम्-

आकाश एष दयितः परिभूः स्वयम्भू-
र्नग्नां विलोक्य धरणीं किमुत स्वभार्याम्।
जातत्रपस्तुहिनपातमिषेण यत्नै-
स्तां संवृणोति शरदभ्रसितैर्दुकूलैः।।

उदाहरणस्वरूप मेरा ही यह पद्य-

ये आकाश में (मँडराते) बादल नहीं प्रत्युत अन्धकार के समान दीखने वाले विन्ध्यपर्वत के शिखर हैं। ये विद्युल्लतायें नहीं हैं प्रत्युत धवलतम वर्ण वाली (पर्वत पर चरती) गायें हैं। यह बादल से ढँका (अर्धदृष्ट) चन्द्रमा भी नहीं प्रत्युत पर्वत-कन्दरा के मुहाने पर बैठा शेर है। यह बादलों की गर्जना भी नहीं है प्रत्युत उसी बबर शेर की दहाड़ है।

उपमान के प्रतिषेध से उपमेय की जो स्थापना की जाती है उसी को आचार्य गण निश्चय अलंकार कहते हैं।।११६।।

निश्चय का उदाहरण जैसे मत्प्रणीत यह पद्य-

यह आकाशमण्डल में (उदित) पूनम का चाँद नहीं है प्रत्युत रमणी का सुन्दर मुखमण्डल है। यह उस चन्द्रमा की गोद में बैठा कोई खरगोश भी नहीं

प्रत्युत रमणी के भाल पर अंकित कस्तूरी का तिलक है। भ्रातः! भ्रान्त चकोर! यूँ उत्कण्ठित होकर, विना कुछ खाये-पिये, यंत्रणा भोगते तुम उस आकांक्षित (मनचाहे) को क्यों देख रहे हो?

जहाँ प्रस्तुत वस्तु की अप्रस्तुत के रूप में संभावना दिखाई पड़े उसे **उत्प्रेक्षा** कहते हैं। यह दो प्रकार की होती है।।११७।।

उत्प्रेक्षा का विस्तार भी आकर ग्रंथों से जानना चाहिये। इसका उदाहरण है मेरी (रचना) **अरण्यानी** का यह पद्य-

सर्वव्यापी तथा स्वयम्भू यह आकाशरूपी नायक, अपनी भार्या धरित्री को नग्न देख कर, लज्जा में निमग्न हुआ सा, हिमपात के बहाने कहीं शरत्कालीन मेघों के समान धवल रेशमी वस्त्रों से यत्नपूर्वक संवृत तो नहीं कर रहा?

हिमपातमभिलक्ष्य कृतेयमुत्प्रेक्षा। आकाशनायकः कान्तां धरणीं नग्नां विलोक्य जातत्रप इव तां संवृणोति, वस्त्रेणाच्छादयतीव। कथम्? शरदभ्रसितैर्दुकूलैर्हिमपातस्वरूपैः।

यथा वा मधुकरगोविन्दमाइणकर प्रणीते स्मृतितरङ्गे पद्यमिदम्-

एषा रम्या मरकतचिता मुद्रिका वाग्विवाहे
प्रेम्णा न्यस्ता मदनलतिके कोमले ते कराग्रे।
स्थानाद् भ्रष्टा मलिनमलिना राजते नापि दीना
मन्ये तस्मादहमिव सखि! क्षीणपुण्या सखी ते।।

अत्र क्षीणपुण्यत्वं हेतुरूपेणोत्प्रेक्षितम्।

अध्यवसायसिद्धत्वेऽतिशयोक्तिर्निगद्यते।
विविधैर्हेतुभिस्सापि पञ्चधैव व्यवस्थिता।।११८।।

तत्र सम्बन्धेऽप्यसम्बन्धरूपाऽसम्बन्धेऽपि सम्बन्धरूपा, भेदेऽप्यभेदरूपाऽभेदेऽपि भेदरूपा, कार्यकारणपौर्वापर्यव्यत्ययरूपा चेति पञ्चधाऽतिशयोक्तिः। असम्बन्धे सम्बन्धरूपाया उदाहरणं यथा मम जानकीजीवनमहाकाव्ये-

समुन्नतत्वादवतंसताङ्गता मनोज्ञनासेति विभाव्य निष्कृतिम्।
अहो प्रतिस्पर्धितया तयैव किं पयोधरौ तुङ्गतरौ बभूवतुः।।

हिमपात को अभिलक्षित कर यह उत्प्रेक्षा की गई है। आकाशरूपी नायक प्रियतमा धरित्री को नग्न देख कर मानो लज्जित हुआ सा उसे ढँक रहा है,

अर्थात् मानो वस्त्रों से आच्छादित कर रहा है। कैसे? शरदभ्र-सित दुकूलों द्वारा, जो हिमपात के रूप में विद्यमान है।

अथवा उदाहरणान्तर जैसे मधुकर गोविन्द माइणकर-प्रणीत स्मृतितरङ्ग का यह पद्य-

यह रही वह पन्ने की अँगूठी जो मैंने वाग्विवाह (मँगनी) के अवसर पर, प्रेमपूर्वक मदनलतिका स्वरूप तुम्हारी कोमल अँगुली में पहनाई थी। (आज) स्थान से भ्रष्ट हुई, अतिशय मलिन वह वेचारी शोभा नहीं प्राप्त कर रही है। इसलिये मैं मानता हूँ प्रिये! कि मेरी ही तरह तुम्हारी वह सखी भी क्षीणपुण्या हो चली है।

यहाँ 'क्षीणपुण्यता' हेतु रूप में उत्प्रेक्षित है।

अध्यवसाय के सिद्ध हो जाने पर अतिशयोक्ति अलंकार होता है। विविध हेतुक अध्यवसायों के कारण वह भी पाँच प्रकार की होती है।।११८।।

सम्बन्ध में असम्बन्धरूपा, असम्बन्ध में सम्बन्धरूपा, भेद में अभेदरूपा तथा अभेद में भी भेदरूपा तथा कार्य-कारण के पौर्वापर्य की व्यत्यय रूपा-अतिशयोक्ति पाँच प्रकार की होती है।

असम्बन्ध में सम्बन्ध रूपवाली अतिशयोक्ति का उदाहरण जैसे मेरे जानकीजीवन महाकाव्य का यह पद्य-

सुन्दर नासिका अपनी समुन्नतता के ही कारण (संभवतः) रूप-सौन्दर्य का प्रतिमान बन गई है-इस स्थिति को भाँपकर ही, नासिका के साथ प्रतिस्पर्धा-भाव होने के कारण क्या (वैदेही के) पयोधरयुगल, उससे भी अधिक समुन्नत हो उठे?

अत्र नासापयोधरयोः प्रतिस्पर्धासम्बन्धेऽविद्यमानेऽपि सम्बन्धः कश्चिदुपकल्पित एव। भेदेऽप्यभेदरूपाया उदाहरणं यथा ममाऽरण्यान्याम्-

विकचकुमुदनेत्रा यूथिकामञ्जुहासा
सरसिजमृदुकाण्डाऽताम्रहस्ताङ्घ्रियुग्मा।
तरुशिखरकुलायोन्निद्रपक्षिप्रजल्पा
समभिसरति चन्द्रं गुर्जरिषु त्रियामा।।

अत्र कुमुदयूथिकासरसिजतरुपक्षिभेदे सत्यपि त्रियामानायिकाङ्गत्वाद-भेदकल्पनयाऽतिशयोक्तिः।

प्रस्तुतानां पदार्थानामन्येषां वा यदा भवेत्।
एकधर्मेण सम्बन्धः सोच्यते तुल्ययोगिता।।११९।।

उदाहरणं यथा मम-

कान्तासंस्पर्शशैतल्यवेदिनो हृदि कस्य नो।
उष्णतोशीरपाटीरमुक्तामलयमारुताम्।।

अत्रोशीरपाटीरमुक्तामरुतामप्रस्तुतानामुष्णतारूपेणैकेनैव धर्मेण सम्बन्धः। प्रस्तुतानां पदार्थानामेकधर्माभिसम्बन्धेन तुल्ययोगिताया उदाहरणं यथा ममैव उत्तरमृगाङ्कदूते-

अङ्गैर्भूतिं विबुधतटिनीमुत्तमाङ्गेन गौरी-
मुत्सङ्गेनोच्छ्वसितविभुतामेवमेवाऽस्तुवाचा।
भालैस्तन्वीं नवविधुकलां विष्णुभक्तिञ्च योगै-
र्जीयात्स्वैरं युवतिनिचयं राधयन् दर्पकारिः।।

यहाँ नासा और पयोधर-युगल की प्रतिस्पर्धा का कोई सम्बन्ध न होने पर भी, किसी सम्बन्ध की परिकल्पना की गयी है।

भेद में भी अभेदरूपा अतिशयोक्ति का उदाहरण जैसे मेरी कृति अरण्यानी (का यह पद्य)।

खिले हुए कुमुदपुष्प-रूपी नेत्रों वाली, जुही पुष्परूपी हँसी वाली, कोमल कमलनालरूपी ललछौंह हाथ-पैर वाली, वृक्षों की चोटी पर बने घोसलों में रतजगा करते पक्षियों के कलरवरूप वार्ताक्रम वाली रात्रिरूपी नायिका गुजरात में, चन्द्रमा से अभिसार कर रही है।

यहाँ पर कुमुद-यूथिका-सरसिज-तरु एवं पक्षी में भेद के रहते हुए भी रात्रिरूपी नायिका के अंग-प्रत्यंग रूप में उनकी अभिन्नता (एकस्थता) के कारण अतिशयोक्ति है।

प्रस्तुत पदार्थों का, अथवा अन्यों का (भी) जब एक ही धर्म से सम्बन्ध हो तो उसे तुल्ययोगिता कहते हैं।।११९

उदाहरण, जैसे मेरा ही यह पद्य-

प्रियतमा के अंग-संस्पर्श की शीतलता का अनुभव कर चुके भला किसके हृदय में उशीर (खस) पाटीर (चन्दन) मुक्ता एवं मलयमारुत की उष्णता की प्रतीति नहीं होती?

यहाँ खस, चन्दन, मोती तथा मलयपवन रूप समस्त अप्रस्तुतों का उष्णतारूप एक ही धर्म से सम्बन्ध बताया गया है।

(इसी प्रकार) प्रस्तुत पदार्थों का एक ही धर्म से अभिसम्बन्ध होने पर निर्व्यूढ तुल्ययोगिता का उदाहरण मेरे उत्तरमृगाङ्क का यह पद्य है-

अंगों से विभूति (राख) को, शीर्ष से देवनदी गंगा को, उत्संग से (प्रियतमा) गौरी को 'एवमस्तु' रूप वाणी से अपार समृद्धि को, ललाट से द्वितीया तिथि की नूतन चन्द्रकला को, समाधियोग से (अपने आराध्य) विष्णु की भक्ति को तथा अपनी लीलाओं से देववनिताओं को यथेष्ट धन्य बनाते दर्पकारि भगवान् शिव जयी हों।

अत्र दर्पकारिवर्णने प्रस्तुते सति भूतिविबुधतटिनीगौरीविभुताचन्द्रकलाविष्णुभक्तिदेवाङ्गनाः सर्वा अपि प्रस्तुता एव। तासां राधनरूपैकधर्मसम्बन्धवशादत्र तुल्ययोगिता। अपरमप्युदाहरणं यथा मदुपज्ञायामरण्यान्याम्-

मानोज्ञकं विविधवर्णयुतं सुमेभ्यो लोकाय पौरुषमभीप्सितसाधनाय।
कोकाय हर्षनिवहं वितरन् विषादं घूकाय साम्प्रतमुदेति विकर्तनोऽयम्।।

अप्रस्तुतप्रस्तुतयोरेकधर्मसमन्वितिः।
दीपकं यत्र बह्वीनां क्रियाणामेककारकम्।।१२०।।

बह्वीनां क्रियाणामेककारकं यत्र तदुदाहरणं यथा राधावल्लभत्रिपाठिप्रणीते लहरीदशके-

हासयन्ती क्वचिद्रोदयन्ती क्वचिन्मोदयन्ती क्वचिद् भ्रामयन्ती तथा।
नर्तयन्ती जनान् काष्ठपुत्रप्रभान् सा जगन्नाटिकासूत्रधारीसमा।।

यथा वाऽवस्थिनो बच्चूलालस्य प्रतानिन्याम्-

चाणूरं प्रणिहत्य वेगमहितश्चोत्पत्य मञ्चाद् द्रुतं
कंसं शोणितकर्दमे क्षितितले सम्पात्य मृद्नन्मुहुः।
यावत्प्राणवियोजनं स्मितयुतो निश्श्योतयन् पीडयन्
रङ्गस्थैरभिनन्दितस्स भगवानव्यादभव्याशयात्।।

अत्राप्यनेकक्रियाणां भगवानेवैकः कर्ता। इति दीपकालंकारः।

प्रतिवस्तूपमा गम्यं सादृश्यं यत्र वाक्ययोः।
एकस्साधारणो धर्मस्तत्र निर्दिश्यते पृथक्।।१२१।।

उदाहरणं यथा ममेदं पद्यम्-

सितास्वादमहो काव्यं मधुरं माक्षिकं मधु।
मृदु रागमयं गीतं हन्त कान्तावचोऽमृतम्।।

अत्र माधुर्यवाचक एक एव साधारणधर्मः सितामधुरमृद्वमृतादिशब्दैः पृथङ् निर्दिष्टः।

यहाँ दर्पकारि का वर्णन ही प्रस्तुत होने के कारण विभूति, देवनदी गंगा, गौरी, समृद्धि, चन्द्रकला, विष्णुभक्ति तथा देवाङ्गनायें-सबके सब प्रस्तुत हैं। उन सबका **राधन** रूप एक ही धर्म से सम्बन्ध होने के कारण यहाँ तुल्ययोगिता है।

एक और भी उदाहरण जैसे मेरी कृति **अरण्यानी** का यह पद्य-

पुष्पों को नाना रंगों वाली सुन्दरता, आकांक्षित साधन वाले लोक को पुरुषार्थ, चक्रवाक को हर्ष-सम्भार तथा धूकों (उल्लुओं) को विषाद बाँटता यह विकर्तन (सूर्य) सम्प्रति उदित हो रहा है।

प्रस्तुत एवं अप्रस्तुत-दोनों की जब एक ही धर्म से समन्विति (सम्बन्ध) हो अर्थात् अनेक क्रियाओं का जहाँ एक ही कारक से सम्बन्ध हो तो वहाँ **दीपक** अलंकार होता है।।१२०।।

बहुत सी क्रियाओं का एक ही कारक से जहाँ सम्बन्ध हो, ऐसा उदाहरण राधावल्लभ त्रिपाठी की कृति **लहरीदशकम्** का यह पद्य है-

कहीं रुलाती हुई, कहीं हँसाती हुई, कहीं आह्लादित करती हुई, कहीं भ्रमण कराती हुई और कहीं काठ के उल्लुओं (मूर्खों) को नचाती हुई वह (रोटी) जगत् रूपी नाटिका की सूत्रधारिणी सी प्रतीत होती है।

अथवा जैसे बच्चूलाल अवस्थी की **प्रतानिनी** का यह पद्य-

त्वरित गति से चाणूर का प्राणपखेरू उड़ा कर, द्रुतगत्या मञ्च से (नीचे) कूद कर-कंस को रक्तकीचड़ से सने भूतल पर पटक कर, प्राण निकलने तक बारम्बार लथेड़ते हुए, निचोड़ते हुए, पीड़ित करते हुए-रंगशाला में स्थित दर्शकों द्वारा अभिनन्दित वह मुस्कानयुक्त भगवान् कृष्ण अमंगलों से आपकी रक्षा करें।

यहाँ पर भी अनेक क्रियाओं के एकमात्र कर्ता भगवान् (कृष्ण) ही हैं। अतः यहाँ (क्रिया) दीपक अलंकार है।

जहाँ दो वाक्यों में (विद्यमान) सादृश्य गम्य हो (वाच्य न हो) तथा एक ही साधारण धर्म, पृथक् शब्दों से निर्दिष्ट किया जाय वहाँ **प्रतिवस्तूपमा**

अलंकार होता है।।१२१।।

उदाहरण-स्वरूप मेरा यह पद्य-

अहो, काव्य शर्करा के आस्वाद जैसा (मीठा) होता है। मक्षिका द्वारा तैयार की गई मधु भी मधुर होती है, रागपरिवाहिणी गीति मृदु होती है और कान्ता की वाणी भी अमृतोपम होती है।

यहाँ माधुर्यवाचक एक ही साधारण धर्म सितास्वाद-मधुर-मृदु तथा अमृत शब्दों से पृथक् निर्दिष्ट किया गया है।

दृष्टान्तो वाक्ययोर्यत्र सधर्मं प्रतिबिम्बनम्।
सन्दृश्यते चिदाह्लादमुपमानोपमेययोः।।१२२।।

उदाहरणं यथा मम-

सारस्वतानन्दविनोदितानां रतिः क्व नृत्यादिषु पामराणाम्।
वसन्तमत्तो न पिकस्सुकण्ठो घनागमे माद्यति वाटिकायाम्।।

यत्रापि वस्तुसम्बन्धस्सम्भवन् वाऽप्यसम्भवन्।
बिम्बानुबिम्बतां वक्ति सा भणिता निदर्शना।।१२३।।

उदाहरणं यथा ममैवारण्यान्याम्-

उत्तिष्ठ मा शुचमुपैहि विलोकयेमं
प्रोन्मील्य मानिनि! दृशौ दयितं समक्षम्।
इत्येवमात्तहृदयोदररोदरौघां
पद्मां प्रबोधयति दीप्तरविः प्रभाते।।

अत्र पद्माप्रबोधनविषये दीप्तरवेर्वक्तृत्वेनाऽन्वयस्सम्भवत्येव। भेदान्तराणि तावदाकरग्रन्थेषु गवेषणीयानि।

आधिक्यमुपमेयस्य न्यूनता वोपमानतः।
सोऽप्यनेकविधः प्रोक्तो व्यतिरेकस्तु कोविदैः।।१२४।।

अष्टचत्वारिंशद्विध इति साहित्यदर्पणकारः। प्रतननक्रीडारसिका आचार्याः। तत्सर्वमाकरग्रन्थेष्वेव द्रष्टव्यम्। उदाहरणं यथा मम-

कथं मनस्ते तुलयेदथाऽब्धिं सकृद्विधुं पार्वणमेक्ष्य वृद्धम्।
प्रियाङ्कपालीवलनैकलुब्धं मृगाक्षि! नित्योत्तरलं मनस्ते।।

जहाँ दो (पृथक्) वाक्यों में उपमान एवं उपमेय का, चेतना को आह्लादित

कर देने वाला समानधर्मी प्रतिबिम्बन होता है वहाँ **दृष्टान्त** अलंकार होता है।।१२२।।

उदाहरणस्वरूप मेरा यह पद्य-

सारस्वत आनन्द (काव्यशास्त्र-विनोद) से विनोद प्राप्त करने वालों की पामरों (ग्रामीणों) के नाच-गान में अभिरुचि कहाँ? वसन्त की मस्ती में डूबा सुकण्ठ कोकिल, पावसऋतु में बगीचों में मस्ती का अनुभव नहीं करता।

जहाँ सम्भव अथवा असम्भव (भी) होता हुआ दो वस्तुओं का सम्बन्ध बिम्बानुबिम्ब-भाव को व्यक्त करता है वहाँ **निदर्शना** अलंकार होता है।।१२३।।

उदाहरणस्वरूप मत्प्रणीत **अरण्यानी** का यह पद्य-

उठो, शोकग्रस्त मत बनो। हे मानिनि! आँखे खोल कर सामने खड़े अपने इस प्रियतम को देखो। प्रभातवेला में दीप्तरवि मानो इस प्रकार हृदयान्तराल में भ्रमरसमूह (रूपी व्यथा) को छिपाये कमलिनी को सान्त्वना दे रहा है।

यहाँ कमलिनी के प्रबोधन-सन्दर्भ में दीप्त रवि का वक्ता के रूप में अन्वय सम्भव ही है। निदर्शना के अन्य भेदों को मूल ग्रंथों से जानना चाहिये।

जहाँ उपमेय की उपमान से अधिकता अथवा न्यूनता होती है उसे कोविदगण **व्यतिरेक** अलंकार कहते हैं। यह भी अनेक प्रकार का होता है।।१२४।।

४८ प्रकार का होता है ऐसा साहित्यदर्पणकार का मन्तव्य है। आचार्यगण तो विस्तार-क्रीडा के रसिक होते ही हैं। वह सारा विस्तार आकर ग्रंथों में ही देखना चाहिये। उदाहरण, जैसे मेरा ही यह पद्य-

पूर्णिमा के चन्द्रमा को देखकर, मात्र एक बार, उच्छ्वसित होने वाले समुद्र से तुम्हारे मन की तुलना कैसे की जाय? (क्योंकि) हे मृगाक्षि! प्रियतम की गोदी में पलोटने की ललक रखने वाला तुम्हारा मन तो नित्य ही उत्तरलित (उच्छ्वसित) होता रहता है।

अत्रोपमानादब्धेरुपमेयस्य मनस आधिक्यम्। उदाहरणान्तरं यथा ममैव-

किमनन्तवसोः साम्यं सूर्येण सह ते विभो!
तमोध्वंसक्षमस्यापि दिनान्तस्थायि यद्वसु।।

अत्र वसुशब्दे श्लेषः। दिनान्तस्थायिवसुत्वादुपमानभूतस्य सूर्यस्य नृपापेक्षया नैयून्यमिति व्यतिरेकालंकारः।

यत्रैक एव शब्दोऽसावर्थद्वितयवाचकः।
सहशब्दार्थयोगेन सा सहोक्तिरुदाहृता।।१२५।।

अतिशयोक्तिमूलेयमलङ्कृतिः। सा च कार्यकारणपौर्वापर्य-विपर्ययरूपैव।

तत्रोदाहरणं यथा मम-

सह परभृतभृङ्गैश्चित्तमुत्प्रेरयन्तः
सह पनसरसालैर्लोकमुल्लासयन्तः।
सह विरहितकान्तैश्शान्तमातङ्कयन्तः
स्मरसुहृदि वसन्ते मञ्जुवाता वहन्ति।।

यत्रैकेन विना नाऽन्यत् जायते क्वाप्यशोभनम्।
विनायोगवती प्रोक्ता सा विनोक्तिरलङ् कृतिः।।१२६।।

यथा मम जानकीजीवनमहाकाव्ये-

दिनानि यातानि विना भवन्तं निशा व्यतीता रघुनाथ! या वा।
प्रभो! तदायुर्न जिजीव सीता ध्रुवं विजानीहि च तद् विनष्टम्।।

उदाहरणान्तरं यथा तत्रैव-

प्राणप्रियां प्रियतमां ननु जीववल्लीं
सीतां विना विरहिणो निखिलास्त्रियामाः।
वत्साननेन्दुपरिवीक्षणसिन्धुकल्प-
श्रीराघवस्य प्रणयोर्मिहता अभूवन्।।

असाध्वशोभननिदर्शनमिदं पद्यद्वयम्। राघवं विना सीता मृतकल्पा जातेति सीतां विना च विरहिणो रामस्य निखिलास्त्रियामाः प्रणयोर्मिहता अभूवन्नित्युभयत्रापि विनोक्तिभङ्ग्यैव कापि लोकोत्तरा विच्छित्तिः।

यहाँ समुद्ररूप उपमान से मनरूप उपमेय की अधिकता वर्णित है।

मेरा ही एक अन्य उदाहरण पद्य-

हे राजन्! अनन्तवसु (सम्पत्ति) वाले आपकी सूर्य के साथ भला क्या तुलना? तमस्काण्ड के क्षय में समर्थ होते हुए भी जिस (सूर्य) का वसु (कान्ति) मात्र सन्ध्याकाल तक टिक पाता है।

यहाँ वसु शब्द में श्लेष है। दिनान्त (संध्या) स्थायी वसु (कान्ति)

वाला होने के कारण उपमानभूत सूर्य की भूपाल की अपेक्षा न्यूनता बताने के कारण व्यतिरेक अलंकार है।

जहाँ एक ही शब्द **सह** शब्द के अर्थ से युक्त होकर दो अर्थों का वाचक बन जाता है वहाँ **सहोक्ति** अलंकार होता है।।१२५।।

यह अलंकार अतिशयोक्तिमूलक होता है। सहोक्ति भी कार्य-कारण एवं पौर्वापर्य के विपर्यय से भिन्नरूपवाली होती है।

इसका उदाहरण है मेरा यह पद्य-

कोकिलों एवं भ्रमरों के **साथ** चित्त को उत्प्रेरित करते हुए, आम्र एवं पनस (कटहल) **के साथ** लोक को उल्लासित करते हुए, वियोगी प्रियतमों **के साथ** शान्त लोगों को भी आतंकित करते हुए काम के मित्रभूत इस वसन्त में रमणीय पवन बह रहे हैं।

जहाँ एक के विना दूसरी वस्तु कभी भी अशोभन नहीं बनती है **बिना** शब्द के योग वाली उस अलंकृति को **विनोक्ति** कहा जाता है।।१२६।।

उदाहरण जैसे मेरे **जानकीजीवनमहाकाव्य** में यह पद्य-

हे रघुनाथ! जो दिन आपके **विना** (अभाव में) बीत गये अथवा जो रातें बीत गई (आपके **विना**) स्वामी! उस आयुष्य को सीता ने नहीं जिया। आप ध्रुव समझें कि (सीता की) वह आयु नष्ट हो गई।

एक दूसरा उदाहरण, उसी महाकाव्य में-

प्राणवल्लीस्वरूपा प्राणप्रिया प्रियतमा सीता **के विना** लव-कुश के मुखचन्द्र को निहारने वाले सागर के समान, विरही श्रीराघव की समस्त रातें प्रणयरूपी लहरों से आहत होती रहीं।

असाधु अर्थात् अशोभन का निदर्शनभूत है यह पद्य-द्वय! राम के अभाव में सीता मृतकल्प हो उठीं तथा सीता के विना विरही राम की समस्त रातें प्रणयलहरियों से आहत होती रहीं-इन दोनों ही सन्दर्भों में **विनोक्ति** की भंगिमा से ही कोई लोकोत्तर काव्य-सुषमा पैदा हो गई है।

प्रस्तुतेऽप्रस्तुतस्यैव कार्यलिङ्गविशेषणैः।
समैर्यत्र समारोपः सा समासोक्तिरुच्यते।।१२६।।

व्यवहारसमारोपजन्यसमासोक्तेरुदाहरणं यथा राधावल्लभत्रिपाठिनः प्रावृड्लहर्याम्-

समायाता इमा वर्षाः श्यामाग्रैः स्वपयोधरैः।
पाययन्त्यः पयस्तूर्णं प्रजाभ्यो मातृवत्सलाः।।

रोमाञ्चकण्टकैर्जुष्टा तुष्टा वन्या वसुन्धरा।
लब्ध्वा पर्जन्यसंस्पर्शं समुच्छ्वसिति कोरकैः।।

अत्र प्रयुक्तशब्दानां श्लिष्टतया वर्षोपरि जनन्या वसुन्धरोपरि च नायिकाया व्यवहारसमारोपः परिस्फुटः।

यथा वा ममैव पद्यमिदम्-

आदौ प्रसाद्य कलमञ्जुलगुञ्जितैः स्वैः
स्पृष्ट्वा तनुं सदयमञ्चितहार्दहृद्याम्।
मल्लीमुपात्तरजसं सरसां सगन्धां
भुङ्क्ष्वस्वमेव सुकृती भुवि भृङ्ग! दृष्टः।।

अत्र प्रस्तुतयोर्मल्लीभृङ्गयोर्व्यवहारसमारोपोऽप्रस्तुतयोर्नायिका-नायकयोरुपरि श्लिष्टपदमहिम्ना स्पष्टतया प्रतीयत एव।

अप्रस्तुतप्रशंसा सा प्रस्तुतं यत्र गम्यते।
अप्रस्तुतात्पुनर्वाच्यात् हेतुभिः पञ्चधा मता।।१२७।।

कारणकार्यसामान्यविशेषसारूप्यमात्रेभ्योऽप्रस्तुतेभ्यो यत्र क्रमेण कार्यकारणविशेषसामान्यसारूप्यमात्राणि प्रस्तुतान्यवगम्यन्ते तत्राऽप्रस्तुत-प्रशंसा। पञ्चमी सारूप्यनिबन्धनाऽप्रस्तुतप्रशंसैवाऽन्योक्तिरित्याचार्याः। तदुदाहरणं यथा ममार्यान्योक्तिशतके-

मा वह गर्वमपारं नवतृणभारं खादन्नजापुत्र!
अद्य श्वो वा भविता मरणं नूनं हि मांसार्थम्।।

ताडय मामतिकामं वादक! हस्तैर्नु दण्डकाघातैः।
तदपि पटहनामाऽहं स्वमधुरनादं न त्यक्ष्यामि।।

समान कार्य, लिङ्ग तथा विशेषणों द्वारा जहाँ प्रस्तुत पर अप्रस्तुत का ही समारोप होता है वहाँ समासोक्ति होती है।।१२७।।

व्यवहार-समारोपजन्य समासोक्ति का उदाहरण राधावल्लभत्रिपाठी प्रणीत प्रावृट्लहरी का यह पद्य-

जननी के समान वत्सलता से ओत-प्रोत, श्यामल अग्रभाग वाले अपने पयोधरों से प्रजाओं को पय पिलाती हुई यह वर्षा त्वरित गति से आ गई।

रोमाञ्च-सरीखे काँटों से भरी-पुरी (जलवृष्टि से) परितुष्ट जंगल की जमीन पर्जन्य का संस्पर्श पाकर अङ्कुरों से समुच्छ्वसित हो उठी।

यहाँ श्लोकद्वय (युग्मक) में प्रयुक्त शब्दों की श्लिष्टता के कारण, वर्षा पर जननी का तथा वन्यधरा पर नायिका का व्यवहार-समारोप सुस्पष्ट है।

अथवा जैसे मेरा ही यह पद्य-

प्रारंभ में अपने सुरीले एवं रमणीय गुञ्जनों से रिझा कर तथा (बाद में) सदय-भाव से शरीर का स्पर्श कर हे भ्रमर! प्रीति में डूबी होने के कारण रमणीय, परागयुक्त, रसमय तथा गन्ध से ओत-प्रोत मल्लिका (बेले का फूल) का उपभोग करने वाले एकमात्र सौभाग्यशाली तुम्हीं दीख रहे हो इस संसार में!

यहाँ पर प्रस्तुतभूत भृङ्ग एवं मल्ली के व्यवहार का समारोप अप्रस्तुतभूत नायक एवं नायिका के ऊपर, श्लिष्ट पदों के कारण, स्पष्टतः प्रतीत हो रहा है।

जहाँ अप्रस्तुत वाच्य से प्रस्तुत (पक्ष) की व्यञ्जनया अवगति होती है उसे **अप्रस्तुतप्रशंसा** अलंकार कहते हैं। (अपने विविध) हेतुओं के कारण यह पाँच प्रकार की होती है।

कारण, कार्य, सामान्य, विशेष तथा सारूप्य मात्र के **अप्रस्तुत** रहने पर जब उनसे **प्रस्तुतभूत** (क्रमशः) कार्य, कारण विशेष, सामान्य तथा सारूप्य व्यञ्जनया अवगत होते हैं तो वहाँ अप्रस्तुतप्रशंसा होती है।

पाँचवी सारूप्यनिबन्धना, अप्रस्तुतप्रशंसा ही **अन्योक्ति** है ऐसा (कुछेक) आचार्यों का मत है। अन्योक्ति का उदाहरण जैसे मेरी कृति **आर्यान्योक्तिशतक** का यह पद्य-

नूतन तृणसमूह का भक्षण करते हे अजापुत्र (बकरे) बहुत अधिक शेखी मत बघारो। (क्योंकि) माँस खाने के लिये आज या कल ही तुम्हारा काम-तमाम होने वाला है।

हे वादक! हाथों अथवा डण्डों के आघात से जीभर कर मुझे पीटो। फिर भी, मेरा नाम है नगाड़ा, अपनी मधुर ध्वनि नहीं छोड़ूँगा।

यथा वाऽवस्थिनो बच्चूलालस्य प्रतानिन्याम् अन्योक्तिप्रताने पद्यमिदम्-

विच्छायो हिमपातशातितदलस्तीरे तरूणां गणः
सौरभ्येण समं बत व्यपगतः सारः सरोजन्मनाम्।
अद्याऽच्छाद्य जलाशयश्रियमियं दुर्दान्तसन्तानिनी
फुल्लद्गल्लदलद्दरिद्रकुसुमा व्याजृम्भते कुम्भिका।।

उभयत्राप्यप्रस्तुताद्वाच्यात् प्रस्तुतस्य सारूप्यनिबन्धनपरस्य व्यञ्जनयाऽवगतिः। अन्यभेदा आकरग्रन्थेभ्यो ग्रहीतव्याः।

कार्यकारणसामान्यविशेषाश्च मिथो यथा।
साधर्म्येण समर्थ्यन्ते वैधर्म्येण तथैव वा।।१२८।।

प्रोक्तस्सोऽर्थान्तरन्यासो विस्तरेण मतोऽष्टधा।

कार्यादयश्चत्वारो यदा कारणादिभिश्चतुर्भिः साधर्म्यवैधर्म्यदिशा समर्थ्यन्ते तदाऽष्टविधोऽर्थान्तरन्यासः। स सर्वोऽपि प्रपञ्च आकरग्रन्थेभ्य एव ज्ञेयः। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासो यथा ममैव विद्योत्तमानाटिकायाम्-

सन्दृष्टा नवमालिका फलवती माकन्दशाखाश्रया
विच्छित्तिं तनुतेऽभ्रचुम्बिशिखरे शैले हिमानी न किम्?
शक्तिश्शक्तिमतो विनक्ति न सुते! सम्पृक्तिहेतुर्यतः
सम्मानं भजतेऽङ्गना पतिगुणैर्लोके तदुत्सङ्गिनी।।

सामान्येन विशेषसमर्थनरूपोऽप्यर्थान्तरन्यासो यथाऽस्मज्जानकीजीवनमहाकाव्ये-

क इह जगति भुङ्क्ते सौख्यमत्यन्तमिद्धो
विपदनुगतसौख्यं दृश्यते लोकसिद्धम्।
प्रभवति खलु चान्द्री कौमुदी नन्दनायै
परमुदयति भानौ साऽपि दैन्यं प्रयाति।।

अथवा जैसे बच्चूलाल अवस्थी-प्रणीत प्रतानिनी के अन्योक्तिप्रतान का यह पद्य-

हिमपात (पाला पड़ने) के कारण विनष्ट पत्तों वाले तीरवर्ती वृक्षों के समूह छायाहीन हो गये और सरोजन्मा कमलों का भी, उनके सौरभ्य के ही साथ, सार समाप्त हो गया। आज तो सरोवर की शोभा को आच्छादित कर दुर्दान्त विस्तार वाली तथा बड़े गर्व से निर्गन्ध पुष्पों को पैदा करती यह जलकुम्भी जोर मार रही है।

दोनो ही उदाहरणों में अप्रस्तुत वाच्य से सारूप्य-निबन्धनपरक प्रस्तुत पक्ष की व्यञ्जनया अवगति हो रही है।

अन्य (चार) भेदों को भी आकर ग्रंथों से ग्रहण करना चाहिये।

कार्य-कारण, सामान्य-विशेष का जब परस्पर, साधर्म्य अथवा वैधर्म्य के साथ, समर्थन होता है तो उसे **अर्थान्तरन्यास** कहते हैं। सम्पूर्ण विस्तार में यह आठ प्रकार का होता है। (कार्य का समर्थन कारण से, कारण का समर्थन कार्य से, सामान्य का समर्थन विशेष से, विशेष का समर्थन सामान्य से। ये चार भेद भी साधर्म्य एवं वैधर्म्य से विभक्त होकर आठ हो जाते हैं)।।१२८।।

कार्यादि चारों जब कारणादि चारों द्वारा साधर्म्य-वैधर्म्य की दृष्टि से समर्थित होते हैं तो आठ प्रकार का अर्थान्तरन्यास होता है। वह सारा प्रपञ्च (विस्तार) आकर ग्रंथों से जानना चाहिये।

विशेष से सामान्य का समर्थनरूप अर्थान्तरन्यास जैसे मेरी **विद्योत्तमा** नाटिका (में द्रष्टव्य है)-

आम्रवृक्ष की शाखा पर आरूढ नवमालिका लता ही फलवती दीखती है। गगनचुम्बी शिखर वाले पर्वत पर ही क्या हिमानी (हिमसन्तति) शोभा नहीं प्राप्त करती है? पुत्री! शक्ति शक्तिमान् से कभी भी पृथक् नहीं रहती क्योंकि वही सम्पृक्ति (दाम्पत्य) का हेतु होती है। प्रियतम की गोद में बैठी (अर्थात् पति की दुलारी) रमणी ही, पति के गुणों से समाज में सम्मान प्राप्त करती है।

सामान्य से विशेष का समर्थन रूप अर्थान्तरन्यास जैसे मेरे **जानकीजीवन** महाकाव्य (में द्रष्टव्य है)-

अत्यन्त समृद्ध भी, इस संसार में (भला) कौन निरन्तर सुख भोगता है? दुःख का अनुगमन करने वाला सुख ही लोकसिद्ध है। चन्द्रमा की चाँदनी आनन्द बिखेरती है परन्तु सूर्य के उदित होते ही, वह भी दैन्य को प्राप्त हो जाती है।

उक्तैः परिकरः प्रोक्तस्साभिप्रायैर्विशेषणैः।।१२९।।

यथा ममैव मधुपर्ण्याम्-

कलिकाल महात्मन्! नमोनमः
आश्चर्यशतात्मन्! नमो नमः।
हे संस्कृतिपुष्करिणीध्वंसक
मदमेदुरवारण! नमोनमः।।

यथा वाऽरण्यानीसङ्कलिते मदुपज्ञे गङ्गास्तवे-

भवभयजलनिधितरुणतरणि जय! विषमनयनघनचिकुररमणि जय! सुरवसतिगमनसुलभसरणि जय! सरदघफणिविषदशनहरणि जय! सगरतनुजचयसदुपकरणि जय! निरवधिकलुषदहनसदरणि जय! गिरि-

गृहविजननगरविचरणि जय! सदयदयितसलिल-निधिगृहिणि जय! विबुधतटिनि! मम सततजननि! जय!!

उभयत्रापि सर्वाण्यपि विशेषणानि साभिप्रायाणि।
काव्यलिङ्गञ्च हेतुत्वे स्याद्वाक्यार्थपदार्थयोः।।

तदुदाहरणं यथा ममैव पद्यमिदम्-

त्वद् भ्रूभङ्गतुलामहो नु दधती नो दृश्यते साऽपगा
विच्छित्तिं च दृशोः स्फुटं प्रवितरन् नीडाश्रितः खञ्जनः।
त्वद्वार्तारसमाधुरीमुपहरन् कीरोऽप्यवाक् पञ्जरे
नक्तं नष्टविनोदने मयि कथं नैष्ठुर्यमीदृग् विधेः।।

अत्र पादत्रयवाक्यार्थस्य हेतुत्वं चतुर्थपादं प्रति।

साभिप्राय विशेषणों के (अभिधयावाच्य) उक्त होने पर परिकर अलंकार होता है।।१२९।।

उदाहरण जैसे मेरी ही अरण्यानी का यह पद्य-

महात्मन् कलिकाल! नमस्कार है तुम्हे! सैकड़ों आश्चर्यों से ओतप्रोत! नमस्कार है तुम्हें! संस्कृति-रूपी पुष्करिणी (कमल-सरोवर) को ध्वस्त करने वाले हे मदमत्त गजराज! नमस्कार है तुम्हे!

अथवा जैसे अरण्यानी में संकलित मत्प्रणीत इस गंगास्तव में-

भवभय-रूपी जलनिधि (को पार करने वाली) मजबूत नौका-स्वरूपे, विषमनयन अर्थात् शिव के धनचिकुर (जटाजूट) में रमण करने वाली, स्वर्गलोक पहुँचने के लिये सुखपूर्वक उपलब्ध सरणिस्वरूपे! संचरण करते पापरूपी सर्प के विषदन्तों को तोड़ने वाली, सगरपुत्रों की मण्डली का सदुपकार करने वाली, अनन्त पापों को भस्म करदेने वाली अरणि (मन्थनाग्नि) स्वरूपे! पर्वतों-बस्तियों वनों तथा नगरों में विचरण करने वाली, दयालु प्रियतम सागर की गृहिणी-स्वरूपे! हे विबुधतटिनि! हे शाश्वत जननि! तुम्हारी जय हो!

दोनों ही उदाहरणों में सारे के सारे विशेषण साभिप्राय हैं।

वाक्यार्थ एवं पदार्थ के हेतुत्व में काव्यलिङ्ग अलंकार होता है।।

काव्यलिङ्ग का उदाहरण जैसे मेरा ही यह पद्य-

तुम्हारे भ्रूभङ्गों की समता को धारण करने वाली वह नदी नहीं दीख रही है। तुम्हारे नेत्र-युगल की सुन्दरता को स्पष्टतः प्रकट करने वाला खञ्जन पक्षी

भी घोंसले में बैठ गया है। तुम्हारी बतरस-माधुरी को उपहृत करने वाला सुआ भी पिंजरे में मौन बैठा है। हे विधाता! रात्रिवेला में विनोदसाधनों से हीन मेरे प्रति (तुम्हारी) ऐसी निष्ठुरता क्यों है?

यहाँ (प्रारंभ के) तीन चरणों का वाक्यार्थ चौथे चरण के वाक्यार्थ का हेतु बन रहा है (अतः काव्यलिङ्ग अलंकार है)।

व्यङ्ग्यमेवोच्यते भङ्ग्या पर्यायोक्तं तदा भवेत्।।१३०।।

यथा ममैव जानकीजीवनमहाकाव्ये विश्वामित्रं प्रति दशरथस्योक्तौ-

प्राप्ता मया परिणते वयसीष्टियत्नैः पुत्रा इमे कुशिकनन्दन! पूज्यपाद!
तस्माद्विलक्षणरतिं सह सिन्धुतोयैःपाठीनवृत्तिमिव सोऽनुभवामि नित्यम्।।

अत्र रामाद् विरहितोऽहं न जीवितुं शक्नोमीति गम्योऽर्थः सिन्धुपाठीन-सम्बन्धेन कयाचिद् भङ्ग्याऽभिधीयते। यथा वा राधावल्लभत्रिपाठि-विरचितप्रावृड्लहर्यां पद्ययुगलमिदम्-

विद्युल्लेखाकशाघातैर्बाणैरासारवर्षिभिः।
प्रकुट्टितो निदाघोऽयं कम्पते भययन्त्रितः।।

तापयन् सततं लोकान् दुश्शासन इवाऽहितः।
धर्मोऽधर्मवशान्नूनं सङ्कुचन् विलयङ्गतः।।

अत्र निदाघदुर्दशावर्णनया घनागमो व्यङ्ग्यो भवति।

हेतुद्वारेण विच्छित्त्या साध्यज्ञानं यदा भवेत्।
अनुमानमलङ्कारं मन्वते तत्र सूरयः।।१३१।।

उदाहरणं यथा ममैव पद्यमिदम्-

चञ्चत्त्रपां वचसि मन्दरयञ्च याते
दृष्टौ मदं वपुषि चापि मनोज्ञकान्तिम्।
दृष्ट्वैव सर्वमिदमन्तरितं मृगाक्ष्या
जाने हृदि स्मरनवाङ्कुर आशु जातः।।

अत्र त्रपादीनि दृष्ट्वा मृगाक्ष्याः स्मरनवाङ्कुरोऽनुमीयते।

जब व्यङ्ग्य अर्थ ही भंगी के साथ (अभिधया) वाच्य बन जाता है तब पर्यायोक्त अलंकार होता है।।१३०।।

जैसे मेरे ही जानकीजीवन महाकाव्य में विश्वामित्र के प्रति दशरथ की इस उक्ति में (पर्यायोक्त अलंकार है)।

हे पूज्यपाद कुशिकनन्दन! ये (चारों) पुत्र मैंने वृद्धावस्था में पुत्रेष्टियज्ञ की कृपा से प्राप्त किये हैं अतएव सागरजल के साथ मत्स्यों की आसक्ति के ही समान मैं भी निरन्तर (इन बच्चों के प्रति) विलक्षण आसक्ति का अनुभव करता हूँ।

यहाँ पर 'राम के वियोग में मैं जीवित नहीं रह सकता' इस व्यङ्ग्य अर्थ को सागर एवं मत्स्य-सम्बन्ध द्वारा, एक भंगिमा के साथ अभिधया प्रकट किया जा रहा है।

अथवा जैसे राधावल्लभत्रिपाठी-विरचित **प्रावृट्लहरी** का यह युग्मक-विद्युल्लेखारूपी कोड़ों की मार से तथा धारासार वर्षा-रूपी शरवृष्टि से प्रकुट्टित किया गया यह निदाघ भयभीत होकर काँप रहा है।

वैरी दुश्शासन की भाँति लोकों को निरन्तर सन्तप्त करता हुआ धर्म (धाम) अधर्माचरणवश, सचमुच संकुचित होता हुआ विलय को प्राप्त हो गया।

यहाँ पर निदाघ की दुर्दशावर्णना से **'वर्षा आ गई'** यह व्यङ्ग्य हो रहा है।

जब विच्छित्तिपूर्वक, हेतु द्वारा साध्य का ज्ञान हो रहा हो तो उस स्थल पर आचार्यगण **अनुमान** अलंकार मानते हैं।।१३१

उदाहरण-स्वरूप मेरा ही यह पद्य-

वाणी में विलसित लज्जा, गमन में मन्दवेग, दृष्टि में मद (मस्ती) और शरीर में भी मनोरम कान्ति-इस सबको गुपचुप समुदित हुआ देख मैं जान गया हूँ कि मृगनयनी (नायिका) के हृदय में काम का नवाङ्कुर अभी-अभी उत्पन्न हो गया है।

यहाँ 'त्रपा' आदि (हेतु) को देख कर मृगाक्षी के स्मरनवाङ्कुर (साध्य) का अनुमान हो रहा है।

विशेषप्रतिपत्त्यर्थं संविवक्षितवस्तुनः।
आभासो यो निषेधस्य स आक्षेपस्समुच्यते।।१३२।।

यथा मदुपज्ञविद्योत्तमानाटिकायामग्निमित्रकथनमिदं विदूषकं प्रति-

प्राग्जन्मार्जितपुण्यसञ्चयवती सौभाग्यलेखाऽनघा
भ्रान्तिक्षोदविबोधिताऽऽत्ममहितेयं प्रत्यभिज्ञा परा।
नाभिस्थाऽपि मृगप्रमादजननी कस्तूरिकेयं सखे!
किन्तेऽन्यत्कथयानि विद्धि शिविकारूढां ममैवायतिम्।।

यथा वोदाहरणान्तरं ममैव-

छलयसि मदयसि लोकं विपदि विकलयसि नितान्तमसहायम्।
अथवा, जरठ विरञ्चे! वरमिह मौनं किमाख्येयैः??

कार्योत्पत्तिर्विना हेतुं यत्र सोक्ता विभावना।
विशेषोक्तिस्तथा हेतौ सत्यभावः फलस्य च।।१३३।।

क्रमेणोदाहरणम्। तत्रादौ विभावनाया यथा ममैव प्रबोधशतके-

अविद्यमानापि भुजाङ्कपाशे प्रतिक्षणं यन्मयकासि दृष्टा।
तेनैव जाने मुनिना मृषोक्तमदर्शनं लोप इति स्वसूत्रे।।

निरात्मदेहापि शिलाङ्कितापि प्रिये! कियत्सङ्गसुखं ददासि।
अवैति तत्त्वं किल वल्लभस्ते त्वल्लोचनाभ्यां न कदापि दृश्यः।।

अत्र विरहिणीं यक्षिणीं प्रति यक्षसन्देशः। भुजाङ्कपाशेऽविद्यमानापि यक्षिणी यक्षेणाऽवलोक्यते। निरात्मदेहा शिलाङ्किताऽपि सङ्गसुखं भोगसौख्यं ददातीत्युभयत्रापि हेतुं विनैव कार्योत्पत्तिदर्शनाद् विभावना।

कहने के लिये आकांक्षित वस्तु की विशेष प्रतिपत्ति के लिये जो निषेध का आभास होता है वही **आक्षेप** कहा जाता है।।१३२।।

जैसे मत्प्रणीत **विद्योत्तमा** नाटिका में विदूषक के प्रति अग्निमित्र का यह कथन (आक्षेप का उदाहरण है)।

पूर्व जन्मों में अर्जित पुण्यसंभार वाली (यह मेरी) निष्पाप सौभाग्य-लेखा है। भ्रान्ति के विनाश से प्रबुद्ध हो उठने वाली यह स्वयमेव महिमामयी श्रेष्ठ प्रत्यभिज्ञा (पहचान) है। मृग के प्रमाद को उत्पन्न करने वाली यह उसकी नाभिवर्तिनी कस्तूरिका है। मित्र! अब तुमसे और क्या कहूँ? शिविका में बैठी (इस कन्या को) मेरी आयति (भविष्यगति) ही समझो।

अथवा जैसे मेरा ही एक दूसरा उदाहरण-

नितान्त असहाय लोक को छलते हो, मदमत्त बनाते हो तथा विपद्वेला में विकल करते हो। अथवा निष्ठुर विरञ्चे! चुप रह जाना ही ठीक है। कहने से क्या लाभ?

विना कारण के ही जहाँ कार्य की उत्पत्ति हो रही हो वहाँ **विभावना** अलंकार होता है तथा कारण के रहते हुए भी फल का अभाव होने पर **विशेषोक्ति** होती है।।१३३।।

क्रमशः (इनका) उदाहरण प्रस्तुत है। उनमें भी सर्वप्रथम **विभावना** का

उदाहरण जैसे मेरे ही प्रबोधशतकम् में-

मेरी भुजाओं के अंकपाश में अविद्यमान होती हुई भी जो तुम मेरे द्वारा प्रतिक्षण (प्रत्यक्ष) देखी गई उसी से मैं जानता हूँ कि महामुनि पाणिनि ने अपने सूत्र में यह झूठ कहा कि अदर्शन को लोप कहते हैं।

शिला पर चित्रित होती हुई भी, आत्महीन देहवाली होती हुई भी प्रिये! तुम कितना साहचर्य-सुख प्रदान करती हो? इस तथ्य को मात्र तुम्हारा वल्लभ ही जानता है जो तुम्हारी आँखों द्वारा (वियोगवश) कभी दृश्य नहीं है।

विशेषोक्त्युदाहरणं यथा ममैव मृगमृगेन्द्रान्योक्तिशतके-

वात्योत्थधूलिनिचयैर्वनिका परीता
भग्नाः प्रभञ्जनरयैस्तरवस्समन्तात्।
वर्षानिषद्वरवशाद्वसुधाऽप्यगम्या
नूनं विरञ्चिकृपयैव मृगोऽवतीर्णः।।

धिक्तेऽक्षियुग्ममदिरच्छविमेण! बन्धो!
कृत्तिं पृषत्करुचिरां सहजार्जवञ्च।
सर्वंसहत्वमथ मन्दगतिञ्च ते धिक्
केनापि हा निजगुणेन न रक्षितोऽसि।।

अत्र वात्याधूलिप्रभञ्जनवर्षानिषद्वरादिप्राणसंकटकारणेषु सत्स्वपि मृगप्राणहानिरूपकार्याभाववशाद् विशेषोक्तिः। एवमेव पद्यान्तरे रक्षाहेतुषु गुणेषु सत्स्वपि मृगरक्षारूपफलाभाववशाद् विशेषोक्तिः।

जात्यादीनां मिथश्चैव विरुद्धत्वाऽवभासने।
विरोधोऽसावलङ्कारो दशरूपो हि जायते।।१३४।।

भेदोपभेदप्रपञ्चस्त्वाकरग्रन्थेभ्योऽवगन्तव्यः। उदाहरणं यथा ममैव-

वियोगे ते तन्व्या मलयमरुतोऽरण्यदहनाः
प्रसूनानां शय्या अहह रवितापाञ्चितशिलाः।
मनोज्ञं सङ्गीतं श्रुतिकुहरसंसक्तविशिखः
किमन्यत्पूर्णेन्दुः प्रखरतरदीप्तिर्दिनकरः।।

अत्र मरुद्दहनयोः शय्याशिलयोः सङ्गीतविशिखयोः पूर्णेन्दुदिनकरयोः आपाततो जातिगतविरोध एव। समाधानं तावद्वियोगजन्यत्वात्तेषाम्।

इन पद्यों में विरहिणी यक्षिणी के प्रति यक्ष का सन्देश अभिव्यक्त है। भुजाङ्कपाश में न रहती हुई भी यक्षिणी यक्ष द्वारा देखी जा रही है। निरात्मदेहा

तथा शिलाङ्कित होती हुई भी संगसुख अर्थात् भोगसुख प्रदान कर रही है-इस प्रकार दोनो ही सन्दर्भों में हेतु के विना ही कार्योंत्पत्ति का दर्शन होने से विभावना है।

विशेषोक्ति का उदाहरण जैसे मेरे ही **मृगमृगेन्द्रान्योक्तिशतक** का यह पद्य- हवाओं के वेग से चारों ओर पेड़ ढह गये हैं। बारिश के कीचड़ के कारण धरती भी चलने योग्य नहीं रह गई है (फिर भी) सचमुच परमेश्वर की कृपा ही थी कि हिरन बच निकला।

हे मृग! हे बन्धु! धिक्कार है तुम्हारे नेत्र-युगल की मदिर शोभा को? धिक्कार है तुम्हारी सुन्दर चितकबरी चमड़ी और जन्मजात सिधाई को! तुम्हारी सब कुछ सहने की आदत और मन्दगति को भी धिक्कार है। क्योंकि अपने किसी गुण से तुम सुरक्षित नहीं रह सके।

यहाँ वात्याधूलि-प्रभञ्जन-वर्षा-निषद्वर आदि प्राणसंकट पैदा करने वाले कारणों के रहते हुए भी मृगप्राण-हानिरूप कार्य की उत्पत्ति न होने से विशेषोक्ति है। इसी प्रकार रक्षाहेतुभूत गुणों के होते हुए भी मृगरक्षारूप फल के अभाववश विशेषोक्ति है।

जाति आदि का परस्पर विरुद्धत्व अवभासित होने की स्थिति में वह **विरोधालंकार** होता है जो दस प्रकार का होता है।।१३४।।

विरोधालंकार के भेद-प्रभेद का विस्तार तो मूलग्रंथों से ही जानना चाहिये। इसका उदाहरण जैसे मेरा ही यह पद्य-

तुम्हारे वियोग में मलयमारुत भी तन्वी (प्रियतमा) के लिये दावानल बन गये, पुष्पों की शय्यायें भी सूर्य के सन्ताप से युक्त शिलायें बन गईं, मनोज्ञ संगीत भी श्रुति-कुहर में धँसा बाण बन गया। और अधिकक्या? पूर्णिमा का चन्द्रमा भी प्रखरतर किरणों वाला दिनकर बन गया।

इस पद्य में मरुत् एवं दहन का, शय्या एवं शिला का, संगीत एवं शर का, पूर्णेन्दु एवं दिनकर का आपाततः जातिगत विरोध तो है ही। परन्तु इस विरोध का समाधान हो जाता है उनकी वियोगजन्यता के कारण।

कार्यकारणयोर्भिन्नदेशत्वे स्यादसङ्गतिः।

उदाहरणं यथा मम पद्यमिदम्-

रजोभारनता मल्ल्यः खिन्ना मधुकराः पुनः।
समन्धास्ताश्च सञ्जाताः प्रमत्ता हन्त ते ऽभवन्।।

विषमं तन्मतं यत्र संघटना विरूपयोः।।१३५।।

उदाहरणं यथा मम मत्तवारण्याम्-

ह्यो यदीयपादकण्टकाः समुद्धृता मया
कण्टकीभवन्त एव ते तुदन्ति मामलम्।
यद्गृहं निवारितं प्रदीप्तवह्नितो मया
पावकीभवन्त एव ते दहन्ति मामलम्!!

यथा वाऽन्यदुदाहरणं ममैव-

जयन्ति शम्भुगेहिन्याः कज्जलाञ्चितदृष्टयः।
याः सृजन्ति सतां कीर्तिं हिमशुभ्रां विकस्वराम्।।

पूर्वपूर्वस्य हेतुत्वं यत्र प्रति परं परम्।
तत्र कारणमाला स्यादभिधानेन सार्थिका।।१३६।।

तदुदाहरणं यथा ममैव पद्यमिदम्-

दृष्टिसङ्गाद्रतिर्जाता रतेर्जातं मिथोऽर्पणम्।
मिथोर्पणाच्च दाम्पत्यं दाम्पत्यादतुलं सुखम्।।

कार्य एवं कारण की भिन्नदेशता के कारण **असंगति** अलंकार होता है।।

इसका उदाहरण है मल्लिखित यह पद्य-

रजोभार (पराग के बोझ) से अवनत तो हुई मल्लिकायें और खेदग्रस्त हो उठे भौंरे! गन्ध से युक्त तो हुईं वे और मतवाले हो उठे ये!

जहाँ विरूप वस्तुओं की संघटना हो वहाँ **विषम** अलंकार होता है।।१३५।।

उदाहरण-स्वरूप मेरी **मत्तवारणी** का यह गीतांश-

कल ही मैंने जिनके पैरों में धँसे काँटे बाहर निकाले थे, वही स्वयमेव कण्टक बनकर (आज) मुझे जीभर पीड़ित कर रहे हैं। जिनका घर (कल) मैंने धधकती आग से बचाया था वही स्वयमेव आग बनकर (आज) मुझे जीभर दग्ध कर रहे हैं।

अथवा, एक दूसरा उदाहरण मेरा अपना ही पद्य-

शम्भुगेहिनी (भगवती पार्वती) की वे कज्जलाञ्चित दृष्टियाँ विजयिनी हों जो सत्पुरुषों की हिमधवल, समुज्ज्वल कीर्ति को उत्पन्न करती हैं।

पूर्व-पूर्व का जब पर-पर के प्रति हेतुत्व हो तो वहाँ **कारणमाला**

अलंकार होता है। यह अलंकार अपनी संज्ञा से ही सार्थक प्रतीत होता है (अर्थात् कारणों की माला बन जाती है इस अलंकार में)।

इसका उदाहरण जैसे मेरा ही यह पद्य-

(नायक-नायिका के) दृष्टिसंग (चातुरक्षिक) से उत्पन्न हुआ प्रेम, प्रेम से पैदा हुआ परस्पर-समर्पणभाव, परस्पर समर्पणभाव से सम्भव हुआ (दोनो का) दाम्पत्य और दाम्पत्य से मिला अतुलनीय सुख!

एकधर्मेण सम्बन्धो जायतेऽप्युत्तरोत्तरम्।
अनेकधर्मिणां यत्र मालादीपकमुच्यते।।१३७।।

उदाहरणं यथा ममैव-

व्योम्ना बलाहकततिस्ततिभिश्च वृष्टि-
र्वृष्ट्या जलं ननु जलेन च तापनाशः।
तापात्ययेन हिमशीतलता तयाऽपि
प्राज्यं सुखं सपदि कैर्न घनेष्ववाप्तम्।।

विशेषणतया यत्र स्थाप्यतेऽपोह्यतेऽथवा।
परं परं प्रति पूर्वं पूर्वमेकावली ततः।।१३८।।

यथा ममैव जानकीजीवनमहाकाव्ये-

न तद्गृहं यन्न विकीर्णगीतकं न गीतकं व्यायतमूर्च्छनं न यत्।
न मूर्च्छनं यन्न रसाक्तवाचिकं न वाचिकं यन्न सुधासहोदरम्।।

यथा वा ममैव बालीविलासकाव्ये-

बाला न सा वरतनुर्न च सुन्दरी या
नो सुन्दरी न खलु पार्वणचन्द्रवक्त्रा।
चन्द्राननाऽपि न च सा न च या मृगाक्षी
नो साऽपि या रुचिरबिम्बफलाधरौष्ठी।।

वस्तूत्तरोत्तरोत्कर्षे सारोऽलङ्कार उच्यते।

उदाहरणं यथा ममैव पद्यमिदम्-

सारं विरञ्चिरचने ननु पिण्डजीवो जीवेषु चापि मनुजो मनुजेषु विद्वान्।
विद्वत्स्वहो सहृदयः कविरेव तेषु नूनं कविष्वपि गिराम्पतिकालिदासः।।

एक ही धर्म से जहाँ अनेक धर्मियों का उत्तरोत्तर सम्बन्ध बनता जाय उसे मालादीपक कहते हैं।।१३७।।

उदाहरण जैसे मेरा ही यह पद्य-

वर्षाऋतु में, आकाश से घनघटा, घनघटाओं से वृष्टि, वृष्टि से जल, निश्चय ही जलवृष्टि से ताप का विनाश, ताप के विनाश से हिमसरीखी शीतलता और उस शीतलता से भी तत्काल अपार सुख किनके द्वारा नहीं प्राप्त किया गया?

पर-पर के प्रति पूर्व-पूर्व को जहाँ विशेषण के रूप से स्थापित अथवा अपोहित किया जाय वहाँ **एकावली** अलंकार होता है।।१३८।।

जैसा कि मेरे **जानकीजीवन** महाकाव्य में (यह पद्य)

वह घर नहीं था जिसमें, गीतस्वर न उठ रहे हों (ऐसा कोई) गीत नहीं था जो विस्तृत आरोह-अवरोह (आलाप) से युक्त न हो, (ऐसी कोई) मूर्च्छना नहीं थी जो रसपेशल पदावली से युक्त न हो और (ऐसी कोई) पदावली नहीं थी जो सुधा की सहोदरी न प्रतीत हो रही हो।

अथवा जैसे मेरे ही **बालीविलासकाव्य** का यह पद्य-

ऐसी कोई बाला नहीं थी जो सुन्दरशरीर वाली एवं सुन्दरी न हो। ऐसी कोई सुन्दरी नहीं थी जो पूर्णिमा के चन्द्र सरीखी मुख वाली न हो। ऐसी कोई चन्द्रमुखी भी नहीं थी जो मृगनयनी न हो तथा मृगनयनी भी ऐसी कोई नहीं थी जो रमणीय बिम्बफल के समान (लाल) अधरोष्ठ वाली न हो।

वस्तु का उत्तरोत्तर उत्कर्ष बताने पर **सार** नामक अलंकार होता है।

उदाहरण-स्वरूप मेरा ही यह पद्य-

विधाता की रचना का सर्वस्व है पिण्डज (शरीरधारी) प्राणी। प्राणियों में भी मनुष्य, मनुष्यों में भी विद्वान्, विद्वानों में भी सहृदय, सहृदयों में भी कवि और कवियों में भी वाक्पति कालिदास श्रेष्ठ हैं (सारभूत हैं)।

उद्दिष्टानामनूद्देशो यथासंख्यं क्रमेण यत्।।१३९।।

उदाहरणं यथा मदुषज्ञमिदं पद्यम्-

समागतो, वारय गोपुरान्ते स्थितोऽस्ति, तिष्ठेन्ननु संविवक्षुः।
श्रव्यं न, सख्या सह मानिनी सा रुषेति कान्तं क्षिणुतेऽपराद्धम्।।

एकं यत्राप्यनेकस्मिन्नेकस्मिन्वाऽप्यनेककम्।
क्रमाद्भवति क्रियते पर्यायोऽसौ समुच्यते।।१४०।।

उदाहरणं यथा मम जानकीजीवनमहाकाव्ये-

प्रथमं दृगपाङ्गशालयोर्ह्यदृशे चाऽनु कपोलमण्डले।
निखिलेऽपघने ततः परं क्रमविस्तारमुपेयुषी त्रपा।।

उदाहरणान्तरं तत्रैव-

क्षणं नृपेषु क्षणमुन्मुखेषु प्रजाजनेषु क्षणमात्मबन्धौ।
महर्षिराजर्षिचयेषु वीरः क्षणं प्रचस्कन्द विलोचनानि।।

उभयत्रापि एकस्याऽनेकस्मिन् पर्यायो दृश्यते। एका त्रपा सीतायाः क्रमेण दृगपाङ्ग्योः कपोलयोः शरीरे चाखिले क्रमेण व्याप्ताऽभूत्। रामस्य दृष्टयोऽपि धनुर्भङ्गावसरे क्रमेण नृपेषु प्रजाजनेषु लक्ष्मणे महर्षिराजर्षिचयेषु च न्यपतन्।

प्रश्नतोऽप्रश्नतो वापि यत्रोदाहृतवस्तुनः।
व्यावृत्तिस्तादृगन्यस्य परिसंख्या समुच्यते।।१४१।।

उदाहरणं यथा गिरिजाशङ्करमिश्रविरचिते प्रसन्नभारते-

मालिन्यं गृहवह्निधूमनिवहे ग्रामीणचेतस्सु नो
संघर्षो न जनेषु केवलमसौ मेषेषु वेविद्यते।
ज्ञातिद्वेष इहास्ति कुक्कुरकुले वर्णेषु न प्राप्यते
स्वच्छन्दं गमनं पतत्रिनिवहे न स्त्रीषु तच्छूयते।।

अर्थापत्तिरलङ्कारो यत्रान्यार्थस्य वेदनम्।
दण्डापूपिकया न्यायसृत्या समभिजायते।।१४२।।

उद्दिष्ट किये गये पदार्थों का जो क्रमानुसार अनुदेश (कथन) किया जाता है उसे **यथासंख्य** अलंकार कहा जाता है।।१३९।।

उदाहरणार्थ, मद्विरचित यह पद्य-

आ गया है। रोक दो। गोपुर (प्रवेशद्वार) के पास खड़ा है। खड़ा रहने दो। कुछ कहना चाहता है। नहीं सुनना है (मुझे) मानिनी नायिका सखी के साथ बतियाती, रोष में, अपराधी प्रियतम को इस प्रकार दुखी कर रही है।

जहाँ अनेक में एक अथवा एक में अनेक क्रमशः होता है अथवा किया जाता है उसे **पर्याय** अलंकार कहते हैं।।१४०।।

उदाहरण जैसे मेरे **जानकीजीवन** महाकाव्य का यह पद्य-

(पुष्पवाटिका में) सीता की लज्जा सर्वप्रथम दोनो अपांगों में (अश्रुरूप में) तदनन्तर, कपोलों पर (पाण्डुतारूप में) तथा समूचे शरीर में (शैथिल्यरूप में) दीखी।

एक अन्य उदाहरण **जानकीजीवन** में ही,

वीर राघव ने क्षण भर के लिये राजाओं पर, तदनन्तर अपनी ओर देखती प्रजाओं पर (पुनः) भाई लक्ष्मण पर तथा (अन्ततः) महर्षियों-राजर्षियों पर दृष्टि डाली।

दोनो ही पद्यों में एक का अनेक में पर्याय दीखता है। सीता की एक लज्जा क्रमशः अपांगों, कपोलों तथा समूचे शरीर में व्याप्त हो उठी। राम की दृष्टियाँ भी धनुर्भंग के अवसर पर क्रमशः राजाओं, प्रजाओं, लक्ष्मण तथा राजर्षियों-महर्षियों पर पड़ी।

प्रश्नपूर्वक अथवा विना प्रश्न के ही जहाँ उदाहृत वस्तु की, उसी प्रकार की अन्य वस्तु से व्यावृत्ति (पृथक्ता) बताई जाय उसे **परिसंख्या** कहते हैं।।१४१।।

उदाहरण जैसे गिरिजाशंकर मिश्र-विरचित **प्रसन्नभारत** महाकाव्य का यह पद्य-

मलिनता घर की आग के धूमसमूह (मात्र) में थी ग्रामवासियों के हृदयों में नहीं। संघर्ष केवल मेषों (भेड़ों) की लड़ाई में था, सामान्य जनता में नहीं। बिरादरी का द्वेष मात्र कुत्तों में था ब्राह्मणादि वर्णों में नहीं और स्वच्छन्द (निर्बन्ध) गमन भी मात्र पक्षियों में था, महिलाओं में वह नहीं सुना जाता था।

जहाँ अन्य अर्थ का ज्ञान **दण्डापूपिकान्याय** से होता है उसे **अर्थापत्ति** अलंकार कहते हैं।।१४२।।

उदाहरणं यथा मम पद्यमिदम्-

शम्भुर्दक्षसुताहीनो विललाप सगद्गदम्।
दैन्यं चेदमृताशस्य मर्त्यानां खलु का कथा।।

अत्राऽमृताशस्येति श्लिष्टप्रयोगवशाच्चमत्कारातिशयः। अमृतान्धसोऽपि यदि दैन्यं तर्हि मरणधर्माणां मनुष्याणां का कथा?

यत्र ख्यातोपमानस्योपमेयत्वं प्रकल्प्यते।
उच्यते निष्फलत्वं वा तत्प्रतीपं समुच्यते।।१४३।।

उदाहरणं यथा ममैव-

मुखं सदाह्लादि दृशौ च साञ्जने
विलोक्य तन्व्या घनकेशजालकम्।
मयाऽनुभूतं किल पर्वचन्दिरा-
सिताब्जमायूरकपिच्छवैक्लवम्।।

अत्र पार्वणचन्द्रादीनामुपमानानां निष्फलत्वाभिधानात्प्रतीपालंकारः।

व्याजोक्तिर्गोपनं व्याजाद्यत्र प्रकटवस्तुनः।

उदाहरणं यथा ममेदं पद्यम्-

श्रीगोवर्धनशैलमण्डपमिलद्गोगोपगोपीव्रजे
रोमाञ्चो वृषभानुजाङ्गमदिरस्पर्शैर्हरेः कोऽप्यभूत्।
वर्षाभिर्ननु कम्पितोऽहमितिवद् व्याजेन तं गूहय-
न्नन्विष्टश्चतुरैर्निसर्गरसिको राधाविटः पातु वः।।

स्वभावोक्तिर्दुरूहार्थडिम्भचेष्टादिवर्णनम्।।१४४।।

उदाहरण जैसे मेरा यह पद्य-

दक्षसुता (अपनी प्रियासती) से विहीन होकर भगवान् शिव गद्गद स्वर से विलाप करने लगे। यदि अमृताशनों (देवों) का भी दैन्य इस प्रकार का है तो फिर मरणधर्माओं (मनुष्यों) के बारे में क्या कहा जाय?

यहाँ पर **अमृताशय** शब्द में श्लिष्ट प्रयोग होने के कारण चमत्कारातिशय विद्यमान है। यदि अमृतपायी देवों की भी ऐसी दीनता है तो फिर मरणधर्मा मनुष्यों की क्या बात?

जहाँ पर प्रख्यात (लोकप्रसिद्ध) उपमान की उपमेयता प्रकल्पित कर ली जाय अथवा उसकी निष्फलता बताई जाय वहाँ **प्रतीप** अलंकार होता है।।१४३।।

उदाहरण जैसे मेरा ही यह पद्य-

तन्वी के नित्याह्लादनशील मुख, अञ्जनयुक्त नेत्र-युगल तथा सघन केश-कलाप को देख कर मैंने पार्वण चन्द्र (पूनम के चाँद) नीलकमल तथा मयूरपिच्छ की विकलता (दैन्य) का अनुभव किया।

यहाँ पार्वणचन्द्रादि (प्रख्यात) उपमानों का निष्फलत्व बताने से प्रतीपालंकार है।

जहाँ पर प्रकटवस्तु (सर्वजन-संवेद्य) का किसी बहाने से गोपन किया जाय वहाँ **व्याजोक्ति** अलंकार होता है।।

उदाहरण जैसे मेरा यह पद्य-

श्री गोवर्धनपर्वत के मण्डप में गायों, ग्वालों तथा गोपियों की भीड़ के परस्पर संगत होने पर वृषभानुजा राधा के अंगों के मदिर संस्पर्श से नन्दनन्दन कृष्ण को अद्भुत रोमाञ्च हो आया। 'वर्षा में भींगने के कारण मैं

काँपने लगा हूँ इस प्रकार का बहाना लेकर उस (रोमाञ्च) को छिपाते हुए (परन्तु) चतुरों द्वारा सचाई जान लिये गये, निसर्ग-रसिक राधाप्रणयी (वह) गोविन्द आपकी रक्षा करें।

दुरूह अर्थों तथा दिम्भादि की चेष्टाओं के वर्णन को **स्वभावोक्ति** अलंकार कहते हैं।।१४४।।

तत्र सारमेयचेष्टावर्णनं यथा ममारण्यान्याम्-

सुस्वापसौख्यमनुभूय निशि प्रगाढं
प्रातस्समीरपरिरम्भसमुत्थकम्पः।
पादौ प्रतत्य लगुडीकृतमेरुदण्डो
व्यायाममानतकटिर्विदधात्यलर्कः।।

डिम्भचेष्टावर्णनं तत्रैवारण्यान्याम् यथा-

सम्पूर्णनग्नशिशवो ननु पामराणां
भिक्षाटिनां गलितघोणजलप्रवाहाः।
स्वैरं हसन्त इह लक्षपतेः समृद्धिं
निघ्नन्ति पल्वलजले शफरान् प्रहृष्टाः।।

यथा वा ममैव जानकीजीवने सीताशैशववर्णनप्रसङ्गे जलसन्तरणपरं पद्यमिदम्-

स्पृशेत् पुरोवर्ति तटं प्रतीर्य का द्रुतं पराभूय समस्तसङ्गिनीः।
इति प्रतिस्पर्धिततोयधावना ललङ्ग वापीं शफरातिशायिनी।।

लोकोत्तरविभुत्वस्य वर्णनोदात्तमुच्यते।
यद्वा महतां चरितं प्रस्तुतस्याङ्गताङ्गतम्।।१४५।।

उदाहरणं यथा मम वामनावतरणमहाकाव्येऽमरावतीवर्णनसन्दर्भे-

स्फटिकायितगोपुरैः क्वचिद्गगनोत्तुङ्गशिखैर्विभूषिताम्।
मणिरत्नसुवर्णमण्डितैर्ननु सौधैः क्वचिदूर्ध्वकेतनैः।।

पुरवीथिसभागृहोच्चयैर्हयहस्त्यादिनिवासमन्दिरैः।
वलभीविपणीष्टहट्टकैः शुचिशृङ्गाटकचत्वरादिभिः।।

अयुताऽयुतदेवमन्दिरैः सुखवातायनमण्डपाञ्चितैः।
मणिहीरकविद्रुमान्वितैरतिरम्यां स ददर्श तां पुरीम्।।

इस सन्दर्भ में कुत्ते की चेष्टाओं का वर्णन जैसे मेरी अरण्यानी में-

रात्रिवेला में गहरी नींद का सुख अनुभव कर, प्रातःकालीन (शीतल) हवाओं के आघातवश कँपकँपी का अनुभव करता, पिछले पैरों को (पीछे) फैला कर मेरुदण्ड (रीढ़ की हड्डी) को लाठी के समान सीधा करता, कमर को झुकाये हुए कुत्ता व्यायाम कर रहा है।

बच्चे की चेष्टा का वर्णन जैसे इसी **अरण्यानी** में (यह पद्य)

नासा-रन्ध्र से चूती हुई जलधारा वाले, भिखमंगे बंजारों के पूर्णतः नंग-धड़ंग बच्चे (मानो) लखपतियों की समृद्धि की जीभर कर हँसी उड़ाते, खुशी-खुशी बावली के पानी में मछली मार रहे हैं।

अथवा जैसे मेरे ही **जानकीजीवन** महाकाव्य में सीता के शैशव-वर्णन-सन्दर्भ में तैराकी से जुड़ा यह पद्य-

समस्त सहेलियों को पराजित कर, हवा की गति से तैरकर, सामने वाले तट को (देखें) कौन छू पाती है इस प्रकार जलसन्तरण की शर्त बदती हुई (सीता) मत्स्य से भी तीव्रगति से सरोवर पार कर गई।

लोकोत्तर विभुता का वर्णन अथवा प्रस्तुत वर्णना के रूप में विद्यमान महामहिमशालियों का चरित **उदात्त** अलंकार कहा जाता है।।१४५।।

उदाहरण, जैसे मेरे **वामनावतरण** महाकाव्य में अमरावती-वर्णनपरक यह पद्य-

कहीं-कहीं स्फटिक-निर्मित गगनचुम्बी शिखरों वाले गोपुरों (प्रवेशद्वारों) से तथा कहीं-कहीं उत्तुंग पताकाओं वाले मणिरत्न तथा सुवर्ण-मण्डित राजभवनो से शोभित।

नगरवीथियों, सभाभवनों की पंक्तियों, हयशालाओं, गजशालाओं, वलभियों, बाजारों, मनचाही पण्यवीथियों तथा साफ-सुथरे चौराहों एवं चबूतरों से।

सुखद झरोखों तथा नृत्यमण्डपों वाले हजारों देवमन्दिरों तथा मणि, हीरक, विद्रुम-मण्डित अति रम्य उस (अमरावती) पुरी को बलि ने देखा।

महच्चरित्रं यथाऽवस्थिनो बच्चूलालस्य प्रतानिन्याम्-

हृद्दर्पणोदितचलच्छविमच्छमूर्तिं
पूर्तिं समीहितफ़लस्य निराश्रयाणाम्।
स्फूर्तिं प्रसृत्वरविजित्वरसद्गुणानां
स्फूर्जत्तडित्प्रभगृहीतिमुमां नमामः।।

वन्दारुक्लृप्तहरिचन्दनचर्चितेन
प्राज्यत्रिविष्टपधुनीसलिलेन यस्याः।
दिव्याभिनन्दनकृतस्मितरश्मिशुभ्रां
वृन्दारकीसमुदयः स्नपनां विधत्ते।।

वाच्याभ्यां स्तुतिनिन्दाभ्यां यदा निन्दास्तुतीत्युभे।
क्रमेणैवाऽवगम्येते व्याजस्तुतिरसौ मता।।१४६।।

महापुरुष के चरित का उदाहरण जैसे बच्चूलाल अवस्थी की प्रतानिनी का यह पद्य-हृदयरूपीदर्पण में प्रकट चंचल छवि वाली निर्मलमूर्ति, निराश्रयों के आकांक्षित फलों की पूर्ति स्वरूप, चतुर्दिक प्रसरणशील विजयी गुणों की स्फूर्ति स्वरूप तथा देदीप्यमान तडित्प्रभा के समान भगवती उमा को प्रणाम करता हूँ।

देवाङ्गनाओं का समूह, वन्दनशीलों द्वारा सम्पादित हरिचन्दन से चर्चित प्रभूत स्वर्गङ्गा के जल से जिस (भगवती उमा का) दिव्य अभिनन्दन के कारण उत्पन्न स्मित-रश्मि से समुज्ज्वल स्नान सम्पन्न करता है।

वाच्य स्तुति एवं निन्दा द्वारा जब क्रमशः निन्दा एवं स्तुति व्यंजनया अवगत होते हैं तो उसे व्याजस्तुति अलंकार कहा जाता है।।१४६।।

तत्र स्तुत्या निन्दावगमे उदाहरणं यथा मम-

पञ्चानन! त्वमिव कोऽस्त्यपरोऽद्वितीयः
शौर्येऽथ सम्मुखरणे रिपुमर्दने वा।
यस्त्वं स्वनामपदसार्थकतां दधानः
पञ्चत्वमापयसि संश्रितसर्वजीवान्।।

निन्दया स्तुत्यवगमेऽपि यथा ममैव पद्यमिदमुदाहरणम्-

कासार! सैरिभकडङ्गरदूषितस्त्वं
घट्टाभिषिक्तमनुजौघमलावृतोऽसि।
ग्रीष्मे ज्वलत्तरणितापपिपासितानाम्-
मेकस्त्वमेव ननु जीवनदोऽसुभाजाम्।।

रसवदाद्यलङ्काराः काव्यप्रकाशसाहित्यदर्पणादिभ्यो यथारुचि ग्रहीतव्याः। अत्र वपुस्तत्त्वोन्मेषे कारिकासंख्या-१४६ स्वोपज्ञोदाहरण-श्लोकसंख्या च-७७.

।।इत्यलंकारप्रकरणम्।।

इति श्रीमद्गौतमगोत्रोत्पन्नस्य भभयाख्यमिश्रवंशावतंसस्य श्रीमद्दुर्गा-प्रसादाभिराजीतनूजस्य पण्डितप्रकाण्डश्रीमदाद्याप्रसादमिश्र-भ्रात्रीयस्य त्रिवेणीकविसंज्ञितस्याभिराजराजेन्द्र-स्याभिनवे काव्यशास्त्रेऽभिराजयशोभूषणे वपुस्तत्त्वोन्मेषाख्यो द्वितीयोंऽशः।

उसमें (वाच्य) स्तुति से (व्यङ्ग्य) निन्दा का उदाहरण जैसे मेरा यह पद्य-

हे पञ्चानन! तुम्हारे जैसा भला कौन दूसरा अ-द्वितीय है-शौर्य में, सम्मुख युद्ध में अथवा शत्रुमर्दन में? जो कि तुम अपने नामपद की सार्थकता को धारण करते हुए अपने ही अधीन (स्थित) समस्त जीवों को **'पञ्चत्व'** को प्राप्त कराते रहते हो।

(वाच्य) निन्दा से (व्यङ्ग्य) स्तुति का भी उदाहरण जैसे मेरा यह पद्य-

हे तालाब! भैसों के गोबर से दूषित, घाटों पर स्नान करने वाले मनुष्यों की भीड़ की मैल-कुचैल से समावृत हो तुम। तथापि ग्रीष्म में जलते हुए सूर्य के सन्ताप से पिपासित प्राणियों को जीवन देने वाले एकमात्र तुम्हीं हो।

रसवदाद्यलङ्कार काव्यप्रकाश-साहित्यदर्पणादि से यथारुचि ग्रहण करना चाहिये। **वपुस्तत्त्वोन्मेष** नामक इस खण्ड में कारिकाओं की संख्या १४६, स्वोपज्ञ उदाहरण-श्लोकों की संख्या ७७ है।

अलंकार-प्रकरण समाप्त हुआ।

इस प्रकार, श्रीमद् गौतमगोत्रोत्पन्न, भभयानामक मिश्र-वंश के आभूषण-स्वरूप महाभागवत पं० रामानन्द मिश्र के पौत्र, श्रीमान् पं० दुर्गाप्रसाद मिश्र एवं महीयसी अभिराजी देवी के मध्यम पुत्र तथा पण्डित-प्रकाण्ड श्रीमदाद्याप्रसादमिश्र के भ्रात्रीय, त्रिवेणीकवि अभिराजराजेन्द्र के अभिनव काव्यशास्त्र अभिराजयशोभूषण में वपुस्तत्त्वोन्मेष नामक द्वितीय खण्ड परिसमाप्त हुआ।

०००

अभिराजयशोभूषणम्

॥आत्मतत्त्वोन्मेषः॥

काव्यमङ्गीकृतं तज्ज्ञैश्चेच्छब्दार्थकलेवरम्।
तदात्मनाऽपि केनापि भाव्यमेवाऽनिवार्यतः।।१।।

अतति व्याप्नुते सर्वं सोऽयमात्मा प्रकीर्तितः।
निष्क्रियपञ्चतत्त्वाढ्यं येन जेजीव्यते वपुः।।२।।

शब्दार्थसंश्रितं काव्यं तद्गुणेन समन्वितम्।
धत्ते सहृदयश्लाघ्यं प्राणवत्तामनारतम्।।३।।

अनुप्राणनधर्मत्वात् सोऽयमात्मा समुच्यते।
चर्च्यते यस्य सन्दर्भः सप्रमाणं यथोचितम्।।४।।

उपनिषन्मूलमिदमात्मतत्त्वव्याख्यानम्। तद्यथा बृहदारण्यकोपनिषदिआत्मा वा अरे मन्तव्यः श्रोतव्यः निदिध्यासितव्यश्च। आत्मनि ज्ञाते सर्वं ज्ञातं भवतीति। यथा सर्वाण्यपीन्द्रियाणि शरीरे सताऽत्मनैव चैतन्याधिष्ठानीकृत्य तत्तद्विषयेषु प्रवर्त्यन्तेऽसता च तेनैव शवतामापाद्य निष्क्रियाणि विधीयन्ते तथैव शब्दार्थसंहननं काव्यमपि केनचिदात्मतत्त्वेनैवानुप्राणितं जीवत्प्रतीयते।

यदि काव्यतत्त्वज्ञों (सूरियों) ने काव्य को शब्दार्थरूपी शरीर वाला स्वीकार किया है तो फिर अनिवार्यतः उसकी कोई आत्मा भी होनी (ही) चाहिये।।१।।

जो सब कुछ व्याप्त कर लेता है, वही आत्मा कहा जाता है और निष्क्रिय पञ्चतत्त्वों (क्षिति, जल, पावक, गगन एवं समीर) से ओत-प्रोत शरीर भी जिसकी उपस्थितिमात्र से जीवन्त बनता है।।२।।

शब्द और अर्थ (रूपी निष्क्रिय अंगों) से युक्त काव्य भी, ठीक उसी प्रकार, जिससे समन्वित होकर, सहृदय-श्लाघ्य बनकर सार्वकालिक प्राणवत्ता को धारण कर लेता है।।३।।

अनुप्राणनधर्मता के कारण वही यह तत्त्व आत्मा कहा जाता है, जिसका सन्दर्भ, सप्रमाण यथोचित रूप में व्याख्यात किया जा रहा है।।४।।

आत्मतत्त्व का यह व्याख्यान (वस्तुतः) उपनिषन्मूलक है। जैसा कि

बृहदारण्यकोपनिषद् में कहा गया है-आत्मा का ही मनन किया जाना चाहिये, श्रवण किया जाना चाहिये तथा चिन्तन किया जाना चाहिये। क्योंकि आत्मतत्त्व के ज्ञान होने पर सब कुछ ज्ञात हो उठता है।

जैसे समस्त इन्द्रियाँ, शरीर में **विद्यमान** आत्मा द्वारा ही, चैतन्य का अधिष्ठान (स्रोत) बना कर तत्तत् विषयों में प्रवर्तित की जाती हैं, और शरीर में **अविद्यमान** रहते हुए उसी (आत्मा) के द्वारा 'शवता' की स्थिति में पहुँचाकर निष्क्रिय बना दी जाती हैं, उसी प्रकार शब्द एवं अर्थरूप शरीर वाला काव्य भी किसी आत्मतत्त्व द्वारा ही अनुप्राणित होकर जीवन्त परिलक्षित होता है।

तत्राऽलङ्कारशास्त्रे सन्त्येव काव्यात्मविषयिण्यो विप्रतिपत्तयः। आभरतात्पण्डितराजं यावदनवरतमेव मिथस्समीक्षणेनोत्तरोत्तरं विकसितप्राये संस्कृतकाव्यशास्त्रे शास्त्रप्रतिपाद्याङ्गभूतास्ता विप्रतिपत्तयोऽद्यापि विराजन्त एव।

तत्र कालक्रमेण समापतति रसाऽलङ्काररीतिध्वनिवक्रोक्त्यौचित्यानां काव्यात्मताप्रसङ्गः। किन्त्वत्रावधेयम्।

काव्यात्मत्वसमुद्घोषे द्विविधाः सन्ति सूरयः।
प्रत्यक्षवादिनश्चैके परोक्षवादिनोऽपरे।।५।।

स्वमतं येऽभिदधते शब्दैस्ते प्रथमे मताः।
ये च तन्वन्ति सङ्केतैः स्वरुचिं तेऽपरे बुधाः।।६।।

प्रत्यक्षवादिनस्तावद्वामनाऽनन्दवर्धनक्षेमेन्द्रा ये सुस्पष्टशब्दैः काव्यात्मत्वमुद्घोषयन्ति रीतिध्वन्यौचित्यानाम्। तद्यथा वामनः-रीतिरात्मा काव्यस्येति। आनन्दवर्धनस्तावत्-काव्यस्यात्मा ध्वनिरिति। पुनश्च-योऽर्थः सहृदयश्लाध्यः काव्यात्मेति व्यवस्थित इति। यथा वा भूयोऽपि-

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।
क्रौञ्चद्वन्द्वियोगोत्थः शोकः श्लोकत्वमागतः।। इति।

क्षेमेन्द्रोऽप्यौचित्यविचारचर्चायामुपन्यस्यति-औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितमिति। यद्यपि रीतिध्वन्यौचित्यतत्त्वप्रशंसका अन्येऽपि पूर्वाऽपरकालीना आचार्याः सन्त्येव तथाप्यत्र काव्यात्मत्वसुस्पष्टवादिनामेवालङ्कारशास्त्रिणां मतमुद्धृतम्मया।

अब इस सन्दर्भ में, अलंकारशास्त्रीयग्रंथों में, काव्यात्मविषयक विप्रतिपत्तियाँ (मतभेद) तो हैं ही। आचार्य भरत से लेकर पण्डितराज जगन्नाथ तक यदि

साकल्येन समीक्षा की जाय तो उत्तरोत्तर विकसित होने वाले संस्कृत काव्यशास्त्र में शास्त्रीय प्रतिपाद्य का अंग बनने वाली वे विप्रतिपत्तियाँ आज भी विराजमान दीखती हैं।

उनमें भी कालक्रम की दृष्टि से रस, अलंकार, रीति, ध्वनि, वक्रोक्ति तथा औचित्य के काव्यात्मा होने का प्रसंग आता है। परन्तु यहाँ यह बात ध्यान में रखने योग्य है-

काव्यात्मता का समुद्घोष करनेवालों में, दो प्रकार के विद्वान् (आचार्य) हैं। कुछ तो हैं प्रत्यक्षवादी तथा अन्य हैं परोक्षवादी ।।५।।

जो अपने मन्तव्य को शब्दशः प्रस्तुत करते हैं वे तो प्रथम कोटि में आते हैं और जो अपनी अभिरुचि को संकेत मात्र से प्रकाशित करते हैं वे विद्वान् दूसरी कोटि के हैं।।६।।

प्रत्यक्षवादी आचार्य हैं जैसे वामन, आनन्दवर्धन तथा क्षेमेन्द्र जो कि शब्दों द्वारा (क्रमशः) रीति, ध्वनि अथवा औचित्य के काव्यात्मत्व को उद्घोषित करते हैं। उदाहरणार्थ, वामन कहते हैं-**रीति काव्य की आत्मा है।** आनन्दवर्धन कहते हैं- **काव्य की आत्मा ध्वनि है।** आगे पुनः कहते हैं-जो सहृदयश्लाघ्य अर्थ काव्य की आत्मा के रूप में प्रतिष्ठित है। अथवा आगे पुनः कहते हैं-

वही (व्यङ्ग्य) अर्थ काव्य की आत्मा है। प्राचीन काल में आदिकवि (प्राचेतस वाल्मीकि) का, क्रौञ्च-मिथुन के वियोग से समुत्थित, शोक ही श्लोक बन कर फूट पड़ा था।

क्षेमेन्द्र भी औचित्यविचारचर्चा में उपन्यस्त करते हैं-औचित्य ही रससिद्ध काव्य का स्थिर (चिरन्तन) प्राणतत्त्व है।

यद्यपि रीति, ध्वनि एवं औचित्य तत्त्व के प्रशंसक और भी अनेक पूर्ववर्ती तथा परवर्ती आचार्यगण हैं ही, फिर भी, यहाँ मैंने काव्य की आत्मा का सुस्पष्ट उल्लेख करने वाले काव्यशास्त्रियों का ही मत उद्धृत किया है।

परोक्षवादिनस्तु भरतभामहदण्ड्युद्भटरुद्रटकुन्तकमहिमभट्टादयो वर्तन्ते ये प्ररोचनावचोभिर्भृशं प्रशंसन्तो रसालङ्कारवक्रोक्तीनां काव्यात्मतामङ्गीकुर्वन्ति। परन्तु रसालङ्कारवक्रोक्तिपक्षधराः सन्तोऽपि रसादीनां काव्यात्मतामङ्गीकुर्वाणा अपि ते स्पष्टशब्दैर्नाऽभिदधते यत् रस एव काव्यस्यात्मेति, अलङ्कार एव काव्यस्यात्मेति, वक्रोक्तिरेव काव्यस्यात्मेति।

।।अथ रसात्मत्वप्रकरणम्।।

रसस्यात्मत्वप्रख्यापनवर्जं माहात्म्यं के न स्वीकुर्वन्ति? तत्रादौ प्रसिद्धरससूत्रोपदेष्टा नाट्यशास्त्रकारो भरत एव ब्रूते-

तत्र रसानेव तावदादावभिव्याख्यास्यामः। नहि रसादृते कश्चिदर्थः प्रवर्तते इति। तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।

भामहस्तु रसवदलङ्कारसन्दर्भे तन्महत्त्वं प्रतिपादयति रसवद्दर्शितस्पष्ट-शृङ्गारादिरसं यथेति। दण्डी कथयति-

इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्।
मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।। इति।

रसवद्दर्शितस्पष्टशृङ्गारादिरसादयमित्युद्भटः। तस्मात्तत्कर्तव्यं यत्नेन महीयसा रसैर्युक्तमिति रुद्रटः।।

एवं हि, प्रायेण सर्वेऽपि पूर्वसूरयो रसमहिमानमातन्वते। ध्वन्यध्वनीनाना-माचार्याणां पुनः का कथा? ते तु रसध्वनिरूपेण तस्य काव्यात्मता-मङ्गीकुर्वन्त्येव। एवम्भूतेऽपि स्पष्टमिदं यद्रसस्य काव्यात्मतां न कोऽप्यभिधत्ते साक्षाद्रीत्या।

वस्तुतः यथा लोके जीवात्मनोऽपि परतरो भवति मोक्षस्तल्लक्ष्य-भूतत्वात् तथैव काव्येऽपि रसः काव्यात्मभूताद् व्यङ्ग्यार्थात् परतरोऽथ च व्यङ्ग्यार्थलक्ष्यभूतः। व्यङ्ग्यार्थलक्ष्यभूत एवाऽसौ रसध्वनिरिति ध्वनिकारः। किन्तु नाऽसौ रसः कथमपि काव्यात्मा काव्यार्थत्व-विरहितत्वात्। काव्यात्मा तु काव्यस्य कश्चिदर्थ एव भवितुं शक्नोति। सोऽर्थः सहृदयश्लाध्यो व्यङ्ग्यार्थ एव न तावद्रसः। सविस्तरं प्रसङ्गोऽयं ध्वन्यात्मत्वप्रकरणे पुनर्निरूपयिष्यते।

परोक्षवादी आचार्य हैं-भरत, भामह, दण्डी, उद्भट, रुद्रट, कुन्तक एवं महिमभट्टादि जो प्रशंसापरक वचनों द्वारा, अतिशय महिमा-गरिमा बखानते - रस, अलंकार एवं वक्रोक्ति की काव्यात्मता को स्वीकार करते हैं। परन्तु रस, अलंकार एवं वक्रोक्ति के पक्षधर होते हुए भी, रस-अलंकार-वक्रोक्ति की काव्यात्मता को स्वीकार करते हुए भी वे स्पष्ट शब्दों द्वारा नहीं ही कहते हैं कि रस ही काव्य की आत्मा है, अलंकार ही काव्य की आत्मा है (अथवा) वक्रोक्ति ही काव्य की आत्मा है।

रस की आत्मा के रूप में प्रतिष्ठा की बात को छोड़कर, उसका माहात्म्य

भला कौन (आचार्यगण) नहीं स्वीकार करते हैं? उस प्रसंग में सर्वप्रथम तो प्रसिद्धरससूत्र के उपदेष्टा नाट्यशास्त्रकार भरत ही कहते हैं-

उस सन्दर्भ में, सर्वप्रथम रसों की ही सांगोपांग व्याख्या करेंगे। (क्योंकि) रस के विना कोई भी अर्थ प्रवृत्त नहीं होता है। विभाव, अनुभाव, व्यभिचारिभाव के संयोग से (ही) रस की निष्पत्ति होती है।

भामह तो रसवत् अलंकार के सन्दर्भ में उसका महत्त्व प्रतिपादित करते हैं-रसवत् अलंकार उसे कहते हैं जिसमें शृङ्गारादि रसों को स्पष्टतः प्रदर्शित किया गया हो।

दण्डी कहते हैं-अलंकारशास्त्र में आठ रसों में सीमित वाणी की रसवत्ता की व्याख्या की गई है। रससिद्ध वाणी में तथा वस्तु में भी रस की स्थिति, मधुर रूप में होती ही है। आचार्य **उद्भट** कहते हैं कि जहाँ शृङ्गारादि रसों का स्पष्टतः प्रतिपादन हो उसे रसवत् अलंकार कहते हैं। इसी प्रकार **रुद्रट** का कथन है कि महाकवियों को चाहिये कि वे यत्नपूर्वक रससंवलित काव्य का निर्माण करें।

इस प्रकार, प्रायः समस्त पूर्वाचार्य-गण रस की महिमा का प्रकाशन करते हैं। ध्वनिप्रस्थान के पक्षधर आचार्यों की तो बात ही क्या? वे तो **रसध्वनि** के रूप में उसकी काव्यात्मता को स्वीकार ही करते हैं। यह सब होने के बावजूद भी यह स्पष्ट है कि रस की काव्यात्मता का प्रतिपादन शब्दशः कोई भी आचार्य नहीं करता।

वस्तुतः जैसे लोक में जीवात्मा से भी श्रेष्ठ होता है **मोक्ष**, उस आत्मा का लक्ष्यभूत होने के कारण, उसी प्रकार काव्य में भी काव्यात्मभूत व्यङ्ग्यार्थ से श्रेष्ठ होता है **रस**, व्यङ्ग्यार्थ का लक्ष्यभूत! व्यङ्ग्यार्थ (प्रतीयमानार्थ) के लक्ष्य के रूप में ही वह **रसध्वनि** के रूप में प्रतिष्ठित है, ऐसा आनन्दवर्धन मानते हैं।

परन्तु वह रस (व्यङ्ग्यार्थ की तुलना में अपनी श्रेष्ठता के बावजूद भी) किसी भी स्थिति में काव्य की आत्मा नही हो सकता। **काव्यार्थ** न होने के कारण! काव्य की आत्मा तो काव्य का कोई अर्थ ही हो सकता है और वह अर्थ सहृदय-श्लाघ्य व्यङ्ग्यार्थ ही है, न कि रस! यह प्रसंग, विस्तारपूर्वक पुनः निरूपित किया जायेगा ध्वनि की काव्यात्मता के प्रकरण में।

॥अथालङ्कारात्मत्वप्रकरणम्॥

सम्प्रत्यलङ्कारसन्दर्भः। अलङ्कारपक्षधरेष्वाचार्येषु भामहदण्डिनौ प्रमुखौ। तत्रोभावपि क्रमेण वक्रोक्त्यतिशयोक्तितत्त्वमेव सर्वालङ्कारमूलत्वेन प्रतिपादयतः। सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते-यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विनेति भामहः। अलङ्कारान्तराणामप्येकामाहुः परायणाम्-वागीशमहितामुक्तिमिमामतिशयाह्वयामिति दण्डी।

किञ्च, अलङ्कारान्तरमूलत्वेनाऽतिशयोक्तेर्वैशिष्ट्यं ध्वनिकारादयोऽपि स्वीकुर्वन्त्येव। तत्राऽनन्दवर्धनः-यतः प्रथमं तावदतिशयोक्तिगर्भता सर्वालङ्कारेषु शक्यक्रियेति (ध्वन्या० ३।३७ वृत्तिः) तेनाऽतिशयोक्तिः सर्वालङ्कार-सामान्यमित्यभिनवगुप्तोऽधिलोचनम्। सर्वत्र एवंविध-विषयेऽतिशयोक्तिरेव प्राणत्वेनाऽवतिष्ठते। तां विना प्रायेणाऽलङ्कारत्वायोगात् (काव्य० २०।१३६ वृत्तिः) इति मम्मटः।

रुय्यकाप्ययौ तद्वदेवोपमामहत्त्वं प्रतिपादयतः। तद्यथा रुय्यकः-अलंकारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्-उपमा कविवंशस्य मातैवेति मतिर्ममेति। अप्पयदीक्षितोऽपि-

उपमैका शैलूषी संगता चित्रभूमिकाभेदान्।
रञ्जयति काव्यरङ्गं नृत्यन्ती तद्विदां चेतः।।

अब अलंकार के प्रकरण को लें। अलंकार (की काव्यात्मता) के पक्षधर आचार्यों में प्रमुख हैं-भामह और दण्डी। उनमें, दोनों ही क्रमशः **वक्रोक्ति** तथा **अतिशयोक्ति** तत्त्व को ही समस्त अलंकारों का अनुप्राणक मानते हैं। **भामह** कहते हैं कि यह वक्रोक्ति ही वह सर्वस्वभूत तत्त्व है। इसी के द्वारा (विविधालंकारयुक्त) अर्थों की विभावना हो पाती है। कवि को इसी (की सिद्धि) में यत्न करना चाहिये (क्योंकि) इसके अभाव में भला कोई भी अलंकार संभव कहाँ हो पाता है?

आचार्य **दण्डी** कहते हैं कि अन्यान्य समस्त अलंकारों में भी (अनुप्राणक तत्त्व के रूप में) निरपेक्ष (अकेले) रूप में विद्यमान, देवगुरु वृहस्पति द्वारा भी समादृत इसी को अतिशयोक्ति (नाम वाली) कहा गया है।

और फिर, आत्मेतर समस्त अलंकारों के मूल के रूप में, अतिशयोक्ति का वैशिष्ट्य तो ध्वनिकार आदि भी स्वीकार करते हैं। आनन्दवर्धन को ही लीजिये-

क्योंकि सर्वप्रथम तो समस्त अलंकारों में अतिशयोक्ति की उपस्थिति ही कारगर (अलंकार-विशेष की उद्भावयित्री) दीखती है (ध्वन्या० ३-३७ की वृत्ति)।

लोचन टीका में अभिनवगुप्त भी लिखते हैं-इसका अभिप्राय यह है कि अतिशयोक्ति ही समस्त अलंकारों की जन्मदात्री है।

इस प्रकार के सन्दर्भों में सर्वत्र ही, अतिशयोक्ति (मात्र) प्राणतत्त्व के रूप में विद्यमान रहती है। उसके अभाव में प्रायः अलंकार-सद्भाव बन ही नहीं पाता (काव्यप्रकाश १०-१३६ की वृत्ति) ऐसा आचार्य मम्मट का कथन है।

उसी प्रकार (अर्थात् वक्रोक्ति एवं अतिशयोक्ति की ही भाँति) आचार्य रुय्यक एवं अप्पय दीक्षित भी उपमा का महत्त्व प्रतिपादित करते हैं।

रुय्यक का कहना है-काव्यसम्पदाओं का सर्वस्वभूत तथा अलंकारों का शिरोरत्न उपमा तो कविवंश की जन्मदात्री (माँ) ही है, ऐसा मेरा मन्तव्य है।

अप्पय दीक्षित भी लिखते हैं-नाना प्रकार की भूमिकाओं में अवतीर्ण होने वाली अकेली उपमा ही शैलूषी (नटी) की भाँति नृत्य करती हुई काव्यरूपी रंग को तथा काव्यमार्मिकों के चित्त को अनुरंजित करती है।

एते सर्वेऽप्याचार्या वक्रोक्तिमतिशयोक्तिमुपमाञ्च सर्वालङ्कारनिस्यन्द-भूतां मन्वाना अपि तस्यालङ्कारस्य काव्यात्मत्वं साधयितुं सर्वथाऽसमर्था एव दृश्यन्ते। यच्च दण्डिनोक्तम्-

यच्च सन्ध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे।
व्यावर्णितमिदं चेष्टमलङ्कारतयैव नः।।

तदपि तस्यालङ्कारतत्त्वं प्रति श्रद्धातिशय एव। यदीदृशमेव किञ्चिद्-विलक्षणमनितरसाधारणं तत्त्वमासीदलङ्कारस्तर्हि कथं न स्पष्टाक्षरैरनवद्य-वाचोयुक्तिभिश्च तस्य काव्यात्मता प्रतिष्ठापिता?

यच्च वामनेन प्रतिपादितम्-काव्यशोभायाः कर्तारो धर्मा गुणाः। तदतिशयहेतवस्त्वलङ्काराः। काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः। रीतिरात्मा काव्यस्येति। तत्र गुणालङ्काररीतीनां मध्ये कस्य सर्वोत्कृष्टतां साधयितुमसौ बद्धपरिकरः? ये काव्यशोभायाः कर्तारस्ते गुणास्तु सामान्यरूपेण चर्चिताः। ये च तदतिशयहेतवस्तेऽलङ्काराः पुनः काव्यग्राह्यत्वहेतवस्सौन्दर्यभूताश्च। हन्त, कुतस्त्योऽयं न्यायः? वामनीयं विवरणमिदं सर्वथा विसंवाद्येव प्रतीयते।

ये समस्त आचार्य वक्रोक्ति, अतिशयोक्ति तथा उपमा को ही (क्रमशः) समस्त अलंकार-प्रपञ्च का निस्यन्द (मूल स्रोत) मानते हुए भी उस अलंकार विशेष का **काव्यात्मत्व** सिद्ध कर पाने में सर्वथा असमर्थ ही परिलक्षित होते हैं।

और जो आचार्य **दण्डी** ने कहा कि जो सन्ध्यङ्ग, वृत्त्यङ्ग तथा लक्षणआदि अन्यान्य आगमों में वर्णित किये गये हैं वह सब हमें **अलंकार** रूप में ही अभीष्ट है, यह कथन भी अलंकार-तत्त्व के प्रति उनका श्रद्धातिशय ही है। यदि अलंकार कुछ ऐसा ही विलक्षण तथा अनितर-साधारण तत्त्व था तो क्यों नहीं उन्होंने स्पष्ट अक्षरों तथा असन्दिग्ध वाचोयुक्तियों द्वारा उसकी काव्यात्मता प्रतिष्ठित की?

और जो आचार्य **वामन** ने प्रतिपादित किया-काव्यशोभा को उत्पन्न करने वाले धर्म गुण हैं तथा उस शोभा के अतिशय-हेतु अलंकार हैं। काव्य ग्राह्य होता है अलंकार के कारण! सौन्दर्य ही अलंकार है। रीति काव्य की आत्मा है।

तो उनके (आचार्य वामन के) इस व्याख्यान में गुण-अलंकार-रीति के बीच में वह किसकी सर्वोत्कृष्टता सिद्ध करने में बद्धपरिकर हैं? जो काव्यशोभा के कारक धर्म हैं वे **गुण** तो सामान्य रूप से चर्चित किये गये और जो उस काव्यशोभा के अतिशय के हेतु (मात्र) हैं वे अलंकार प्रतिष्ठित कर दिये गये-काव्य की ग्राह्यता के हेतु रूप में तथा सौन्दर्य के रूप में? वाह, यह कहाँ का न्याय है? वामन का यह विवरण सर्वथा विसंवादी ही प्रतीत होता है।

काव्यालङ्कारकारिकाकारस्सनातनोद्विवेदिरेवाप्रसादोऽपि काव्यात्मभूत-मलङ्कारपदमग्निपुराणप्रामाण्येन ब्रह्मपर्यायत्वेनाङ्गीकुर्वन् स्वालङ्कारपक्षधरतां प्रकटयति। तन्मतं सम्यक्तया संक्षिपन्नायुष्मान् द्विवेदी सदाशिवकुमारस्तत्सूनुः प्रस्तौति-आनन्दकोषस्योल्लासे लोकोत्तरविभावनाऽलङ्कृतार्थसंवित्तिरेव काव्यमिति। प्रमेयमात्रनिष्ठत्वादलङ्कारतत्त्व ...मिति। ... रसस्य सामाजिकैक-निष्ठत्वात्काव्यधर्मत्वाऽभावः। काव्यधर्मत्वे पुनरलङ्कारत्वमेवेति च।

तदभिप्रायजातं साकल्येनाऽनङ्गीकुर्वन्नप्यहं महत्या श्रद्धया तत्सारस्वतश्रमं समाद्रिये।

काव्यालंकारकारिकाकार रेवाप्रसाद द्विवेदी सनातन भी काव्यात्मभूत **अलंकार** को अग्निपुराण के प्रामाण्य से परब्रह्म का पर्याय मानते हुए अपनी अलंकार-पक्षधरता को प्रकट करते हैं। उनके पुत्र आयुष्मान् सदाशिव कुमार द्विवेदी ने उसके मन्तव्यों को भलीभाँति संक्षिप्त करते हुए कहा है-आनन्दकोष के उल्लासन में लोकोत्तर विभावना वाली अलंकृत अर्थ की संवित्ति ही काव्य है। प्रमेयमात्रनिष्ठ होने के कारण अलंकारतत्त्व ही काव्यात्मा रूप में मान्य है।

अलम्भाव की ही अलंकारता है (अन्य किसी तत्त्व की नहीं) वाक्यार्थ मात्र रूप वाला होने के कारण अलंकार की अवाच्यता सिद्ध है। एकमात्र सामाजिकाश्रित होने के कारण रस की काव्यधर्मता नहीं मानी जा सकती। काव्यधर्मता होने पर रस का (भी) अलंकारत्व ही मान्य है।

उनके इन समस्त मन्तव्यों को साकल्येन अंगीकार न करता हुआ भी मैं बड़ी श्रद्धा के साथ उनके सारस्वत-श्रम का समादर करता हूँ।

ततश्चाभिनवकाव्यालङ्कारसूत्रकारो राधावल्लभोऽभि द्विवेदिमतमनुहरन्न-लङ्कारमेव काव्यं काव्यात्मानञ्चाङ्गीकरोति। तद्यथा-इत्थं च अलङ्कारो हि नाम सर्वासु कलासु सर्वविधसाहित्ये च सार्वकालिकः सार्वदेशिकः सर्वङ्कषश्च मानदण्डः। अलङ्कारोऽयं न केवलं काव्यविश्वस्य मानदण्डः, काव्यमार्गे तासां तासां पद्धतीनां नियामकोऽपि इति (अभिनव० पृ० ३९)

भूयोऽपि-सौन्दर्यमलङ्कार इति निगदन् वामनः काव्ये समग्रमपि सौन्दर्यं सौन्दर्यप्रक्रियां चालङ्काररूपामेव मनुते। एतेन ध्वनिगुणरीतिबन्धवक्रोक्ति प्रभृतीनां समेषां काव्यतत्त्वानामलङ्कारवर्तित्वम्। (अभिनव० पृ० ४०)।

भूयोऽपि-तस्य महाविषयत्वेनाङ्गित्वेन च प्रतिपादयिष्यमाणत्वादिति यदुक्तमानन्दवर्धनेन तदपास्तम्। अलंकारस्यैव महाविषयत्वात् तस्य वाच्यलक्ष्य-व्यङ्ग्यादीनर्थान् व्याप्यापि तानतिशय्याऽवस्थितेः (अभिनव० पृ० ४१)।

भूयोऽपि-तेनालङ्कारेणैव पूर्णताऽधीयते काव्ये। तस्मिंश्चान्तर्भवन्ति समग्राः काव्यकोटयः। भवतश्चात्र श्लोकौ-

रसाश्चापि गुणाश्चापि रीतयो वृत्तयस्तथा।
सर्वे ध्वनिप्रभेदाश्च ये प्राचीनैरुदाहृताः।।

सन्धिसन्ध्यङ्गवृत्त्यङ्गलक्षणानि तथैव च।
अलङ्कारस्य परिधौ सर्वे चान्तर्भवन्ति च।।-अभि० पृ० ४६

किमत्र वाच्यम् ? अलङ्कारसम्प्रदायपक्षपातिनामाचार्याणां स्थापना-मप्यतिक्रामति सर्वतन्त्रस्वतन्त्रेयं श्रद्धा त्रिपाठिवर्यस्य। तत्र कोविदा एव प्रमाणम्। स्वमन्तव्यमहमग्रे स्थापयिष्यामि।

इसके अनन्तर अभिनवकाव्यालंकारसूत्रकार राधावल्लभ भी आचार्य द्विवेदी के मत का समर्थन करते हुए अलंकार को ही काव्य एवं काव्यात्मा मानते हैं। उन्हीं के शब्दों में-इस प्रकार अलंकार ही समस्त कलाओं में तथा सर्वविध

साहित्य में सार्वकालिक, सार्वदेशिक तथा सर्वङ्कष मानदण्ड है। यह अलंकार न केवल काव्यजगत् का मानदण्ड है (प्रत्युत) काव्यमार्ग की समस्त पद्धतियों का नियामक भी है। (अभिनव० पृ० ३९)

पुनश्च-सौन्दर्य अलंकार है ऐसा कहते हुए वामन भी काव्य में (विद्यमान) समस्त सौन्दर्य तथा सौन्दर्य-प्रक्रिया को अलंकार-रूप ही मानते हैं। इससे ध्वनि, गुण, रीति, बन्ध तथा वक्रोक्ति आदि समस्त काव्य तत्त्वों की अलंकारवर्तिता सिद्ध है (अभिनव० पृ० ४०)।

पुनश्च-उस (ध्वनि) के महाविषयत्व तथा अंगित्व को आगे प्रतिपादित किये जाने के कारण-यह जो कहा है आनन्दवर्धन ने (ध्वन्यालोक में) वह अपास्त हो जाता है अलंकार के ही **महाविषयत्व** के कारण तथा वाच्य, लक्ष्य एवं व्यङ्ग्यादि अर्थों को व्याप्त कर, उनके भी अतिशय की स्थिति में होने के कारण (अभिनव० पृ० ४१)।

पुनश्च-इसलिये, काव्य में पूर्णता अलंकार से ही आ पाती है। उसी में अन्तर्भूत हो जाती हैं समस्त काव्यकोटियाँ। इस सन्दर्भ में दो श्लोक हैं-

रस, गुण, रीतियाँ, वृत्तियाँ तथा समस्त ध्वनिप्रभेद जो प्राचीनों द्वारा उदाहृत हैं, साथ ही साथ, सन्धि, सन्ध्यङ्ग, वृत्त्यङ्ग तथा लक्षण-सबके सब अलंकार की ही परिधि में आते हैं। (अभिनव० पृ० ४६)

क्या कहा जाय इस सन्दर्भ में? अलंकार सम्प्रदाय-पक्षधर आचार्यों की **स्थापना** को भी अतिक्रान्त कर रही है त्रिपाठी जी की यह सर्वतंत्र स्वतंत्र श्रद्धा! अब इसे विद्वज्जन ही जानें। अपना मन्तव्य मैं आगे रखूँगा।

॥अथ रीतिकाव्यात्मत्वप्रकरणम्॥

आचार्यो वामनो रीतिमेव काव्यात्मानं मनुते-रीतिरात्मा काव्यस्येति। तं समर्थयते तट्टीकाकारस्तिप्पभूपालः। अलङ्कारसंग्रहकारोऽमृतानन्दयोग्यपि रीत्यात्मवादी। तद्यथा-रीतिरात्माऽत्र काव्यस्य कथ्यते या चतुर्विधा (५।१०)

रीतिविषयकं नामान्तरसंख्याश्रेष्ठतासन्दर्भं प्रस्तूयेदानीं तस्याः काव्यात्मत्वसन्दर्भो निरूप्यते। वामनमतेन रीतिरेव काव्यस्यात्मा काव्येऽङ्गीभूतत्वात्। रसोऽपि रीत्यङ्गभूत एवेत्याचार्यः। विशिष्टा पदरचना रीतिरिति प्रतिपादयता वामनेन स्पष्टमुक्तं यद् विशेषो गुणात्मा। अतएव रीतिगुणयोर्नित्यसम्बन्धः। किञ्च, गुणा रीत्यनुप्राणकाः। अतएव रीतयो

गुणमाध्यमेन प्रत्यक्षरसोपकर्त्र्यः। सर्वेऽपि रसाः कान्तिगुण एव समाहितास्तद्यथा-दीप्तरसत्वं कान्तिरिति।

तन्नेति ध्वन्यध्वनीना आनन्दवर्धनाभिनवमम्मटविश्वनाथजगन्नाथाः। काव्यस्य शरीरस्थानीयं तत्त्वं रीतिस्तत्कथं तदात्मपदमधिरोढुं शक्नोतीति पृच्छति ध्वनिकारः। न चापि गुणा रीत्यनुप्राणका रसधर्मत्वात्। तद्यथाऽह स्वयमेव ध्वनिकारः-तस्मान्न गुणाः संघटनास्वरूपाः। न च संघटनाश्रया गुणाः। ननु यदि संघटना गुणानां नाऽश्रयस्तत्किमालम्बना एते परिकल्पन्ताम्? उच्यते-प्रतिपादितमेवैषामालम्बनम्।

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्।।

आचार्य वामन रीति को ही काव्य की आत्मा मानते हैं-रीति है काव्य की आत्मा! उनके मत का समर्थन करते हैं उनके टीकाकार तिप्पभूपाल! अलंकार-संग्रहकार आचार्य अमृतानन्दयोगी भी रीति को ही काव्यात्मा मानने वाले हैं। जैसा कि उन्होंने लिखा है-रीति है काव्य की आत्मा, जो चतुर्विध बताई गई है (५-१०)

रीतिविषयक नामान्तर, संख्या तथा श्रेष्ठता का सन्दर्भ प्रस्तुत करने के बाद अब उसकी काव्यात्मता का सन्दर्भ निरूपित किया जा रहा है। वामन के विचार से रीति ही काव्य की आत्मा है काव्य में अङ्गीभूत होने के कारण। रस भी रीति का ही अंगभूत है ऐसा आचार्य वामन का अभिमत है। 'विशिष्ट कोटिक पद-रचना ही रीति है' ऐसा प्रतिपादित करते हुए वामन ने स्पष्टतः कहा है कि विशेष गुणात्मा है। अर्थात् विशिष्टा पद-रचना का तात्पर्य है गुण-संवलित पद-संघटना! अतएव रीति एवं गुण का सम्बन्ध नित्य हुआ । बल्कि यह कहें कि गुण रीति के अनुप्राणक हैं। अतएव रीतियाँ गुणों के माध्यम से ही प्रत्यक्षतः रसोपकर्त्री हैं। सारे के सारे रस कान्ति नामक गुण में ही समाहित हो जाते हैं। जैसा कि कहा गया है-दीप्तरसता ही कान्ति (नामक) गुण है।

'परन्तु ऐसा नहीं है'-यह कथन है ध्वनिमार्गी आचार्य आनन्दवर्धन, अभिनवगुप्त, मम्मट, विश्वनाथ एवं जगन्नाथ का। काव्य का शरीरस्थानीय तत्त्व है (जब) रीति, तो फिर उसी काव्य के आत्मपद पर कैसे प्रतिष्ठित हो सकती है? यह प्रश्न है ध्वनिकार का। गुण भी रीति के अनुप्राणक नहीं है, रस-धर्म होने के कारण।

जैसा कि ध्वनिकार ने स्वयं कहा है-इसलिये गुण न तो संघटना-स्वरूप हैं और न ही संघटनाके आश्रय हैं। अब यदि संघटना गुणों का आश्रय नहीं है

तो गुणों को किस आलम्बन वाला कल्पित किया जाय? इसका उत्तर है-इन गुणों के आलम्बन का प्रतिपादन किया जा चुका है (इस रूप में कि) उस अंगीभूत अर्थ (रस) को जो अवलम्बन बनाते हैं उन्हें गुण कहा गया है (तथा इसी प्रकार जो काव्य के) अंगभूत शब्द एवं अर्थ के आश्रित हैं वे स्वीकरणीय हैं अलंकार रूप में। जैसे कटक (भुजबन्द) आदि (शरीर के)।

अथवा भवन्तु शब्दाश्रया एव गुणाः। न चैषामनुप्रासादितुल्यत्वम्। यस्मादनुप्रासादयोऽनपेक्षितार्थविस्तारा शब्दधर्मा एव। शब्दधर्मत्वं चैषामन्याश्रयत्वे शरीराश्रयत्वमिव शौर्यादीनाम् ... तस्मादन्ये गुणा अन्या च संघटना।-ध्वन्या० (३।६।वृत्तिः)

विस्तृतोऽयं सन्दर्भ आकरग्रन्थ एव द्रष्टव्यः। तथापि सुस्पष्टाऽत्र ध्वनिकारदृष्टिः। संघटना रीतिर्वा न साक्षाद्रसोपकर्त्री। का कथा पुनस्तस्याः काव्यात्मतायाः?

लोचनकारोऽभिनवगुप्तोऽपि रीतिवृत्त्योर्गुणालङ्काख्यतिरिक्ततां नाङ्गीकरोति-तेषाञ्च समुचितचित्तवृत्त्यर्पणे यदन्योऽन्यमेलनक्षमत्वेन पानक इव गुडमरिचादिरसानां संघातरूपताऽऽनयनं दीप्तललितमध्यमवर्णनीयविषयं गौडीयवैदर्भपाञ्चालदेशहेवाकप्राचुर्यदिशा तदेव त्रिविधं रीतिरुक्तम्। जातिर्जातिमतो नाऽन्या, समुदायश्च समुदायिभ्यो नाऽन्य इति वृत्तिरीतयो न गुणालङ्कारव्यतिरिक्ता इति।-लोचनटीका।

आनन्दवर्धनाऽभिनवगुप्तमतेन स्फारीभूतमिदं तथ्यं यद्वर्णरचना-विशेषवती रीतिः कामं स्याद् गुणाभिव्यञ्जिका, परन्तु न भवति कथमपि रसाभिव्यञ्जिका। तद्यथाऽह रसगङ्गाधरकारः-वर्णरचनाविशेषाणां माधुर्यादिगुणाभिव्यञ्जकत्वमेव न रसाभिव्यञ्जकत्वम्। गौरवात् मानाभावाच्च।

अथवा गुणों को शब्दाश्रित ही मान लिया जाय। फिर भी अनुप्रासादि के साथ इनकी तुल्यता नहीं है। क्योंकि अनुप्रासादि तो अनपेक्षित अर्थविस्तार वाले शब्दधर्म ही हैं। यदि गुणों को भी शब्दधर्मी ही मान लिया जाता है तो फिर कुछ ऐसी बात होगी कि जैसे अन्य अर्थात् आत्माश्रयी शौर्यादि (गुणों) को शरीराश्रयी मान लिया गया (और यह कथमपि उचित एवं संगत नहीं है) अतएव माधुर्यादिगुण कुछ और ही हैं तथा संघटना भी कुछ और ही है (अर्थात् दोनो एक नहीं है)-ध्वन्या० ३।६ की वृत्ति।

यह विस्तृत सन्दर्भ मूलग्रंथ में ही देखना चाहिये। फिर भी ध्वनिकार की

दृष्टि इस सन्दर्भ में सुस्पष्ट है। पदसंघटना अथवा रीति साक्षाद् रसोपकर्त्री नहीं है। उसकी काव्यात्मता की तो बात ही क्या?

लोचनकार अभिनवगुप्त भी रीति एवं वृत्ति का (क्रमशः) गुण एवं अलंकार से पार्थक्य अंगीकार नहीं करते-समुचित चित्तवृत्ति के अर्पण में उनका जो एक दूसरे के साथ मिल जाने की क्षमता के कारण, पानक रस के समान गुड-मरिचादि रसों का संविलय-स्वरूप में आ जाना है तथा गौड, वैदर्भ तथा पाञ्चाल क्षेत्रों में प्रयोग -प्राचुर्य की दृष्टि से उनकी जो दीप्त, ललित एवं मध्यमकोटिक वर्णनीय-विषयता है-उसी को त्रिविध रीति कहा गया है। (जैसे) जाति जातिमान् से पृथक् नहीं, समुदाय समुदाय में रहने वालों से पृथक् नहीं, ठीक उसी प्रकार वृत्तियाँ तथा रीतियाँ भी अलंकारों एवं गुणों से पृथक् नहीं-लोचनटीका।

आनन्दवर्धन एवं अभिनवगुप्त के मन्तव्यों से यह तथ्य सुस्पष्ट हो जाता है कि विशिष्ट पदरचना वाली रीति भले ही गुणों की अभिव्यंजिका हो, परन्तु वह रसों की अभिव्यञ्जिका कथमपि नहीं बन सकती। जैसा कि रसगंगाधरकार पण्डितराज जगन्नाथ ने कहा-

विशिष्टकोटिक वर्ण-रचनाओं का माधुर्यादि गुणों का अभिव्यञ्जकत्व ही हो सकता है, रसों का अभिव्यञ्जकत्व (कथमपि) नहीं। क्यों? गौरव के कारण और मानाभाव के कारण (गौरव का तात्पर्य यह कि यह कार्य अर्थात् रसाभिव्यञ्जन रीति की सामर्थ्य से बाहर की बात है)।

वस्तुतोऽलङ्कारं रीतिं वक्रोक्तिमौचित्यं प्रति तद्वैलक्षण्यप्रख्यापका एव तावदाश्वस्ता न दृश्यन्ते। सर्वेऽपि तत्सर्वातिशयितविषये सन्दिहाना एव तन्महत्त्वं प्रतिपादयन्ति। न ते ध्वनिकार इव सुस्पष्टवक्तारो न वा नीर-क्षीरविवेकिनः। व्यङ्ग्यार्थमात्रं काव्यात्मानं मन्यमान आनन्दवर्धनो गुणालङ्काररीतिवृत्तिप्रभृतीनि रसेतरतत्त्वानि युक्तिपुरस्सरं सुस्पष्टञ्च काव्य-शरीरमेव स्वीकरोति। अस्वीकरोति च तेषामेकतमस्याप्यात्मत्वम्। तद्यथा-अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमादिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्(ध्वन्या० १।१३ वृत्तिः) इति।

तस्मान्न ध्वनेरन्यत्रान्तर्भावः। इतश्च नान्तर्भावः। यतो काव्यविशेषोऽङ्गी ध्वनिरिति कथितः। तस्य पुनरङ्गानि-अलङ्कारा गुणा वृत्तयश्चेति प्रतिपादयिष्यन्ते। न चावयव एव पृथग्भूतोऽवयवीति प्रसिद्धः। अपृथग्भावे तु तदङ्गत्वं तस्य। न तु तत्त्वमेव। यत्रापि वा तत्त्वं तत्रापि ध्वनेर्महाविषयत्वान्न तन्निष्ठत्वमेव(ध्वन्या० १.१६ वृत्तिः) इति।

लोचनकारस्तु स्पष्टतरशब्दैस्सदृष्टान्तमलङ्कारध्वन्योर्महदन्तरं प्रतिपादयति। तद्यथा-न केवलमन्योन्यविरुद्धवाच्यवाचकभावव्यङ्ग्यव्यञ्जकभावसमाश्रयत्वात्। न तादात्म्यमलङ्काराणां ध्वनेश्च यावत्स्वामिभृत्यवदङ्गिरूपाङ्गरूपयोर्विरोधादित्यर्थः (लोचनम् १।१६)

वस्तुतः अलंकार, रीति, वक्रोक्ति तथा औचित्य (की महामहिमशालिता) के प्रति उनकी विलक्षणता का प्रख्यापन करने वाले आचार्यगण ही (क्रमशः दण्डी, वामन, कुन्तक तथा क्षेमेन्द्र) आश्वस्त नहीं दीखते। सबके सब उन-उन तत्त्वों की **सर्वातिशयिता** के विषय में, सन्देह करते हुए से, उनका महत्त्व प्रतिपादित करते हैं। **मानो इस भाव से कि मेरा मन्तव्य मान लिया जाय तो अच्छा है, न भी माना जाय तो हमें कोई कष्ट नहीं।**

वे लोग ध्वनिकार आनन्दवर्धन की तरह स्पष्ट वक्ता नहीं हैं और नहीं **'दूध का दूध और पानी का पानी'** करने वाले व्यक्ति हैं। व्यङ्ग्यार्थ मात्र को काव्य की आत्मा मानने वाले आनन्दवर्धन गुण, अलंकार, रीति एवं वृत्ति आदि रसेतर काव्य-तत्त्वों को तर्कसंगत रीति से स्पष्टतः काव्य का 'शरीर' ही स्वीकार करते हैं और उनमें से किसी एक की भी काव्यात्मता को अस्वीकार कर देते हैं। उन्हीं के शब्दों में-पृथग्भूत अवयव ही तो अवयवी नहीं मान्य होता है! यदि अवयव तथा अवयवी में (पूर्णतः) पृथग्भाव नहीं है अर्थात् दोनों परस्पर सम्पृक्त हैं तो फिर अवयव अवयवी के अंग ही तो हुए न कि अवयवी ही! और जहाँ भी वे 'तत्त्व' रूप में (अवयवी के ही रूप में) दीखते हैं वहाँ भी ध्वनि की **महाविषयता** (विस्तृततर क्षेत्र) के कारण वे तन्निष्ठ (ध्वनि के ही बराबर व्यापक, विस्तृत) नहीं होते (ध्वन्या० १-१६ की वृत्ति)।

लोचनकार तो और अधिक स्पष्ट शब्दों में, दृष्टान्तमुखेन, अलंकार एवं ध्वनि का महान् अन्तर निरूपित करते हैं। उन्हीं के शब्दों में-

(अलंकार एवं ध्वनि में अन्तर मात्र इसलिये नहीं है कि) अलंकार वाच्य-वाचकभाव-समाश्रित होते हैं तथा ध्वनि व्यङ्ग्य-व्यञ्जकभाव-समाश्रित। और ये दोनो भाव एक-दूसरे के विरुद्ध हैं। ध्वनि से अलंकारों का तादात्म्य इस दृष्टि से भी संभव नहीं कि **स्वामी** और **भृत्य** की भाँति अंगीरूप ध्वनि तथा अंगरूप अलंकारों में मौलिक विरोध है (लोचन १।१६)।

अभाववादिनां वाचोयुक्तिमाविलयन् ध्वनिकारो भूयोऽप्यभिधत्ते-तदप्यसमीचीनम्। यतो वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः? वाच्यवाचकचारुत्वहेतवो

हि तस्याङ्गभूताः न तु तदेकरूपा एवेति प्रतिपादयिष्यमाणत्वात्। परिकर-श्लोकश्चात्र-

व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।
वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः।।-ध्वन्या० १।१३ वृत्तिः।

काव्यात्मत्वसमीक्षायामानन्दाभिनवादयः।
युक्तिभिर्निष्ठया चापि दृश्यन्तेऽचलबुद्धयः।।७।।

व्यङ्ग्यार्थविषये द्वैधं न तेषां दृश्यते क्वचित्।
तेऽभिराजमतेनैव व्यङ्ग्यार्थाद्वैतवादिनः।।८।।

समकालं मार्गद्वयगामिनोऽवलोक्यन्ते केचिदलङ्कारशास्त्रिणः। न ते विकल्पमेकं स्वीकुर्वन्ति यदलङ्कारतत्त्वं केवलं काव्यात्मैव, यद्वा काव्यशरीरमेव। वस्तुतस्तेऽलङ्कारस्योभयविधतामुपदिशन्ति। कथमिदं संभवेत्? यच्छरीरं तदेव तत्त्वमात्माऽपि स्यात् ? नेदं लोकसिद्धं न चाप्यनुभवसिद्धम्। एवंवादिभिराचार्यैः शास्त्रेऽनवस्थोत्पाद्यते। मर्यादा-पुरुषोत्तमराम इवाऽचार्यैरपि द्विरभिभाषकैर्न भवितव्यम्। अन्यथा सहृदयपाठकाः सन्दिहाना अश्रद्धालवश्च भविष्यन्ति काव्यशास्त्रे।

सर्वेऽप्यलङ्कारवादिन आचार्यास्तमात्मानं परिकल्पयन्तोऽपि शरीरधर्ममेव मन्यन्ते। काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवः पुनरलङ्कारा इति वामनः। तद्यथाऽह वामनः-काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः। करणव्युत्पत्त्या पुनः शब्दोऽयमुपमादिषु वर्तत इति।

सैषा सर्वैव वक्रोक्तिरितिवादिनो भामहादेव सम्प्रेरितस्सन् कुन्तको वक्रोक्तिमेव लोकोत्तरचमत्कारकारिवैचित्र्यसाधिकां प्रतिपिपादयिषुर्यद्यपि साहसं विदधे तथापि वक्रोक्तेः पारम्परिकं रूढस्वरूपमसौ सम्यक्तया जानात्येव-

अभाववादी आचार्यों की वाचोयुक्ति का उत्तर देते हुए ध्वनिकार पुनः कहते हैं-वह भी उचित नहीं है। क्योंकि वाच्य-वाचकमात्र का आश्रय लेने वाले प्रस्थान में व्यङ्ग्य-व्यञ्जकभाव के माध्यम से व्यवस्थित ध्वनि का अन्तर्भाव कैसे हो सकता है? वाच्य (अर्थ) तथा वाचक (शब्द) की चारुता के हेतु तो उस (ध्वनि) के अंगभूत होते हैं, न कि उस ध्वनि से एकरूप (तदात्म) ऐसा अभी आगे प्रतिपादित किया जायेगा। इस सम्बन्ध में यह परिकर श्लोक द्रष्टव्य है-

(अर्थ एवं शब्द के बीच) व्यङ्ग्य -व्यञ्जक सम्बन्ध का निबन्धन होने के कारण ध्वनि का अन्तर्भाव भला वाच्य (अर्थ) एवं वाचक (शब्द) के चारुत्व-हेतुओं (गुणालंकारादि) में कैसे संभव है?-ध्वन्या० १।१३ की वृत्ति।

(वस्तुतः) काव्य की आत्मा निश्चित करने के सन्दर्भ में आनन्दवर्धन एवं अभिनवगुप्त आदि अपनी युक्तियों (तर्कों) तथा निष्ठा की दृष्टि से स्थिर-बुद्धि दीखते हैं।।७।।

व्यङ्ग्यार्थ (की काव्यात्मता) के विषय में उनका कहीं भी सन्देह परिलक्षित नहीं होता। अभिराज के मत से ही वे **व्यङ्ग्यार्थाद्वैतवादी** आचार्य सिद्ध होते हैं।।८।।

कुछ अलंकारशास्त्री (आचार्य) एक ही समय में, दो मार्गों पर चलते हुए दृष्टिगोचर होते हैं। वे एक विकल्प नहीं स्वीकार करते कि अलंकार-तत्त्व केवल काव्य की आत्मा है (कथमपि उसका शरीर नहीं) अथवा काव्य का शरीरमात्र है (कथमपि आत्मा नहीं) वस्तुतः वे अलंकार की **उभयविधता** को बताते हैं। यह कैसे संभव है भला? जो शरीर हो वही तत्त्व आत्मा भी हो! यह तो न लोकसिद्ध (तथ्य) है और न ही अनुभवसिद्ध! ऐसा (अर्थात् एक ही वस्तु के विषय में दो तरह की बात) कहने वाले आचार्यों द्वारा (वस्तुतः) शास्त्र में (भी) **अनवस्था** उत्पन्न की जाती है।

मर्यादापुरुषोत्तम राम की तरह आचार्यों को भी **द्विरभिभाषी** नहीं होना चाहिये। अन्यथा सहृदय पाठकगण काव्यशास्त्र (की मान्यताओं) के प्रति सन्दिग्ध एवं अश्रद्धालु होंगे।

सारे के सारे अलंकारवादी आचार्यगण अलंकार को काव्य की आत्मा कल्पित करते हुए भी उसे **शरीरधर्म** ही मानते हैं।

काव्यशोभा के उत्पादक धर्म गुण हैं तथा उस शोभा के अतिशय के हेतु हैं अलंकार, ऐसा आचार्य वामन कहते हैं। **वामन** स्वयमेव कहते हैं-काव्य ग्राह्य होता है अलंकार के कारण और अलंकार कहते हैं सौन्दर्य को। करण की व्युत्पत्ति से (अलंक्रियतेऽनेन इति) यही (अलंकार) शब्द उपमादि के लिये भी प्रयुक्त होता है।

'वही यह वक्रोक्ति सर्वस्वभूत है' ऐसा कहने वाले **भामह** से प्रेरित होकर ही **कुन्तक** ने वक्रोक्ति को ही लोकोत्तर चमत्कारकारी वैचित्र्य की साधिका के रूप में प्रतिपादित करने की भावना से साहस तो प्रदर्शित किया (वक्रोक्ति को

काव्यात्मा मान कर) परन्तु वक्रोक्ति के परम्परा से चले आने वाले रूढ स्वरूप को तो वह भी भलीभाँति जानते ही हैं-

अलङ्कारशब्दः शरीरस्य शोभातिशयकारित्वान्मुख्यतया कटकादिषु वर्तते, तत्कारित्वसामान्यादुपचारादुपमादिषु, तद्वदेव च तत्सदृशेषु गुणादिषु तथैव च तदभिधायिनि ग्रन्थे।-वक्रोक्ति० १।२ वृत्तिः।

अलङ्कारत्वेन प्राक्चर्चितायाः किञ्च, अलङ्कारान्तरानुप्राणकतत्त्वतया भामहेनैव समुपश्लोकिताया वक्रोक्ते : काव्यात्मत्वसिद्धयै कियानपि यत्नो विधीयेत, परन्तु गुणालंकाररीतिवृत्त्यादिरूढस्वरूपपरिचितः को नु बुधस्तत्र श्रद्धत्ते?

यथा दर्शनशास्त्रेषु ब्रह्ममायाऽत्मबुद्धयः।
अहङ्कारमनः पञ्चमहाभूतेन्द्रियादयः।।९।।

सर्वे प्रत्यभिज्ञायन्ते निजाद्रूढस्वरूपतः।
पुनर्लक्षणस्वातन्त्र्यं यथा तेषां न विद्यते।।१०।।

तथैव काव्यशास्त्रेऽपि किञ्च शास्त्रान्तरेऽखिले।
नास्ति सिद्धप्रमेयाणामन्यथा ख्यापनौचिती।।११।।

गुणालङ्काररीतीनां यथाज्ञापितलक्षणम्।
विज्ञायापि मतिं कुर्यात्कस्तत्प्रतननान्तरे।।१२।।

अतश्शतसहस्त्रवाचोयुक्तिभिर्बुद्धिव्यायामैश्चाऽप्यवगमितं रीत्यलङ्कार-वक्रोक्त्यौचित्यादीनां काव्यात्मत्वं न कथमपि बुद्धिसौधगोपुरदेहलीमतिक्रामति। तेषां चिरपरिचितरूढस्वरूपत्वात्। तत्काव्यात्मत्वप्रवक्तारोऽपि 'खड्गलक्षण-न्यायेनैव' स्वसिद्धान्तमवगमयितुं प्रयतन्ते। यद्यपि स्वप्रयासवैयर्थ्यं ते स्वयमपि सम्यक्तया जानन्त्येव। तद्यथाह महामाहेश्वरोऽभिनवगुप्तपादाचार्यः-

यथा हि खड्गलक्षणं करोमीत्युक्त्वा आतानवितानात्मा प्राव्रियमाणः सकलदेहाच्छादकः सुकुमारश्चित्रतन्तुविचितः संवर्तनविवर्तनसहिष्णुरच्छेदकः सुच्छेद्यः उत्कृष्टः खड्ग इति ब्रुवाणः परैः पटः खल्वेवंविधो भवति न खड्ग इत्युक्ततया पर्यनुयुज्यमान एवं ब्रूयात्-

ईदृश एव खड्गो ममाभिमत इति तादृगेवैतत्।
प्रसिद्धं हि लक्ष्यं भवति न कल्पितमिति भावः।।-लोचनम् १।१

शरीर के शोभातिशय को उत्पन्न करने वाला होने के कारण अलंकार शब्द

मुख्यतः कटकादि (बाजूबन्दादि) के अर्थ में प्रयुक्त होता है (परन्तु) शोभा उत्पन्न करने के सामान्य गुणवश उपमादि के लिये भी **अलंकार** शब्द प्रयुक्त होता है और उसी प्रकार, अलंकारों जैसे ही गुणों के (भी) लिये तथा उन (गुणालंकारों) का व्याख्यान करने वाले ग्रंथ के लिये भी।-वक्रोक्ति० १।२ की वृत्ति।

अलंकार के रूप में पहले चर्चित तथा अन्यान्य अलंकारों की अनुप्राणिका, स्वयं भामहाचार्य द्वारा प्रशंसित **वक्रोक्ति** की भी काव्यात्मता सिद्ध करने के लिये कितना ही यत्न किया जाय, परन्तु गुण-अलंकार-रीति एवं वृत्ति आदि के रूढ स्वरूप (परिभाषित स्वरूप) से परिचित कोई भी विद्वान् भला उसकी काव्यात्मता के प्रति श्रद्धालु क्यों होगा?

जैसे दर्शनशास्त्र में ब्रह्म, माया, आत्मा, बुद्धि, अहंकार, मन, पञ्चमहाभूत, पञ्च ज्ञानेन्द्रियाँ आदि ।।९।।

सबके सब अपने रूढ (शास्त्रसम्मत) स्वरूप से पहचाने जाते हैं (फलतः) उनके **पुनर्लक्षण** की स्वतंत्रता (अधिकार) किसी को नहीं होती।।१०।।

उसी तरह **काव्यशास्त्र** में भी अथवा यह कहा जाय कि अन्यान्य समस्त **शास्त्रों** में भी सिद्ध (सर्वात्मना निर्णीत एवं स्वीकृत) प्रमेयों के **अन्यथाख्यापन** (अन्य रूप में व्याख्या या स्थापना) का कोई औचित्य नहीं है।।११।।

गुणों, अलंकारों तथा रीतियों के काव्यशास्त्र-प्रतिष्ठित लक्षणों को जानकर भी भला कौन उनकी नई व्याख्या का समादर करेगा!!१२।।

अतएव रीति, अलंकार, वक्रोक्ति तथा औचित्य का काव्यात्मत्व चाहे सैकड़ों-हजारों वाचिक तर्कों से और बौद्धिक व्यायामों से समझाया जाय लेकिन वह बुद्धि रूपी राजमहल के प्रवेशद्वार की देहरी को पार नहीं कर पाता। । क्यों? रीत्यादि के चिर-परिचित रूढ स्वरूप के कारण!

रीति आदि को काव्यात्मा बताने वाले लोग भी **खड्गलक्षणन्यायेन** ही (अर्थात् जबर्दस्ती) अपना सिद्धान्त समझाना चाहते हैं। यद्यपि अपने प्रयास की व्यर्थता को वे स्वयं भी जानते हैं भलीभाँति! जैसा कि (इस सन्दर्भ में) महामाहेश्वर अभिनवगुप्तपादाचार्य ने कहा है-

जैसे कि 'तलवार का लक्षण बताता हूँ' ऐसा कह कर कोई (सैनिक) विवरण दे-लम्बाई तथा चौड़ाई में फैलने वाला, लपेटा जा सकने वाला, सारे शरीर को ढँकने वाला, अत्यन्त कोमल, रंग-बिरंगे धागों से बुना हुआ, सिमटने तथा फैलने में समर्थ, अच्छेदक (काटने में असमर्थ) तथा सरलता से (स्वयं)

कट जाने वाला उत्कृष्ट खड्ग मुझे चाहिये और ऐसा कहता हुआ औरों द्वारा टोंका जाय-इस प्रकार का तो वस्त्र होता है मेरे भाई! खड्ग नहीं। ऐसा समझाने के बाद भी वह रट लगाये-नहीं, मुझे तो बस ऐसा ही खड्ग चाहिये! आपकी जिद भी कुछ वैसी ही है (कि हम अभिधा के दीर्घ-दीर्घतर व्यापार से ही व्यङ्ग्यार्थ का भी बोध कर लेंगे।)

लक्ष्य तो प्रसिद्ध (अन्तिम रूप से निर्णीत एवं स्वीकृत) होता है, कल्पित नहीं, यह भाव है।-लोचन १।१

॥अथ वक्रोक्तिकाव्यात्मत्वप्रकरणम्॥

काव्यात्मत्वं हि वक्रोक्तेः किन्त्वसौ कुन्तको यथा।
वक्रोक्तिजीविते स्वीये निर्भयं वक्तुमुद्यतः।।१३।।

सोपेक्षं नामभिः प्रोच्याऽलङ्कारञ्च गुणं रसम्।
काव्यात्मानं यथौचित्यं व्यासदासस्स घुष्यति।।१४।।

तद्विलोक्य ध्रुवं चित्ते जायते विस्मयो महान्।
क्व विनयो ध्वनिकर्तुः शास्त्रदर्पः क्व चैतयोः।।१५।।

न चर्चा पूर्वपक्षस्य न चापि तस्य खण्डनम्।
अकुतोभयभावेन स्वमतस्यैव मण्डनम्।।१६।।

शास्त्ररीतिरियं नव्या सम्प्रवृत्ता कुतश्चन।
यया कुन्तकक्षेमेन्द्रौ कुरुतः स्वमतवर्तनम्।।१७।।

कुन्तकात्पूर्वमेवैता रसालङ्काररीतयः।
किञ्च, ध्वनिरपि प्राज्यं सर्वत्र बुधसंसदि।।१८।।

यथा काव्यात्मरूपेण चर्चाविषयताङ्गताः।
ध्रुवं पक्षविपक्षाभ्यां रक्षिता वाऽथ खण्डिताः।।१९।।

कुन्तकेनापि तत्सर्वं निश्चप्रचमसंशयम्।
श्रुतं मतं च बुद्धं स्यात्काव्यशास्त्रविनोदनात्।।२०।।

किन्तु तद्विषये तूष्णीमुपाश्रित्य यथा निजम्।
मतं न्यस्यति साटोपं कुन्तकस्तन्न साम्प्रतम्।।२१।।

व्यङ्ग्यार्थविषये यद्यद्वाचिकं महिमान्वितम्।
प्रस्तौति ध्वनिकारोऽसाविदम्प्रथमतां गतः।।२२।।

तत्तदेवाऽनुवदति कुन्तकोऽपि च केवलम्।
अपसार्य ध्वनिं तावत्स्वीयवक्रोक्तिसंज्ञया।।२३।।

अन्यथा को न जानाति वक्रोक्तिं तां पुरातनीम्।
भामहादप्पयं यावद् भूयोभूयो विवेचिताम्।।२४।।

किन्तु आचार्य-प्रवर कुन्तक अपने **वक्रोक्तिजीवित** में वक्रोक्ति की काव्यात्मता जिस प्रकार निर्भयभाव से कहने को समुद्यत दीखते हैं।।१३।।

और अलंकार, गुण तथा रस की पूर्ण उपेक्षा के साथ नाम्ना उल्लेखमात्र करते हुए, वह **व्यासदास** (आचार्य क्षेमेन्द्र भी) जिस प्रकार **औचित्य** को काव्यात्मा घोषित करते हैं।।१४।।

वह सब देखकर निश्चय ही चित्त में बड़ा विस्मय उत्पन्न होता है कि कहाँ तो ध्वनिकार की विनम्रता और कहाँ इन दोनों आचार्यों का शास्त्रदर्प?१५।।

न (कहीं किसी) पूर्वपक्ष की चर्चा, नही उसका खण्डन। बस, **अकुतोभय** भाव से अपने सिद्धान्त का ही मण्डन!!१६!!

कुन्तक एवं क्षेमेन्द्र जिस शैली में अपने मत का प्रवर्तन करते हैं उससे कोई नई ही शास्त्ररीति जन्म ले रही है (जो पहले संस्कृत आचार्यों में नहीं ही थी) ।।१७।।

कुन्तक से पूर्व ही रस, अलंकार तथा रीति-यहाँ तक कि ध्वनितत्त्व भी विद्वत्समज्या में सर्वत्र, यथेष्ट रूप से **काव्यात्मा के रूप में** जिस प्रकार चर्चा-विषयता को प्राप्त होकर पक्ष (सिद्धान्त) के रूप में स्थिरभाव से रक्षित हुए अथवा विपक्ष बनकर खण्डित हुए।।१८, १९।।

काव्य एवं शास्त्र के अनुशीलन से ही समय बिताने वाले आचार्य कुन्तक ने भी वह सब निस्सन्देह, निश्चित रूप से सुना होगा, माना होगा और समझा होगा।।२०।।

परन्तु उस विषय में (पूर्णतः) चुप्पी साध कर, जिस प्रकार कुन्तक अपना मत बड़े आटोप (ताम-झाम) के साथ रखते हैं (गोया काव्यात्मा के रूप में वक्रोक्ति की प्रतिष्ठा करने वाले वह **प्रथम** आचार्य हैं, इसके पूर्व काव्यात्मा का प्रसंग मानो उठा ही नहीं है) वह समुचित नहीं है।।२१।।

व्यङ्ग्यार्थ के विषय में जो-जो महिमान्वित विवरण **पहली बार** ध्वनिकार आचार्य आनन्दवर्धन प्रस्तुत करते हैं।।२२।।

कुन्तक भी मात्र उसी-उसी को केवल दुहराते भर हैं-मात्र ध्वनि शब्द को हटा कर तथा ध्वनि के स्थान पर वक्रोक्ति शब्द को स्थानापन्न कर।।२३।।

अन्यथा आचार्य भामह से लेकर अप्पय दीक्षित तक भूयोभूयः विवेचित उस पुरातनी वक्रोक्ति को कौन नहीं जानता??२४??

यथा व्याख्याति ध्वनिकारः प्रतीयमानार्थं सर्वथा तथैव कुन्तकोऽपि लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धिहेतुकाऽसामान्याह्लादविधायिविचित्र-भावात्मकमपूर्वकाव्यालङ्कारं वक्रोक्त्याख्यं कमपि विशदयति। नाऽहमुभयत्र पश्यामि किञ्चिदन्तरं सन्दर्भादृते। ध्वन्यर्थविषये स्पष्टमूचे आनन्दवर्धनः-

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।

यत्रार्थो वाच्यविशेषः वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः स काव्य-विशेषो ध्वनिरिति। अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमादिभ्यो-ऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम् इति। (ध्वन्या० १।१३ वृत्तिः)।

आनन्दवर्धनः काव्यात्मभूतं सहृदयश्लाघ्यं तं व्यङ्ग्यार्थमङ्गनासु प्रतीयमानं प्रसिद्धावयवातिरिक्तं लावण्यकल्पमङ्गीकरोति-यथा ह्यङ्गनासु लावण्यं पृथङ् निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव सहृदयलोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थ इति (ध्वन्या० १।४ वृत्तिः)

जैसे ध्वनिकार प्रतीयमानार्थ की व्याख्या करते हैं ठीक उसी प्रकार कुन्तक भी लोकोत्तर चमत्कारकारी वैचित्र्य की सिद्धि का हेतु बनने वाले, असामान्य आह्लाद प्रदान करने वाले, विचित्रभावात्मक वक्रोक्तिनामक किसी अपूर्व काव्यालंकार को व्याख्यात करते हैं।

आचार्य आनन्दवर्धन एवं कुन्तक में मैं केवल सन्दर्भों (क्रमशः ध्वनि तथा वक्रोक्ति) को छोड़कर कोई अन्तर नहीं देखता। ध्वन्यर्थ के विषय में आनन्दवर्धन ने साफ कहा-

जहाँ अर्थ अथवा शब्द क्रमशः स्वयं को अथवा (अपने) अर्थ को गौण बनाकर (परस्पर समवेत होकर) उस प्रतीयमानार्थ को अभिव्यक्त करते हैं वह काव्य-विशेष सूरियों (आचार्यों) द्वारा ध्वनि कहा गया है।

जहाँ पर अर्थ अर्थात् वाच्यविशेष अथवा शब्द अर्थात् वाचकविशेष उस प्रतीयमानार्थ को समन्वित भाव से प्रकाशित करते हैं वह काव्यविशेष ध्वनि है।

ऐसा कहने से वाच्य-वाचक के चारुत्वहेतुओं उपमादि (अर्थालंकारों) तथा अनुप्रासादि (शब्दालंकारों) से विभक्त (पृथक्) ही है ध्वनि का क्षेत्र, यह दिखा दिया गया। ध्वन्या० १।१३ की वृत्ति ।

आनन्दवर्धन काव्यात्मभूत सहृदयश्लाध्य उस व्यङ्ग्यार्थ को रमणियों में विद्यमान हस्त-पादादि प्रसिद्ध शरीर-अंगों से व्यतिरिक्त प्रतीत होने वाले लावण्य के समान मानते हैं-जैसे अंगनाओं में विद्यमान लावण्य (शरीर के अंगों से) पृथक् परिलक्षित होता हुआ, शरीर के समस्त अवयवों से अलग-थलग कुछ और (विलक्षण) ही सहृदयों के नेत्रों के लिये अमृत-स्वरूप तत्त्वान्तर प्रतीत होता है उसी प्रकार वह व्यङ्ग्यार्थ! -ध्वन्या० १।४ की वृत्ति।

विविधविशिष्टवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य स एवार्थः सारभूत इत्यप्यानन्दवर्धनः। महतां कवीनां निःस्यन्दमाना सरस्वती अलोक-सामान्यं परिस्फुरन्तं प्रतिभाविशेषं तं व्यङ्ग्यार्थमभिव्यनक्ति। सोऽर्थः शब्दार्थ-शासनज्ञानमात्रेणैव न वेद्यते। वस्तुतो व्यङ्ग्यार्थोऽसौ केवलं काव्यार्थतत्त्वज्ञैरेव वेद्यते। तद्यथाऽह स्वयं ध्वनिकारः-यदि च वाच्यरूप एवासावर्थः स्यात्तद्वाच्य-वाचकस्वरूपपरिज्ञानादेव तत्प्रतीतिः स्यात्। अथ च वाच्यवाचकलक्षणमात्र-कृतश्रमाणां काव्यतत्त्वार्थभावनाविमुखानां स्वरश्रुत्यादिलक्षणमिव प्रगीतानां गान्धर्वलक्षणविदामगोचर एवासावर्थः।-ध्वन्या० १।७ वृत्तिः।

ध्वनिकृन्मतेन न सर्वोऽपि शब्दो न चापि सर्वोऽप्यर्थो व्यञ्जको भवति। अतएव तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ। यतो हि 'व्यङ्ग्यव्यञ्जकाभ्यामेव हि सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनाम्, न वाच्यवाचकरचनामात्रेण।' यथाऽह स्वयमेवाऽनन्दवर्धनः-

सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः।।

एवं हि विविधरूपेण प्रतीयमानार्थमहितस्वरूपं विवृणोत्यानन्दवर्धनः। वक्तोक्तिजीवितकारोऽपि प्रायेण तयैव पद्धत्या तैरेव शब्दैः काव्यात्मभूतं तं वक्रोक्तिसमुल्लसितमर्थमवगमयति। कुन्तकोऽपि विशिष्टमेव शब्दार्थसाहित्यं षड्विधवक्रताविलसितं काव्यमार्गे परमार्थभूतमङ्गीकरोति। तद्यथा-

वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः।।

शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः।।

विविध एवं विशिष्ट वाच्य (अर्थ) एवं वाचक (शब्द) के रचनाविस्तार से रमणीय काव्य का वह व्यङ्ग्यार्थ ही आत्मा होता है, यह भी कहते हैं आनन्दवर्धन! महाकवियों की निस्यन्दमाना सरस्वती, परिस्फुरित होने वाले अलोक-सामान्य प्रतिभा-रसायनभूत उस प्रतीयमान अर्थ को अभिव्यक्त करती है। वह व्यङ्ग्यअर्थ शब्द (व्याकरण) एवं अर्थ (कोष) के शासन के ही ज्ञानमात्र से समझ में नहीं आता है। वस्तुतः वह व्यङ्ग्यार्थ तो काव्यार्थ (चित्तविश्रान्ति देने वाले काव्याभिप्राय) के तत्त्वज्ञों (सहृदयों) द्वारा ही समझा जाता है।

जैसा कि ध्वनिकार ने स्वयं कहा है-यदि (साधारण) वाच्यस्वरूप ही होता वह (व्यङ्ग्य) अर्थ तो फिर उन-उन (विविध सन्दर्भ के) शब्दों एवं अर्थों के स्वरूप-परिज्ञानमात्र से ही उसकी प्रतीति हो जाती । परन्तु वाच्य (अर्थ) एवं वाचक (शब्द) के लक्षण मात्र में श्रम करने वाले (परन्तु) काव्य-तत्त्वार्थ की भावना से विमुख लोगों को वह व्यङ्ग्यार्थ ठीक उसी प्रकार पल्ले नहीं पड़ता जैसे गान्धर्व लक्षण मात्र जानने वाले गायकों को स्वर-श्रुति आदि का लक्षण! -ध्वन्य० १।७ की वृत्ति।

ध्वनिकार के मत से न सारे के सारे शब्द और न ही सारे के सारे अर्थ व्यञ्जक होते हैं। अतएव उन्हीं शब्दों एवं अर्थों की पहचान (प्रत्यभिज्ञान) **महाकवि** को होनी चाहिये (जो व्यंजक हों) क्योंकि सम्यक् रूप से प्रयुक्त व्यङ्ग्य अर्थों तथा व्यञ्जक शब्दों से ही महाकवियों को **महाकवित्व** (पद) का लाभ होता है, न कि वाच्य-वाचक की रचना मात्र से.।

जैसा कि स्वयं कहते हैं आनन्दवर्धन-वह (व्यङ्ग्य) अर्थ तथा उस अर्थ की अभिव्यक्ति के सामर्थ्य वाला कोई एक विरला (व्यञ्जक) शब्द! ऐसे ही उन शब्दार्थों की पहचान महाकवि को करनी चाहिये।

इस प्रकार, विविध रूप से आनन्दवर्धनाचार्य प्रतीयमानार्थ के मंजुल स्वरूप की व्याख्या करते हैं। **वक्रोक्तिजीवितकार** भी प्रायः उसी पद्धति से (और आश्चर्य कि) **उन्हीं शब्दों द्वारा** काव्यात्मभूत उस (स्वाभीष्ट) वक्रोक्ति-समुल्लसित अर्थ को समझाते हैं।

कुन्तक भी विशिष्टकोटिक ही, छह प्रकार की वक्रता सेविलसित शब्दार्थ - साहित्य को काव्य के क्षेत्र में **परमार्थभूत** (आत्मस्वरूप) स्वीकार करते हैं। जैसे कि,

वाच्य अर्थ तथा वाचक शब्द यद्यपि प्रसिद्ध (प्रख्यात, सर्वज्ञात) हैं तथापि इस काव्यमार्ग में (जिसकी मैं प्रतिष्ठा कर रहा हूँ) इन दोनो का यह परमार्थ (प्राणतत्त्व) है।

(काव्य में) अन्यान्य शब्दों के रहते हुए भी ऐसे किसी (विशिष्ट) शब्द की उपस्थिति होनी चाहिये जो विवक्षित (आकांक्षित) अर्थ का एकमात्र वाचक हो। और अर्थ भी ऐसा होना चाहिये जो सहृदयों का आह्लादकारी हो तथा अपने स्पन्दमात्र (स्वरूपमात्र) से सुन्दर हो।

यद्यपि कौन्तिकी व्याख्येयं ध्वनिकृद्व्यङ्ग्यार्थव्याख्यासहोदर्येव प्रतीयते। तथाप्युभयोरयं विशेषो यदानन्दवर्धनः केवलं व्यञ्जकव्यङ्ग्य-शब्दार्थसाहित्यमेव सहृदयश्लाध्यमङ्गीकरोति, कुन्तकस्तावद् वाच-कवाच्यसाहित्यमेव वक्रताढ्यं काव्यपरमार्थभूतं मन्यते। वस्तुतोऽयमेव व्यङ्ग्यार्थविरोधोऽपि तस्य वक्तुं शक्यते। तद्यथा-

यो वाचकः स शब्दः यो वाच्यश्चाभिधेयः सोऽर्थ इति। ननु च द्योतक-व्यञ्जकावपि शब्दौ सम्भवतः। तदसंग्रहान्नाव्याप्तिः। यस्मादर्थप्रतीतिकारित्व-सामान्यादुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्व-सामान्यादुपचाराद्वाच्यत्वमेव। तस्माद्वाचकत्वं वाच्यत्वं च शब्दार्थयोर्लोके सुप्रसिद्धं यद्यपि लक्षणं तथाप्यस्मिन् अलौकिके काव्यमार्गे कविकर्मवर्त्मनि अयमेतयोर्वक्ष्यमाणलक्षणः परमार्थः किमप्यपूर्वं तत्त्वमित्यर्थः।-वक्रोक्ति० १।८ वृत्तिः

हन्त, आचार्यकुन्तकोऽपि विवरणमिदं महामाहेश्वराभिनवगुप्त-पादोपदिष्ट-खड्गलक्षणन्यायेनैव प्रस्तौति। अन्यथा व्यञ्जकशब्दं व्यङ्ग्यमर्थञ्च वाचक-वाच्यसाधारणावेव मन्वानोऽसौ सर्वाभिमतकाव्य-शास्त्रप्रस्थानविरोध्येव प्रतीयते। किञ्च, वाच्यार्थलक्ष्यार्थव्यङ्ग्यार्थाश्चेति त्रयोऽप्यर्था अभिधालक्षणाव्यञ्जना-वृत्तिभिर्नियन्त्रिताः। वाचको वाचक एव साक्षात्सङ्केतितार्थाभिधायकत्वात्। लक्षको लक्षक एव उपचरितार्थोप-लक्षकत्वात्। व्यञ्जकश्च शब्दः व्यञ्जक एव गूढाभिप्रायाभिव्यञ्जकत्वात्।

यद्यपि आचार्य कुन्तक की यह व्याख्या ध्वनिकार की व्यङ्ग्यार्थ-व्याख्या की सहोदरी ही प्रतीत होती है। फिर भी दोनों में यही अन्तर है कि आनन्दवर्धन केवल व्यञ्जक-व्यङ्ग्य शब्दार्थ-साहित्य को ही सहृदयश्लाघ्य अंगीकार करते हैं जबकि कुन्तक वक्रता से ओत-प्रोत वाचक-वाच्य साहित्य

को ही काव्य का परमार्थभूत मानते हैं (व्यङ्ग्यार्थ का नाम नहीं लेते)।

वस्तुतः इसी को कुन्तक का व्यङ्ग्यार्थ -विरोध भी कहा जा सकता है। जैसा कि (कुन्तक स्वयं कहते हैं)-जो वाचक है वह शब्द है और जो वाच्य है, अभिधेय है वह अर्थ है। हाँ, यह बात तो है कि द्योतक (लक्षक) एवं व्यञ्जक शब्द भी होने संभव हैं। (परन्तु) उन दोनों को ग्रहण न करने से (कोई) अव्याप्ति नहीं है। क्योंकि अर्थ की प्रतीति कराने के सामान्य उपचार (कर्तव्य) वश वे भी वाचक ही हैं। इस प्रकार द्योत्य (लक्ष्य) तथा व्यङ्ग्य अर्थों के प्रत्येयत्वरूप (ज्ञेयत्वरूप) सामान्य उपचारवश उनका भी वाच्यत्व ही हुआ।

इसलिये, यद्यपि शब्द का वाचकत्व तथा अर्थ का वाच्यत्व ही लोक में सुप्रसिद्ध लक्षण है फिर भी इस अलौकिक काव्यमार्ग में, कविकर्म-वर्त्म में यह परमार्थ है जिसका लक्षण आगे बताया जायेगा। यह कोई अपूर्व तत्त्व है, यह अभिप्राय है। वक्रोक्ति १।८ की वृत्ति।

आश्चर्य है कि आचार्य कुन्तक भी यह विवरण महामाहेश्वर अभिनवगुप्तपादाचार्य द्वारा उपदिष्ट खड्गलक्षणन्याय से ही प्रस्तुत कर रहे हैं।

अन्यथा व्यञ्जक शब्द तथा व्यङ्ग्य अर्थ को वाचक शब्द एवं वाच्य अर्थ से अभिन्न मानते हुए वह सर्वाभिमत काव्यशास्त्रीय प्रस्थान के विरोधी ही प्रतीत होते हैं। और फिर, वाच्यार्थ-लक्ष्यार्थ एवं व्यङ्ग्यार्थ -ये तीनो ही अर्थ (क्रमशः) अभिधा, लक्षणा एवं व्यञ्जना शक्तियों से नियंत्रित हैं। वाचक शब्द वाचक ही है साक्षात्संकेतित अर्थ का अभिधायक होने के कारण। लक्षक शब्द लक्षक ही है उपचरित अर्थ का उपलक्षक होने के कारण। और व्यञ्जक शब्द व्यञ्जक ही है गूढाभिप्राय का प्रकाशक होने के कारण।

काममर्थप्रतीतिकारित्वं शब्दधर्मः। परन्तु प्रत्येकं शब्दस्यार्थ-प्रतीतिकारित्वं मिथो भिन्नम्। वाचकस्सङ्केतितमेवार्थं बोधयति। लक्षकोऽपि वाच्यसम्बद्धमेवार्थं प्रस्तौति। परन्तु व्यञ्जकश्शब्दो यमर्थं प्रकाशयति स भवति सर्वथा वाच्यवाचकविलक्षण एव। तत्कथं तयोर्वाचकव्यञ्ज-कयोरैक्यमुपचारादपि साधयितुं शक्यम्? एवं हि सुप्रतिष्ठितशास्त्र-सिद्धान्तावमाननेनाऽनवस्था जायेत। किञ्च, शास्त्रचिन्तनेऽपि व्यभिचारः प्रवर्तेत।

निर्बन्धोऽयं कुन्तकस्य। वस्तुत आनन्दवर्धनाभिमतं प्रतीयमानार्थमेवासौ पौनः पुन्येन परमार्थ इत्यनुवदति। तद्विषयकं सर्वमपि तदीयं व्याख्यानं शब्दान्तरितं व्यङ्ग्यार्थव्याख्यानमेव ध्वनिकारस्येत्यभिराजः।

यच्चोदितं कुन्तकेन-सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग्वाचकतां न प्रतिपद्यत इति तत्पूर्वोक्तस्ववचनविरोध एव। यद्येवं तर्हि द्योतकव्यञ्जकौ वाचकावेवेति कथम् ?

किञ्च, वर्णविन्यास-पदपूर्वार्ध-प्रत्यय-वाक्य-प्रकरण-प्रबन्ध-वक्रताबलेन यं परमार्थं कल्पते वक्रोक्तिजीवितकारो नाऽसौ व्यङ्ग्यार्थात् कथमपि भिन्नो विलक्षणो वा। तत्र सहृदया एव प्रमाणम्। परिहीयतेऽत्रायं सन्दर्भः।

माना कि शब्द का धर्म है अर्थ की प्रतीति कराने की क्षमतावाला होना। परन्तु प्रत्येक शब्द की अर्थ-प्रतीति कराने की क्षमता एक-दूसरे से भिन्न होती है। वाचक शब्द संकेतित अर्थ का ही बोध कराता है। लक्षक शब्द भी वाच्यार्थ से सम्बद्ध (न कि सर्वथा स्वतंत्र) ही अर्थ को प्रस्तुत करता है (जैसे गंगा की बजाय गंगातटे का अर्थ देना) परन्तु व्यञ्जक शब्द जिस (विलक्षण) अर्थ को प्रकाशित करता है वह तो वाच्य-वाचक से सर्वथा विलक्षण ही होता है। तो फिर वाचक एवं व्यञ्जक शब्दों का ऐक्य, उपचार से ही सही, भला कैसे सिद्ध किया जा सकता है?

इस प्रकार, सुप्रतिष्ठित शास्त्रसिद्धान्तों की अवमानना से अनवस्था पैदा होगी। क्योंकि शास्त्रचिन्तन में भी व्यभिचार प्रवृत्त हो जायेगा।

यह हठ है कुन्तक का! वस्तुतः आनन्दवर्धनाभिमत प्रतीयमानार्थ को ही वह पौनःपुन्येन (अपने काव्य के) परमार्थ रूप में दुहराते हैं।

उस विषय से सम्बद्ध उनका सारा का सारा व्याख्यान ध्वनिकार आनन्दवर्धन का परिवर्तित शब्दों वाला व्यङ्ग्यार्थ का व्याख्यान मात्र है, ऐसा मन्तव्य है अभिराज का।

और जो कुन्तक ने यह कहा कि जो अर्थ सामान्य रूप से बताया जाना अभीष्ट है उसका विशेषार्थ बताने वाला शब्द सम्यक् रूप से उसकी वाचकता को नहीं प्राप्त करता है। यह भी उनका पूर्वोक्त स्ववचन-विरोध ही हुआ। यदि (सचमुच) ऐसा है तो फिर द्योतक एवं व्यञ्जक शब्द वाचक ही होते हैं-यह कैसे मान लिया?

पुनश्च, वर्णविन्यास, पदपूर्वार्ध, प्रत्यय, वाक्य, प्रकरण तथा प्रबन्ध की वक्रता के बल पर वक्रोक्तिजीवितकार जिस परमार्थ (व्यङ्ग्यार्थ?) की कल्पना करते हैं वह व्यङ्ग्यार्थ से किसी भी प्रकार न भिन्न है अथवा नही विलक्षण!

इस सन्दर्भ में सहृदय ही प्रमाण हैं। यह सन्दर्भ (अब) यहीं छोड़ा जा रहा है।

।।अथौचित्यकाव्यात्मत्वप्रकरणम्।।

क्षेमेन्द्रोऽपि यथैवाऽसौ नवप्रस्थानकातरः।
औचित्यविषयां पूर्वचर्चां स्पृशति नो मनाक्।।२५।।

का कथा ध्वनिकारस्य महामाहेश्वरं पुनः।
स्वसाहित्यगुरुञ्चापि नासौ स्मरत्यभिनवम्।।२६।।

येन स्पष्टमिदं प्रोक्तं यदौचित्यमिदं रसात्।
अन्यत्किमपि नैवास्ति तत्त्वं प्रतननास्पदम्।।२७।।

मन्ये नाऽभिमतं जातं क्षेमेन्द्रस्य मतं ततः।
कस्याप्येकतमस्यापि परवर्तिविपश्चितः।।२८।।

एवं काव्यात्मसिद्धान्तौ कुन्तकक्षेमवर्तितौ।
निश्चप्रचं प्रतीयेते समुत्पन्नदिवङ्गतौ।।२९।।

ध्वन्यध्वनि विराजन्ते येऽपि सत्साहितीगुणाः।
ते न सन्त्येव वक्रोक्तावौचित्येऽप्यथवा पुनः।।३०।।

वस्तुतः पूर्ववर्तिकाव्यात्मसम्प्रदायाऽनङ्गीकरणहेतवो यथोपलभ्यन्ते ध्वन्यालोकेऽथ च ध्वन्यध्वनीनानामन्येषां परवर्तिटीकाकृतामाचार्याणां वा ग्रन्थेषु न तथा कुन्तकक्षेमेन्द्रग्रन्थयोः। किञ्च, नैतयोः कोऽपि समर्थक एव यस्समादध्यात् समुत्थितविप्रतिपत्तीः। तस्मादेवोच्यते समुत्पन्नदिवङ्गताविति। महार्घोऽपि सौधोऽसंरक्षितो विनश्यत्येव।

नया काव्यात्म-प्रस्थान स्थापित करने के लिये जैसे कातर (उद्विग्न) दीखते हैं वह आचार्य क्षेमेन्द्र भी, औचित्य-विषयक पूर्व चर्चाओं का ज़रा भी संस्पर्श नहीं करते।।२५।।

ध्वनिकार की क्या बात कही जाय (मान लिया वह तो पूर्वाचार्य थे) परन्तु क्षेमेन्द्र तो अपने साहित्यशास्त्रोपाध्याय महामाहेश्वर अभिनव तक का स्मरण नहीं करते।।२६।।

जिन्होंने कि स्पष्टतः यह कहा कि यह औचित्य-तत्त्व रसतत्त्व से पृथक् और कुछ भी व्याख्यानयोग्य वस्तु नहीं है।।२७।।

संभवतः इसीलिये आचार्य क्षेमेन्द्र का काव्यात्म-विषयक औचित्यमत किसी एक भी परवर्ती आचार्य को स्वीकार्य नहीं हो पाया, ऐसा मैं मानता हूँ।।२८।।

इस प्रकार, कुन्तक एवं क्षेमेन्द्र द्वारा प्रवर्तित काव्यात्म-सिद्धान्त निश्चित रूप से (अब) **समुत्पन्न-दिवंगत** (पैदा होकर मर गये) ही प्रतीत होते हैं।।२९।।

(वस्तुतः) ध्वनि-सम्प्रदाय में सत्साहिती के जो गुण विद्यमान हैं वे न वक्रोक्ति में हैं और नहीं औचित्य में।।३०।।

सच तो यह है कि पूर्ववर्ती काव्यात्म-सम्प्रदायों (रस, अलंकार तथा रीति) को स्वीकार न करने के जैसे कारण (मूलग्रंथ) ध्वन्यालोक में उपलब्ध होते हैं अथवा ध्वनिपक्षधर अन्यान्य परवर्ती टीकाकारों अथवा आचार्यों के ग्रंथों में मिलते हैं, वैसे कुन्तक एवं क्षेमेन्द्र के ग्रंथों में नहीं (कि वे रस, अलंकार, रीति तथा ध्वनि को काव्यात्मा क्यों नहीं मान रहे!)

पुनश्च, इन दोनों का कोई ऐसा (समसामयिक अथवा परवर्ती) समर्थक भी नहीं जो वक्रोक्ति एवं औचित्य (को काव्यात्मा मानने) के विरुद्ध उठी विप्रतिप्रतियों का समाधान कर सका हो। इसीलिये कहा जा रहा है कि ये दोनो सिद्धान्त पैदा भी हुए और कालकवलित भी हो गये। महल कितना ही आलीशान क्यों न हो, संरक्षण के अभाव में धराशायी तो हो ही जाता है।

औचित्यमपि तावत्पूर्वपरिचितं सूरिव्याख्यातं काव्यतत्त्वम्। तस्यापि सुविदितान्तस्तत्त्वस्य विषयस्य विलक्षणीकरणप्रयासो मुधैव प्रतीयते।

आनन्दवर्धनात्प्रागपि तदिदमौचित्यतत्त्वं विमृष्टमासीदाचार्यैः। भामहदण्ड्युद्भटादयो दोषव्याजेनौचित्यं समुपदिशन्ति। परन्तु ध्वनिकारस्तु विविधैः सन्दर्भैरौचित्यस्य माहात्म्यं सश्रद्धमाख्याति। तद्यथा-

अनौचित्यादृते नाऽन्यद्रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।।

वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादिविषयेणैतन्मुख्यं कर्म महाकवेः।।

रसाद्यनुगुणत्वेन व्यवहारोऽथ शब्दयोः।
औचित्यवान्यस्ता एता वृत्तयो द्विविधाः स्मृताः।।

-ध्वन्या० तृतीयोद्योतः।

औचित्य भी तो पूर्वपरिचित तथा आचार्यों द्वारा व्याख्यात काव्यतत्त्व है। उस (जाने-बूझे) औचित्य का भी - एक ऐसा विषय जिसका रहस्य समुद्भिन्न हो चुका है, विलक्षण काव्यतत्त्व सिद्ध करने का प्रयास निरर्थक ही प्रतीत होता है।

आनन्दवर्धन से पूर्व भी यह औचित्यतत्त्व आचार्यों द्वारा समीक्षित किया

जा चुका था। भामह, दण्डी तथा उद्भट आदि, दोष के बहाने, औचित्य की चर्चा करते हैं। परन्तु ध्वनिकार तो विविध सन्दर्भों द्वारा, औचित्य का माहात्म्य, बड़ी श्रद्धा के साथ प्रतिपादित करते हैं। उन्हीं के शब्दों में-

अनौचित्य के अतिरिक्त रसभंग का और कोई कारण नहीं होता है। औचित्य का उपनिबन्धन ही रस का प्राणतत्त्व है।

रसादि (अर्थात् भाव, भावसन्धि, भावोदय, भावशबलता एवं भावप्रशमादि) को विषय (लक्ष्य) बनाकर वाच्य अर्थों तथा वाचक शब्दों की जो औचित्य-दृष्ट्या योजना होती है, वही महाकवि का मुख्य कर्म है।

रसादि की अनुकूलता को दृष्टि में रखकर, शब्द एवं अर्थ का जहाँ औचित्य की दृष्टि से व्यवहार किया जाता है, वे ये वृत्तियाँ दो प्रकार की बताई गई हैं।-ध्वन्या० तृतीयोद्योत।

निखिलेऽपि तृतीयोद्योते ध्वनिकारो विविधदृशौचित्यमाहात्म्यमेव प्रतिपादयति। तन्मतसारांशोऽत्र प्रस्तूयते-

विविधाः काममैतिह्ये कथाः सन्तु रसाञ्चिताः।
विभावाद्यौचितीयुक्तं तथाप्यंशं ततो हरेत्।।३१।।

स्वेच्छापि चेत्कवेः काचिद् भवेद्रसविरोधिनी।
सा न योज्येतिहासार्थैः कथामार्गव्यतिक्रमात्।।३२।।

अत्राऽनूदितम्मया ध्वनिकारस्यैव वचनम्। अस्मिन् सन्दर्भे स्वयमेवाऽऽनन्दवर्धनः कथयति-कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्। तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत्तां भङ्क्त्वापि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत्। नहि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित्प्रयोजनम्। इतिहासादेव तत्सिद्धेः।-ध्वन्या० ३।१४ वृत्तिः।

लोचनकारोऽप्यत्र ग्रन्थकृदाशयं विवृण्वन् भणति-विभावाद्यौचित्येन हि विना का रसवत्ता कवेरिति। तस्माद्विभावाद्यौचित्यमेव रसवत्ताप्रयोजकं नान्यदिति भावः।

अन्यत्राऽप्यसौ स्वमतं प्रकटयति-तथा हि अचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति, अलङ्कार्यस्याभावात्। यतिशरीरं कटकादियुक्तं हास्यावहं भवति, अलङ्कार्यस्यानौचित्यात्। इति।

अन्यत्र भूयोऽप्याह-औचित्यनिबन्धनं रसभावादि मुक्त्वा नाऽन्यत् किञ्चिदस्ति इति तदेवान्तर्भाति मुख्यं जीवितमित्यभ्युपगन्तव्यम्। इति।

ध्वन्यालोक के सम्पूर्ण तीसरे उद्योत में ध्वनिकार ने विविध दृष्टियों से औचित्य का प्रतिपादन किया है। उस प्रकरण का सारांश यहाँ प्रस्तुत किया जा रहा है-

इतिहास में भले ही नाना प्रकार की रसाञ्चित कथायें विद्यमान हों तथापि (उनमें से) विभावादि के औचित्य से युक्त अंश का ही आहरण करना चाहिये।।३१।।

कवि की अपनी कोई वैयक्तिक इच्छा भी यदि रसविरोधिनी हो तो कथामार्ग के व्यतिक्रम को दृष्टि में रखते हुए, उसे इतिहासार्थ के साथ संवलित नहीं करना चाहिये।।३२।।

यहाँ मैने ध्वनिकार आनन्दवर्धन के ही वचनों को अनूदित किया है (अपने शब्दों में लिखा है) इस सन्दर्भ में आनन्दवर्धन स्वयं कहते हैं कि प्रबन्ध का उपनिबन्धन करने वाले कवि के द्वारा, हर प्रकार से, रस के अधीन ही होना चाहिये। यदि प्रबन्ध-रचना में कवि रस के प्रतिकूलस्थिति देखें, तो उसको अपवर्जित करके भी, पूर्ण स्वतंत्रता के साथ रसानुकूल किसी अन्यविध कथान्तर को कल्पित कर लें। केवल इतिवृत्त मात्र का निर्वाह ही कवि का कोई प्रयोजन नहीं है। उसकी सिद्धि तो इतिहास से ही हो जाती है। ध्वन्या० ३।१४ की वृत्ति।

इस सन्दर्भ में **लोचनकार** भी ग्रंथकार के अभिप्राय की व्याख्या करते हुए कहते हैं कि विभावादि के औचित्य के विना भला कवि की रसवत्ता कहाँ? इसलिये विभावादि का औचित्य ही रसवत्ता का प्रयोजक है, कोई और नहीं।

एक अन्य स्थान पर भी आचार्य अभिनव अपना मत प्रकाशित करते हैं-जैसे कि चैतन्य-विहीन शव (मुर्दे) का शरीर कुण्डलादि से अलंकृत होते हुए भी शोभित नहीं होता है, अलंकार्य के **अभाववश**। यति (संन्यासी) का शरीर केयूरादि से अलंकृत होने पर भी हास्यावह होता है, अलंकार्य के **अनौचित्य** के कारण!

अन्यत्र, वह एक बार पुनः कहते हैं-औचित्य का निबन्धन रस तथा भाव आदि के अतिरिक्त और कुछ भी नहीं है। **अतः वह (औचित्य) उसी (रस) में अन्तर्लीन होता है मुख्य जीवित बन कर-ऐसा समझना चाहिये।**

आनन्दवर्धनाऽभिनवगुप्ताभ्यामेतावता विस्तरेण सारवच्छब्दसमुदायेन च व्याख्याते सत्यप्यौचित्यतत्त्वे क्षेमेन्द्रस्तस्य काव्यात्मतां साधयितुमुपक्रमत इत्यहो साहसमाचार्यवर्यस्य! एवं प्रतीयते यदसौ स्वसाहित्यगुरोरभिनवगुप्तपादाचार्यस्याचार्यानन्दवर्धनेऽतितरां श्रद्दधानस्यापि मन्तव्यं न सुष्ठु वेद यो हि सुस्पष्टमूचे-औचित्यनिबन्धनं रसभावादि मुक्त्वा नान्यत् किञ्चिदस्तीति।

महता शब्दाडम्बरेणासौ स्वमतं पुरस्कुरुते-

उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते।।

अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।।

वस्तुत औचित्यं नाम काव्ये रसास्तित्वप्रतिभूः। यत्र यत्रौचित्यं तत्र तत्र रसः, यत्र पुननौंचित्यं तत्र न रस इत्यन्वयव्यतिरेकाभ्यामुभयोरविनाभावः सिध्यति। औचित्यं न तावत्स्वतन्त्रतत्त्वं किमपि रसालङ्कारादिवत्। अतएव न कथमपि समुत्तिष्ठति तस्य काव्यात्मतायाः प्रश्नः। तदयमत्र निखिलसन्दर्भसंक्षेपः।

नालङ्कारो न वा रीतिर्वक्रोक्तिरथवौचिती।
नूनं शब्दार्थधर्मत्वात्काव्यात्मत्वं समश्नुति।।३३।।

रूढमेषां स्वरूपं हि व्याख्यातं पूर्वसूरिभिः।
सुज्ञातञ्च सचेतोभिर्नान्यथाऽऽख्यातुमिष्यते।।३४।।

अन्यथाऽपि समाख्यातं हृदयेषु सचेतसाम्।
श्रद्धामपि परां स्रष्टुं शक्नुते न कथञ्चन।।३५।।

रीत्यलङ्कारयोः काव्यात्मत्वं ध्वनिकृता स्वयम्।
यद्यपि खण्डितं स्वैरं महामहिमशालिना।।३६।।

आनन्दवर्धन तथा अभिनवगुप्त द्वारा इतने विस्तार तथा सारगर्भित शब्दावली द्वारा औचित्य तत्त्व के व्याख्यात किये जाने के बावजूद भी क्षेमेन्द्र उसकी काव्यात्मता सिद्ध करने का प्रयास कर रहे हैं, हन्त! यह आचार्यप्रवर का साहस ही है! ऐसा प्रतीत होता है कि आचार्य आनन्दवर्धन के प्रति अत्यन्त श्रद्धा रखने वाले अपने साहित्यगुरु अभिनवगुप्तपादाचार्य के मन्तव्य को भी वह भलीभाँति नहीं समझ पाये जिन्होंने कि स्पष्ट शब्दों में कहा था-रस तथा भावादि को छोड़ औचित्य-निबन्धन और कोई वस्तु नहीं है।

शब्दों के विशाल आडम्बर के साथ क्षेमेन्द्र अपना मत प्रस्तुत करते हैं-

जो वस्तु जिस (दूसरी) वस्तु के समान है, उसे आचार्यों ने (उसके) उचित कहा है। और उचित का जो भाव है उसी को औचित्य कहा जाता है।

अलंकार तो अलंकार ही हैं। गुण भी सदा गुण ही होते हैं (अतः ये काव्य की आत्मा नहीं) रससिद्ध काव्य की शाश्वत आत्मा तो (बस) औचित्य ही है।

वस्तुतः औचित्य, काव्य में रस के अस्तित्व का साक्षी है। जहाँ-जहाँ औचित्य होता है वहाँ-वहाँ रस होता है, और जहाँ-जहाँ औचित्य नहीं होता है वहाँ-वहाँ रस (भी) नहीं होता है। इस प्रकार अन्वय-व्यतिरेक की व्याप्तिवश दोनों में अविनाभाव सिद्ध होता है। (इस प्रकार) औचित्य रस एवं अलंकारादि के समान कोई स्वतंत्र तत्त्व नहीं है। इसलिये उसकी काव्यात्मता का तो प्रश्न ही नहीं उठता। तो फिर यह रहा समूचे सन्दर्भ का संक्षेप-

न अलंकार, न ही रीति, वक्रोक्ति अथवा औचित्य काव्य की आत्मा सिद्ध होते हैं (क्यों?) निश्चित रूप से (स्थूल) शब्द एवं अर्थ के धर्म होने के कारण।।३३।।

क्योंकि इन सभी का स्वरूप पूर्वाचार्यों द्वारा (बहुशः) व्याख्यात (अतएव) रूढ है। सहृदयों ने उन्हें भलीभाँति समझ भी रखा है अतः उनकी व्याख्या शास्त्रेतर रीति से नहीं की जा सकती ।।३४।।

थोड़ी देर के लिये यदि (काव्यात्मता के पक्ष में) उनकी किसी दूसरे प्रकार की व्याख्या कर भी दी जाय तो सहृदयों के हृदयों में वह (व्याख्या) उत्कृष्टकोटिक श्रद्धा का कथमपि संचार नहीं कर सकेगी।।३५।।

रीति तथा अलंकार की काव्यात्मता का खण्डन तो महामहिमशाली ध्वनिकार ने यद्यपि स्वयमेव यथेष्ट रीति से कर दिया है।।३६।।

किन्तु तत्र न विद्वेषो नेर्ष्या नापि दुराग्रहः।
न च सारस्वती स्पर्धा न वा पण्डितमानिता।।३७।।

सादरं सार्जवञ्चैव सम्प्रस्तूय यथायथम्।
पूर्वपक्षमसौ सूरिरनिगूह्य सविस्तरम्।।३८।।

पुरस्करोति सिद्धान्तपक्षं विनयवर्त्मना।
काऽत्र देयोपपत्तिर्भोः प्रमाणं कोविदाःस्वयम्।।३९।।

न कुतर्कं न वा युक्तिं पूर्वसूर्यसमर्थिताम्।
नाऽप्यशास्त्रां स्वमन्तव्यसाधिकां कामपि प्रमाम्।।४०।।

आनन्दवर्धनाचार्यः स्वीयसिद्धान्तपुष्टये।
उपन्यस्यति धौरेयो विदुषां निर्वृतात्मनाम्।।४१।।

ध्वनेः काव्यात्मता तस्मात्स्वीकृता परवर्तिभिः।
काव्यशास्त्ररहस्यज्ञैः प्रख्योपाख्याविचक्षणैः।।४२।।

अभाववादिनां तर्काः प्रतितर्कैः समाहिताः।
यथा हि ध्वनिकारेण पिहितञ्च तदाननम्।।४३।।

नैयून्यञ्च यथा भक्तेः सम्प्रदर्श्य यथोचितम्।
ध्वनेर्महाविषयत्वं साधितं तेन सूरिणा।४४।।

प्रकाशमेव तत्सर्वं न किलाऽकाशभाषितम्।
स्वगतं नियतश्राव्यं नापि हन्ताऽपवारितम्।।४५।।

परन्तु उस खण्डन में उनका (किसी के प्रति) न तो विद्वेषभाव है, न ईर्ष्या है, न दुराग्रह (हठधर्मिता) है, न सारस्वती प्रतिस्पर्धा है और न ही मात्र स्वयं को महापण्डित मानने का भाव।।३७।।

प्रभूत आदर एवं सौजन्य के साथ ही साथ विद्वच्छिरोमणि आनन्दवर्धन, विना किसी लगाव-छिपाव के, पूर्वपक्षियों के मतों को यथार्थरूप में सविस्तर प्रस्तुत करते हैं।।३८।।

तथा (अत्यन्त) विनम्रतापूर्वक सिद्धान्तपक्ष को उपन्यस्त करते हैं। अब, इस सन्दर्भ में हाथ कंगन को आरसी क्या? विद्वज्जन स्वयं प्रमाण हैं।।३९।।

शास्त्रप्रतिभा से आनन्दित चित्तवृत्ति वाले विद्वानों के अग्रगण्य आचार्य आनन्दवर्धन अपने सिद्धान्त (ध्वनिकाव्यात्मवाद) की पुष्टि के लिये न तो कोई कुतर्क प्रस्तुत करते हैं, न पूर्वाचार्यों द्वारा अ-समर्थित कोई युक्ति देते हैं और नही अपने मन्तव्य (मात्र) को सिद्ध करने वाली (परन्तु मूलतः) अशास्त्रीय कोई प्रमा!!४०, ४१।।

इसीलिये काव्यशास्त्र के मर्मज्ञ, प्रख्या-उपाख्याविचक्षण परवर्ती आचार्यों ने (आनन्दवर्धन द्वारा समुपदिष्ट) ध्वनि की काव्यात्मता को अंगीकार किया।।४२।।

ध्वनिकार ने जिस प्रकार अभाववादी आचार्यों के तर्कों का अपने प्रतितर्कों से समाधान किया तथा उनका मुँह बन्द कर दिया।।४३।।

अथवा जैसे भाक्तवाद (लक्षणा में ध्वनि के अन्तर्भाव) की कमियों को यथोचित मात्रा में सम्यक्तया प्रदर्शित कर आचार्यप्रवर ने ध्वनि की (लक्षणापेक्षया) महाविषयता सिद्ध की।।४४।।

वह सब कुछ सर्वजन-समक्ष विद्यमान है। न वह अकाशभाषित है, न स्वगत (मन में गोपित) न ही नियतश्राव्य (जनान्तिक) और न ही अपवारित।।४५।।

स्पष्टम्। यथाऽह ध्वनिकार एव-अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमादिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्। यदप्युक्तम्-प्रसिद्धप्रस्थानातिक्रमिणो मार्गस्य काव्यत्वहानेर्ध्वनिर्नास्ति इति तदप्ययुक्तम्। यतो लक्षणकृतामेव स केवलं न प्रसिद्धः लक्ष्ये तु परीक्ष्यमाणे स एव सहृदयहृदयाह्लादकारि काव्यतत्त्वम्। ततोऽन्यच्चित्रमेवेत्यग्रे दर्शयिष्यामि। यदप्युक्तम्-कामनीयकमनतिवर्तमानस्य तस्योक्तालंकारादिप्रकारेष्वन्तर्भाव इति तदप्यसमीचीनम्। यतो वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्य-व्यञ्जक-समाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः? वाच्यवाचक-चारुत्वहेतवो हि तस्याङ्गभूता, न तु तदेकरूपा एवेति प्रतिपिपादयिष्य-माणत्वात्।

भक्तिविषयेऽपि कथयति ध्वनिकारः-

भक्त्या बिभर्त्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया।।

वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।
व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्।।

तस्मादन्यो ध्वनिरन्या च गुणवृत्तिः। अव्याप्तिरस्य लक्षणस्य। नहि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षणः अन्ये च बहवः प्रकारा भक्त्या व्याप्यन्ते। तस्माद् भक्तिरलक्षणम् इति।

बात स्पष्ट है। जैसा कि ध्वनिकार ने ही कहा है-मेरे इस व्याख्यान से, वाच्य (अर्थ) एवं वाचक (शब्द) के चारुत्व का हेतु बनने वाले उपमादि से तथा अनुप्रासादि (अलंकार) से ध्वनि का क्षेत्र सर्वथा पृथक् ही है-ऐसा प्रदर्शित किया गया। जो यह कहा गया (कुछेक लोगों द्वारा) कि पहले से चले आ रहे प्रस्थानों का अतिक्रम करने वाले मार्ग को स्वीकारने से काव्यत्व की हानि होगी, इसलिये (प्रस्थान-विरोधी) ध्वनि स्वीकरणीय नहीं है, तो यह भी अनुचित है। क्योंकि मात्र लक्षणकार आचार्यों में वह ध्वनि प्रसिद्ध (भले) नहीं है परन्तु लक्ष्यग्रंथों (रामायण, महाभारतादि) की परीक्षा करने पर तो वह ध्वनि ही सहृदयों के हृदयों को आह्लादित करने वाला काव्यतत्त्व सिद्ध होती है। उससे विरहित तो बस चित्रकाव्य ही बचता है, ऐसा आगे प्रदर्शित करूँगा।

और जो यह कहा कि यदि ध्वनि कामनीयक का अतिक्रमण नहीं करने वाला कोई तत्त्व है तो फिर उसका अन्तर्भाव (तथाविध) अलंकारादि में ही हो जायेगा,

यह भी उचित नहीं हैं। क्योंकि वाच्य और वाचक मात्र के समाश्रयी प्रस्थान में व्यङ्ग्य-व्यञ्जक के समाश्रय से व्यवस्थित ध्वनितत्त्व का भला अन्तर्भाव कैसे हो सकता है? वाच्य और वाचक के चारुत्व के हेतु तो उस ध्वनि के अंगभूत हुए, नकि उसके साथ एक रूप ही-ऐसा अभी आगे निरूपित किया जायेगा।

भक्ति के विषय में भी ध्वनिकार कहते हैं-

रूप का भेद होने के कारण यह ध्वनि भक्ति (लक्षणा) से एकरूप सिद्ध नहीं होती है। अतिव्याप्ति अथवा अव्याप्ति दोष के कारण वह लक्षणा द्वारा लक्षित नहीं हो पाती।

जो गुणवृत्ति (भक्ति या लक्षणा) वाचकत्व-मात्र के आश्रय से (शाब्दी लक्षणा में) व्यवस्थित होती है वह भला व्यञ्जकत्वमूलक ध्वनि का लक्षण कैसे हो सकती है?

इसलिये पृथक् है ध्वनि और (उससे भी) पृथक् है गुणवृत्ति (यदि गुणवृत्ति को ही ध्वनि मान लिया जाय तो) यह लक्षण अव्याप्ति दोष से दूषित होगा। ध्वनि का ही एक विशिष्ट भेद 'विवक्षितान्यपरवाच्य' तथा और भी अनेक ध्वनि के भेद भक्ति से व्याप्त नहीं होते। इसलिये भक्ति ध्वनि का लक्षण नहीं बन सकती।

॥अथ ध्वनेःकाव्यात्मत्वप्रकरणम्॥

एवं काव्यात्मसिद्धान्तान् सर्वानपि यथामति।
सादरञ्च समालोच्य प्रकृतं प्रतिपाद्यते।।४६।।

स चास्ति ध्वनिसिद्धान्तो वय्याकरणसम्मितः।
आनन्दवर्धनाचार्यैर्भूयश्चापि प्रतिष्ठितः।।४७।।

कामं कालक्रमेणाऽयं तुरीयस्थानमर्हति।
रसालङ्काररीतीनामान्तर्यमुपागतः।।४८।।

तथापि ध्वनिसिद्धान्तः सर्वतत्त्वसमन्वितः।
सर्वमान्यः स्थिरश्चेति कृत्वा पश्चात्समीक्ष्यते।।४९।।

ध्वनेः काव्यात्मतासिद्धौ न कस्याप्यवमानना।
यतः पूर्वे परे सर्वे सिद्धान्ता अत्र सङ्गताः।।५०।।

यो हि प्रतीयमानार्थः काव्यात्मत्वेन घोषितः।
आनन्देन ध्वनिनामा व्यङ्ग्यार्थाऽपरसंज्ञितः।।५१।।

अलङ्काररसौ तस्माद् ध्वनेर्भिन्नौ न तिष्ठतः।
औचित्यञ्च रसाद्भिन्नं नैव सिध्यति किञ्चन।।५२।।

कौन्तिकी चापि वक्रोक्तिश्चेद् विचित्रैव साऽभिधा।
व्यङ्ग्यार्थात्साऽपि नो भिन्ना प्रमाणमत्र सूरयः।।५३।।

वाच्यार्थात्सर्वथा भिन्ना भङ्गीभणितिमेदुरा।
षड्विधा यदि वक्रोक्तिः कुन्तकस्य विलक्षणा।।५४।।

ध्वनिस्सैव न तद्भिन्ना वक्रोक्तेश्चाप्यसौ परः।
तत्स्वरूपमथ स्फीतं यथाशास्त्रं निरूप्यते।।५५।।

इस प्रकार, समस्त (ध्वनीतर) काव्यात्म सिद्धान्तों को यथामति तथा आदरपूर्वक समालोचित करने के बाद (अब) मूल विषय पर आता हूँ।।४६।।

वह है वय्याकरणों द्वारासमर्थित ध्वनि (के काव्यात्मा होने का) सिद्धान्त जिसे (चिरकालानन्तर) आनन्दवर्धनाचार्य ने पुनः प्रतिष्ठित किया।।४७।।

भले ही कालक्रमानुसार यह सिद्धान्त रस, अलंकार तथा रीति के (काव्यात्मवाद के) अनन्तर चौथे स्थान पर आता है।।४८।।

तथापि उस ध्वनिसिद्धान्त की समीक्षा सबसे अन्त में इस उद्देश्य से की जा रही है कि वह सर्वतत्त्व-समन्वित, सर्वमान्य तथा स्थिर है।।४९।।

ध्वनि को काव्यात्मा अंगीकार करने में किसी की भी अवमानना नहीं है क्योंकि पूर्ववर्ती तथा परवर्ती सभी (काव्य) सिद्धान्त इसमें समञ्जस हैं।।५०।।

आनन्दवर्धन द्वारा जो **प्रतीयमानार्थ** काव्यात्मा के रूप में घोषित किया गया है, जिसकी दूसरी संज्ञा व्यङ्ग्यार्थ है और जिसे ध्वनि (भी) कहते हैं।।५१।।

रस और अलंकार उस ध्वनि से पृथक् नहीं रहते। दूसरी ओर औचित्य भी रस से भिन्न कोई इतर तत्त्व नहीं सिद्ध होता ।।५२।।

और यदि कुन्तकाभिमत वह वक्रोक्ति भी विलक्षणतायुक्त अभिधामात्र ही है तो वह भी व्यङ्ग्यार्थ से भिन्न नहीं ही है। इस सन्दर्भ में प्रमाण हैं विद्वज्जन।।५३।।

भंगी-भणिति से ओत-प्रोत तथा वाच्यार्थ से सर्वथा भिन्न आचार्य कुन्तक की षड्विधा वक्रोक्ति भी यदि (कोई) विलक्षण ही तत्त्व है।।५४।।

तो फिर वह ध्वनि ही है, उससे भिन्न (और कुछ भी) नहीं। वह ध्वनि (तो) वक्रोक्ति से भी अधिक श्रेष्ठ है। अब उसी का साफ-सुथरा स्वरूप शास्त्रानुसार निरूपित किया जा रहा है।।५५।।

यथाशास्त्रं निरूप्यते। नाऽत्र कश्चिन्ममाग्रहः। यथाऽऽनन्दवर्धनपूर्ववर्तिभिर्भामहदण्डिवामनोद्भटादिभिः परवर्तिभिश्चाप्यभिनवमम्मटरुय्यकविश्वनाथ-पण्डितराजादिभिर्निरूपितं तथैव निरूप्यते। किञ्च, यथाऽस्मदुपाध्यायैः साहित्यव्याकरणाम्भोधिभूतैश्श्रीमच्चण्डिकाप्रसादशुक्लपादैरध्यापितं तथा निरूप्यते।

अतीव प्राक्तनी ध्वनिपरम्परा। यथाऽह स्वयमेव ध्वनिकारः-यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितस्तथापि गुणवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्टोऽपि न लक्षित इति परिकल्प्यैवमुक्तम्-भाक्तमाहुस्तमन्ये।-ध्वन्या० १।१ वृत्तिः।

यथा वा सुस्पष्टमुक्तं रसगङ्गाधरकारेण-ध्वनिकारात्प्राचीनैर्भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यङ्ग्यादिशब्दा न प्रयुक्ता इत्येतावतैव तैर्ध्वन्यादयो न स्वीक्रियन्ते इत्याधुनिकानां वाचोयुक्तिरयुक्तैव। यतः समासोक्तिव्याजस्तुत्यप्रस्तुतप्रशंसाद्यलङ्कारनिरूपणेन कियन्तोऽपि गुणीभूत-व्यङ्ग्यभेदास्तैरपि निरूपिताः। अपरतश्च, सर्वोऽपि ध्वनिप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः। न ह्यनुभवसिद्धोऽर्थो बालेनाप्यपनिह्नोतुं शक्यते। ध्वन्यादिशब्दैः परं व्यवहारो न कृतः। न ह्येतावताऽनङ्गीकारो भवति इति।

शास्त्र (ध्वन्यालोक) के अनुसार ही निरूपित किया जा रहा है। इस निरूपण में मेरा कोई (अपना) आग्रह नहीं है। जैसे आनन्दवर्धन के पूर्ववर्तियों-भामह, दण्डी, वामन तथा उद्भटादि द्वारा तथा परवर्तियों-अभिनवगुप्त, मम्मट, रुय्यक, विश्वनाथ, पण्डितराज जगन्नाथ आदि द्वारा भी निरूपित किया गया है, ठीक उसी प्रकार निरूपित किया जा रहा है।

पुनश्च, जैसा साहित्य एवं व्याकरणज्ञान के सागरभूत मेरे साहित्यशास्त्रोपाध्याय पूज्यचरण चण्डिकाप्रसाद शुक्ल जी द्वारा अध्यापित किया गया, उस प्रकार निरूपित किया जा रहा है।

ध्वनि की परम्परा अत्यन्त प्राचीन है। जैसा कि स्वयं ध्वनिकार ने कहा-यद्यपि काव्यलक्षणकार आचार्यों ने गुणवृत्ति (लक्षणा) अथवा अन्य किसी काव्यभेद को ध्वनि शब्द के माध्यम से प्रकाशित नहीं किया है तथापि लक्षणा शक्ति द्वारा काव्यों में उसका प्रयोग प्रदर्शित करते हुए उन लोगों द्वारा ध्वनि का मार्ग अंशतः व्यवहृत करते हुए भी (साक्षात् ध्वनि के रूप में) नाम्ना लक्षित नहीं किया गया-

ऐसी परिकल्पना करके ही हमने यह कहा है कि अन्यान्य आचार्यों ने उस ध्वनि को भाक्त अर्थ (लक्ष्यार्थ) बताया है। ध्वन्या० १।१ की वृत्ति।

अथवा, जैसा कि **रसगंगाधरकार** ने सुस्पष्ट कह दिया है-ध्वनिकार (अनन्दवर्धन) से प्राचीन आचार्य भामह एवं उद्भट आदि द्वारा अपने ग्रंथों में कहीं भी (यद्यपि) ध्वनि, गुणीभूतव्यङ्ग्यादि शब्द नहीं प्रयुक्त किये गये हैं, बस इतने से ही-**इन आचार्यों द्वारा ध्वनि आदि (काव्यतत्त्व) स्वीकार नहीं किये गये हैं**-आधुनिकों द्वारा यह वाचोयुक्ति (तर्क) प्रस्तुत करना अनुचित ही है। क्योंकि समासोक्ति, व्याजस्तुति, अप्रस्तुतप्रशंसा आदि अलंकारों के निरूपण में (तो) कितने ही गुणीभूतव्यङ्ग्य (काव्य) के भेद उनके द्वारा भी निरूपित किये गये हैं। दूसरी ओर, सारा का सारा ध्वनिप्रपञ्च **पर्यायोक्त** (अलंकार) की कुक्षि में निक्षिप्त कर दिया गया है। अनुभव-सिद्ध अर्थ तो बच्चे द्वारा भी छिपाया नहीं जा सकता। यह अवश्य है कि ध्वनि शब्द द्वारा (उन आचार्यों ने) व्यवहार नहीं किया है (परन्तु) इतने से ही (उन आचार्यों द्वारा) **ध्वनि का अनंगीकार** (निषेध) नहीं माना जा सकता।

अथ काव्यात्ममीमांसाक्रमे प्रश्नोऽयमादिमः।
शब्दार्थमयकाव्यस्य यदात्मा को नु सम्भवेत्।।५६।।

आत्मापि स्यात्सजातीय इति वादो विपश्चिताम्।
जलात्मा जलजातीयो दृषदात्मा दृषन्मयः।।५७।।

धराजातीय एवात्मा धराया इति निश्चितम्।
नाग्नेरम्भोमयश्चात्मा भवितुं शक्नुयादिह।।५८।।

काव्यात्माऽपि तथैवाऽयं काव्यजातीय एव हि।
यदि कश्चिद्भवेन्नूनं तदा न्यायोचितं भवेत्।।५९।।

शब्दार्थसाहितीकाव्यं यद्यपीह सुनिश्चितम्।
परमार्थस्तथाऽप्यत्र प्रेक्षावद्भिर्निरूप्यताम्।।६०।।

काव्यप्रयुक्तशब्दानां केवलं पठनेन चेत्।
जायेत चित्तविश्रान्तिश्शब्दानां तर्हि काव्यता।।६१।।

किन्तु नैवं भवत्येव शब्दैश्चित्तं न रञ्ज्यते।
केवलं जायते तैस्तु श्रुतिरन्ध्रानुरञ्जनम्।।६२।।

काव्यप्रयुक्तशब्दानामप्यर्थावगमादृते।
क्व नु सा चित्तविश्रान्तिः काव्यानन्दोऽप्यसौ कुतः।।६३।।

तस्मात्काव्यार्थ एवासौ जायते परमार्थतः।
काव्यं तद्विग्रहो वापि प्रमाणं रसिकाः स्वयम्।।६४।।

अब, काव्य की आत्मा का विचार-विमर्श करने के क्रम में पहला प्रश्न यह उठता है कि शब्द और अर्थ की समष्टिभूत काव्य की आत्मा कौन हो सकता है??५६??

आत्मतत्त्व भी (शरीर) सजातीय ही होना चाहिये, ऐसा विपश्चितों का मन्तव्य है। जल की आत्मा (भी) जलजातीय होनी चाहिये। पाषाण की आत्मा (भी) पाषाणकोटिक (ही) होनी चाहिये।।५७।।

पृथ्वी की आत्मा पृथ्वीजातीय ही होनी चाहिये, यह सुनिश्चित है। इस संसार में अग्नि की जलमय आत्मा होनी संभव नहीं है।।५८।।

ठीक उसी प्रकार यह काव्य की आत्मा भी काव्यजातीय ही कोई वस्तु हो तो निश्चित रूप से यही न्यायोचित होगा।।५९।।

यद्यपि साहित्यशास्त्र में यह निर्णीत तथ्य है कि शब्द एवं अर्थ की समष्टि ही काव्य है, फिर भी इसका परमार्थ विद्वज्जनों द्वारा निरूपित किया जाना चाहिये।।६०।।

यदि अकेले काव्य में प्रयुक्त किये गये शब्दों के पढ़ने से चित्त की विश्रान्ति (उत्कण्ठोपशम) हो जाय तो (केवल) शब्दों की काव्यता मान ली जाय।।६१।।

परन्तु ऐसा नहीं ही होता है। मात्र शब्दों (के पाठ) से चित्त अनुरंजित नहीं होता। शब्दों के पारायण मात्र से तो केवल श्रुतिकुहरों (कर्णरन्ध्रों) का अनुरंजन हो पाता है।।६२।।

काव्य में प्रयुक्त किये गये शब्दों का अर्थबोध हुए विना वह चित्त की विश्रान्ति भला कहाँ? और वह काव्यानन्द भी कहाँ? ६३।।

इसलिये काव्यप्रयुक्त शब्दों का वह अर्थ (अर्थात् काव्यार्थ) ही परमार्थतः काव्य होता है अथवा काव्य का विग्रह (स्वरूप) होता है। सहृदयजन स्वयं इस सचाई के प्रमाण हैं।।६४।।

ननु शब्दार्थौ सहितावेव काव्यम्। नाऽत्र काऽपि संशीतिः। न केवलं शब्दो न चाप्यर्थः काव्यमितरेतरवियोगाऽसहिष्णुत्वात्। तथापि व्यवहारदृष्ट्या शब्दप्रकटितार्थ एव काव्यम्। काव्यप्रयुक्तशब्दानामभिप्रायेऽवगत एव जायते काव्यानन्दः। अतएवाऽर्थसम्पदेव काव्यमित्यभिराजः। तद्यथा-

ददददोऽदुदैदाददेऽदद-
द्युददुदिद्दादद्दद्दोद्दौ।
दुरुदरोदरे रैददाऽदरा-
द्दुददरिद्रदुद्दारदेऽद्दौ।।

पण्डितगोपीकृष्णव्यासप्रणीतजयमल्लकाव्यादुद्धृतोऽयं श्लोकः कामं श्रुतिशष्कुलीसौख्यं जनयेद् दकारावृत्तिवशात्। परन्तु यावदेषां शब्दानामर्थो नाऽवगम्यते क्व तावत्काव्यानन्दः?

यथा वाऽस्मद्दीक्षागुरूणां भार्गवराघवीयकारणां चित्रकूटस्थतुलसी-पीठाधीश्वराणां श्रीरामभद्राचार्यपादानां श्लोकद्वय मिदम्।

कः कौ के केककेकाकः काककाकां-ककः ककः।
काकः काकः ककः काकः कुकाकः ककक: कुकः।।

लोलालाली लला-लोल-लीला लालालला लल।
लेले लेलललालील लाल-लौलील लालल।।

-सर्गः २० श्लोकौ ९२, ९४

उभयत्राप्यर्थावगमाद्दते श्रवणजन्यश्रुतिशष्कुलीसौख्यमात्रम्!

यच्चाचार्यकुन्तकेनोक्तम्-शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषाञ्चिन्मतं कविकौशलकल्पितकमनीयताऽतिशयः शब्द एव केवलं काव्यमिति, केषाञ्चिद्वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति, पक्षद्वयमपि निरस्तं भवति। तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते न पुनरेकस्मिन्निति तत्र कस्य वा विप्रतिपत्तिः? तथाऽप्यर्थ एव विशेषेण काव्यमिति ममाग्रहः।

पदार्थोऽथ च वाक्यार्थः काव्यार्थश्च तृतीयकः।
नूनमेते त्रयोऽप्यर्था विदुषां प्राणवल्लभाः।।५७।।

निश्चित रूप से परस्पर सम्पृक्त शब्द एवं अर्थ ही काव्य हैं। इसमें कोई संशय नहीं है। न ही अकेला शब्द और नही अकेला अर्थ काव्य होता है-एक दूसरे का वियोग (अभाव) न सह पाने के कारण। फिर भी, व्यवहार की दृष्टि से-शब्दों द्वारा प्रकट किया गया अर्थ ही काव्य होता है। काव्य में प्रयुक्त शब्दों का अभिप्राय समझ में आने के बाद ही काव्यानुशीलन का आनन्द प्राप्त होता है।

अतएव अर्थसम्पत् ही काव्य है, यह अभिराज का मत है।

उदाहरणार्थ–जो व्यक्ति दान देता हुआ धनोपभोग करता है वह उदय को प्राप्त करता है। परन्तु जो अददत् अर्थात् न देते हुए मात्र संग्रह करता जाता है वह दोषी बनता है। जो औरों से कुछ लेता नहा, मात्र अपना देता ही है वह स्वर्गसुख प्राप्त करता है। जो 'दुरुदरे' अर्थात् द्यूतक्रीडा में रैदत् अर्थात् धन का अपव्यय करता है वह पापविद्ध होता है तथा अपने धन को व्यर्थ ही गँवाता है। ऐसा अज्ञान–ग्रस्त प्राणी आत्मस्वरूप से पृथक् होकर नाना जीवयोनियों में प्रक्षिप्त होता रहता है।

पण्डित गोपीकृष्ण व्यास (जन्म ८ अगस्त १९२० ई०, पोखरण, जैसलमेर, राजस्थान) प्रणीत जयमल्लकाव्यकीर्तिलता से उद्धृत यह श्लोक भले ही (पढ़ते समय) कर्णकुहरों में श्रुतिसौख्य पैदा करे दकार की (आद्यन्त) आवृत्तिवशात्। परन्तु जब तक इन शब्दों का अर्थ नहीं समझ में आता तब तक (पारमार्थिक) काव्यानन्द कहाँ?

अथवा, जैसे मेरे दीक्षागुरु **भार्गवराघवीय** महाकाव्य–प्रणेता, चित्रकूट–स्थित तुलसीपीठ के अधिपति श्रद्धेय श्री राम भद्राचार्य जी महाराज का श्लोकद्वय! दोनों ही श्लोकों में, बिना अर्थबोध हुए, मात्र श्रवणजन्य कर्णकुहरों का सुख प्राप्त होता है।

जो आचार्य कुन्तक ने कहा–शब्द और अर्थ मिलकर काव्य हैं। वाचक और वाच्य दोनों सम्मिलित रूप से काव्य हैं (अकेले–अकेले नहीं) दोनों (शब्द और अर्थ) एक (काव्य) हैं यह कहना भी विचित्र ही है। तो ऐसा कहने से यदि कुछेक लोगों का यह मन्तव्य हो कि कवि–कौशल से कल्पित कमनीयता के अतिशय वाला **शब्द ही** केवल (अकेला) काव्य होता है अथवा कुछेक का यह मन्तव्य कि रचनावैचित्र्य से चमत्कार की सृष्टि करने वाला **अर्थमात्र** ही काव्य होता है–तो ये दोनों ही पक्ष निरस्त हो जाते हैं। इसलिये तिल–तिल में विद्यमान तैल के समान, शब्द और अर्थ –दोनों में ही तद्विदाह्लादकारित्व (पाठक को आनंदित करने की क्षमता) विद्यमान होता है, न कि किसी एक में ही।

कुन्तक के इस मन्तव्य में भला किसे सन्देह होगा? (ऐसा ही है) फिर भी, विशेष रूप से (व्यवहारदृष्ट्या) **अर्थ ही काव्य** है यह मेरा (व्यक्तिगत) आग्रह है।

पदार्थ, वाक्यार्थ एवं तीसरा काव्यार्थ! निश्चय ही ये तीनों अर्थ विद्वज्जनों को प्राणातिप्रिय होते हैं।।५७।।

पदार्थजीविनश्शब्दशास्त्रज्ञा भुवि सम्मताः।
मीमांसकाश्च विद्वांसस्सन्ति वाक्यार्थजीविनः।।५८।।

काव्यार्थजीविनस्तावज्जन्मनैव सचेतसः।
यतस्तच्चित्तविश्रान्तिः काव्यार्थेनैव नान्यथा।।५९।।

अथ काव्यार्थरूपस्य काव्यस्यात्माऽपि कश्चन।
काव्यार्थ एव भवितुं सजातीयतयाऽर्हति।।६०।।

कोऽन्वसौ खलु काव्यार्थो यो हि काव्यात्मताग्रही।
वाल्मीकिनेव चेतव्यस्स एव राघवोपमः।।६१।।

वाच्यार्थो न स काव्यार्थो नूनं सकलगोचरः।
शब्दार्थोभयसङ्केतसम्बन्धेन नियन्त्रितः।।६२।।

लक्ष्यार्थोऽपि स काव्यार्थो भवितुं नार्हति ध्रुवम्।
कोविदेषु प्रयुक्तत्वात् स्थूणात्रयसमाश्रितः।।६३।।

नूनं सहृदयश्लाध्यो व्यङ्ग्यार्थ एव केवलम्।
काव्यार्थस्तादृशो यत्र मनो विश्राम्यति द्रुतम्।।६४।।

काव्यार्थभूतकाव्यस्य सजातीयतया स्थितः।
आत्मा स एव व्यङ्ग्यार्थ एवमानन्दवर्धनः।।६५।।

वाच्यार्थात्सर्वथा भिन्नो लक्ष्यार्थादपि दूरगः।
व्यङ्ग्यार्थोऽयं भवत्येव गूढगूढो विलक्षणः।।६६।।

इस भूतलपर शब्दशास्त्रज्ञ सम्मान्य वय्याकरण **पदार्थ**-जीवी माने जाते हैं (क्योंकि व्याकरण का लक्ष्य ही है पदों की तथा उनके अर्थों की सिद्धि) मीमांसाशास्त्र के पण्डित **वाक्यार्थ**-जीवी होते हैं।।५८।।

(परन्तु) सहृदय (साहित्यशास्त्रज्ञ) तो जन्म से ही **काव्यार्थ**-जीवी होते हैं क्योंकि उनकी चित्तविश्रान्ति मात्र काव्यार्थ से ही होती है, किसी अन्य वस्तु से नहीं।।५९।।

तो फिर **काव्यार्थरूप** काव्य की आत्माभी, सजातीय सम्बन्ध के कारण कोई न कोई **काव्यार्थ** ही होना चाहिये।।६०।।

तो फिर कौन हो सकता है वह काव्यार्थ जो काव्य की आत्मा बनने का दावा कर सके? प्राचेतस वाल्मीकि के द्वारा (अपने काव्यनायक) राघव की ही

भाँति, उस विशिष्ट काव्यार्थ की खोज की जानी चाहिये।।६१।।

वाच्यार्थ (=संकेतितार्थ, अभिधेयार्थ, मुख्यार्थ, कोषसम्मतार्थ) तो वह काव्यार्थ होने से रहा क्योंकि वह तो निस्सन्देह सकलगोचर (स्थूल) होता है। क्योंकि वह नियंत्रित (निश्चित) होता है शब्द एवं अर्थ के पारस्परिक संकेत-सम्बन्ध के कारण।।६२।।

लक्ष्यार्थ भी निश्चित रूप से वह (काव्यात्मभूत) काव्यार्थ नहीं हो सकता (उसके दो कारण हैं) एक तो वह मात्र कोविदों में ही व्यवहृत होता है (अतः उसका क्षेत्र संकीर्ण या संकुचित है) दूसरे, वह स्थूणात्रय (स्तम्भत्रय) पर टिका हुआ है अतः नैसर्गिक या सहज नहीं है, आरोपित मात्र है।।६३।।

निश्चय ही, एकमात्र सहृदयों द्वारा श्लाघ्य **व्यङ्ग्यार्थ** ही उस प्रकार का काव्यार्थ है जिसमें चित्त द्रुतगति से विश्रान्त हो जाता है।।६४।।

काव्यार्थभूत काव्य के सजातीय धर्म वाला वही व्यङ्ग्यार्थ काव्य की आत्मा है, ऐसा आनन्दवर्धन कहते हैं।।६५।।

वाच्यार्थ से सर्वथा भिन्न और लक्ष्यार्थ से भी अलग-थलग यह व्यङ्ग्यार्थ होता ही है (स्वरूपदृष्ट्या) अतिशय गूढ (रहस्यमय) तथा विलक्षण ।।६६।।

प्रतीतिरेव सम्भाव्या यतोऽर्थस्यास्य केवलम्।
ततः प्रतीयमानोऽर्थोऽप्ययं विद्भिस्समुच्यते।।६७।।

यथा गन्धो हि मृल्लोष्टे चिरकालं नु तिष्ठति।
यावच्चासौ न वर्षाभिः प्रसह्यानीयते बहिः।।६८।।

विद्यमानस्तथैवायं ननु वाच्यार्थगह्वरे।
यावन्न वाच्यसामर्थ्याक्षिप्तस्तावन्न व्यज्यते।।६९।।

ततश्चैव समाख्यातो लावण्यप्रतिमोऽप्ययम्।
लीनं यदङ्गनादेहे नैव निर्वर्ण्यते पृथक्।।७०।।

वक्त्रनेत्रकपोलादिदेहावयवसंश्रितम्।
सौन्दर्यन्तु विलासिन्याः सामान्यैरपि दृश्यते।।७१।।

किन्तु लावण्यतत्त्वन्तु ललनाया वपुः स्थितम्।
नागरैर्विरलैरेव लोचनाभ्यां निपीयते।।७२।।

तादृग्गुणविशिष्टोऽयं व्यङ्ग्यार्थः प्रतिभोत्थितः।
काव्यात्मेति मतं स्वीयं भणत्यानन्दवर्धनः।।७३।।

अधिष्ठितोऽप्यनेनैव व्यङ्ग्यार्थेन रसात्मना।
यो हि काव्यविशेषोऽङ्गी स ध्वनिः स्फुटमुच्यते।।७४।।

यत्र शब्दः स्वसङ्केतार्थमर्थोऽप्यस्तित्वमात्मनः।
गुणीकृत्य मिथो व्यङ्क्तो नवमर्थं विलक्षणम्।।७५।।

ध्रुवं काव्यविशेषोऽसौ जायते ध्वनिसंज्ञितः।
ध्वनिकार इति ब्रूते सप्रमाणमसंशयम्।।७६।।

चूँकि इस काव्यार्थ की प्रतीतिमात्र होनी संभव है (इसे वाच्यार्थ अथवा लक्ष्यार्थ की भाँति शब्दार्थ के माध्यम से लिखा नहीं जा सकता) इसीलिये विद्वज्जनों द्वारा इसे **प्रतीयमानार्थ** भी कहा जाता है।।६७।।

जैसे मिट्टी के ढेले में गन्ध अनन्त काल तक रची-बसी रहती है जब तक कि जलवृष्टियों के द्वारा उसे जबर्दस्ती बाहर नहीं लाया जाता ।।६८।।

इसी प्रकार वाच्यार्थ के गह्वर में (अन्तराल में) निश्चित रूप से विद्यमान यह व्यङ्ग्यार्थ जब तक वाच्यार्थ के सामर्थ्य से आक्षिप्त नहीं होता, तब तक अभिव्यक्त नहीं हो पाता है।।६९।।

इसीलिये इस व्यङ्ग्यार्थ को **लावण्य** के समकक्ष भी माना गया है जो कि रमणी-शरीर में लीन रहता है (परन्तु) पृथक् परिलक्षित नहीं हो पाता।।७०।।

मुख, नेत्रयुगल, कपोल आदि शरीर के अंगों में संश्रित रमणी की सुन्दरता को तो ऐरे-गैरे (सामान्य सौन्दर्यचेतना वाले भी) भी जान लेते हैं।।७१।।

परन्तु रमणी के सांगोपांग व्यक्तित्व में परिव्याप्त **लावण्य-तत्त्व** तो विरले ही नागरों द्वारा नेत्रों द्वारा ग्राह्य हो पाता है।।७२।।

कविप्रतिभा-प्रसूत, तादृग्गुण-विशिष्ट अर्थात् लावण्य के ही समान गूढ़तया निर्वर्ण्यमान वह व्यङ्ग्यार्थ ही काव्य की आत्मा है, ऐसा स्वोपज्ञ मत प्रकट करते हैं आचार्य आनन्दवर्धन ।।७३।।

रसरूपी सर्वस्व से युक्त इसी व्यङ्ग्यार्थ द्वारा अधिष्ठित जो काव्यविशेष अङ्गी होता है उसे स्पष्टतः **ध्वनि** कहा जाता है।।७४।।

जहाँ (काव्य में प्रयुक्त शब्द) अपने संकेतित अर्थों को तथा अर्थ स्वयं अपने अस्तित्त्व को गौण बना कर, परस्पर समवेत भाव से (एक) नूतन, विलक्षण अर्थ को प्रकाशित करते हैं।।७५।।

निश्चित रूप से वह काव्य-विशेष ध्वनिकाव्य संज्ञा वाला होता है, ऐसा ध्वनिकार आनन्दवर्धन प्रमाणपूर्वक निस्सन्देह कहते हैं।।७६।।

नूनं प्रतीयमानार्थो व्यङ्ग्यार्थाऽपरसंज्ञकः।
ध्वन्यर्थोऽपि ततश्चैव व्यञ्जनावादिभिर्मतः।।७७।।

मृल्लोष्टं दृश्यते दृग्भ्यां वर्षणञ्चापि दृश्यते।
किन्तु मृल्लोष्टगन्धोऽसौ व्यक्तःसूक्ष्मोऽनुभूयते।।७८।।

व्यङ्ग्यस्तथैव काव्यार्थः केवलं ह्यनुभूयते।
वस्त्वलङ्काररूपो वा रसरूपश्च वस्तुतः।।७९।।

ब्राह्मणश्रमणन्यायेनोभौ व्यङ्ग्यावपि ध्रुवम्।
कामं हि वस्त्वलङ्कारौ वाच्यतामुपगच्छतः।।८०।।

व्यङ्ग्यार्थः किन्तु योऽयं हि रसरूपोऽनुभूयते।
न स्वप्नेऽपि स शब्देन वाच्यतामुपगच्छति।।८१।।

तथा हि ध्वनिकारः-तृतीयस्तु रसादिलक्षणः प्रभेदो वाच्यसामर्थ्यक्षिप्तः प्रकाशते। न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद्विभिन्न एव। तथा हि वाच्यत्वं तस्य स्वशब्दनिवेदितत्वेन वा स्यात् विभावादिप्रतिपादनमुखेन वा। पूर्वस्मिन् पक्षे स्वशब्दनिवेदितत्वाभावे रसादीनामप्रतीतिप्रसङ्गः। न च सर्वत्र तेषां स्वशब्दनिवेदितत्वम्। यत्राप्यस्ति तत्रापि विशिष्टविभावादि-प्रतिपादनमुखेनैवैषां प्रतीतिः। स्वशब्देन सा केवलमनूद्यते। न तु तत्कृता। विषयान्तरे तथा तस्या अदर्शनात्। नहि केवलशृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्त्वप्रतीतिरस्ति। यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावादिभ्यो रसादीनां प्रतीतिः। केवलाच्च स्वाभिधानादप्रतीतिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्यक्षिप्तत्वमेव रसादीनाम्। नत्वभिधेयत्वं कथञ्चित्। इति तृतीयोऽपि प्रभेदो वाच्याद्भिन्न एवेति स्थितम्। वाच्येन त्वस्य सहैव प्रतीतिरित्यग्रे दर्शयिष्यते।-ध्वन्या० २।४ वृत्तिः।

निश्चय ही व्यङ्ग्यार्थरूपी अपर संज्ञा वाला प्रतीयमानार्थ इसीलिये व्यञ्जनावादी आचार्यों द्वारा ध्वन्यर्थ भी कहा जाता है।।७७।।

मिट्टी का ढेला नेत्रों से दिखाई पड़ता है, वर्षा भी दिखाई पड़ती है। परन्तु वर्षा के कारण, मिट्टी के ढेले में छिपी बैठी (परन्तु अब) बाहर निकली हुई वह गन्ध तो बस अनुभवमात्र की जाती है।।७८।।

ठीक उसी प्रकार व्यङ्ग्य (अभिव्यक्त अथवा प्रकाशित होने वाला) अर्थ केवल अनुभव काविषय होता है-वस्तु के रूप में अथवा अलंकार के रूप में। परन्तु **परमार्थतः** रस के रूप में।।७९।।

वस्तु एवं अलंकार रूप दोनों व्यङ्ग्यार्थ तो निश्चित रूप से **ब्राह्मणश्रमणन्यायेन** भले ही वाच्यता को प्राप्त हो जॉय।।८०।।

परन्तु रस के रूप में जो व्यङ्ग्यार्थ अनुभव किया जाता है वह तो स्वप्न में भी शब्दों के माध्यम से वाच्यता को प्राप्त नहीं करता (वह सदैव व्यङ्ग्य ही होता है)।।८१।।

जैसा कि ध्वनिकार कहते हैं-तीसरा (व्यङ्ग्यार्थ) रसादि लक्षण वाला है जो कि वाच्य की सामर्थ्य से आक्षिप्त होकर ही प्रकाशित हो पाता है। वह साक्षात् शब्द-व्यापारका विषय न होने के कारण वाच्यार्थ से भिन्न ही है। क्योंकि उसकी वाच्यता तो दो ही प्रकारसे संभव है-या तो वह स्वशब्द से निवेदित (प्रकट) होने वाला हो अथवा (अनुकूल) विभावादि के प्रतिपादन द्वारा। यदि पहला पक्ष माना जाय तो फिर स्वशब्द-निवेदितत्व के अभाव में रसादि की अप्रतीति का प्रसंग उठना चाहिये। परन्तु सर्वत्र तो रसादि का स्वशब्दनिवेदितत्त्व होता (दीखता) नहीं। जहाँ कहीं है भी, वहाँ भी विशिष्टकोटिक विभावादि के प्रतिपादन के माध्यम से ही उनकी प्रतीति होती है। स्वशब्द से तो बस, उनका अनुवदनमात्र होता है। न कि स्वशब्द मात्र से उनकी प्रतीति होती है। विषयान्तर में, उस रूप में उसकी अनुपलब्धि होने के कारण।

केवल **शृङ्गारादि** शब्द से युक्त (परन्तु) विभावादि के प्रतिपादन से रहित काव्य में तिलभर भी रस-प्रतीति नहीं होती है। परन्तु 'शृङ्गारादि' (स्वाभिधान) का प्रयोग न भी हो, मात्र विभावादिकों का प्रतिपादन हो तो भी रसादिकों की प्रतीति होती है। परन्तु अभिधान मात्र से प्रतीति नहीं होती है।

इस प्रकार, अन्वय-व्यतिरेक (व्याप्ति) से यही सिद्ध होता है कि रसादि अभिधेय के सामर्थ्य से ही आक्षिप्त होते हैं। न कि स्वयं **अभिहित** होते हैं (वाच्यार्थ के रूप में) इस प्रकार तीसरा भी (व्यङ्ग्यार्थरूप) भेद वाच्य से भिन्न ही सिद्ध होता है। वाच्यार्थ के साथ ही इसकी प्रतीति होती है, ऐसा आगे दिखाया जायेगा। ध्वन्या० १।४ की वृत्ति।

स च ध्वनिरविवक्षितवाच्यविवक्षितान्यपरवाच्यभेदाभ्यां द्विविधः।

तदवान्तरभेदा यथा-अर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्वौ भेदावविवक्षितवाच्यस्य। असंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्वौ भेदौ विवक्षितान्यपरवाच्यध्वनेः। स सर्वोऽपि प्रपञ्चो यथायथं निरूपित आकरग्रन्थेष्वेव द्रष्टव्यः।

इति ध्वन्यात्मत्वप्रकरणम्। अत्रात्मतत्त्वोन्मेषे कारिकासंख्या-८१

।।इति श्रीमद्गौतमगोत्रोत्पन्नस्य भभयाख्यमिश्रवंशावतंसस्य।।
श्रीमद्दुर्गाप्रसादाभिराजीतनूजस्य पण्डितप्रकाण्ड-
श्रीमदाद्याप्रसादमिश्रभ्रात्रीयस्य त्रिवेणीकवि-
संज्ञितस्याभिराजराजेन्द्रस्याभिनवे काव्य-
शास्त्रेऽभिराजयशोभूषणे आत्म-
तत्त्वोन्मेषाख्यस्तृतीयोंशः।

वह ध्वनि अविवक्षितवाच्य तथा विवक्षितान्यपरवाच्य के भेद से दो प्रकार की होती है। उन्हीं के अवान्तर भेद इस प्रकार हैं-अर्थान्तरसंक्रमितवाच्य तथा अत्यन्ततिरस्कृतवाच्य-ये दो भेद अविवक्षितवाच्य ध्वनि के तथा असंलक्ष्य-क्रमव्यङ्ग्य एवं संलक्ष्यक्रमव्यङ्ग्य-ये दो भेद विवक्षितान्यपरवाच्य ध्वनि के। यह सारा ध्वनि-प्रपञ्च यथोचित रूप से निरूपित किया गया, आकर ग्रंथों में ही द्रष्टव्य है।

ध्वन्यात्मप्रकरण इस प्रकार समाप्त हुआ। इस आत्मतत्त्वोन्मेष में कारिकाओं की संख्या ८१ है।

इस प्रकार, श्रीमद् गौतमगोत्रोत्पन्न भभयानामक मिश्र-वंश के अलंकारभूत, महाभागवत पं० रामानन्द मिश्र के पौत्र, श्रीमान् पं० दुर्गाप्रसादमिश्र एवं अभिराजी देवी के मध्यमपुत्र, पण्डितप्रकाण्ड आचार्य आद्याप्रसादमिश्र के भ्रात्रीय, त्रिवेणीकवि, अभिराजराजेन्द्र द्वारा प्रणीत अभिनव काव्यशास्त्र अभिराजयशोभूषण में आत्मतत्त्वोन्मेष नामक यह तृतीय अंश समाप्त हुआ।

***

अभिराजयशोभूषणम्

॥निर्मितितत्त्वोन्मेषः॥

काव्यं रसात्मकं चेदं शब्दार्थैककलेवरम्।
भिद्यते खलु निर्मित्या रुचिरूपप्रभेदतः।।१।।

कुलालो हि भ्रमच्चक्रे स्वरुचिं पोषयन्यथा।
विविधाकृतिपात्राणि निर्मात्येव निरन्तरम्।।२।।

कुलालरुचिभेदाद्धि पात्रभेदः प्रजायते।
यथा, तथा कवेः प्रीत्या काव्यमेतत्पृथक्पृथक्।।३।।

रूपदृष्ट्यापि काव्यानि भिद्यन्ते हि परस्परम्।
गद्यं पद्यञ्च मिश्रञ्च त्रयमेतदुदाहृतम्।।४।।

प्रभेदा बहवस्तत्र सन्ति गद्यादिषु त्रिषु।
सविस्तरञ्च तत्सर्वं मया सम्प्रति तन्यते।।५।।

पुष्कला खलु सामग्री पूर्वाचार्यैर्निरूपिता।
संयोज्यते तया सार्धं स्वपक्षोऽप्यधुनातनः।।६।।

न तावद्राष्ट्रमिदं भारताख्यं सम्प्रति प्राक्स्वरूपमाधत्ते। नेदानीं राजानो न वा तेषां पृथग्राज्यानि। न कुत्रापि गमनाऽगमनप्रत्यवायः। समग्रमपि राष्ट्रमाकाश्मीरात्केरलं यावदापञ्चनदराज्यान्मिजोरमं यावदेकसूत्रग्रथितमिदानीं जीवति। विकसितानि सञ्चारसाधनानि। रेडियोदूरदर्शनाद्याविष्करणैः समग्रमपि विश्वमेकनीडायतेऽधुना। भाषान्तरमानदण्डाः शिल्पानि च यथारुचि प्रयुज्यन्ते सर्वभाषाकविभिः।

शब्द एवं अर्थ (समष्टि) रूप एकमात्र शरीर वाला यह रसात्मक काव्य, अभिरुचि एवं रूप (आकार-प्रकार) के प्रभेद से-निर्मिति दृष्ट्या भिन्न होता है।।१।।

जैसे अपनी अभिरुचि (पसन्द) को ध्यान में रखकर कुम्भकार, घूमते हुए चक्र पर विविध आकृति के पात्रों का निरन्तर निर्माण करता ही रहता है।।२।।

और जैसे कुम्भकार की पसन्द के भेद से ही पात्रों में भी भिन्नता पैदा हो जाती है, ठीक उसी प्रकार कवि की प्रीति (पसन्द) के ही कारण यह काव्य भी पृथक्-पृथक् (रूपवाला) होता है।।३।।

रूप की दृष्टि से भी काव्य आपस में ही भिन्न होते हैं। गद्य, पद्य एवं मिश्र उनके ये तीन रूप (पूर्वसूरियों द्वारा) उदाहृत किये गये हैं।।४।।

उन गद्यादि तीनों भेदों के भी अनेक प्रभेद बताये गये हैं। वह सब अब मेरे द्वारा सविस्तर निरूपित किया जा रहा है।।५।।

पूर्वाचार्यों द्वारा (एतद्विषयक) पुष्कल सामग्री निरूपित की गई है। उस सामग्री के साथ, अपना अधुनातन पक्ष (नई सामग्री) मेरे द्वारा जोड़ा जा रहा है।।६।।

भारत नामवाला यह राष्ट्र आज अपने प्राचीन स्वरूप को धारण नहीं कर रहा है। आज न (शासन करने वाले) राजा हैं न ही उनके पृथक्-पृथक् राज्य! न ही कहीं भी (पुराने-जमाने जैसी) आने-जाने की विघ्न-बाधा! काश्मीर से लेकर केरल तक तथा पञ्जाब से लेकर मिजोरम तक सम्पूर्ण राष्ट्र सम्प्रति एकसूत्रता में ग्रथित हुआ जी रहा है। सञ्चार के साधन विकसित हो चले हैं। रेडियो तथा दूरदर्शन आदि के आविष्कारों से सम्पूर्ण विश्व अब एक घोंसले सा प्रतीत होने लगा है। समस्त (भारतीय) भाषाओं के कवियों द्वारा, अपनी रुचि के अनुसार, निजेतर भाषाओं के (साहित्यिक) मानदण्ड एवं शिल्प व्यवहार में लाये जाने लगे हैं।

काव्यस्य ये प्रभेदाः प्राग्भूपदृष्ट्यैव कल्पिताः।
समाप्ते राजतन्त्रे ते कालातीता अथाऽभवन्।।७।।

नूतनाश्चापि धौरेया लोकतन्त्रे प्रतिष्ठिते।
सञ्जाताः सद्गुणाधारा लोकनायकताङ्किताः।।८।।

तादृग्गुणविशिष्टान्वै प्रशस्तचरिताश्रयान्।
समालम्ब्यापि काव्यानि प्रणीयन्ते कवीश्वरैः।।९।।

नूतनानि महाकाव्यानि क्रियन्ते तद्यथा-अमीरचन्द्रशास्त्रिविरचितं जवाहरलालनेहरूचरितम् बलभद्रप्रसादशास्त्रिविरचितमिन्दिराजीवनम् गजाननबालकृष्णपलसुलेविरचितं वैनायकम् सुबोधचन्द्रपन्तविरचितं झाँसीश्वरी चरितम् माधवहरिअणेविरचितस्तिलकयशोऽर्णवः ब्रह्मानन्द-शुक्लविरचितं नेहरूचरितं गान्धिचरितञ्च विश्वनाथकेशवछत्रेविरचितं सुभाषचरितमित्येवम्।

एतत्सर्वं मया सविस्तरं निरूपितं स्वोपज्ञे विंशशताब्दीसंस्कृत-ग्रन्थसूचीपत्रे। तत्रैव द्रष्टव्यम्।

केचित्काव्यप्रकाराश्च भाषान्तरप्रयोजिताः।
ये हि लोकप्रियाः सन्ति भावसंवेदनक्षमाः।।१०।।

आत्मतुष्ट्यर्थमद्यत्वे हाइकू-तानकादयः।
संस्कृतरचनाकारैरभिव्यक्त्यर्थमाहृताः।।११।।

तच्च नाऽनुचितं मन्ये नूनं स्वरुचिपोषणात्।
कल्पितत्वात्प्रकाराणां काव्यस्यापि सुनिश्चितम्।।१२।।

स्वतन्त्राः कवयस्सर्वे शास्त्रकाराश्च पण्डिताः।
निर्मितेन पथा यान्ति क्व ते कण्ठीरवा इव।।१३।।

जयन्तु मतभेदास्ते तेषां विषमचेतसाम्।
यन्महिम्नैव सञ्जातं काव्यशास्त्रं बृहत्तमम्।।१४।।

इस प्रकार, काव्य के जो विशिष्ट भेद पहले, राजा को ही दृष्टि (केन्द्र) में रख कर कल्पित किये गये थे, वे राजतंत्र के समाप्त होते ही (स्वयमेव) कालातीत हो गये।।७।।

(दूसरी ओर) लोकतंत्र के प्रतिष्ठित होते ही सद् गुणों के आधार नये प्रकार के मुखिया लोग लोकनायकता को प्राप्त हो गये।।८।।

उस प्रकार के सद् गुणों से श्रीमण्डित, प्रशस्त चरित वाले लोगों को भी आश्रय बना कर श्रेष्ठ कवियों द्वारा (आज) काव्य लिखे जा रहे हैं।।९।।

नूतन महाकाव्य लिखे जा रहे हैं जैसे अमीरचन्द्रशास्त्रि-विरचित जवाहरलालनेहरूचरितम्, बलभद्रप्रसादशास्त्रि-विरचित इन्दिराजीवनम्, गजानन बालकृष्ण पलसुले-विरचित वैनायकम्, सुबोधचन्द्र पन्त-विरचित झाँसीश्वरीचरितम्, माधव हरि अणे-विरचित तिलकयशोऽर्णवः, ब्रह्मानन्दशुक्ल-विरचित नेहरूचरितम् तथा गान्धिचरितम्, विश्वनाथकेशवछत्रे-विरचित सुभाषचरितम् आदि।

यह सब मैने स्वरचित ग्रंथ **विंशशताब्दीसंस्कृतग्रंथसूचीपत्रम्** में विस्तार के साथ निरूपित किया है। वहीं देखना चाहिये।

दूसरी (देशी अथवा विदेशी) भाषाओं में प्रयुक्त काव्य की कुछ विधायें जो कि भावसंवेदन में समर्थ हैं तथा लोकप्रियता अर्जित कर चुकी हैं।।१०।।

हाइकू तथा तान्का आदि ऐसी विधायें आजकल संस्कृत रचनाकारों द्वारा (भी) आत्मतुष्टि के लिये, भावाभिव्यक्ति-हेतु ग्रहण की जा रही हैं।।११।।

मैं सचमुच उसे अनुचित नहीं मानता (क्योंकि) उससे कवि की अपनी

अभिरुचि का पोषण होता है। काव्यविधाओं के कल्पितत्त्व के कारण भी, निश्चित रूप से (मैं उन्हें अनुचित नहीं मानता)।।१२।।

. समस्त (क्रान्तदर्शी) कवि, शास्त्रकार एवं पण्डित सर्वतंत्र-स्वतंत्र होते हैं। बने-बनाये मार्ग से भला वे कहाँ चलते हैं-बबर शेर की तरह।।१३।।

अतएव विषम (एक-दूसरे से भिन्न) चित्तवृत्ति वाले उन कवियों के उन मत-भेदों की जय हो जिनकी महिमा से ही काव्यशास्त्र का अतिशय विस्तार हो सका है।।१४।।

।।अथ काव्यभेदनिरूपणम्।।

रुचिवैचित्र्यमूलैव सृष्टिरेषा चतुर्विधा।
रुचिवैषम्यमूलञ्च वाङ्मयं भूरिविस्तरम्।।१५।।

ततश्चेदं नु वैषम्यं सृष्टिबीजमनिन्दितम्।
अभिनन्द्यं हि सर्वेषु क्षेत्रेष्विति मतिर्मम।।१६।।

प्रत्नं यच्चाप्युपादेयं प्रासङ्गिकमथोत्तमम्।
प्रत्यग्रमपरिहार्यं नवानां मार्गदर्शकम्।।१७।।

तदादाय विवेकेन ताटस्थ्यञ्च समाश्रयन्।
करोमि काव्यकृद्भूत्यै काव्यभेदनिरूपणम्।।१८।।

दृश्यश्रव्यप्रकाराभ्यामादौ काव्यं द्विधा मतम्।
रूपरूपकनाट्यानि दृश्यनामान्तराणि च।।१९।।

रूपं दृश्यतयाऽऽख्यातं नाट्यमङ्गप्रचालनात्।
नटे रामादिरूपाणामारोपादथ रूपकम्।।२०।।

दृश्यं तत्राभिनेयं स्यादधिमञ्चं प्रयोक्तृभिः।
अवस्थानुकरणाढ्यं नेत्रश्रुतिरसायनम्।।२१।।

यो हि प्रत्नं कथावस्तु समक्षमानयेद् ध्रुवम्।
स एवाभिनयः ख्यातः प्रेक्षावद्भिश्चतुर्विधः।।२२।।

(वस्तुतः) यह चतुर्विध (पिण्डज, अण्डज, स्वेदज, उद्भिज्ज) सृष्टि ही (विधाता की) रुचि के वैचित्र्य पर आधारित है। (ठीक यूँ ही) प्रभूत विस्तार वाला वाङ्मय भी (रचनाकारों के) रुचि-वैषम्य से विकसित हुआ है।।१५।।

इसलिये, यह प्रशंसनीय तथा सृष्टिबीजभूत **वैषम्य** समस्त क्षेत्रों में अभिनन्दन-योग्य है, ऐसी मेरी सोच है।।१६।।

प्राचीन जो भी (आज के युग में भी) उपादेय है, प्रासंगिक है तथा उत्तमकोटिक है, ताजा है, अपरिहार्य है तथा नये रचनाकारों के लिये पथप्रदर्शक है।।१७।।

उसे विवेकपूर्वक ग्रहण करते हुए तथा तटस्थता (पूर्वाग्रहमुक्तता) का सहारा लेते हुए, काव्यकारों के कल्याणार्थ मैं काव्यप्रकारों का निरूपण कर रहा हूँ।।१८।।

दृश्य एवं श्रव्य प्रकारों के माध्यम से सर्वप्रथम काव्य दो प्रकार का बताया गया है। दृश्य काव्य की कुछ और भी संज्ञायें हैं-रूप, रूपक तथा नाट्य।।१९।।

दृश्यता (दर्शनेन्द्रियविषयता) के कारण (दृश्यकाव्य को) **रूप** कहते हैं, अंगोपाङ्गों का संचालन होने के कारण उसे **नाट्य** कहते हैं तथा (साम्प्रतिक) नटों के ऊपर (त्रेतायुगीन) रामादि पात्रों के रूप का आरोप होने के कारण उसे **रूपक** कहते हैं।।२०।।

इन दोनों भेदों में दृश्यकाव्य रंगमञ्च के ऊपर, प्रयोगकर्मी अभिनेताओं द्वारा अभिनेय होता है जो कि (रामादि पात्रों की) अवस्थाओं के अनुकरणों से भरा-पुरा होता है (फलतः) नेत्रों एवं कानों के लिये रसायनकल्प (भी)।।२१।।

जो प्राचीन कथावस्तु को निस्सन्देह समक्ष उपस्थित कर दे वही **अभिनय** कहा जाता है तथा विद्वज्जनों द्वारा चार प्रकार का (आंगिक, वाचिक, आहार्य तथा सात्त्विक) बताया गया है।।२२।।

अभि समक्षं नयति प्रापयति प्राचीनं कथावस्त्विति अभिनय इत्यभिनवगुप्तपादाचार्योऽभिनवभारत्याम्। अभिनयद्वारा प्राचीनाः सन्तोऽपि रामादयस्साक्षात् प्रत्यक्षीक्रियन्ते। किं वैशिष्ट्यमभिनयस्येति सम्प्रत्युच्यते।

आङ्गिकवाचिकाहार्याः सात्त्विकश्चान्तिमो मतः।
प्रत्येकमेषां स्वस्थाने प्रामुख्येण महीयते।।२३।।

दृश्यकाव्यमिदं भूयो विभक्तं सूरिभिर्द्विधा।
रूपकं प्रथमं तत्र द्वितीयमुपरूपकम्।।२४।।

नाटकं च प्रकरणं भाणः प्रहसनं तथा।
व्यायोगसमवकारौ डिमेहामृगवीथयः।।२५।।

अङ्कश्चेत्युपदिष्टानि रूपकाणि पुनर्दश।
यथोचितं गृहीतानि देवमानवनायकैः।।२६।।

अथोपरूपकाणि-

नाटिका भाणिका गोष्ठी दुर्मल्ली च विलासिका।
त्रोटकं सट्टकं काव्यं रासकं नाट्यरासकम्।।२७।।

संलापकं श्रीगदितं प्रेङ्खणञ्चापि शिल्पकम्।
हल्लीशः प्रकरणी च प्रस्थानमुल्लाप्यकम्।।२८।।

एतान्यष्टादशोक्तानि प्रायेणैकाङ्कवन्ति च।
उपरूपकवृन्दानि नाट्यशास्त्रविशारदैः।।२९।।

रूपकाणां दशमितानामुपरूपकाणाञ्चाष्टादशमितानां लक्षणानि द्रष्टव्यानि दशरूपकादिषु। तत्र लोकप्रियतायाः धुरि स्थितं नाटकमद्यापि भूयस्त्वेन प्रणीयत इति कृत्वा नवयुगानुकूलं तल्लक्षणं प्रस्तूयते।

अभि का अर्थ है-समक्ष, आँखों के सामने। वहाँ ले आये, पहुँचा दे प्राचीन कथावस्तु को जो उसे अभिनय कहते हैं, ऐसा मन्तव्य है अभिनवगुप्तपादाचार्य का (नाट्यशास्त्र की टीका) अभिनवभारती में। अभिनय के माध्यम से ही, प्राचीन (त्रेतायुगीन) होते हुए भी रामादि पात्र साक्षात् प्रत्यक्षीकृत हो जाते हैं। अभिनय का क्या वैशिष्ट्य होता है? इसे अब बताया जा रहा है।

अभिनय चार प्रकार के होते हैं-आङ्गिक, वाचिक, आहार्य तथा अन्तिम-सात्त्विक। इनमें से प्रत्येक, अपने स्थान (सन्दर्भ) पर प्रमुख होने के कारण महनीय होता है।।२३।।

यह दृश्यकाव्य पुनः आचार्यों द्वारा द्विधा विभक्त किया गया है। पहला है-रूपक तथा दूसरा है-उपरूपक।।२४।।

नाटक, प्रकरण, भाण, प्रहसन, व्यायोग, समवकार, डिम, ईहामृग, वीथी तथा अंक ये दश भेद रूपक के बताये गये हैं। जैसा जहाँ उचित है इनके नायक देव अथवा मानवकोटिक होते हैं।।२५, २६।।

उपरूपक-

नाटिका, भाणिका, गोष्ठी, दुर्मल्ली (दुर्मल्लिका) विलासिका, त्रोटक, सट्टक, काव्य, रासक, नाट्यरासक, संलापक, श्रीगदित, प्रेङ्खण (प्रेक्षणक) शिल्पक,

हल्लीश, प्रकरणी, प्रस्थान तथा उल्लाप्यक-ये अट्ठारह भेद नाट्याचार्यों द्वारा उपरूपक के बताये गये हैं जो प्रायेण एकाङ्की कोटि के हैं।।२७-२९।।

दस संख्या वाले रूपकों तथा अठारह संख्या वाले उपरूपकों के लक्षण **दशरूपक** आदि (नाट्यशास्त्रीय) ग्रंथों में द्रष्टव्य है। उनमें, लोकप्रियता के शिखर पर स्थित **नाटक** आज भी पुष्कल मात्रा में लिखा जा रहा है, ऐसा मान कर उसका नवयुगानुकूल लक्षण लिखा जा रहा है।

नाटकलक्षणम्-

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्।
पञ्चभिः सप्तभिश्चाङ्कैर्दशभिर्वा प्रपञ्चितम्।।३०।।

धीरोदात्तो भवेन्नेता प्रतापैश्वर्यमण्डितः।
देवो भूपोऽथवा कश्चिद् गुणवांल्लोकनायकः।।३१।।

नायकस्थापने यत्र लिङ्गभेदो न गण्यते।
महिलापि ततो नेता स्यादौदात्यमहीयसी।।३२।।

शृङ्गारः करुणो वीरश्शान्तो वाङ्गी रसो भवेत्।
शेषा यान्तु तदङ्गत्वं स्यान्निर्वहणमद्भुतम्।।३३।।

राष्ट्रोदयं गुणैश्वर्यं लोकजीवनमङ्गलम्।
न्यायसत्यदयाधर्मसौजन्यादिसृतेर्जयम्।।३४।।

स्थापयेन्नाटकं नूनं लक्ष्यीकृत्य यथोचितम्।
येन लोकस्सदाचारोच्छ्रितमार्गं समाश्रयेत्।।३५।।

उद्वेगाऽमङ्गलव्रीडारक्तपातादिसंश्रितम्।
दृश्यं न चित्रयेन्नाट्ये रङ्गविक्षोभकारकम्।।३६।।

यच्च सत्यं शिवं भूयात्सुन्दरञ्च सुखावहम्।
जनानुरागवर्धिष्णु तत्परिकल्प्य वर्णयेत्।।३७।।

राष्ट्रोदयपरं यथा प्रतापविजयं मूलशङ्करयाज्ञिकस्य छत्रपतिसाम्राज्यं तस्यैव, वीरप्रतापं मथुरानाथदीक्षितस्य भारतविजयञ्चापि तस्यैव। गुणैश्वर्यपरं यथा भक्तसुदर्शनं मथुरानाथदीक्षितस्य, लक्ष्मीस्वयंवरं वेङ्कटराघवस्य, शिवाजिचरितं हरिदाससिद्धान्तवागीशस्य।

प्रख्यात कथानक वाला, पञ्चसन्धियों से समन्वित तथा पाँच, सात अथवा दश अंकों में विभक्त (विस्तारित) होता है नाटक।।३०।।

प्रताप एवं ऐश्वर्य से मण्डित धीरोदात्त चरित्र वाला कोई देवता, राजा अथवा गुणवान् लोकसत्पुरुष नाटक का नायक होना चाहिये।।३१।।

नाटक में नायक निश्चय करते समय लिङ्गभेद (स्त्री अथवा पुरुष का भेद) को महत्त्व नहीं देना चाहिये। इसलिये औदात्त्य से महिमान्वित कोई महिला भी नाटक का नेता हो सकती है।।३२।।

शृङ्गार, करुण, वीर एवं शान्त में से कोई एक प्रधान रस होना चाहिये। शेष रस प्रधान रस के अंगभूत हों। हाँ निर्वहण में (अनिवार्यतः) अद्भुत रस हो।।३३।।

राष्ट्र का अभ्युदय, सद्गुणों का ऐश्वर्य, लोकजीवन का मंगल, न्याय, सत्य, दया, धर्म तथा सौजन्यादि-सरणियों की विजय।।३४।।

जैसा उचित (कथानुकूल) हो, किसी एक को, नाटक में लक्ष्य बना कर प्रतिष्ठित करना चाहिये जिससे कि (पाठक) समाज सदाचार के श्रेयस्कर मार्ग का वरण कर सके।।३५।।

उद्वेग, अमंगल, लज्जाजनक दृश्य, रक्तपातादि पर आधारित दृश्य, जिनसे रंग (दर्शकों) का विक्षोभ होता हो, का नाटक में चित्रण नहीं होना चाहिये।।३६।।

जो सत्य हो, कल्याणकर हो तथा सुन्दर (समञ्जस) हो, जो सुखावह हो तथा जनानुराग को बढ़ाने वाला हो ऐसे इतिवृत्त को परिकल्पित करके भी (नाटक में) वर्णित करना चाहिये।।३७।।

राष्ट्रोदयपर नाटक जैसे मूलशङ्कर याज्ञिक का प्रतापविजयम्, उन्हीं का (दूसरा नाटक) छत्रपतिसाम्राज्यम्, मथुरानाथ दीक्षित-प्रणीत वीरप्रतापम् तथा भारतविजयम्। गुणैश्वर्यपर नाटक जैसे मथुरानाथ दीक्षित का भक्तसुदर्शनम्, वेङ्कटराघव का लक्ष्मीस्वयंवरम्, हरिदास सिद्धान्तवागीश-प्रणीत शिवाजिचरितम्। विवेकानन्दविजयं श्रीधरभास्करवर्णेकरस्य, चाणक्यविजयं विश्वेश्वरविद्याभूषणस्य, प्रेमपीयूषं राधावल्लभस्य, सिद्धार्थचरितं वीरेन्द्र-कुमारभट्टाचार्यस्य। एवमेव न्यायसत्यादिजयपरं यथा शिखाबन्धनं कर्णार्जुनीयञ्च रामाशीषपाण्डेयस्य, बँगलादेशविजयं पद्मशास्त्रिणः, स्नेहसौवीरं त्रिपाठिभास्कराचार्यस्य, मणिहरणं जग्गूबकुलभूषणस्य, शिविवैभवं जग्गूशिङ्गरार्यस्य। लोकमङ्गलपरं यथा नारीजागरणं गोपाल-

शास्त्रिणः, भारतलक्ष्मीर्यतीन्द्रविमलचतुर्धुरीणस्य, सुसंहतभारतं पुल्लेल-रामचन्द्रस्य, सनातनधर्मसर्वस्वं सदाशिवतीर्थस्य, रक्तदानं वनेश्वर-पाठकस्य, विभ्रान्तनारदं तस्यैव, तण्डुलप्रस्थीयं त्रिपाठिराधावल्लभस्य। यथा वा ममैव प्रशान्तराघवं लीलाभोजराजञ्च। नाटकानां संख्या भूयसी।

अयं तावद् दिङ्मात्रनिर्देशः। सविस्तरं मदुपज्ञे विंशशताब्दी-संस्कृतग्रन्थसूचीपत्रे द्रष्टव्यम्।

वृत्तं प्रकरणादीनां यथा साहित्यदर्पणे।
व्यवस्थितं तथा ग्राह्यं विमतिर्नात्र कापि मे।।३८।।

लक्षणेऽप्युपरूपाणां ननु साहित्यदर्पणः।
प्रमाणमेकमात्रं तन्निर्मितिभावितात्मनाम्।।३९।।

यद्यपि नाटकमेव सम्प्रति प्रचुरतया प्रणीयते रूपकपक्षधरैः। तथैवोपरूपभेदो नाटिका संख्यादृष्ट्या भूयसी परिलक्ष्यते। प्रहसनञ्चापि व्यभिचरितलक्षणमिदानीं लोकप्रियताया धुरि तिष्ठति। भेदान्तराणि तावद्रूपकोपरूपकयोः सङ्कीर्णान्येव।

श्रीधरभास्करवर्णेकर का विवेकानन्दविजयम्, विश्वेश्वरविद्याभूषण का चाणक्यविजयम्, राधावल्लभ-प्रणीत प्रेमपीयूषम्, वीरेन्द्रकुमारभट्टाचार्य-प्रणीत सिद्धार्थचरितम्। इसी प्रकार **न्याय-सत्यादिविजयपरक** नाटकों में जैसे रामाशीषपाण्डेय-कृत शिखाबन्धनम् तथा कर्णार्जुनीयम्, पद्मशास्त्री का बँगलादेशविजयम्, भास्कराचार्यत्रिपाठिकृत स्नेहसौवीरम्, जग्गू बकुलभूषण-कृत मणिहरणम् तथा जग्गू शिङ्गरार्यकृत शिविवैभवम्!

लोकमंगलपरक नाटक जैसे गोपालशास्त्री का नारीजागरणम्, यतीन्द्रविमल चौधरी का भारतलक्ष्मीः, पुल्लेल रामचन्द्रुडु का सुसंहतभारतम्, सदाशिव तीर्थ का सनातनधर्मसर्वस्वम्, वनेश्वरपाठक का रक्तदानम् एवं विभ्रान्तनारदम् तथा राधावल्लभत्रिपाठी का तण्डुलप्रस्थीयम्। अथवा जैसे मेरी ही कृति प्रशान्तराघवम् तथा लीलाभोजराजम्।

नाटकों की संख्या प्रभूत है।

यह तो दिङ्मात्र-निर्देश है। मेरे ग्रंथ **विंशशताब्दीसंस्कृतग्रन्थसूचीपत्रम्** में इन्हें विस्तारपूर्वक देखना चाहिये।

प्रकरण आदि (दशरूपक-भेदों) का इतिवृत्त जैसा व्यवस्थित है

साहित्यदर्पण में वैसा ही ग्रहण (स्वीकार) करना चाहिये। उस विषय में मेरा कोई वैमत्य नहीं है।।३८।।

उपरूपकों के लक्षण में भी निश्चय ही, एकमात्र प्रमाण साहित्यदर्पण ही है, उनके प्रणयनार्थ उत्कण्ठित रचनाकारों के लिये।।३९।।

यद्यपि रूपक-रचना के पक्षधरों द्वारा इस समय **नाटक** ही प्रचुरता के साथ लिखे जा रहे हैं (अन्य रूपक-भेद नहीं) उसी प्रकार, उपरूपकों का भेद-विशेष **नाटिका** संख्या की दृष्टि से सर्वाधिक दिखाई पड़ रही है।

प्रहसन भी, जिसके लक्षणानुपालन में एकरूपता नहीं बरती जा रही है, इस समय लोकप्रियता के शिखर पर विद्यमान है। रूपक तथा उपरूपक के अन्यान्य भेद तो (रचना की दृष्टि से) प्रायः संकीर्ण ही हैं।

तत्र प्रकरणं यथा राधावल्लभप्रणीतं तण्डुलप्रस्थीयम्। भाणो यथा ममैव फण्टूस- (प्रत्यूष) चरितभाणः।

व्यायोगसमवकारडिमेहामृगवीथ्यङ्कोदाहरणानि गवेषणीयानि। व्यभिचरितलक्षणानां प्रहसनानामपि संख्या भूयसी। तत्र मुकुन्दरामशास्त्रि-नारायणशास्त्रिकाङ्कररमाकान्तशुक्ल-राधावल्लभ-सुन्दरराज-ओगे-टिपरीक्षिच्छर्म-पूजालाल-घनश्यामत्रिवेदिहरिदत्तशर्म-रामकृष्णमूर्ति-कृष्णलाल-शिवप्रसादभारद्वाज-रामकिशोरमिश्र-वेदकुमारीप्रभृतीनां प्रहसनानि महीयन्ते।

मदुपज्ञेषु प्रायेण द्विषष्टिमितेष्वेकाङ्केषु भूयांसि प्रहसनान्येव। तद्यथा-नवरसप्रहसनं, स्वप्नाज्जागरणं वरम्, इन्द्रजालम्, मोदकं केन भक्षितम्, वाणीघटकमेलकम्, बधिरप्रहसनम्, साक्षात्कारः, मण्डूकप्रहसनम्, प्रतिभापरीक्षणम्, वादनिर्णयनम्, संवाददातृसम्मेलनम्, प्रत्यक्षरौरवम्, क्रीतानन्दम्, स्वयंवरकेन्द्रम्, शारदावमाननञ्चेति।

अथैकाङ्किसन्दर्भः-

हिन्दीप्रभृतिभाषासु भारतीयासु साम्प्रतम्।
लघुनाट्यं यदेकाङ्कि सर्वाभीष्टं महीयते।।४०।।

देववाच्यपि तन्नूनं तद्वदेव प्रतिष्ठितम्।
नियन्त्रितं न तज्ज्ञेयमुपरूपकलक्षणैः।।४१।।

नायकोऽत्र भवेद्भूपः पण्डितः पामरोऽथवा।
दिव्योऽदिव्योऽथवाऽन्योऽपि शिक्षकोभिक्षुको यतिः।।४२।।

योऽपि कश्चिद् भवेन्नेता पुरुषो महिलाऽपि वा।
यादृशञ्चापि वृत्तं स्यान्नाट्यकृत्प्रतिभाश्रितम्।।४३।।

उनमें **प्रकरण** का उदाहरण है राधावल्लभ-प्रणीत तण्डुलप्रस्थीयम्। **भाण** जैसे मेरी ही कृति फण्टूस (प्रत्यूष) चरितभाणः।

व्यायोग, समवकार, डिम, ईहामृग, वीथी तथा अङ्क के उदाहरण गवेषणीय (ही) हैं। व्यभिचरित लक्षणों वाले प्रहसनों की संख्या (अवश्य ही) पुष्कल है। उनमें मुकुन्दराम शास्त्री, नारायणशास्त्री काङ्कर, रमाकान्तशुक्ल, राधावल्लभ, सुन्दरराज, ओगेटि परीक्षित शर्मा, पूजालाल, घनश्यामत्रिवेदी, हरिदत्तशर्मा, रामकृष्णमूर्ति, कृष्णलाल, शिवप्रसादभरद्वाज, रामकिशोरमिश्र तथा वेदकुमारी आदि के प्रहसन महत्त्वपूर्ण हैं।

मेरे द्वारा लिखे गये प्रायः **बासठ** एकांकियों में अधिकांश तो **प्रहसन कोटि** के ही हैं। जैसे-नवरसप्रहसनम्, स्वप्नाज्जागरणं वरम्, इन्द्रजालम्, मोदकं केन भक्षितम्, वाणीघटकमेलकम्, बधिरप्रहसनम्, साक्षात्कारः, मण्डूकप्रहसनम्, प्रतिभापरीक्षणम्, वादनिर्णयनम्, संवाददातृसम्मेलनम्, प्रत्यक्षरौरवम्, क्रीतानन्दम्, स्वयंवरकेन्द्रम् तथा शारदावमाननम्!

अब **एकाङ्की** का सन्दर्भ-

हिन्दी आदि भारतीय भाषाओं में इस समय **एकाङ्की** नामक जो, सबको प्रिय लगने वाला लघुनाट्य प्रतिष्ठित है।।४०।।

वही, निश्चित रूप से, देववाणी संस्कृत में भी उसी प्रकार प्रतिष्ठित हो चुका है। परन्तु उसे (किसी संस्कृत) उपरूपक के लक्षण से (सर्वात्मना) नियंत्रित नहीं जानना चाहिये।।४१।।

एकांकी में राजा, पण्डित अथवा पामर (ग्राम्य जन) दिव्य अथवा अदिव्य-कोटिक कोई भी पात्र, अन्यान्य शिक्षक, भिक्षुक या संन्यासी।।४२।।

पुरुष अथवा महिला-जो कोई भी हो, नेता हो सकता है। एकांकी का इतिवृत्त भी जिस किसी भी प्रकार का हो सकता है, परन्तु हाँ, उसे नाट्यकार की प्रतिभा से समन्वित होना चाहिये।।४३।।

एकाहचरितञ्चैव लघुनाट्ये प्रयोजयेत्।
संवादबहुला भाषा व्यङ्ग्यगर्भाऽत्र सम्मता।।४४।।

रसः कोऽपि भवेदङ्गी नाट्यवृत्ताऽनुगुण्यतः।
लक्ष्यमेकं परं तस्य भवेद्रङ्गप्रसादनम्।।४५।।

नाट्यशिल्पादिसम्बद्धं वैलक्षण्यं नवं नवम्।
एकाङ्केऽस्मिन्प्रयोक्तव्यं नाट्यकर्त्रा यथामति।।४६।।

एतत्सर्वमप्येकाङ्किवैशिष्ट्यं पूर्वोक्तनाट्यकाराणां लघुनाट्येषु यत्नतोऽन्वेषणीयम्। भूपनायकं यथा मम नवरसप्रहसनम्। शिक्षकनायकं यथा ममैव वाणीघटकमेलकम्। पण्डितनायकं यथा मम मण्डूकपण्डितम्। पामरनायकं यथा ममैवेन्द्र[illegible]। महिलानायकं यथा स्वयंवरकेन्द्रं स्वप्नाज्जागरणं वरञ्चेति।

नाटिकाऽपि पूर्वमेव चर्चिता मया। तत्राऽयं विशेषः,

स्त्रीप्राया चतुरङ्का स्यान्नाटिका यदुदाहृता।
पूर्ववर्तिभिराचार्यैस्तन्मह्यमपि रोचते।।४७।।

भूपेतरोऽपि नेता स्यात्पुरुषः किञ्च सम्मता।
दिव्यसद्गुणसम्भारभूषिता कापि भामिनी।।४८।।

अन्यन्निखिलवैशिष्ट्यं दशरूपकवर्णितम्।
नाटिकारचनायान्तु ग्राह्यमेव यथायथम्।।४९।।

सुस्पष्टम्। भूपमहिषीवृत्तविरहिताऽपि नाटिका साम्प्रतिके युगे युज्यत एवेति विशेषः। यथा ममैव प्रमद्वरायां महर्षिपुत्रो रुरुर्नायकः। विद्योत्तमानाटिकायाञ्च कालिदासापरसंज्ञो देवदत्तो नायकः।

विद्युन्माला-पद्मावती-रहस्यमयी-सावित्री-वेलोर्वशी-चाण्डालिका-ऽम्रपाली-कादम्बरीप्रभृतिरचनासु नायकव्यवस्था भिन्नैव दृश्यते।

इस लघुनाट्य में, एक ही दिन में घटी हुई घटना का वर्णन किया जाना चाहिये। भाषा संवाद-बहुल होनी चाहिये। व्यङ्ग्यगर्भा भाषा हो तो फिर क्या कहना??४४??

एकांकी के इतिवृत्त के ही अनुकूल कोई भी रस अंगीरस हो सकता है। परन्तु उस रस का एकमात्र लक्ष्य होना चाहिये-रंग का प्रसादन (न कि दर्शकों का उद्वेग)।।४५।।

नाट्यकार को, अपने बुद्धिवैभव के मुताबिक, इस एकांकी में नाट्यशिल्पादि से सम्बद्ध नया-नया वैलक्षण्य प्रयुक्त करना चाहिये।।४६।।

यह सारा का सारा एकांकि-वैशिष्ट्य पूर्वोद्धृत नाट्यकारों के लघुनाट्यों में यत्नपूर्वक खोजना चाहिये।

भूपनायक एकांकी जैसे मेरा नवरसप्रहसनम्। **शिक्षकनायक** एकांकी जैसा मेरा ही वाणीघटकमेलकम्। **पण्डितनायक** जैसे मेरा ही मण्डूकपण्डितम्। **पामरनायक** जैसे मेरा ही इन्द्रजालम्। **महिलानायक** जैसे मेरी ही कृतियाँ स्वयंवरकेन्द्रम् तथा स्वप्नाज्जागरणं वरम्।

नाटिका की भी चर्चा मैं पहले ही कर चुका हूँ। उस सन्दर्भ में कुछ विशेष वक्तव्य इस प्रकार है-

पूर्वनाट्याचार्यों द्वारा जो यह कहा गया है कि 'नाटिका स्त्रीपात्र-बहुल तथा चतुरंकिका होनी चाहिये, वह मुझे भी (पूर्णतः) अभीष्ट है।।४७।।

(परन्तु) नाटिका का नायक भूपेतर पुरुष भी होना चाहिये। यही नहीं, दिव्य सद्गुणों के सम्भार से विभूषित कोई लोकवन्द्य पुरन्ध्री भी नाटिका का नायक हो सकती है।।४८।।

दशरूपक में वर्णित, नाटिका का अन्य सारा वैशिष्ट्य, आज की नाटिका की रचना में, जैसा का तैसा, ग्रहण करना चाहिये।।४९।।

अभिप्राय सुस्पष्ट है। राजा और रानी की कहानी से विरहित भी नाटिका आज के युग में उचित ही है, यह विशेष आग्रह है। जैसे मेरी ही नाटिका प्रमद्वरा में रुरु नायक है जो महर्षि प्रमति का पुत्र है (किसी राजा का पुत्र नहीं) (मेरी ही) विद्योत्तमानाटिका में भी **कालिदास** अपर संज्ञा वाला देवदत्त नायक है।

विद्युन्माला, पद्मावती, रहस्यमयी, सावित्री, वेला, उर्वशी, चाण्डालिका, आम्रपाली तथा कादम्बरीप्रभृति (नाटिकाकोटिक) रचनाओं में नायक-व्यवस्था भिन्न ही दीखती है।

अथ श्रव्यकाव्यसन्दर्भः-

श्रव्यकाव्यमथेदानीं प्राप्तक्रमं निरूप्यते।
गृह्यते हि यदानन्दो रसिकैः श्रुतिसङ्गतः।।५०।।

पद्यगद्यमयं श्रव्यं मिश्रञ्चेति त्रिधास्थितम्।
पदैर्नियमितं पद्यं गद्यं यद्धि निगद्यते।।५१।।

उभयोर्मिश्रणं मिश्रं गद्यपद्यसमन्वितम्।
प्राक्तनैः कैश्चनाचार्यैश्चम्पूरित्यपि कथ्यते।।५२।।

नियताक्षरमाख्यातं नाट्यशास्त्रकृता पुनः।
पद्यं, गद्यं तथैवेदं घुष्टमनियताक्षरम्।।५३।।

चतुर्भिश्च समैः पादैर्विषमैर्वा नियम्यते।
समवृत्तं क्रमेणेदं विषमञ्च समुच्यते।।५४।।

आदिपादस्तृतीयेन चतुर्थेन द्वितीयकः।
यत्र साम्यं भजेदर्धसमवृत्तं तदुच्यते।।५५।।

अब **श्रव्यकाव्य** का सन्दर्भ-

अब, दृश्य के बाद श्रव्य का क्रम होने के कारण श्रव्यकाव्य का निरूपण किया जा रहा है जिसका कर्णेन्द्रिय-ग्राह्य आनन्द सहृदयों द्वारा ग्रहण किया जाता है।।५०।।

श्रव्यकाव्य पद्य-गद्यमय तथा मिश्र-तीन प्रकार का होता है। पदों अर्थात् चार चरणों द्वारा नियमित होने के कारण 'पद्य' को **पद्य** कहते हैं तथा प्रातिभ कथन के कारण 'गद्य' को **गद्य** कहते हैं।।५१।।

गद्य एवं पद्य से समन्वित दोनो (शैलियों) का मिश्रण **मिश्र** कहा जाता है। पुराने कुछेक आचार्यों द्वारा वही **चम्पू** भी कहा जाता है।।५२।।

नाट्यशास्त्रकार (आचार्य भरत) ने तो पद्य को **नियताक्षर** तथाउसी प्रकार, इस गद्य को **अनियताक्षर** घोषित किया है।।५३।।

सम (समान रूप वाले)अथवा विषम (असमान रूप वाले) चार चरणों में व्यवस्थित यह पद्य क्रमशः समवृत्त तथा विषमवृत्त कहा जाता है।।५४।।

जब प्रथम चरण तृतीय के समान हो तथा द्वितीय चतुर्थ के तो (उस तीसरे भेद को) अर्ध समवृत्त कहते हैं।।५५।।

रचना बन्धश्शय्येति मिथः पर्यायभूताः। निबध्यते इति बन्धः। सोऽपि द्विविधः-पद्यबन्धो गद्यबन्धश्च। यत्रोभयोः सम्मिश्रणं तत्र मिश्रबन्धः। स एव चम्पूरित्यभिधीयते। पादैश्चतुर्भिर्नियमितत्वात् पद्यम्। न तथेति गद्यम्।

तमेव बन्धभेदमाचार्यभरतो चूर्णनिबद्धशब्दाभ्यामनियताक्षर-प्रमाण-नियताक्षरशब्दाभ्यां वा बोधयति। तद्यथा-

एभिः शब्दविधानैर्विस्तारव्यञ्जनार्थसंयुक्तैः।
पदबन्धाः कर्तव्या निबद्धबन्धास्तु चूर्णा वा।।
विभक्त्यन्तं पदं ज्ञेयं निबद्धं चूर्णमेव च।
तत्र चूर्णपदस्येह संनिबोधत लक्षणम्।।
अनिबद्धपदच्छन्दस्तथा चानियताक्षरम्।
अर्थापेक्षाक्षरस्यूतं ज्ञेयं चूर्णपदं बुधैः।।
निबद्धाक्षरसंयुक्तं यतिच्छेदसमन्वितम्।
निबद्धं तु पदं ज्ञेयं प्रमाणनियताक्षरम्।।-नाट्य० १८

नियतानि निश्चितानि अक्षराणि यस्मिन् स बन्धो नियताक्षरबन्धः। स्थानदृष्ट्या संख्यादृष्ट्या चेति शेषः। स एव बन्धः पद्यम्। समवृत्त-पद्येऽक्षराणां संख्या प्रतिपादं नियता भवति। लघुत्वगुरुत्वदृष्ट्या तेषां स्थानमपि नियतं भवति। तस्मादेव नियताक्षरमुच्यते पद्यम्। एवं सत्येव प्रवाहलयमाधुर्यश्रुतिसुखादिगुणाः पद्ये समुद्भवन्ति। भरतमतेनेदमेव प्रमाणनियताक्षरमिति। प्रमाणेन च्छन्दश्शास्त्रप्रमाणेन नियतान्यक्षराणि यस्मिंस्तत् प्रमाणनियताक्षरम्। प्रमाणं यथा-ननमयययुतेयं मालिनी भोगिलोकैरिति मालिनीलक्षणम्।

रचना, बन्ध तथा शय्या-ये सारे शब्द परस्पर पर्यायभूत हैं। जो निबद्ध किया जाय उसे **बन्ध** कहते हैं। वह भी दो प्रकार का होता है-**पद्यबन्ध** तथा **गद्यबन्ध**। जिस बन्ध में दोनों का सम्मिश्रण हो उसे **मिश्रबन्ध** कहते हैं। उसी को चम्पू भी कहा जाता है। चार चरणों द्वारा व्यवस्थित होने के कारण पद्य संज्ञा होती है। जिसमें चरण-व्यवस्था नहीं होती उसे गद्य कहते हैं।

उसी बन्धभेद को आचार्य भरत **चूर्ण** एवं **निबद्ध** पदों द्वारा अथवा **अनियताक्षर** तथा **प्रमाणनियताक्षर** पदों द्वारा बोधित करते हैं। जैसा कि,

विस्तारहेतु व्यञ्जनार्थों से संयुक्त इन शब्दविधानों द्वारा पदबन्धों का निर्माण करना चाहिये-निबद्धबन्धों तथा चूर्णों का।।

विभक्ति से अन्त होने वाला होता है पद! यह दो प्रकार का होता है-निबद्ध (बन्ध) तथा चूर्ण (बन्ध) इनमें (सर्वप्रथम) चूर्णपद का लक्षण समझिये।।

अनिबद्ध पदच्छन्दों वाला, अनिश्चित अक्षर (संख्या) वाला तथा अर्थापेक्षानुसारी अक्षर-विस्तार वाला बन्ध विद्वानों द्वारा **चूर्णपद** कहा जाता है।।

निबद्धाक्षरों से युक्त, यतिच्छेद से समन्वित तथा प्रमाणों (छन्दः शास्त्रीयव्यवस्था) के अनुसार नियत अक्षर-संख्यावाला बन्ध **निबद्धपद** कहा जाता है।-नाट्यशास्त्र अ० १८

नियत हैं, निश्चित हैं अक्षर जिसमें वह बन्ध **नियताक्षरबन्ध** होता है। स्थान की दृष्टि से तथा संख्या की दृष्टि से-ऐसा और कहना चाहिये। वही बन्ध **पद्य** कहा जाता है। समवृत्त पद्य में अक्षरों की संख्या प्रत्येक चरण में नियत (समान) होती है। लघुत्व एवं गुरुत्व की दृष्टि से भी उन अक्षरों का स्थान नियत (ही) होता है। इसीलिये पद्य को नियताक्षर कहा जाता है। ऐसा होने पर ही प्रवाह, लय, माधुर्य तथा श्रुतिसुखादि गुण पद्य में (स्वतः) उत्पन्न हो जाते हैं।

भरत के मत से यही **प्रमाणनियताक्षर** (बन्ध) है। प्रमाण द्वारा अर्थात् छन्दश्शास्त्र के प्रमाण द्वारा नियत हैं अक्षर जिसमें उसे कहते हैं-प्रमाणनियताक्षर। प्रमाण का उदाहरण-नगण, नगण, मगण, यगण तथा यगण से युक्त मालिनी होती है। इस छन्द में यतिच्छेद होता है भोगिसंख्या (भोगी का अर्थ है नाग जिनकी संख्या आठ है) अर्थात् आठवें अक्षर के बाद तथा लोकसंख्या (लोक होते हैं सात) अर्थात् सातवें अक्षर के बाद।

उदाहरणं यथा मम जानकीजीवने महाकाव्ये-

तरुणतरणिदीप्तां नीलवक्त्रालकान्तां
निशितकनकभूषां रक्तकौशेयवेषाम्।
त्रिदशयुवतिसौम्यां दिव्यरूपां ददौ तां
सपदि जनकजातां राघवायाऽग्निदेवः।।

अनिबद्धपदच्छन्दस्त्वमनियताक्षरत्वमर्थापेक्षाक्षरस्यूतत्वञ्चेति त्रयं चूर्णवैशिष्ट्यम्। चूर्णमेव गद्यमिति विशेषः। अभिप्रायापेक्षया स्यूतानि प्रयुक्तान्यक्षराणि यस्मिन् स चूर्णबन्धः। तस्मादेवाऽनियताक्षरत्वमपि तस्य। चूर्णकगद्येऽभिप्रायोऽल्पो भवति। ततोऽक्षराणामपि संख्या तत्राऽल्पीयस्येव। उत्कलिकाप्राये पुनरभिप्रायोऽनल्पस्तस्मादक्षरसंख्याऽप्यनल्पातत्र। एतत्सर्दभग्रे सोदाहरणं निरूपयिष्यते। प्रकृतमनुसरामस्तावत्।

।।इति पद्यगद्यवैशिष्ट्यनिरूपणम्।।

अथ पद्यविस्तरनिरूपणम्-

पद्यं पुनर्द्विधा ख्यातं प्रायशः पूर्वसूरिभिः।
मुक्तकादि-प्रबन्धाभ्यां तदिदानीं प्रतन्यते।।५६।।

अथ मुक्तकादिकाव्यसन्दर्भः-

पूर्वाऽपरसन्दर्भाभ्यां मुक्तं पद्यं तु मुक्तकम्।
द्वाभ्यां मिथोऽवसक्ताभ्यां युग्मकं जायते पुनः।।५७।।

पद्यत्रयेण सन्दृब्धं सन्दानितकमुच्यते।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।।५८।।

उदाहरण जैसे मत्प्रणीत जानकीजीवनम् महाकाव्य का यह पद्य-

तरुण भास्कर के समान प्रकाशमयी, घुँघराले तथा काले अलक प्रान्तों वाली, देदीप्यमान स्वर्णाभूषणालंकृत, लाल रेशमी परिधान में सज्जित, देवाङ्गनाओं के समान कमनीय दिव्यरूप वाली उस जनकनन्दिनी को अग्निदेव ने (स्वयं) तत्काल राघव को अर्पित कर दिया।

अनिबद्धपदच्छन्दस्त्व, अनियताक्षरत्व तथा अर्थापेक्षाक्षरानुस्यूतत्व-ये तीन वैशिष्ट्य हैं **चूर्णपद** बन्ध के। चूर्ण ही गद्य है (आचार्य भरत की दृष्टि में) यह विशेष बात है।

अभिप्राय की अपेक्षा से स्यूत किये गये हों, प्रयुक्त किये गये हों अक्षर (कम या ज्यादा) जिसमें उसे **चूर्णबन्ध** कहते हैं। इसीलिये चूर्ण या गद्य में अनियताक्षरता दीखती है।

(परवर्ती) **चूर्णक** गद्य में अभिप्राय लघु होता है अतएव उसमें अक्षरों की संख्या भी अल्प ही होती है। परन्तु **उत्कलिकाप्राय** गद्य में अभिप्राय अनल्प (विस्तृत) होता है, इसलिये उसमें अक्षरों की संख्या भी अनल्प ही होती है। यह सब आगे सोदाहरण व्याख्यात किया जायेगा। पुनः लौटते हैं मूल सन्दर्भ की ओर!

पद्य-गद्य के वैशिष्ट्य का निरूपण समाप्त हुआ।

अब पद्यबन्ध के विस्तार का निरूपण-

पूर्वाचार्यों द्वारा पद्य को पुनः प्रायः दो रूपों में व्याख्यात किया गया है। पहला-मुक्तक आदि (अर्थात् युग्मक, सन्दानितक, कलापक कुलक, शतकादि)

तथा दूसरा-प्रबन्ध। अब उसका निरूपण किया जा रहा है।।५६।।

सर्वप्रथम मुक्तकादि काव्य का सन्दर्भ-

पूर्व एवं पर (पीछे तथा आगे के) सन्दर्भों से मुक्त पद्य को **मुक्तक** कहा जाता है। दो पद्यों का सन्दर्भ यदि परस्पर मिला हुआ हो (पृथक् न हो) तो उसे **युग्मक** कहते हैं।।५७।।

तीन पद्यों का सन्दर्भ परस्पर समन्वित होने पर **सन्दानितक** कहा जाता है तथा चार और पाँच (पद्यों का सन्दर्भ समन्वित होने पर) क्रमशः **कलापक** तथा **कुलक** कहा जाता है।।५८।।

सप्तकं चाष्टकं ख्यातं दशकं विंशतिस्तथा।
पञ्चाशिका शती यद्वा शतकं त्रिशती पुनः।।५९।।

ततः पञ्चशती ख्याता ख्याता सप्तशती तथा।
सहस्त्रकमपि ख्यातं समवाप्तपरम्परम्।।६०।।

तत्र मुक्तक-प्रबन्धाभ्यां पद्यं द्विविधम्। मुक्तं पूर्वापरकथासन्दर्भेण मुक्तं स्वतन्त्रं पद्यं मुक्तकम्। पूर्वापरसन्दर्भैर्ग्रथितं प्रबन्धकाव्यं महाकाव्यादि यथावसरं वक्ष्यते।

अभिनवगुप्तपादस्तु मुक्तकं प्रबन्धकाव्यमध्यस्थितमपि स्वीकरोति। तद्यथाऽसावधिलोचनम्-मुक्तमन्येन नालिङ्गितम्। तस्य संज्ञायां कन्। तेन स्वतन्त्रतया परिसमाप्तनिराकाङ्क्षार्थमपि प्रबन्धमध्यवर्ति मुक्तकमित्युच्यते। ध्वन्या० ३।७ टीका।

यथा वा भूयोऽप्यसावाह स्पष्टतरम्-यदि वा प्रबन्धेष्वपि मुक्तकस्यास्ति सद्भावः। पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम्। यथा-त्वामालिख्य प्रणयकुपिताम् इत्यादिश्लोकः। ध्वन्या० ३।७ टीका।

मुक्तकमतितरां प्रशंसति स्वयं ध्वनिकारोऽपि। तद्यथा-मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते। यथा ह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव। ध्वन्या० ३।७ वृत्तिः।

इसी प्रकार (सन्दर्भ की एकता के आधार पर) सप्तक, अष्टक, दशक, विंशतिका पञ्चाशिका, शती अथवा शतक तथा त्रिशती भी प्रख्यात हैं।।५९।।

इसके बाद पञ्चशती तथा सप्तशती की ख्याति है। सहस्रकम् भी प्रसिद्ध है जिसकी परम्परा (संस्कृत कविता में) प्राप्त होती है।।६०।।

मूलतः तो मुक्तक एवं प्रबन्ध-भेदों से पद्यबन्ध दो प्रकार का होता है। मुक्त अर्थात् पिछले एवं अगले कथा-सन्दर्भ से जो मुक्त हो, स्वतंत्र हो-वह पद्य मुक्त कहा जाता है।

पिछले और अगले सन्दर्भों से ग्रथित (समन्वित) प्रबन्धकाव्य महाकाव्यादि, अवसर आने पर निरूपित किया जायेगा।

अभिनवगुप्तपाद तो मुक्तक (पद्य) को प्रबन्धकाव्य के मध्य में भी स्थित स्वीकार करते हैं। जैसा कि लोचनटीका में उन्होंने कहा है-

मुक्त का अर्थ है दूसरे (पद्य) द्वारा आलिङ्गित न होना। मुक्त पद्य ही मुक्तक है कन् प्रत्यय जुड़ने के कारण। इसलिये, स्वतंत्रतापूर्वक परिसमाप्त होने वाला, निजेतर अर्थ की आकांक्षा न करने वाला (अर्थात् अपने ही अभिप्राय में पर्यवसित) तथा प्रबन्धकाव्य के बीच में (भी) आने वाला मुक्तक कहा जाता है। ध्वन्या० ३।७ की टीका।

जैसा कि उन्होंने आगे पुनः और स्पष्टता के साथ कहा है-प्रबन्धकाव्यों (के बीच) में भी मुक्तक का सद्भाव होता है। पूर्व और पर सन्दर्भों से निरपेक्ष रहते हुए भी जिसके द्वारा रसचर्वणा की जाती है वही है-मुक्तक। जैसे-प्रणयकुपित तुम्हें चित्रित कर इत्यादि (उत्तरमेघ का) पद्य। ध्वन्या० ३।७ की लोचनटीका।

स्वयं ध्वनिकार आनन्दवर्धनाचार्य भी मुक्तक काव्य की अतिशय प्रशंसा करते हैं। उन्हीं के शब्दों में-

मुक्तक काव्यों में भी कविगण, प्रबन्धकाव्यों के ही समान रस-प्रयोगार्थ प्रयत्नशील दीखते हैं। जैसा कि अमरुक कवि के मुक्तक पद्य शृङ्गाररस को प्रवाहित करने वाले, प्रबन्धकाव्य जैसे ही प्रतीत होते हुए ख्यातिप्राप्त हैं। ध्वन्या० ३।७ की वृत्ति।

युग्मकादिविषयं विशदयत्यभिनवगुप्तः-द्वाभ्यां क्रियासमाप्तौ सन्दानितकम्। त्रिभिर्विशेषकम्। चतुर्भिः कलापकम्। पञ्चप्रभृतिभिः कुलकम्। ध्वन्या० ३।७ टीका।

अत्र दृश्यते कश्चिद् विरोधः। सन्दानं तावद्रज्जुः। सा च त्रिभिरेव फालैर्वेष्टिता बलवती भवति। अतएव त्रिभिस्सन्दानितकम् इत्येव युज्यते। यथाह साहित्यदर्पणकारः-

छन्दोबद्धपरं पद्यं तेन मुक्तेन मुक्तकम्।
द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते।।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।

तत्र मुक्तकं यथा ममैव-

तस्मै दत्तवती कथञ्चन शुभे! सन्देशमद्यैव ते
भूयः किन्तु न यामि तस्य सदनं नीरन्ध्रकुञ्जावृतम्।
मां विद्रावयतेऽवलोक्य तरसा पापी कलापी युवा
पश्यैतानि नखक्षतानि मयका यान्याहतान्यार्तया।।

युग्मकं यथा ममैव वामनावतरणमहाकाव्ये-

बकुलैः सुमकोरकाञ्चितैः फललुब्धारुणनेत्रसेवितैः।
फलपातसमुत्थवल्लकीमृदुनादभ्रमदक्षनिःस्वनैः।।
जलचारिविहङ्गमव्रजैः शिशुभेकैश्च गृहाङ्गणीकृतम्।
नलिनीतटमैक्षत क्वचिच्चटुवार्तारतहंसमण्डलम्।।

युग्मक आदि के सन्दर्भ की व्याख्या करते हैं अभिनवगुप्त (जो इस प्रकार है।) दो पद्यों द्वारा (समन्वित रूप से) क्रिया की समाप्ति होने पर सन्दानितक (?) होता है। तीन से विशेषक, चार से कलापक तथा पाँच आदि से कुलक होता है। ध्वन्या० ३।७ की लोचनटीका।

यहाँ एक विरोध सा दीखता है। सन्दान का अर्थ है रज्जु अथवा रस्सी। वह रस्सी तीन ही फालों से बटी गई (अधिक) मजबूत होती है (न कि दो से) इसलिये तीन ही पद्यों के समन्वय से सन्दानितक की परिकल्पना उचित प्रतीत होती है। जैसा कि साहित्यदर्पणकार ने कहा है-

छन्दोबद्ध पदों वाला बन्ध पद्य कहा जाता है। यदि वह (पूर्वापर सन्दर्भों से) मुक्त है तो मुक्तक कहा जाता है। दो पद्यों के समन्वय से युग्मक, तीन के समन्वय से सन्दानितक, चार के समन्वय से कलापक तथा पाँच पद्यों के सन्दर्भ-समन्वय से कुलक कहा जाता है।

अब इनमें मुक्तक का उदाहरण जैसे मेरा ही (यह पद्य)

हे शुभे! उस (तुम्हारे प्रणयी) को तुम्हारा सन्देश तो मैने, जैसे-तैसे आज ही पहुँचा दिया परन्तु आगे पुनः, घने झुरमुटों से घिरे, उसके घर की ओर मैं नहीं जाऊँगी। उसका नई उम्र वाला पापी मोर मुझे देखते ही सरपट

दौड़ा लेता है। देखो न, उसके नाखूनों की खरोंच जो विपत्तिग्रस्त होकर मैंने झेले हैं!

युग्मक का उदाहरण जैसे मेरे ही **वामनावतरणम्** महाकाव्य में-

दानवराज बलि ने (अमरावती में) कहीं पर पुष्करिणी के तट को देखा जो पुष्पकलिकाओं से ओतप्रोत तथा फललोभी कोकिलों द्वारा सेवित बकुल वृक्षों (मौलसिरी) से श्रीमण्डित था तथा (पानी में) फलों के गिरने से उत्पन्न वीणा की मीठी ध्वनि के भ्रमवश चुप्पी साध लेने वाले जलचारी पक्षिसमूहों तथा भेक-शिशुओं द्वारा अपना गृहाङ्गण बनाया जा चुका था और कहीं-कहीं पर चाटुवार्ताओं में डूबे हंसमण्डल से युक्त था।

सन्दानितकं यथा राधावल्लभप्रणीतवसन्तलहर्याम्-

उत्कोचराशिमधिगत्य सुखेन कश्चित् पीत्वा प्रमादमदिरामधिकारमत्तः।
वासन्तिके विहरतीव सदाधिकारी कार्यालयेऽप्यकृतकृत्यकुकृत्यसक्तः।।

यावत्त्वसौ स्फुरति नृत्यति रिङ्गतीव स्फारप्रफुल्लसमदप्रमदासमूहे।
होलोत्सवप्रखरपिञ्जरदिङ्मुखेभ्यः सोल्लासमत्र नगरे स ऋतुर्वसन्तः।।

तावन्मलीमसजुगुप्सितकर्दमानां क्षेपाः शठैश्च विहिता घृणितप्रचारैः।
मर्दैर्विमर्दविकृतैः कृतडम्बरैस्तैः सम्मूर्छिता विषरसेन वसन्तशोभा।।

कलापकं यथा ममैव वामनावतरणे-

विभावसुर्लोकतमोऽपहारकः सनत्कुमारोऽप्यथवा महेश्वरः।
दिदृक्षयाऽयाति मखस्य को न्विति प्रमोहविद्धा दधिरे भृगूत्तमाः।।
विघातशङ्काहतदीनमानसाः प्रयाजका भार्गववंशभास्कराः।
वदन्तु यावत्किल किञ्चिदीहितं बलिः समुत्थाय ससार हर्षितः।।
कमण्डलुं पूर्णजलं सुमेखलां पलाशदण्डं मृगचर्म चासितम्।
मखोपवीतं जटिलां जटामपि मधुस्मितं तं दधतं यथायथम्।।
विलोक्य सौन्दर्यविधानमद्भुतं हृतान्तरालोऽपहृतात्मचेतनः।
विमुग्धचित्तो दितिवंशभास्करो जगाद वाणीं विनतां यशस्विनीम्।।

सन्दानितक का उदाहरण जैसे राधावल्लभ-प्रणीत वसन्तलहरी में (ये पद्य) प्रमादरूपी मदिरा का पान कर अधिकार-मत्त हुआ सा कोई अधिकारी सहजभाव से घूस की धनराशि ऐंठ कर, इस वसन्त वेला में, कार्यालय में धेले भर का भी काम न करता हुआ तथा कुकृत्यों में आसक्त होकर मौज मार रहा है।

अत्यधिक प्रफुल्लित तथा मस्ती में भरी रमणियों की भीड़में चमकता-दमकता, नाचता-कूदता और बलखाता, होलोत्सव में उड़ी अबीर से पिञ्जरित दिशाओं वाला वह वसन्त जब आ धमका उल्लास के साथ इस नगर में।

तभी मैले-कुचैले तथा गन्दे कीचड़ की फेंका-फेंकी शुरू कर दी घृणित उछल-कूद वाले लफंगों ने और विमर्द-विकृत उस भाँगड़ा नाचती भीड़ के कारण मानो वसन्त-लक्ष्मी ही विषरस से मूर्च्छित हो उठी।।

कलापक का उदाहरण जैसे मेरे ही वामनावतरण महाकाव्य में-संसार के अन्धकार का अपहरण करने वाला सूर्य (बालस्वरूप) सनत्कुमार अथवा (साक्षात्) शिव ही-यज्ञ को देखने की इच्छा से आखिर कौन आ रहा है? प्रमोह से बिंधे भृगुवंशी (याजक) ऋषियों ने ऐसा सोचा।

विघ्न-बाधा की आशंका से दीन मनोवृत्ति वाले, यज्ञकर्ता भार्गववंशी ऋषिगण जब तक अपनी आकांक्षा निवेदित करें तब तक (राजा) बलि हर्षित होकर आगे बढ़ा।

पूर्णजल वाले कमण्डलु, सुन्दर मौञ्जी मेखला, पलाशदण्ड, कृष्ण मृगचर्म, यज्ञोपवीत, उलझी हुई जटा तथा मधुर मुस्कान को यथोचित रूप से धारण करने वाले।।

उस अद्भुत सौन्दर्य-विधान को देखकर (बरबस) अपहृत आत्मचेतना वाले तथा वशीकृत चित्तवृत्ति वाले, विमुग्धचित्त दितिवंश-भास्कर बलिने विनम्रताभरी यशस्विनी वाणी प्रकट की।।

अन्यदुदाहरणं यथा ममैव प्रबोधशतके-

त्वन्निर्दयाश्लेषनिमित्तमूर्ध्वप्रोद्यत्करं मां वियतीक्षमाणाः।
कान्तारदेव्यः कथमश्रुबिन्दून् स्थूलाकृतीन् सम्मुमुचुर्दयार्द्राः।।
कथं लिखित्वाधिशिलं प्ररुष्टां त्वां धातुरागैश्चरणार्पितन्ते।
विधातुमैच्छं कथमश्रुपूर्णाऽकुलेक्षणश्चाक्षम एव जातः।।
विलोक्य मेघान्तरितं मृगाङ्कं पूर्णं प्रिये! व्योम्नि विलुप्तधैर्यः।
विलम्बिकेशार्धपरीतवक्त्रं तवाऽस्मरं रामगिरौ कथं वा।।
इतीव तास्ता घटना अनेका वियोगविद्धान्तरसाक्षिभूताः।
सनिर्भराश्लेषमहं प्रवक्ष्ये कान्तेऽधिशय्यं तवकौतुकाय।।

कुलकं यथा तत्रैव वामनावतरणे-

दिव्यं पशुं स विदधेऽक्षतकामधेनुं दिव्यं विहङ्गममसौ कृतवान्सुपर्णम्।
दिव्यां धुनीं द्युतटिनीमथ पारिजातं दिव्यं जुघोष मघवा सुरराजवृक्षम्।।

एक अन्य उदाहरण जैसे मेरे ही **प्रबोधशतक** में-

तुम्हारे निर्दय आश्लेषहेतु ऊपर उठी भुजाओं वाले मुझे आकाश से देखने वाली वनदेवियों ने किस प्रकार स्थूल आकृति वाले अश्रुविन्दुओं को, दयार्द्रभाव से गिराया।

और कैसे रूठी हुई तुम्हें धातुओं के रंग से शिलापट्ट पर चित्रित कर मैने स्वयं को तुम्हारे चरणों पर अर्पित करना चाहा (परन्तु) कैसे अश्रुपूरित अतएव डबडबाई दृष्टि के कारण वैसा नहीं कर सका।

और प्रिये! आकाश में पूर्णचन्द्र को बादलों में छिपा देख कर विलुप्त धैर्य वाला मैं कैसे उस रामगिरि पर लटकती केशराशि से अर्धावगुण्ठित तुम्हारे मुखमण्डल को स्मरण करता रहा।

इस प्रकार, विछोह से बिंधे हृदय की साक्षीभूता उन-उन अनेक घटनाओं को हे प्रिये! मैं तुम्हें शय्या पर प्रगाढ आलिङ्गन में बाँध कर ही, तुम्हारे कौतुकार्थ सुनाऊँगा।

कुलक का उदाहरण जैसे वहीं, वामनावतरण महाकाव्य में-

अक्षत कामधेनु को देवराज इन्द्र ने दिव्यपशु का गौरव प्रदान किया तथा सुपर्ण (गरुड) को दिव्य विहंगम घोषित किया। देव नदी गंगा को दिव्य धुनी तथा पारिजात को दिव्य सुरराजवृक्ष के रूप में प्रतिष्ठित किया।।

दिव्यां लतां स वृतवानथ सोमवल्लीं पेयञ्च सोमरसमध्वरमन्त्रपूतम्।
भक्ष्यं हविष्यममलंञ्च पुरोडशाख्यं दिव्यं क्रतुं विबुधसम्मतसोमयागम्।।
दिव्यं पयोधिमवृणोत्किल दुग्धसिन्धुं दिव्याचलं स विदधे प्रथितं सुमेरुम्।
दिव्यायुधं कुलिशमस्थिकृतं दधीचेर्दिव्यञ्च मासमकरोत्पुरुषोत्तमाख्यम्।।
ऐरावतं विबुधसिन्धुरमश्वरत्नमुच्चैःश्रवोऽभिधमसौ ववृते सुखाय।
दिव्यं मणिं स हरिवक्षसि कौस्तुभाख्यं दिव्यं सरञ्च मधवाऽकृत मानसाख्यम्।।
कृत्वा हिमाचलमसौ विबुधाधिवासं स्वर्गाधिरोहणपथं द्युनदीञ्च गङ्गाम्।
सोपानवीथिमनघां दिवि सारयन्तीं स्वर्गं भुवञ्च मघवा युगपद् बबन्ध।।

सप्तकाऽष्टकदशकविंशतिकाप्रभृतीनि यथा मदुपज्ञे कस्मै देवाय

हविषा विधेमेति कोशकाव्ये। पञ्चाशिका यथा मण्युपाह्वजनार्दन-प्रसादपाण्डेय-विरचितोद्गारपञ्चाशिका। शती यथा छन्दश्शती जनार्दन-पाण्डेयस्यैव। शतकं यथा ममैव मृगमृगेन्द्रान्योक्तिशतकम् शतकान्तराणिच पञ्चविंशतिमितानि। त्रिशती यथा शिवजीवोपाध्यायप्रणीता शतकत्रयनाम्नी। पञ्चशती यथा मदुपज्ञा पञ्चकुल्या। सप्तशती यथा राधासप्तशती रसिकविहारिजोशिनः, स्फूर्तिसप्तशती शिवदत्तशर्मचतुर्वेदिनः। सहस्त्रकं यथा ममैवाभिराजसहस्त्रकम् जगन्नाथपाठक-प्रणीतमार्यासहस्त्रारामम्।

सोमवल्ली को दिव्यलता के रूप में वरण किया और यज्ञ-मंत्रों से पवित्रित सोमरस को दिव्यपेय बनाया। दिव्यभक्ष्य बनाया हविष्यान्न के रूप में प्रयुक्त निर्मल पुरोडाश को तथा दिव्ययज्ञ घोषित किया देवसम्मत सोमयाग को।।

क्षीरसागर को दिव्यसमुद्र घोषित किया और प्रख्यात सुमेरु को दिव्यपर्वत की प्रतिष्ठा दी। महर्षि दधीचि की अस्थियों से निर्मित कुलिश (वज्र) को दिव्यायुध घोषित किया तथा पुरुषोत्तममास को दिव्यमास के रूप में प्रतिष्ठित किया।

ऐरावत को दिव्यगज, उच्चैः श्रवा को दिव्यअश्व के रूप में उन देवराज इन्द्र ने सुखहेतु वरण किया। नारायण के वक्षः स्थल पर विराजमान कौस्तुभ को इन्द्र ने दिव्यमणि तथा मानसरोवर को दिव्य सरोवर घोषित किया।

(इसी प्रकार) देवताओं के निवासभूत हिमालय पर्वत को स्वर्गारोहण का मार्ग तथा देवनदी गंगा को, स्वर्ग की ओर प्रस्थान करती निष्पाप सोपान-वीथी (सीढ़ी) बनाते हुए मघवा (इन्द्र) ने स्वर्ग और पृथ्वी को एक साथ जोड़ दिया।।

सप्तक, अष्टक, दशक तथा विंशतिका आदि का उदाहरण मेरे द्वारा प्रणीत कोशकाव्य **कस्मैदेवाय हविषा विधेम** में उपलब्ध है।

पञ्चाशिका का उदाहरण जैसे जनार्दनप्रसाद पाण्डेय मणि-प्रणीत **उद्गार-पञ्चाशिका**। शती का उदाहरण भी जनार्दनपाण्डेय की ही कृति-**छन्दश्शती** है।

शतक का उदाहरण जैसे मेरी ही रचना-**मृगमृगेन्द्रान्योक्तिशतकम्**। इसी प्रकार मेरे अन्यान्य पच्चीस शतक भी शतक के उदाहरण हैं।

त्रिशती का उदाहरण जैसे शिवजीवोपाध्याय-प्रणीत **शतकत्रयम्**।

पञ्चशती का उदाहरण मेरी रचना-**पञ्चकुल्या**।

सप्तशती का उदाहरण रसिकविहारी जोशी की कृति **राधासप्तशती** तथा शिवदत्तशर्मा चतुर्वेदि-प्रणीत **स्फूर्तिसप्तशती**।

सहस्रक का उदाहरण जैसे मेरी ही काव्यकृति अभिराजसहस्रकम्, जगन्नाथपाठक-प्रणीत आर्यासहस्राराम्।

अथ प्रबन्धकाव्यसन्दर्भः-

पद्यान्तरनिरपेक्षं यथा भवति मुक्तकम्।
पूर्वाऽपरकथापेक्षं प्रबन्धं प्रोच्यते तथा।।६१।।

प्रबन्धकाव्यमेतद्धि नायकाद्यन्तजीवनम्।
वर्णयेच्चेन्महाकाव्यं सर्गबद्धं समुच्यते।।६२।।

कस्यचित्पुरुषार्थस्य साङ्गोपाङ्गसमीक्षणम्।
तच्चाप्यस्ति महाकाव्यमित्येके बुधतल्लजाः।।६३।।

वर्ण्यते किन्तु चेन्नेतुर्जीवनांशो हि केवलम्।
खण्डकाव्यं भवेन्नूनं तदसर्गं लघुक्रमम्।।६४।।

पुरुषार्थविशेषस्याप्यांशिकं यद्धि वर्णनम् ।
नेतुस्तु कस्यचिन्नूनं खण्डकाव्यं तदुच्यते।।६५।।

अथ महाकाव्यलक्षणम्-

सर्गबन्धो महाकाव्यं लोकवन्द्यजनाश्रयम्।
ख्यापयद्विश्वबन्धुत्वं स्थापयद्विश्वमङ्गलम्।।६६।।

नायकस्तत्र देवः स्यात्प्रजाबन्धुरथो नृपः।
चारुचर्योऽथवा कोऽपि सज्जनश्चरितोज्ज्वलः।।६७।।

प्रातस्सन्ध्यानिशीथेन्दुभास्करोदयतारकाः।
वनोद्याननदीसिन्धुप्रपाताद्रिबलाहकाः।।६८।।

ग्रामाश्रमपुराऽरामदुर्गसैन्यरणोद्यमाः।
पुत्रजन्मादिवृत्तान्ताः पामरावाससङ्कथा।।६९।।

इतिवृत्तानुरोधात्तु वर्णनीया न चाऽन्यथा।
प्रसह्य वर्णने तेषां न च तृप्तिर्न वा यशः।।७०।।

अब प्रबन्धकाव्य का सन्दर्भ-

जैसे मुक्तक पद्य (पूर्व एवं पर) पद्यान्तर से निरपेक्ष होता है उसी प्रकार बन्धकाव्य होता है पूर्व एवं परकथा का अपेक्षी।।६१।।

यह प्रबन्धकाव्य यदि (किसी) नायक के जीवन का आद्यन्त वर्णन करता है तो सर्गों में विभक्त उसे **महाकाव्य** कहते हैं।।६२।।

यदि किसी पुरुषार्थ-विशेष की सांगोपांग समीक्षा की जाय तो भी उसे **महाकाव्य** कहते हैं, ऐसा कुछेक श्रेष्ठ विद्वानों का मन्तव्य है।।६३।।

परन्तु यदि किसी नायक के (सम्पूर्ण) जीवन का अंशमात्र वर्णित किया जाय तो निश्चय ही सर्गविहीन तथा लघु-कलेवर वह रचना **खण्डकाव्य** होती है।।६४।।

नायक के जीवन का पुरुषार्थ-विशेष भी (अर्थ, धर्म एवं काम) यदि अंशतः वर्णित किया जाय तो भी वह रचना **खण्डकाव्य** होती है।।६५।।

महाकाव्य का लक्षण-

लोकवन्द्य नायक पर आश्रित, विश्वबन्धुत्व को प्रख्यापित करने वाला तथा विश्वमंगल की स्थापना करने वाला सर्गबन्ध (प्रबन्ध काव्य) महाकाव्य होता है।।६६।।

उस महाकाव्य में नायक (कोई) देवता हो, प्रजावत्सल नरपति हो अथवा समुज्ज्वल चरित वाला तथा सौम्य आचरण वाला कोई सत्पुरुष।।६७।।

प्रातः, सन्ध्या, अर्धरात्रि, चन्द्रोदय, सूर्योदय, नक्षत्रोदय, वन, उद्यान, नदी, सागर, प्रपात, पर्वत, मेघ।।६८।।

गाँव-गिराँव, आश्रम, नगर, आराम, दुर्ग, सैन्य, रणप्रयाण तथा पुत्रजन्मादि के वृत्तान्त एवं झुग्गी-झोपड़ियों की आपबीती।।६९।।

(महाकाव्य के) इतिवृत्त के अनुरोध को दृष्टि में रख कर ही वर्णित करना चाहिये, किसी अन्यरूप (पूर्वाग्रहवश) में नहीं। उनका जबर्दस्ती (अस्वाभाविक) वर्णन करने से न तो (पाठकों को) तृप्ति होगी और नहीं (रचनाकार कवि को) यश प्राप्त होगा।।७०।।

यच्छिवं यच्च सत्यं स्यादथवा लोकमङ्गलम्।
वर्णनीयं प्रकल्प्यापि कथांशीकृत्य सादरम्।।७१।।

सर्गा अष्टाधिकाः सन्तु कथाविस्तृतिसम्मताः।
अष्टत्रिगुणतां यावत्सर्गसंख्या प्रथीयसी।।७२।।

नोद्वेगः कविना कार्यः पाठकानां रसात्मनाम्।
सर्गसंख्यादिविस्तारैर्वर्णनैर्वाऽनपेक्षितैः।।७३।।

लोकवृत्तं न हातव्यं मूलवृत्तोपकारकम्।
लोकचित्रणगर्भं हि महाकाव्यं महीयते।।७४।।

त्रयाणां पुरुषार्थानां कश्चिदेको भवेद्ध्रुवम्।
महाकाव्यफलं रम्यं धर्मकामार्थसम्मतम्।।७५।।

शृङ्गारवीरशान्तानां कश्चिदन्यतमो रसः।
सयत्नमङ्गीकर्तव्यः कविना प्रतिभावता।।७६।।

छन्दोऽलङ्कारसन्दर्भा भूरिवैविध्यमण्डिताः।
महाकाव्ये प्रयोक्तव्या भावुकानां प्रतुष्टये।।७७।।

लोकोत्तरगुणादर्शः पुरुषो नायको भवेत्।
महीयसी पुरन्ध्री वा नाऽत्र कार्या विचारणा।।७८।।

जो (लोक के लिये) कल्याणकारी हो, जो सत्य हो अथवा लोकमंगलकर हो ऐसी घटनाओं को, चाहे कल्पना ही क्यों न करनी पड़े, मूलकथा का अंश बना कर, आदरपूर्वक वर्णित करना चाहिये।।७१।।

सर्ग आठ से अधिक हों (परन्तु) कथा-विस्तार के सानुपातिक हों। (मेरी दृष्टि में) आठ का तिगुना अर्थात् चौबीस तक सर्गसंख्या उचित मानी जायेगी (इससे अधिक नहीं)।।७२।।

रसानुभूति के लिये उत्कण्ठित पाठकों का, कवियों द्वारा सर्गसंख्यादि के (अनपेक्षित) विस्तार तथा अप्रासंगिक वर्णनों द्वारा, उद्वेग नहीं किया जाना चाहिये।।७३।।

मूल कथा का उपकार करने वाले लोकवृत्तों का परित्याग नहीं करना चाहिये (वस्तुतः) लोकचित्रण से भरे-पुरे महाकाव्य ही प्रशंसनीय होते हैं।।७४।।

धर्म, अर्थ, काम-इन तीन पुरुषार्थों में से कोई एक निश्चित रूप से महाकाव्य का रमणीय फल (लक्ष्य) होना चाहिये।।७५।।

प्रतिभाशाली कवि द्वारा शृङ्गार, वीर एवं शान्त में से किसी एक को (महाकाव्य का) अंगी रस यत्नपूर्वक प्रतिष्ठित करना चाहिये।।७६।।

प्रभूत विविधता से श्रीमण्डित छन्दों एवं अलंकारों के सन्दर्भ, पाठकों की हार्दिक तुष्टि के लिये (कवियों द्वारा) महाकाव्य में प्रयुक्त किये जाने चाहिये।।७७।।

लोकोत्तर गुणों एवं (उच्च) आदर्शों वाला कोई पुरुष नायक होना चाहिये

या फिर कोई महीयसी महिला! इस सन्दर्भ में (स्त्री-पुरुष होने का) विचार नहीं करना चाहिये।।७८।।

कथावैशिष्ट्यमालक्ष्य समज्ञां नायकस्य वा।
करणीयं महाकाव्यस्याभिधानं यशस्करम्।।७९।।

प्रतिष्ठापयितुं नूत्नं महाकाव्ये स्वयं कविः।
आचार्यप्रतिभो नूनं यदि वा भवति क्षमः।।८०।।

लोकवन्द्यजनाश्रयं महाकाव्यं यथा झाँसीश्वरीतिलकगान्धिवल्लभ-सुभाष-जवाहरविवेकानन्दटॉल्सटायलेनिनदयानन्देन्दिराराजीवादिसमाश्रितं महाकाव्यजातम्।

विश्वमङ्गलाश्रयं महाकाव्यं यथा माधवभट्टराइप्रणीतं सत्यसाईचरितम्, बलभद्रप्रसादशास्त्रिप्रणीतं भागीरथीदर्शनम्, दूताञ्जनेयम्, मल्लिकार्जुन-परडुविरचितं वसवभास्करोदयम्, रेवाप्रसादद्विवेदिप्रणीतमुत्तरसीताचरितम्, अभिराजराजेन्द्रविरचितं जानकीजीवनम् वामनावतरणञ्च, वसन्तत्र्यम्बक-शेवडे-प्रणीतं शुम्भवधम्, विष्णुदत्तशर्मप्रणीतं गुरुनानकदेवचरितम्, रामभद्राचार्यप्रणीतं भार्गवराघवीयम्, कृष्णप्रसादधिमिरेप्रणीतं श्रीकृष्ण-चरितामृतम्, क्षमारावविरचितं ज्ञानेश्वरचरितम्, तुकारामचरितञ्चेत्येवमादीनि।

अष्टसर्गात्मकं महाकाव्यं यथा श्रीनिवासरथप्रणीतं बलदेवचरितम्, चतुर्विंशतिसर्गात्मकं च स्वातन्त्र्यसम्भवं सनातनकवेः। सर्गसंख्याविस्तारो यथापरीक्षिच्छर्मप्रणीते श्रीमत्प्रतापराणायने यत्राऽशीतिमिताः सर्गा विद्यन्ते।

लोकवृत्तं यथा मदुपज्ञे जानकीजीवने सीताशैशववर्णनं, प्राजापत्य-विधिना सीतारामविवाहवर्णनं साकेतान्तः पुरे होलोत्सववर्णनम्।

महिलानायकं महाकाव्यं यथा विष्णुदत्तशुक्लस्य सौलोचनीयम्, सावित्रीचरितमात्मारामशास्त्रिणः, उर्मिलीयम् श्रीनारायणशुक्लस्य, यशोधरामहाकाव्यम् ओगेटिपरीक्षिच्छर्मणः, झाँसीश्वरीचरितं सुबोध-चन्द्रपन्तस्य, राधाचरितम् कालिकाप्रसादशुक्लस्य, सीताचरितं रेवा-प्रसादद्विवेदिनः, जानकीजीवनं ममैवाऽभिराजराजेन्द्रस्य, इन्दिराजीवनं बलभद्रशास्त्रिणः, जगदम्बिकावैभवम् भीमकान्तपन्थिनः।

(महाकाव्य की) कथा की विशेषता को दृष्टि में रखकर अथवा नायक की कीर्ति को महत्त्व देते हुए महाकाव्य का यशस्कर नाम रखना चाहिये।।७९।।

अथवा आचार्य-सरीखी प्रतिभा वाला कवि, निश्चित रूप से स्वयमेव (अपने महाकाव्य में) कुछ भी अभिनव (विलक्षण) प्रतिष्ठित करने में समर्थ होता है।।८०।।

लोकवन्द्यजनाश्रय महाकाव्य जैसे झाँसीश्वरी, तिलक, गान्धी, वल्लभ, सुभाष, जवाहर, विवेकानन्द, टॉल्सटॉय, लेनिन, दयानन्द, इन्दिरा तथा राजीव आदि पर आश्रित महाकाव्य-समूह।

विश्वमंगलाश्रय महाकाव्य जैसे माधवभट्टराई-प्रणीत सत्यसाईचरितम्, बलभद्रप्रसादशास्त्रि-प्रणीत भागीरथीदर्शनम् तथा दूताञ्जनेयम्, मल्लिकार्जुन परडिङ्-प्रणीत बसवभास्करोदयम्, रेवाप्रसादद्विवेदि-प्रणीत उत्तरसीताचरितम्, अभिराजराजेन्द्र-प्रणीत जानकीजीवनम् तथा वामनावतरणम्, वसन्तत्र्यम्बक शेवडे-प्रणीत शुम्भवधम्, विष्णुदत्तशर्म-प्रणीत गुरुनानकदेवचरितम्, रामभद्राचार्यप्रणीत भार्गवराघवीयम्, कृष्णप्रसादधिमिरे-प्रणीत श्रीकृष्णचरितामृतम्, क्षमाराव-प्रणीत ज्ञानेश्वरचरितम् तथा तुकारामचरितम्। इत्यादि।

अष्टसर्गात्मक महाकाव्य जैसे श्रीनिवासरथ-प्रणीत बलदेवचरितम्, चौबीससर्गात्मक सनातनकवि का स्वातन्त्र्यसम्भवम्। सर्गसंख्या का विस्तार जैसे परीक्षित् शर्म-प्रणीत श्रीमत्प्रतापराणायनम् जिसमें कुल अस्सी सर्ग हैं।

लोकवृत्त जैसे मेरे ही महाकाव्य जानकीजीवनम् में सीता का शैशववर्णन, प्राजापत्य-विधि से सीता और राम का विवाह-वर्णन तथा साकेत के अन्तःपुर में होलिकोत्सव का वर्णन!

महिला-नायक वाले महाकाव्य जैसे विष्णुदत्तशर्म-कृत सौलोचनीयम्, आत्मारामशास्त्रि-प्रणीत सावित्रीचरितम्, श्रीनारायणशुक्ल का उर्मिलीयम्, ओगेटिपरीक्षित् शर्म का यशोधराचरितम्, सुबोधचन्द्रपन्तकृत झाँसीश्वरीचरितम्, कालिकाप्रसादशुक्ल-कृत राधाचरितम् रेवाप्रसादद्विवेदि-प्रणीत उत्तरसीताचरितम्, अभिराजराजेन्द्र-प्रणीत (मेरा ही) जानकीजीवनम्, बलभद्रशास्त्रि-प्रणीत इन्दिराजीवनम्, भीमकान्तपंथी-प्रणीत जगदम्बिकावैभवम्।

यच्च राधावल्लभत्रिपाठिना भाषार्थचमत्कृति-कविदृष्टि-बन्ध-रीतीन्द्रियाणि आधृत्य काव्यविधाविभाजनम् (अभिनव० ३।१।२) इति ब्रुवता काव्यभेदनिरूपणं कृतं तत्पूर्वकाव्यशास्त्रपरम्परापरीहारवशात् पाठकान् द्वैधग्रस्तान् कुर्यादिति चिन्त्यम्। कोविदानाम्पुनः प्रीतिकरमेव।

यच्च तेन महाकाव्यं परिभाषितम्-पद्यात्मकं समग्रजीवननिरूपणपरं

महाकाव्यम्। गीतैतिह्यपुराणलोककथाभेदादस्य नानात्वम् इति (अभिनव० ३।१।३) तदपि सहृदयपाठकापेक्षाऽपूरणपरमेव प्रतीयते। सिद्धान्ता नात्मतोषायाऽपितु सहृदयपरितोषाय स्युरिति दिक्।

यच्च द्विवेदिरहसविहारिणोदितम्-

सर्गैर्वृत्तैश्च बद्धं सहृदयहृदयाह्लादिशब्दार्थरम्यं
संवादैश्चोच्चशिल्पैः सततरसमयं ग्रन्थिमुक्तं समृद्धम्।
पात्रं स्याद्यस्य मुख्यं परमगुणयुतं लोकविख्यातवृत्तं
भव्यं लोकस्वभावं महदपि महतां तन्महाकाव्यमास्ते।।
तत्सर्वं ग्राह्यमेव महाकाव्यवैशिष्ट्यप्रकाशनक्षमत्वात्।

और जो राधावल्लभ त्रिपाठी ने-भाषाचमत्कृति, कविदृष्टि, बन्ध, रीति, इन्द्रिय को आधार मानकर काव्यविधा का विभाजन सम्भव है- ऐसा कहते हुए काव्य-भेदों का निरूपण किया है, वह पूर्व काव्यशास्त्रीय परम्पराओं की उपेक्षा करने के कारण पाठकों को संशयग्रस्त बना सकताहै, अतएव चिन्त्य है। हाँ, विद्वज्जनों के लिये भले ही प्रीतिकर हो।

और जो उन्होंने महाकाव्य को परिभाषित किया है-समग्रजीवन का निरूपण करने वाला पद्यबन्ध महाकाव्य है। गीत, ऐतिह्य, पुराण तथा लोककथा की दृष्टि से उसका वैविध्य संभव है (अभि० ३।१।३) वह लक्षण भी सहृदय पाठकों की (महाकाव्य का सांगोपांग लक्षण जानने की) अपेक्षा को अपूर्ण करने वाला ही प्रतीत होता है।

सिद्धान्त (मात्र) अपनी सन्तुष्टि के लिये नहीं, प्रत्युत सहृदयों के परितोषार्थ होने चाहिये। इतना ही पर्याप्त है।

और जो रहसविहारी द्विवेदी ने कहा-सर्गों एवं वृत्तों में निबद्ध, सहृदय-हृदयाह्लादी शब्दार्थ-समष्टि से रमणीय, संवादों एवं उत्कृष्ट शिल्पों से निरन्तर रसमय, ग्रन्थिमुक्त, समृद्ध, लोकविख्यात कथानक वाला, चरित्रचित्रण की प्रधानता से युक्त, परमगुणयुक्त, भव्य लोकस्वभाव का प्रदर्शक, श्रेष्ठों में भी श्रेष्ठ जो हो, उसे महाकाव्य कहते हैं।

यह सब ग्राह्य है महाकाव्य का वैशिष्ट्य बता सकने के कारण!

अथ खण्डकाव्यादिलक्षणम्-

कस्यचित्पुरुषार्थस्य वर्णनन्तु यदांशिकम्।
जीवनस्याथवा नेतुः खण्डकाव्यं तदुच्यते।।८१।।

खण्डकाव्यमिदञ्चैव स्वेतिवृत्तानुरोधतः।
विविधान्यभिधानानि पृथगर्थानि गच्छति।।८२।।

दूतकाव्यमिदं प्रोक्तं दौत्यकर्मप्रसङ्गतः।
सन्देशप्रेषणव्याजैरस्य सन्देशकाव्यता।।८३।।

मेघो दूतीकृतो यस्मान्मेघदूतं ततो न्विदम्।
अन्यच्च हंससंदेशस्तत्र तस्यैव चित्रणात्।।८४।।

अन्यापदेशकाव्यं तत्प्रवृत्त्याऽन्योक्तिनिष्ठया।
गीतिकाव्यं तदेवोक्तं गीततत्त्वप्रयोगतः।।८५।।

देवस्तुतिप्रवृत्त्या च स्तोत्रकाव्यं तदुच्यते।
पद्यानां शतसंख्यत्वाच्छतकाख्यं तदेव हि।।८६।।

सम्पादनाच्च नीतीनां नीतिकाव्यं नु तत्पुनः।
ख्यातं प्रहेलिकाकाव्यं तासामेव निरूपणात्।।८७।।

विमानयात्रानुभवैः समृद्धमधुनातनम्।
विमानकाव्यमित्याख्यं साम्प्रतं हि महीयते।।८८।।

यात्राकाव्यं नर्मकाव्यं रागकाव्यं तथैव च।
एवमेवाऽभिधाऽप्यन्या तत्तद् वृत्त्यनुरोधतः।।८९।।

लहरीकाव्यमप्येतत् खण्डकाव्यं समुच्यते।
प्रतिपाद्यं यदा काव्ये लहरीसन्निभं भवेत्।।९०।।

खण्डकाव्यादि का लक्षण-

किसी पुरुषार्थ (धर्म, अर्थ अथवा काम) का जो आंशिक (अ-सांगोपांग) वर्णन होता है अथवा नायक के (आद्यन्त) जीवन का जो खण्डवर्णन होता है, उसे खण्डकाव्य करते हैं।।८१।।

यही खण्डकाव्य अपने इतिवृत्त के अनुरोधवश, पृथक् अर्थ वाले विविध नामों (संज्ञाओं) को धारण करता है।।८२।।

दौत्यकर्म का प्रसंग (वार्णित) होने पर इसे दूतकाव्य कहा जाता है। यूँ ही सन्देश-सम्प्रेषण के महत्त्ववश इसे सन्देशकाव्य भी कहते हैं।।८३।।

चूँकि (कालिदास-प्रणीत काव्यविशेष में) मेघ को दूत बनाया गया इसलिये इसे मेघदूत नाम दिया गया। एक दूसरे काव्य को हंससन्देश कहा गया उसमें हंस (के ही दौत्यकर्म) का वर्णन होने के कारण।।८४।।

खण्डकाव्य की प्रवृत्ति अन्योक्ति वर्णन-निष्ठ होने के कारण उसे **अन्यापदेशकाव्य** (अन्योक्ति काव्य) कहते हैं। उसी को **गीतकाव्य** भी कहते हैं गीततत्त्व का प्रयोग होने के कारण।।८५।।

खण्डकाव्य में देवस्तुति की प्रवृत्ति (वर्णना) होने से उसे **स्तोत्रकाव्य** कहा जाता है और (खण्डकाव्य में) पद्यों की संख्या सौ होने के कारण उसी को **शतककाव्य** भी कहते हैं।।८६।।

नीतियों के सम्पादन के कारण उसे **नीतिकाव्य** कहते हैं और उसी को **प्रहेलिकाकाव्य** भी कहते हैं (उस खण्डकाव्य में) पहेलियों का वर्णन होने के कारण।।८७।।

विमान-यात्राओं के अनुभव से भरे-पुरे आजकल के काव्यविशेष को **विमानकाव्य** के रूप में प्रतिष्ठित माना गया है।।८८।।

नाना प्रकार के इतिवृत्तों के अनुरोधवश, इसी प्रकार खण्डकाव्य की अन्यान्य संज्ञायें भी होती हैं जैसे-यात्राकाव्य, नर्मकाव्य तथा रागकाव्य आदि।।८९।।

यही खण्डकाव्य **लहरीकाव्य** भी कहा जाता है बशर्ते उस काव्य का प्रतिपाद्य लहरी के समान हो।।९०।।

परस्परं समासक्ता लहर्यो जलधौ यथा।
भङ्गिव्रजं जनयन्त्यो यान्त्यद्वैतस्वरूपताम्।।९१।।

भक्तिशृङ्गारसन्दर्भाः काव्येऽन्येऽपि तथा यदा।
भिन्नाः सन्तोऽपि पुष्णन्ति मूलभावं पुनः पुनः।।९२।।

लहरीसन्निभा भाषाविच्छितिं जनयन्ति च।
नयनाऽसेचनं भूरि वितन्वन्ति निरन्तरम्।।९३।।

तदा तल्लहरीकाव्यं कोविदैर्विनिगद्यते।
अभिराजमतञ्चैतन्निश्चितं बुधतोषणम्।।९४।।

दूतकाव्यं यथा ममैव मृगाङ्कदूतम्। यथा वा रामचन्द्रअम्बिकादत्त-शाण्डिल्यप्रणीतं कामदूतम् कृपारामत्रिपाठिनस्तरङ्गदूतम् हरिनारायणदीक्षितस्य हनुमद्दूतम्, पी०के० नारायणपिल्लैप्रणीतं मयूरदूतम्, इच्छारामद्विवेदिप्रणीतं मित्रदूतम्।

सन्देशकाव्यं यथा कुटुम्बरामशास्त्रिण इन्दुसन्देशः, कुञ्चनम्बूदरी-

प्रणीतश्चातकसन्देशः, वेलूरिसुब्बारावशर्मप्रणीतः सुन्दरीमेघसन्देशः लक्ष्मणसूरिप्रणीतः विप्रसन्देश इति।

अन्यापदेशकाव्यं यथा ममैवार्यान्योक्तिशतकम्, मृगमृगेन्द्रान्योक्ति-शतकञ्च। यथा वा बदरीनाथशर्मप्रणीताऽन्योक्तिसाहस्त्री।

गीतिकाव्यं यथा ममैव गीतभारतम्। यथा वा राधावल्लभप्रणीतं गीतधीवरम्, भट्टमथुरानाथशास्त्रिप्रणीता गीतिवाणी, पुल्लेलरामचन्द्रप्रणीतो गीताञ्जलिः, अमीरचन्दशास्त्रिप्रणीता गीतिकादम्बरी, रुद्रदेवत्रिपाठिकृता गीतिगङ्गा, विरूरचिदम्बरजोइसकृतं गीतरामायणम्, एस०वी०-वेलणकरकृतं गीतिगैर्वाणम्, नृपतिरामभट्टकृतं गीतगिरीशम्, वीरेन्द्रकुमार-भट्टाचार्यकृतं गीतगौराङ्गम्, श्रीधरभास्करवर्णेकरकृता संस्कृतगीतमालेति। हरिदत्तशर्मकृता गीतकन्दलिका, मयाऽभिराजराजेन्द्रेण प्रणीता वाग्वधूटी-मृद्वीका-श्रुतिम्भरा-मत्तवारणी-शालभञ्जिकाः, पुष्पादीक्षितकृता-ऽग्निशिखा, हरेकृष्णमेहेरकृतो मातृगीतिकाञ्जलिः, जनार्दनमणिप्रणीता निस्यन्दिनी च।

स्तोत्रकाव्यं यथा मम पराम्बाशतकम् नवाष्टकमालिका शनिशतकं चेति। यथा वा कृष्णदत्तशास्त्रिकृतं रामराघवस्तवनम्, जयनारायणयात्रिकृतं सवितृस्तोत्रम्, रामभद्राचार्यप्रणीतं लघुरघुवरम्, रामचन्द्रअम्बिकादत्तप्रणीता स्तोत्रावलिः, नारायणवेङ्कटरमणकृतः स्तुतिकुसुमाञ्जलिः, स्वामिनाथप्रणीतं बदरीशसुप्रभातम्, पूजालालकृता स्तोत्रसङ्गीतिकेति।

शतकानां संख्या भूयसी। सविस्तरमस्मदुपज्ञे विंशशताब्दीसंस्कृत-ग्रन्थसूचीपत्रे द्रष्टव्यम्। प्रहेलिकाकाव्यं यथा रामाशीषपाण्डेयकृतं प्रहेलिकाशतकम्।

जैसे सागर में लहरियाँ एक दूसरे के साथ जुड़ी रहती हैं तथा नाना प्रकार की भंगियों को उत्पन्न करती परस्पर अभिन्न प्रतीत होती हैं।।९१।।

उसी प्रकार काव्य में भी जब भक्ति एवं शृङ्गार के सन्दर्भ अथवा अन्यान्य भी प्रवृत्तियाँ, परस्पर भिन्न होती हुई भी, मूलभाव (central theme) को पौनःपुन्येन सम्पुष्ट करती हैं।।९२।।

लहरियों के समान तथा भाषा-सौन्दर्य की सृष्टि करती हैं तथा क्षण-प्रतिक्षण नयनासेचनक को विखेरती रहती हैं।।९३।।

तो उसी को विद्वज्जन **लहरीकाव्य** कहते हैं। पण्डितों को परितुष्ट करने वाला यही **अभिराज** का भी सुनिश्चित मत है।।९४।।

दूतकाव्य जैसे मेरी ही कृति मृगाङ्कदूतम्। अथवा जैसे रामचन्द्र अम्बिकादत्तशाण्डिल्य-प्रणीत कामदूतम्, कृपाराम त्रिपाठी-कृत तरङ्गदूतम्। अथवा हरिनारायण दीक्षित कृत हनुमद् दूतम्, पी०के० नारायण पिल्लै-प्रणीत मयूरदूतम्, इच्छाराम द्विवेदि-प्रणीत मित्रदूतम्।

सन्देशकाव्य जैसे कुटुम्बरामशास्त्रि-प्रणीत इन्दुसन्देशः, कुञ्चन नम्बूदरी-प्रणीत चातकसन्देशः, वेलूरि सुब्बारावशर्म-प्रणीत सुन्दरीमेघसन्देशः, लक्ष्मणसूरि-प्रणीत विप्रसन्देशः।

अन्यापदेश काव्य जैसे मेरा ही आर्यान्योक्तिशतकम् तथा मृगमृगेन्द्रान्योक्तिशतकम्। अथवा जैसे बदरीनाथशर्म-प्रणीत अन्योक्तिसाहस्री।

गीतिकाव्य जैसे मेरी ही काव्यरचना गीतभारतम्। अथवा जैसे राधावल्लभ त्रिपाठी-प्रणीत गीतधीवरम्, भट्टमथुरानाथशास्त्रि-प्रणीत गीतिवाणी, पुल्लेलरामचन्द्र-प्रणीत गीताञ्जलिः, अमीरचन्द्रशास्त्रि-प्रणीत गीतिकादम्बरी, रुद्रदेवत्रिपाठि-प्रणीत गीतिगङ्गा, विरूरचिदम्बर जोइसकृत गीतरामायणम्, एस-वी०बेलणकर-कृत गीतगैर्वाणम्, नृपतिरामभट्टकृत-गीतगिरीशम्, वीरेन्द्रकुमारभट्टाचार्य-कृत गीतगौराङ्गम्, श्रीधरभास्करवर्णेकर-कृत संस्कृतगीतमाला, हरिदत्तशर्म-कृत गीतकन्दलिका, अभिराजराजेन्द्र-प्रणीत वाग्वधूटी, मृद्वीका, श्रुतिम्भरा, मत्तवारणी तथा शालभञ्जिका, पुष्पादीक्षितकृत अग्निशिखा, हरेकृष्णमेहेरकृत मातृगीतिकाञ्जलिः, जनार्दनमणिप्रणीत निस्यन्दिनी आदि।

स्तोत्रकाव्य जैसे मेरी कृति पराम्बाशतकम्, नवाष्टकमालिका तथा शनिशतकम्। अथवा जैसे कृष्णदत्तशास्त्रि-प्रणीत रामराघवस्तवनम्, जयनारायणयात्रि-कृत सवितृस्तोत्रम्, रामभद्राचार्य-प्रणीत लघुरघुवरम्, रामचन्द्र अम्बिकादत्त-प्रणीत स्तोत्रावलिः, नारायण वेङ्कटरमणकृत स्तुतिकुसुमाञ्जलिः, स्वामिनाथ-प्रणीत बदरीशसुप्रभातम्, पूजालालकृत स्तोत्रसङ्गीतिका।

शतककाव्यों की संख्या (तो) प्रभूत है। विस्तारपूर्वक मेरे द्वारा प्रणीत **विंशशताब्दीसंस्कृतग्रन्थसूचीपत्र** नामक ग्रंथ में देखना चाहिये।

प्रहेलिकाकाव्य जैसे रामाशीष पाण्डेय-कृत प्रहेलिकाशतकम्।

विमानकाव्यं यथा मम विमानयात्राशतकम्। यथा वा राधावल्लभ-

त्रिपाठिप्रणीता धरित्रीलहरी। यात्राकाव्यं यथा रामचन्द्र अम्बिकादत्त-शाण्डिल्य-प्रणीतं यात्राप्रसङ्गीयम्, यथा वा ममैव वैशालीशतकम्, गुर्जरशतकम्, उज्जयिनीशतकम्, यवद्वीपसाहित्यशतकम्।

नर्मकाव्यं यथा मम सुभाषितोद्धारशतकम्। यथा वा वागीशशास्त्रि-कृता नर्मसप्तशती, अरुणचन्द्रशास्त्रिकृतं हास्यशतकम्, दिगम्बरमहापात्र-कृतं दुर्नीतिपुराणञ्च।

लहरीकाव्यं यथा मम विस्मयलहरी। यथा वा लहरीदशकं राधा-वल्लभस्य, सरयूलहरी रामभद्राचार्यस्य, साम्बलहरी शतावधानगणेशस्य, अनुकम्पालहरी के०आर० सुब्रह्मण्यस्य, विषादलहरी श्रीभाष्यविजयसारथेः, पूर्णालहरी रसिकलालपटेलस्य, मातृभूलहरी श्रीधरभास्करवर्णेकरस्य, विरहलहरी एस्०वी०वेलणकरस्य, प्रेमलहरी भास्करपिल्लेमहोदयस्येति।

विविधखण्डकाव्यानामयं परिचयो विदुषां परितोषाय प्रदत्तो मया। विस्तृत-परिज्ञानार्थं मम विंशशताब्दीसंस्कृतग्रन्थसूचीपत्रमस्मत्सुहृद्रत्नानामा-चार्यराधावल्लभत्रिपाठिनां वा सूचीपत्रं ग्रन्थान्तरं वा द्रष्टव्यमिति विशेषः।

यच्च राधावल्लभेनोदितम् -जीवनस्यैकदेशनिरूपकं खण्ड-काव्यमिति (अभिनव० ३।१।४) तदपि मन्मन्तव्यसगन्ध्येवेति।

अथ गद्यकाव्यलक्षणम्-

भरताभिमतस्य चूर्णबन्धस्याऽनियताक्षरापरनामधेयस्य चर्चा प्राक् कृतैव तिष्ठति। तदेव गद्यमित्युच्यते।

गद्यं चतुर्विधं प्रोक्तं मुक्तकं वृत्तगन्धि च।
ततश्चोत्कलिकाप्रायं चूर्णकञ्चान्तिमं मतम्।।९५।।

असमस्तपदं मुक्तं पद्यांशि वृत्तगन्धि च।
अन्यद्दीर्घसमासाढ्यं चूर्णमल्पसमासकम्।।९६।।

मुक्तकगद्योदाहरणं यथा ममेक्षुगन्धायाम्-

अम्ब! कलङ्किनी जातास्मि। निन्द माम्। भर्त्सय माम्। ताडय माम्। गृहाद्बहिर्निस्सारय माम्। कलङ्कितो मया त्वदुत्सङ्गोऽम्ब! कलङ्कितं मया प्रातः स्मरणीयस्य पितृचरणस्य सुगृहीतनामधेयम् इत्येवमादि।

विमानकाव्य जैसे मेरी काव्यकृति विमानयात्राशतकम्। अथवा जैसे राधावल्लभत्रिपाठी-प्रणीत धरित्रीलहरी। यात्राकाव्य जैसे रामचन्द्र अम्बिकादत्त

शाण्डिल्य-प्रणीत यात्राप्रसङ्गीयम् अथवा जैसे मेरी ही कृतियाँ-वैशालीशतकम्, गुर्जरशतकम्, उज्जयिनीशतकम्, यवद्वीपसाहित्यशतकम्।

नर्मकाव्य जैसे मेरी रचना सुभाषितोद्धारशतकम्। अथवा जैसे वागीश शास्त्री-कृत नर्मसप्तशती, अरुणचन्द्रशास्त्रिकृत हास्यशतकम्, दिगम्बरमहापात्रकृत दुर्नीतिपुराणम्।

लहरीकाव्य जैसे मेरी कृति विस्मयलहरी। अथवा जैसे राधावल्लभ-प्रणीत लहरीदशकम्, रामभद्राचार्य कृत सरयूलहरी, शतावधान आर०गणेश-कृत साम्बलहरी, के०आर० सुब्रह्मण्यकृत अनुकम्पालहरी, श्रीभाष्यम् विजयसारथि-प्रणीत विषादलहरी, रसिकलालपटेल-कृत पूर्णालहरी, श्रीधरभास्कर वर्णेकर कृत मातृभूलहरी, एस्०वी० वेलणकर कृत विरहलहरी, भास्कर पिल्ले-कृत प्रेमलहरी।

विविध प्रकार के खण्डकाव्यों का यह परिचय मैने विद्वज्जनों के परितोषार्थ दिया। विस्तृत परिज्ञान के लिये मेरा **विंशशताब्दीसंस्कृतग्रंथसूचीपत्रम्** अथवा मेरे सुहृद्रत्न आचार्य राधावल्लभत्रिपाठी का सूचीपत्र या फिर अन्य ग्रंथों को देखना चाहिये।

और जो राधावल्लभ ने कहा-जीवन के एकदेशका निरूपण करने वाला खण्डकाव्य होता है (अभि० ३।१।४) वह लक्षण भी मेरे मन्तव्य के समान (अतः अभिनन्द्य) है।

अब **गद्यकाव्य** का लक्षण प्रस्तुत है-

आचार्य भरत को अभिमत (पसन्द) **अनियताक्षर** अपरनाम वाले **चूर्णबन्ध** की चर्चा पहले ही की जा चुकी है। उसी को (परवर्ती युग में) गद्य कहा गया।

गद्य चार प्रकार का बताया गया है-मुक्तक, वृत्तगन्धि। तदनन्तर उत्कलिकाप्राय तथा अन्तिम चूर्णक।।९५।।

समासहीन पदों वाला गद्य **मुक्तक** है। पद्यांशों से युक्त (अथवा पद्य जैसा प्रतीत होने वाला) **वृत्तगन्धि** है। दीर्घ समासों से ओतप्रोत **उत्कलिकाप्राय** है तथा अल्प समासों से युक्त गद्य **चूर्णक** है।।९६।।

मुक्तक गद्य का उदाहरण जैसे मेरी कथाकृति इक्षुगन्धा में-

माँ! कलङ्किनी बन गई हूँ। बुरा-भला कहो मुझे। फटकारो मुझे। मारो मुझे। घर से बाहर निकाल दो मुझे। माँ! मैने तुम्हारी गोद कलंकित कर दी। कलंकित कर दिया मैने प्रातःस्मरणीय पिताजी का गर्व के साथ लिया जाने वाला नाम। आदि। (जिजीविषा शीर्षक कथा)

वृत्तगन्धि चापि यथा ममैवेक्षुगन्धायाम्-

मां पश्यन्नेव पितामहोऽवदत्-समीर! कः कालस्त्वामन्विष्यामि? वराकी शुभदा त्वां कुत्र न मार्गयतिस्म? अनुक्त्वैव किञ्चिद् गतोऽसि? चायपेयं सर्वथा शीतलं जातम्। इत्येवमादि।

अत्र कः कालस्त्वामन्विष्यामि इत्ययमंशोऽनुष्टुभं स्पृशति। अनुक्त्वैव किञ्चिद्गतोऽसीत्यपि भुजङ्गप्रयातपादः प्रतीयते।

उत्कलिकाप्रायगद्योदाहरणं यथा मोहनलालशर्मपाण्डेयप्रणीतायां पद्मिन्याम्-विप्रकृष्टविदेशात्समायातो ब्राह्मणोऽयमासीत्सर्वशास्त्रपण्डितः, सारदाशारदासमाराधनोपपादितनवनवोन्मेषप्रस्फुरद्वाग्वैभवः, प्रतिक्षण-विलक्षणसमेधमानाऽसमानशेमुषीकः श्रवणमात्रोपात्तश्रुतिप्रकृतिविकृतिमन्त्र-भागः, प्रतिभाप्रकाशितपदशास्त्रपठनपाठनपाटवः, प्रत्ननूत्नन्यायरत्नप्रभा भासमानान्तःकरणः ज्योतिषमीमांसाकर्मकाण्डप्रकाण्डपण्डितः शिवशक्ति-सुश्रूषाप्रभावप्राप्ततान्त्रिकमन्त्रसिद्धिसमृद्धः।

चूर्णकगद्योदाहरणं यथा राधावल्लभत्रिपाठिप्रणीते विक्रमचरिते-एवञ्च भृशं प्ररुदतां तेषामवसितं दिनम्। अस्ताचलमारुरोह भगवान् भास्करः। विहगाश्च शूकरसमाजरोदने सङ्गतिमिवाचरन्तस्तीव्रं कूजन्तः स्वकुलायान् शिश्रियिरे। पार्श्वस्थो वटवृक्षः प्रतिशाखं विपञ्चीर्वादयामास। शनैश्च कुलायेषु लीना विहगाः। शूकरविहारस्थल्यां परिव्याप्तं गाढपङ्कमिव श्यानं तमोऽवततार धरणीम्। शनैर्निर्वातनिष्कम्पमिव समजनि तत्स्थलम् इत्येवमादि।

वृत्तगन्धि गद्य का भी उदाहरण जैसे मेरी कथाकृति इक्षुगन्धा में ही-

मुझको देखते ही दादाजी बोले-समीर! कितनी देर से तुम्हें खोज रहा हूँ? बेचारी शुभदा ने तुम्हें कहाँ-कहाँ नहीं खोजा? विना कुछ कहे ही चले गये? तुम्हारी चाय एकदम ठंडी हो गई! इत्यादि।

इस गद्यांश में 'कितनी देर से तुम्हें खोज रहा हूँ' यह अंश (छन्दोदृष्ट्या) अनुष्टुप् जैसा लगता है। 'बिना कुछ कहे ही चले गये' यह अंश भी (छन्दोदृष्ट्या) भुजंगप्रयात (के एक चरण) सा प्रतीत होता है।

उत्कलिकाप्राय गद्य का उदाहरण जैसे मोहनलालशर्म पाण्डेय-प्रणीत (उपन्यास) पद्मिनी में यह अंश-दूरवर्ती परदेस से आया हुआ यह ब्राह्मण

समस्त शास्त्रों का पण्डित, सारज्ञान प्रदान करने वाली शारदा के समाराधन से सम्प्राप्त नये-नये उन्मेषों से संवलित प्रस्फुरद् वाग्वैभव वाला, क्षण-प्रतिक्षण विलक्षण गति से विकसित होती हुई अप्रतिम बुद्धिवाला, सुनने मात्र से ही श्रुति की प्रकृति एवं विकृति से युक्त मंत्र-सम्पत्ति को हृदयंगम कर लेने वाला, प्रतिभा से पदशास्त्र (व्याकरण) के पठन-पाठन की पटुता को प्रकाशित करने वाला, प्राचीन एवं नव्य न्याय की रत्नप्रभा से भासमान अन्तःकरण (अधिकार) वाला, ज्योतिष-मीमांसा तथा कर्मकाण्ड का प्रकाण्ड पण्डित, शिव एवं शक्ति की परिचर्या के प्रभाववश सम्प्राप्त तंत्र एवं मंत्र की सिद्धि से समृद्ध था।

चूर्णक गद्य का उदाहरण जैसे राधावल्लभत्रिपाठी-प्रणीत विक्रमचरित में-

इस प्रकार, भरपूर चीखते-चिल्लाते ही सिरा गया उनका दिन। भगवान् भास्कर अस्तपर्वत पर जा चढे। पंछी भी, सुअरों की टोली के रोदन में अपना स्वर मिलाते से, तीखी चाँव-चाँव करते घोसलों में जा बैठे। पड़ोस का बरगद का पेड़ भी डाल-डाल पर मानो वीणा बजाने लगा। धीरे-धीरे पंछी घोंसलों में घुस गये। सुअरों की विहार- स्थली में परिव्याप्त गहबर कीचड़ जैसा घना अन्धकार धरती पर उतरने लगा। हौले-हौले वह स्थान वायुशून्य तथा जड सा हो चला। इत्यादि।

अथ कथालक्षणम्-

प्रबन्धात्मकगद्यस्य रूपद्वयमुदाहृतम्।
कथेति प्रथमं तत्राऽख्यायिकेत्यपरं मतम्।।९७।।

कथा तत्र भवेद्रम्या सरसा कल्पनाश्रिता।
दिव्याऽदिव्येतिवृत्तांशा विविधानुभवैर्युता।।९८।।

आदौ तत्र नमस्कारः खलादिचरितं तथा।
कथाकर्तुरभिप्रायोऽखिलं पद्यमयं भवेत्।।९९।।

तत्र क्वचिद्भवेदार्या क्वचिद्वक्त्रापववक्त्रके।
क्वचिच्चाप्यात्मसंस्पर्शः प्रतिभाशिल्पमण्डितः।।१००।।

तत्रोदाहरणं यथा जग्गूबकुलभूषणप्रणीता जयन्तिका। यथा वा जय-नारायणयात्रिणो मधुमती, रामकरणशर्मणो रयीशः सीमा च, केशव-चन्द्रदाशस्योर्मिचूडाशशिरेखादयः, श्रीनिवासशास्त्रिणश्चन्द्रमहीपतिकृष्ण-तारासूर्यप्रभासर्वाभ्युदयादिकृतयः, मेधाव्रताचार्यस्य कुमुदिनीचन्द्र इत्येवमादि।

अथाख्यायिकालक्षणम्-

आख्यायिकोपलब्धार्था तस्मादैतिह्यसम्मता।
आश्वासैः संविभक्ता स्यादार्याप्रभृतिमण्डिता।।१०१।।

वर्णिता स्यादियं नेतृमुखेनैवेति केचन।
नैवमित्यपरे तस्मादुभयं भाति सम्मतम्।।१०२।।

आर्यावक्त्रापवक्त्रैश्च ननु भाव्यर्थसूचनम्।
अन्यापदेशपद्धत्याऽश्वासारम्भे विधीयते।।१०३।।

युज्यते च समारम्भे कविवंशानुकीर्तनम्।
कविवृत्तान्तरञ्चापि परपद्यं क्वचित्क्वचित्।।१०४।।

कथा का लक्षण-

प्रबन्धात्मक गद्य का (पूर्वाचार्यों द्वारा) दो प्रकार बताया गया है। उनमें प्रथम है-कथा और दूसरा है आख्यायिका।।९७।।

इन दोनों में रमणीय प्रकृतिवाली, रसवत्ता से ओतप्रोत तथा कल्पना पर आश्रित (गद्यकृति) को कथा कहते हैं जो कि दिव्य अथवा अदिव्य (मानवीय) इतिवृत्तांशों वाली तथा विविध अनुभवों से युक्त होती है।।९८।।

कथा के प्रारंभ में नमस्कार-विधि होती है, खलादि का चरित होता है। तदनन्तर कथाकार का (व्यक्तिगत) अभिप्राय वर्णित होता है। यह सब पद्यमय ही होता है। (न कि गद्य में)।।९९।।

कथा में कहीं आर्या का और कहीं वक्त्र एवं अपरवक्त्र छन्दों का प्रयोग होना चाहिये। कविप्रतिभा के शिल्प से मण्डित कवि का आत्मसंस्पर्श (वैयक्तिक भावनाओं की अभिव्यक्ति) भी कहीं-कहीं होना चाहिये।।१००।।

कथा का उदाहरण जैसे जग्गू बकुलभूषण-प्रणीत जयन्तिका। अथवा जैसे जयनारायणयात्री-प्रणीत मधुमती, रामकरणशर्म-प्रणीत रयीशः तथा सीमा, केशवचन्द्रदाशकृत ऊर्मिचूडा एवं शशिरेखादि कृतियाँ। श्रीनिवासशास्त्री-कृत चन्द्रमहीपति, कृष्णतारा, सूर्यप्रभा तथा सर्वाभ्युदय आदि कृतियाँ। मेधाव्रताचार्य-कृत कुमुदिनीचन्द्र आदि।

आख्यायिका का लक्षण-

आख्यायिका उपलब्ध (लोक में प्राप्त न कि कल्पित) कथानक वाली

अतएव इतिहास-सम्मत होती है। आर्याप्रभृति छन्दों से मण्डित यह कृति आश्वासों में विभक्त होती है।।१०१।।

आख्यायिका (की कथा) का वर्णन नायक के ही मुँह से होना चाहिये, ऐसा कुछेक आचार्यों का कथन है। परन्तु अन्य आचार्य ऐसा नहीं मानते (उनकी दृष्टि में आख्यायिका-कथा का वर्णन स्वयं कवि भी कर सकता है) इसलिये कथावर्णन की दोनो ही पद्धतियाँ सम्मत (उचित) प्रतीत होती हैं।।१०२।।

(आख्यायिका में) आश्वास के प्रारंभ में ही, अन्यापदेश-पद्धति का आश्रय लेकर, भावी कथा आर्या, वक्त्र अथवा अपरवक्त्र छन्दों द्वारा सूचित कर दी जाती है।।१०३।।

प्रारंभ में कविवंश का वर्णन होना उचित है। कविवृत्त के अनन्तर, कहीं-कहीं दूसरे कवियों के पद्य भी उद्धृत किये जा सकते हैं।।१०४।।

इतिहाससम्मतकथाश्रिताऽऽख्यायिकेत्यर्थः। नेयं कल्पनाविलसिता। क्वचिन्नेतृमुखेन वर्णिता, यथा शिवराजविजये कश्चिदंशो भूषणमुखेन कश्चिदंशश्च शिववीरमुखेन वर्ण्यते। क्वचिदन्यमुखेन वर्णिता, यथा हर्षचरिताख्यायिका। नव्याख्यायिकोदाहरणं यथाकृष्णाचार्यप्रणीतश्चन्द्रगुप्तः, देवेन्द्रनाथचट्टोपाध्यायप्रणीतो बङ्गवीरप्रतापादित्यः, वासुदेवशर्मलाटकरप्रणीतं शाहुचरितम्, जगड्रामशास्त्रिप्रणीतं छत्रसालविजयम्, कृष्णशर्मचितलेप्रणीतं लोकमान्यतिलकचरितम्। हरिनारायणदीक्षितकृतं श्रीमदप्पयदीक्षितचरितम्, श्रीनाथहसूरकरप्रणीता सिन्धुकन्या, चेन्नम्माऽजातशत्रुश्च, सुदर्शनशर्मकृतं वीरवैरागिचरितम्, मोहनलालशर्मपाण्डेयप्रणीता पद्मिनीत्येवमादि।

अथोपन्यासलक्षणम्-

कथाऽऽख्यायिकयोः कश्चिन्मिश्रभेदोऽपि साम्प्रतम्।
उपन्यास इति ख्यातो भाषान्तरप्रतिष्ठितः।।१०५।।

कालखण्डविशेषस्य समग्रं जनजीवनम्।
प्रतिबिम्ब इवादर्शे न्यस्यतेऽत्र सविस्तरम्।।१०६।।

क्वचित्सामाजिकी क्रान्तिः सर्वोदयसमर्थिनी।
रूढिपाखण्डविध्वंसो नवाचारः क्वचित्पुनः।।१०७।।

महाकाव्यवदेवायमुपन्यासोऽपि वस्तुतः।
साङ्गोपाङ्गं समग्रञ्च नेतृजीवनचित्रणम्।।१०८।।

इतिहास-सम्मत कथा पर आधारित होती है आख्यायिका, यह भाव है। यह कल्पना-विलसित नहीं होती। यह कहीं (स्वयं) नायक के ही मुँह से वर्णित होती है। जैसे शिवराजविजय में कुछ कथांश (स्वयं) नायक शिववीर के मुख से तथा कुछ भूषण कवि के मुख से वर्णित होता है। कहीं-कहीं कथांश किसी और के मुख से वर्णित होता है जैसे हर्षचरित आख्यायिका (स्वयं कवि के मुख से)।

नई (इस युग की) आख्यायिका का उदाहरण जैसे कृष्णाचार्य-प्रणीत चन्द्रगुप्तः, देवेन्द्रनाथ चट्टोपाध्याय-प्रणीत बङ्गवीरप्रतापादित्यः, वासुदेवशर्मलाटकर-प्रणीत शाहुचरितम्, जगडूरामशास्त्रि-प्रणीत छत्रसालविजयम्, कृष्णशर्मचितले-प्रणीत लोकमान्यतिलकचरितम्, हरिनारायणदीक्षितकृत श्रीमदप्पय्यदीक्षितचरितम्, श्रीनाथहसूरकर प्रणीत सिन्धुकन्या, चेन्नम्मा, अजातशत्रुः, सुदर्शनशर्म-कृत वीरवैरागिचरितम्, मोहनलालशर्म पाण्डेयकृत पद्मिनी। इत्यादि।

उपन्यास का लक्षण-

कथा एवं आख्यायिका का कोई मिश्रित (मिला-जुला) भेद भी वर्तमान युग में **उपन्यास** के नाम से विख्यात है जो कि संस्कृतेतर भाषाओं में (विशेषरूप से) प्रतिष्ठित है।।१०५।।

उपन्यास में कालखण्ड-विशेष का सांगोपांग जनजीवन, दर्पण में उतरे प्रतिबिम्ब की भाँति विस्तारपूर्वक उपन्यस्त होता है।।१०६।।

इसमें कहीं-कहीं तो सामाजिक क्रान्ति का वर्णन होता है जिसमें समाज के (छोटे-बड़े) हर वर्ग के अभ्युदय का समर्थन होता है और कहीं-कहीं रूढियों एवं पाखण्डों के विध्वंस से उपजे नवाचार (नई समाजव्यवस्था) का वर्णन होता है।।१०७।।

वस्तुतः यह उपन्यास भी महाकाव्य के ही समान नायक के सांगोपांग तथा समग्र जीवन का वर्णन होता है।।१०८।।

धर्मराजनयार्थानां नैव वृत्तं हि तादृशम्।
यदुपन्यासनिर्माणे नोपयोज्यं भवेत्पुनः।।१०९।।

विविधाः सन्त्युपन्यासाः इतिवृत्तानुरोधतः।
कथाप्रस्तुतिभेदाच्च कविप्रतिभयाञ्चिताः।।११०।।

तत्रोदाहरणं यथा रामकरणशर्मप्रणीतौ सीमारयीशौ। यथा वा केशवचन्द्रदाशप्रणीता दिशाविदिशा-पताका-निकषालकाञ्जलिम-धुयानारुणावर्तनाद्युपन्यासाः। यथा रामजीउपाध्यायप्रणीतः द्वा सुपर्णा इति। भगीरथप्रसादत्रिपाठिप्रणीतः मङ्गलमयूखो विश्वनारायणशास्त्रिकृतम् अविनाशि इति वा।

गद्यैर्विद्योतितं यस्माद् गद्यकाव्यं तदीरितम्।
ग्रन्थरूपं तदेवात्र श्रव्यं किञ्चिन्निरूप्यते।।
उपन्यासपदेनापि तदेव परिकल्प्यते।
यथा कादम्बरी यद्वा शिवराड्विजयो मम।।

इति स्वोपज्ञगद्यकाव्यमीमांसायामुपनिबध्नता शिवराजविजयकारेण श्रीमदम्बिकादत्तव्यासेनापि उपन्यासः कथाख्यायिकाभ्यां नातिभिन्न-स्वीकृतः।

त्रिपाठिराधावल्लभोऽपि गद्यबद्ध उपन्यासो महाकाव्यमयी कथेति (अभिनव० ३।१।१३) कथयन् स्वल्पशब्दैर्बहु प्रकाशयते।

उपन्यासं लक्षयति द्विवेदी रहसविहारी-

गद्यकाव्यबृहद्बन्ध उपन्यासोऽभिधीयते।
अस्मिन् युगोचितं वस्तु पात्रं कविसमीहितम्।।
देशकालोचितं चित्रं गद्यशिल्पं मनोहरम्।
कल्पितं चापि तत्सर्वं यथार्थं सत्प्रतीयते।।
तदेतल्लक्षणं त्वरितकथनमेव प्रतीयते।

अथ कथानिकालक्षणम्-

प्रतिष्ठाधुरमध्यास्ते कथाभेदो हि कश्चन।
अभीष्टा सर्वभाषासु प्रोच्यते सा कथानिका।।१११।।

गृहीत्वा किमप्युद्देश्यं लोकाभ्युदयकारकम्।
चित्रणेन चरित्राणां सरत्यग्रे कथानिका।।११२।।

क्वचित्पात्रमुखेनैव क्वचिल्लेखकभाषया।
क्वचित्संवादपद्धत्या पूर्वोन्मेषदिशा क्वचित्।।११३।।

शिल्पान्तरैरनेकैश्च निबद्धेयं कथानिका।
लघ्वी दीर्घेति भेदाभ्यां द्विविधैव महीयते।।११४।।

धर्म, राजनीति तथा अर्थ से जुड़ा ऐसा कोई भी घटनाचक्र नहीं जो उपन्यास के निर्माण में (संघटक कथांश के रूप में) उपयोग (वर्णन) के योग्य न होता हो।।१०९।।

इतिवृत्त के अनुरोधवश तथा कथाप्रस्तुति के भेदवश, रचनाकार की प्रतिभा से ओतप्रोत विविध प्रकार के उपन्यास हुआ करते हैं।।११०।।

उपन्यास का उदाहरण जैसे रामकरणशर्म-प्रणीत सीमा तथा रयीशः। अथवा जैसे केशवचन्द्रदाश-प्रणीत दिशाविदिशा, पताका, निकषा, अलका, अञ्जलिः, मधुयानम्, अरुणा तथा आवर्तनम् आदि। अथवा रामजीउपाध्याय-प्रणीत द्वासुपर्णा, भगीरथप्रसादत्रिपाठी-प्रणीत मङ्गलमयूख, विश्वनारायणशास्त्रि-प्रणीत अविनाशि।

'गद्यमय होने के कारण श्रव्यकाव्य-विशेष को ही गद्यकाव्य कहते हैं। उसी को 'उपन्यास' नाम से भी जाना जाता है, जैसे-कादम्बरी अथवा मेरा शिवराजविजय।'

अपनी **गद्यकाव्यमीमांसा** में ऐसा लिखते हुए शिवराजविजयकार पं० अम्बिकादत्त व्यास ने भी उपन्यास को कथा एवं आख्यायिका से बहुत भिन्न नहीं माना है।

राधावल्लभ त्रिपाठी ने भी 'गद्यबद्ध महाकाव्यमयी कथा को उपन्यास' मानते हुए स्वल्प शब्दों में ही बहुत कुछ कह दिया है।

रहसबिहारी द्विवेदी ने जो परिभाषा दी है उपन्यास की, वह त्वरित-कथन मात्र प्रतीत होती है (अर्थात् अपूर्ण है)।

कथानिका (कहानी का) लक्षण-

कथा का ही कोई भेद-विशेष जो (संस्कृत ही नहीं प्रत्युत) समस्त (भारतीय) भाषाओं में लोकप्रिय है तथा प्रतिष्ठा के शिखर पर विद्यमान है-उसे कथानिका (कहानी) कहते हैं।।१११।।

लोक का अभ्युदय सिद्ध करने वाले किसी भी उद्देश्य को लेकर, मानवीय चरित्रों के चित्रण के माध्यम से कहानी अग्रसर (विकसित) होती है।।११२।।

कहीं-कहीं तो पात्र (नायक) के ही मुँह से, कहीं लेखक (कथाकार) की ही भाषा के माध्यम से, कहीं (पात्रों के) संवाद के माध्यम से और कहीं पूर्वोन्मेष (Flash Back) के माध्यम से।।११३।।

अथवा अन्यान्य शिल्पों (तकनीकों) के माध्यम से लिखी गई यह कहानी लघु तथा दीर्घ के भेद से दो प्रकार की मानी जाती है।।११४।।

मार्मिकत्वमेव कथायाः प्राणतत्त्वम्। कथाया निर्वहणं यद्यद्भुतरसेन स्यात्तर्हि श्रेयस्करमिति विशेषः।

तत्रोदाहरणं यथा ममैव कथासङ्कलना इक्षुगन्धा, राङ्गडा च। यथा वा राधावल्लभत्रिपाठिन उपाख्यानमालिका, प्रमोदभारतीयस्य सहपाठिनी, वनमालिविश्वालस्य नीरवस्वनः, प्रभुनाथद्विवेदिनः श्वेतदूर्वा, प्रशस्यमित्र-शास्त्रिणोऽनाघ्रातं पुष्पम्, अशोकपुरनाट्टुकरस्यानामिका, वीणापाणिपाटन्या अपराजिता, नलिनीशुक्लायाः कथासप्तकम्।

इयमेव कथा नैकखण्डपरिसमाप्ता विविधबृहद्घटनाचक्रवर्णनपरा दीर्घकथेत्युच्यते। तदुदाहरणं यथा राधावल्लभत्रिपाठिन उपाख्यानमालिका। यथा वा ममैव प्रणयी प्रीतिकूटस्येति (अनाख्याता बाणभट्टात्मकथा)।

अथ लघुकथालक्षणम्-

नाऽतिविस्तृतसन्दर्भा विद्युदुन्मेषसन्निभा।
नूनं लघुकथेयं स्यादेकपात्रावसायिनी।।११५।।

अकस्माद्धि परीहारश्चिरसंस्तुतवर्त्मनः।
असंस्तुतसरणेश्चाऽप्यङ्गीकारो ह्यतर्कितम्।।११६।।

सुग्रहणमग्राह्यस्य गृहीतस्याप्युपेक्षणम्।
कस्यचन सङ्कल्पस्य झटित्येव समुद्भवः।।११७।।

भावोन्मेषो विवर्तो वा भावानां समयोचितः।
चिररूढमनोभावस्यापि द्राक्परिवर्तनम्।।११८।।

उल्कापिण्डसदृक्षाभा ह्रत्तन्त्रीझङ्कृतिक्षमा।
अल्पाक्षराऽल्पपात्रापि कथा लध्वी महीयते।।११९।।

मार्मिकता कहानी का प्राणतत्त्व है। कथा का निर्वहण (समापन) यदि अद्भुत रस में हो तो श्रेयस्कर माना जाता है।।

कहानी का उदाहरण जैसे मेरी ही कथासंकलनायें-इक्षुगन्धा तथा राङ्गडा अथवा जैसे राधावल्लभत्रिपाठि-प्रणीत उपाख्यानमालिका (दीर्घकथा) प्रमोदभारतीय-प्रणीत सहपाठिनी, वनमाली विश्वाल-प्रणीत नीरवस्वनः, प्रभुनाथद्विवेदि-प्रणीत श्वेतदूर्वा, प्रशस्यमित्रशास्त्रिप्रणीत अनाघ्रातं पुष्पम्, अशोकन

पुरनाट्टुकरप्रणीत अनामिका, वीणापाणि पाटनीकृत अपराजिता तथा नालिनीशुक्ल-प्रणीत कथासप्तकम्।

यही कथा जब अनेक खण्डों में समाप्त होती है तथा वैविध्ययुक्त वृहद् घटनाचक्रों के वर्णनों में अवसित होती है तो **दीर्घकथा** कही जाती है। दीर्घकथा का उदाहरण है राधावल्लभत्रिपाठी की कथाकृति उपाख्यानमालिका। अथवा मेरी ही दीर्घ कथा-प्रणयी प्रीतिकूटस्य (बाणभट्ट की अनकही आत्मकथा)।

लघुकथा का लक्षण-

जिसका सन्दर्भ (कथासूत्र) अत्यन्त विस्तृत न हो तथा जो विद्युदुन्मेष (बिजली की कौंध) जैसी क्षणसंवेदिनी हो ऐसी (प्रायः) एक ही पात्र से (प्रारंभ एवं) समाप्त होने वाली होती है निश्चित रूप से लघुकथा।।११५।।

चिरकाल से पालित होते आ रहे मार्ग का अकस्मात् परिहार (छूट जाना) तथा असंस्तुत (अपरिचित) पद्धति का अतर्कित रूप से अंगीकार (अपना लेना)।।११६।।

अग्राह्य का सरलता से ग्रहण, गृहीत की (उतनी ही सरलता से) उपेक्षा अथवा किसी संकल्प का झट से प्रादुर्भाव।।११७।।

समयोचित किसी भाव का उन्मेष अथवा अनेक भावों का घात-प्रतिघात अथवा चिरकाल से दृढताको प्राप्त किसी मनोभाव का विद्युद्गति से परिवर्तित हो जाना।।११८।।

उल्कापिण्ड टूटने जैसी सूरत वाली, हृदयतंत्री को झंकृत कर देने में समर्थ, अल्पाल्प अक्षरों वाली, अल्पाल्प ही पात्रों वाली तथा लघु आकार-प्रकार वाली लघुकथा प्रशंसनीय होती है।।११९।।

यथा मल्लघुकथासङ्कलना चित्रपर्णी। यथा वा कृष्णदत्त-शर्मशास्त्रिणः शुष्को वृक्षः, इच्छारामद्विवेदिनः एकादशी, केशवचन्द्र-दाशस्योर्मिचूडा इत्येवमादि।

काव्यप्रभेदान् विवृण्वता ध्वनिकारेण यदुक्तम्-यतः काव्यस्य प्रभेदाः-मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धम्। सन्दानितकविशेषक-कलापककुलकानि पर्याय-बन्धः परिकथा सकलकथा खण्डकथा सर्गबन्धोऽभिनेयार्थमाख्यायिका कथेत्येवमादयः। तदाश्रयेणापि संघटना विशेषवती भवति इति। ध्वन्या० ३।७ वृत्तिः।

तत्र मुक्तकादीनि यथावसरं प्राग्व्याख्यातानि। पर्यायबन्धोऽपि नामातिकुलकं प्रबन्धकाव्यमध्यवर्ति वसन्तादिवर्णनम्। तद्यथाऽभिनवगुप्त-पादाचार्योऽधिलोचनम्-अवान्तरक्रियासमाप्तावपि वसन्तवर्णनाद्ये-कवर्णनीयोद्देशेन प्रवृतः पर्यायबन्ध इति।

परिकथादिविषयेऽप्याह महामाहेश्वरः-एकं च धर्मादिपुरुषार्थमुद्दिश्य प्रकारवैचित्र्येणाऽनन्तवृत्तान्तवर्णनप्रकारा परिकथा। एकदेशवर्णना खण्डकथा। समस्तफलान्तेतिवृत्तवर्णना सकलकथेति।

उदाहरण जैसे मेरी लघुकथाओं का संग्रह-चित्रपर्णी। अथवा जैसे कृष्णदत्तशास्त्री-प्रणीत शुष्को वृक्षः। इच्छारामद्विवेदी-प्रणीत एकादशी तथा केशवचन्द्रदाश-प्रणीत ऊर्मिचूडा आदि।

काव्य-प्रभेदों का विवरण प्रस्तुत करते हुए ध्वनिकार ने जो कहा-क्योंकि काव्य के भेद-प्रभेद होते हैं-मुक्तक, जो संस्कृत प्राकृत एवं अपभ्रंश में निबद्ध होते हैं। सन्दानितक, विशेषक, कलापक, कुलक, पर्यायबन्ध, परिकथा, सकलकथा, खण्डकथा, सर्गबन्ध, अभिनेयार्थ आख्यायिका तथा कथा एवं इसी प्रकार के अन्यभेद। इनके आश्रय से भी संघटना वैशिष्टय से संवलित हो जाती है।-ध्वन्या० ३।७ की वृत्ति।

इनमें से मुक्तक आदि की तो यथावसर पहले ही व्याख्या की जा चुकी है। पर्यायबन्ध कुलक एवं प्रबन्ध के मध्यवर्ती काव्य को कहते हैं-वसन्तवर्णनादि (लम्बे) सन्दर्भों को। जैसा कि आचार्य अभिनवगुप्त ने लोचनटीका में लिखा है-

अवान्तर (अन्यान्य) क्रियाओं की समाप्ति हो जाने पर भी जो वसन्तवर्णनादि एकमात्र सन्दर्भ के वर्णन से प्रवृत्त होता है, उसे पर्यायबन्ध कहा जाता है।

परिकथा आदि के विषय में भी महामाहेश्वर (अभिनवगुप्त) ने कहा है-धर्म आदि किसी एक ही पुरुषार्थ को उद्देश्य बनाकर, जब नाना प्रकार से अनन्त वृत्तान्तों का वर्णन किया जाय तो उस पद्धति को परिकथा कहते हैं।

एकदेशीय (आंशिक, खण्डविशेष) वर्णना को खण्डकथा कहते हैं।

सम्पूर्ण फलावाप्ति से समाप्त होने वाले इतिवृत्त के वर्णन से युक्त कृति को सकलकथा कहते हैं।

एकमेव समुद्दिश्य पुरुषार्थं प्रवर्तिताः।
याश्च प्रकारवैचित्र्यैस्ता वै परिकथाः स्मृताः।।१२०।।

खण्डकाव्यसदृक्षैव याऽप्येकदेशवर्णना।
सैव खण्डकथा ख्याता हृच्चमत्कारकारिणी।।१२१।।

आनन्दवर्धनोद्दिष्टा सेयं खण्डकथा पुनः।
मान्या लघुकथैवेति त्रिवेणीकविसम्मतिः।।१२२।।

योऽपि दीर्घकथाभेदो मया पूर्वं निरूपितः।
सकलकथापर्यायः सोऽपि मान्योऽस्तु कोविदैः।।१२३।।

तदेवं सुस्पष्टं यदानन्दवर्धनाभीष्टा खण्डकथैव लघुकथाऽद्यतनी। तद्वदेव सकलकथाऽपि दीर्घकथा। समस्तफलान्तेतिवृत्तवर्णनत्वात्।

पशुपक्षिसरीसृपवनस्पतिप्रभृत्याश्रिताः कथाश्चापि कथानिकालघुकथादीर्घकथास्वेवान्तर्भवन्तीति विशेषः। तत्रोदाहरणं यथा राधावल्लभत्रिपाठिप्रणीतं विक्रमचरितम्। यथा वा ममैव कान्तारकथा।

कथानिकां लघुकथाञ्चाभिन्नां मन्वानेन द्विवेदिरहसविहारिणा यत्प्रोक्तम्-

उपन्यासस्य चैकांशश्चारुगद्यसमन्वितः।
प्रायशः कल्पितं वृत्तं समाश्रित्य प्रवर्तते।।
स्थाने काले क्रियायाञ्च तत्रैक्यं तथ्यगर्भितम्।
प्रेरकञ्च सदुद्देश्यं यस्याः लघुकथा च सा।।

तन्न, कथानिकालघुकथयोर्मध्ये मौलिकभेदोपस्थितिवशात्। तत्सर्वं मया प्राग्व्याख्यातमेव।

यच्चाऽभिनवकाव्यालङ्कारसूत्रकारेणोदितम्-जीवनस्यैकदेशनिरूपणपरमाख्यानं कथा (अभि० ३।१।१२) तत्कथानिकालक्षणमेव सुग्राह्यम्।

अथ च यथावृत्तस्य स्मृत्याऽऽख्यानं संस्मरणम् (३।१।१४) शब्दैर्घटनाया व्यक्तेश्चित्रमिव निर्मितं रेखाचित्रम् (३।१।१५) जीवनचरितस्यैव प्रकारविशेष आत्मकथा (३।१।१७) यात्राया यथाऽनुभूतं वर्णनं यात्रावृत्तमिति (३।१।१८) लक्षयता राधावल्लभत्रिपाठिना यथा संस्मरण-रेखाचित्र-जीवनचरितात्मकथा-यात्रावृत्तादीनि कथारूपाणि व्याख्यातानि तान्यभिनन्दनीयानि। वस्तुतः सर्वमिदं कथाया नामान्तरमात्रम्। एषां पृथगङ्गीकारेणाऽनवस्थैव स्यात्।

सम्प्रति चम्पूकाव्यसन्दर्भः-

मिश्रकाव्यमिति प्रोक्तं गद्यपद्यविमिश्रणात्।
तदेव कैश्चनाचार्यैश्चम्पूकाव्यमपि स्मृतम्।।१२४।।

कथायां नाटके चापि मिश्रणं गद्यपद्ययोः।
दृश्यते चेत्ततः कस्माच्चम्पूस्तदतिरिच्यते।।१२५।।

(इस प्रकार) एक ही पुरुषार्थ को लक्ष्य बनाकर प्रणीत की गईं, प्रकार-वैचित्र्य से ओतप्रोत जो कथायें होती हैं, उन्हें **परिकथा** कहते हैं।।१२०।।

खण्डकाव्य के ही समान एकदेशीय वर्णन वाली तथा हृच्चमत्कार की सृष्टि करने वाली कथा को **खण्डकथा** कहते हैं।।१२१।।

आचार्य आनन्दवर्धन द्वारा उद्दिष्ट यही खण्डकथा **लघुकथा** (आज की) के रूप में भी मान्य होनी चाहिये ऐसी **त्रिवेणी कवि** की सम्मति है।।१२२।।

दीर्घकथा नाम का भी जो कथाभेद मैने पहले निरूपित किया है वह भी **सकलकथा** के रूप में विद्वज्जनों द्वारा मान्य होना चाहिये।।१२३।।

तो इस प्रकार सुस्पष्ट है कि (आनन्दवर्धनाभिनवगुप्ताभिमत) खण्डकथा ही आज की लघुकथा है। उसी प्रकार (उस युग की) सकलकथा ही (आज की) दीर्घकथा है। समस्त फल का प्रदर्शन करने वाले इतिवृत्त का वर्णन करने के कारण।

पशुपक्षी, सरीसृप, वनस्पति आदि पर आधारित कथायें भी कथानिका, लघुकथा एवं दीर्घकथा में ही अन्तर्भूत हो जाती हैं, यह विशेष बात है। उसका उदाहरण है राधावल्लभत्रिपाठि-प्रणीत विक्रमचरितम्। अथवा मेरी ही कथाकृति-कान्तारकथा (Jungle Book)।

कहानी और लघुकथा को अभिन्न मानते हुए रहसविहारी द्विवेदी ने जो कहा है-'सुन्दर गद्य से समन्वित, प्रायः कल्पित कथा पर समाश्रित, देश-काल एवं क्रिया की एकता से युक्त, तथ्यों से भरा-पुरा, प्रेरक सदुद्देश्य वाला उपन्यास का ही एक अंश (खण्ड) लघुकथा है।'

उनका यह कथन ठीक नही है-कहानी (कथा) एवं लघुकथा में मौलिक भेद होने के कारण। वह सब मैंने पहले ही स्पष्ट कर दिया है।

और जो अभिनवकाव्यालंकारसूत्रकार त्रिपांठी ने कहा- जीवन के एक अंशविशेष का निरूपण करने वाला आख्यान ही **कथा** है, वह कहानी का ही लक्षण होने के कारण सुखेन ग्राह्य है।

पुनश्च, बीती हुई घटना का यथावत् स्मृतिपरकवर्णन ही **संस्मरण** है, शब्दों के द्वारा व्यक्ति अथवा घटना का चित्र सा खड़ा कर देना ही **रेखाचित्र** है,

किसी महापुरुष का प्रेरणाप्रद चरितवर्णन ही **जीवनचरित** है, जीवनचरित का ही एक विशिष्ट भेद **आत्मकथा** है। यात्रा का यथानुभूत वर्णन ही **यात्रावृत्त** है- इस प्रकार परिभाषित करते हुए राधावल्लभ त्रिपाठी द्वारा जिस प्रकार संस्मरण, रेखाचित्र, जीवनचरित, आत्मकथा एवं यात्रावृत्त आदि कथारूपों की व्याख्या की गई है, वह सब स्वागतयोग्य ही है।

वस्तुतः ये सब कथा के नामान्तरमात्र हैं। इनकी पृथक् सत्ता मानने से '**अनवस्था**' ही पैदा होती है।

अब **चम्पूकाव्य** का सन्दर्भ-

गद्य तथा पद्य शैलियों के विशिष्टकोटिक मिश्रण के कारण जिसे मिश्रकाव्य कहा गया है उसी काव्य-भेद को कुछेक आचार्य चम्पूकाव्य भी कहते हैं।।१२४।।

कथा और नाटक में भी (यद्यपि) गद्य एवं पद्य का मिश्रण होता है। यदि ऐसा है तो फिर चम्पूकाव्य कैसे कथा एवं नाटक से अतिरिक्त है??१२५??

कथाया नाटकस्यापि प्रकृतिर्गद्यसंश्रया।
वृत्तवर्णनप्राचुर्यात्संवादानाञ्च योगतः।।१२६।।

स्वाभाविकं न कुत्रापि पद्यबन्धस्य मेलनम्।
पूर्वाग्रहवशादेव कविना तद् विधीयते।।१२७।।

कथायां कमप्यादर्शं सत्यं यद्वा चिरन्तनम्।
प्रतिष्ठापयितुं पद्यं प्रसङ्गोचितमङ्ग्यते।।१२८।।

संवादप्रचुरे नाट्येऽप्यकस्मादृतुवर्णने।
नायिकारूपलावण्यव्यवहारादिचित्रणे।।१२९।।

विच्छित्तिमतुलां स्रष्टुं कर्तुमाकर्षणं महत्।
गद्यसंवादजनितं चित्तोद्वेगं व्यपोहितुम्।।१३०।।

प्रयुङ्क्ते नाट्यकारोऽसौ पद्यबन्धं रसोल्बणम्।
नाट्यप्रकृतिभिन्नं यत्तदभिन्नं प्रतीयते।।१३१।।

मिश्रणं किन्तु चम्प्वां तत्सहजं गद्यपद्ययोः।
तयोरेकतरस्यापि प्रयोगे न दुराग्रहः।।१३२।।

(उसका उत्तर है कि वस्तुतः) कथा और नाटक की भी प्रकृति गद्यात्मक ही होती है-कथ्य तथ्यों के प्राचुर्यवश तथा संवादों के योगवश।।१२६।।

कथा और नाटक में (गद्य के साथ) पद्यबन्ध का मेलन कहीं भी स्वाभाविक (नैसर्गिक या शैलीजन्य) नहीं होता। ऐसा कवि के द्वारा पूर्वाग्रहवश ही किया जाता है।।१२७।।

(मूलतः गद्य प्रकृति वाली) कथा में किसी आदर्श अथवा चिरन्तन सत्य को प्रतिष्ठित (High light) करने के लिये ही, प्रसंग के अनुकूल, पद्य का प्रयोग किया जाता है।।१२८।।

संवाद-प्रचुर नाटक में भी अकस्मात् ऋतुवर्णन-सन्दर्भ आ जाने पर (अथवा) नायिका के रूप-लावण्य तथा व्यवहारादि का चित्रण आ जाने पर।।१२९।।

अतुलनीय विच्छित्ति (साहित्यिक सौन्दर्य) की सृष्टि के उद्देश्य से, महान् आकर्षण उत्पन्न करने के लिये तथा गद्यात्मक संवादों से उत्पन्न (दर्शकों के) चित्तोद्वेग को दूर करने के लिये।।१३०।।

नाट्यकार रसोल्वण पद्यबन्ध को (बीच-बीच में) प्रयुक्त करता है जो कि नाट्य की (गद्यात्मक) प्रकृति से भिन्न होता हुआ भी उससे अभिन्न ही प्रतीत होता है।।१३१।।

परन्तु (कथा एवं नाटक की अपेक्षा) चम्पू में वह गद्य एवं पद्य का मिश्रण सहज होता है। उसमें से किसी भी एक के प्रयोग में (कवि का) कोई दुराग्रह नहीं होता है।।१३२।।

पथिको हि यथा कश्चित् स्वेच्छया प्रचलन्पथि।
विश्राम्येत्तरुसंस्थाने विश्रम्याथ पुनश्चलेत्।।१३३।।

नैव पूर्वाग्रहः कोऽपि न च लक्ष्यं विलक्षणम्।
प्रमाणं स्वरुचिश्चैव तस्य विश्रमयात्रयोः।।१३४।।

चम्प्वामपि तथा कर्त्रा गद्यं पद्यं प्रयुज्यते।
यथारुचि यथामात्रं पर्यायेण यथायथम्।।१३५।।

स्वाभाविकं ततश्चम्प्वां गद्यपद्यविमिश्रणम्।
चम्पूप्रकृतिरेवैतन्मिश्रणं गद्यपद्ययोः।।१३६।।

साङ्काऽप्यथ च सोच्छ्वासा भवेच्चम्पूरियम्पुनः।
उक्तिप्रत्युक्तिविष्कम्भशून्यापीति च केचन।।१३७।।

प्रबन्धमुक्तकाभ्याञ्च चम्पूरपि मता द्विधा।
करम्भकञ्च विरुदं मुक्तकं जयघोषणा।।१३८।।

यद्यपि चम्वामिव कथायां नाटकादिष्वपि गद्यपद्यमिश्रणं सन्दृश्यते। तथापि न कथमपि कथानाटके चम्पूपदवाच्ये। कुत इत्युच्यते। गद्यपद्यमिश्रणं चम्पूकाव्यस्य स्वरूपमेव। प्रकृतिरेव। स्वाभाविको धर्म इति वक्तव्यम्। परन्तु न तन्मिश्रणं कथानाटकयोः प्रकृतिः पूर्वाग्रहजन्यपद्यप्रयोगत्वात्।

जैसे कोई राहगीर, मन-मुताबिक सफर तय करता हुआ किसी पेड़ की छाया में (स्वेच्छया) सुस्ताने लगता है और सुस्ता कर पुनः चलने लगता है।।१३३।।

उस बटोही के सुस्ताने या चल पड़ने में प्रमाण या कारण उसकी अपनी पसन्द ही होती है। उसमें न कोई पूर्वाग्रह होता है और नहीं कोई विलक्षण लक्ष्य।।१३४।।

चम्पू काव्य में भी, उसी प्रकार रचनाकार अपनी रुचि से ही कभी गद्य का तो कभी पद्य का प्रयोग करता है-यथोचित मात्रा में तथा बारी-बारी।।१३५।।

इस प्रकार, चम्पूकाव्य में गद्य एवं पद्य का मिश्रण (पूर्णतः) स्वाभाविक होता है (वस्तुतः) गद्य तथा पद्य शैलियों का यह मिश्रण ही चम्पूकाव्य की प्रकृति है।।१३६।।

चम्पू रचना साङ्क (अंक अर्थात् कवि की स्वारस्योक्ति से युक्त) उच्छ्वासों में विभक्त होती है। कुछेक आचार्यों के मतानुसार चम्पू उक्ति-प्रत्युक्ति वाले विष्कम्भक से शून्य भी होती है।।१३७।।

प्रबन्ध और मुक्तक भेदों की दृष्टि से चम्पू भी दो प्रकार की होती है। मुक्तक कोटि के चम्पू का उदाहरण है-करम्भक, विरुद तथा जयघोषणा आदि।।१३८।।

यद्यपि चम्पू के ही समान (गद्यात्मक) कथा एवं नाटक में भी गद्य तथा पद्य का मिश्रण दिखाई पड़ता है। तथापि, कथा एवं नाटक को किसी भी प्रकार चम्पू पद से सम्बोधित नहीं किया जा सकता है। क्यों? इसका उत्तर दिया जा रहा है।

गद्य और पद्य का मिश्रण (तो) चम्पूकाव्य का स्व-रूप ही है। प्रकृति ही है। स्वाभाविक धर्म है (चम्पू का) ऐसा कहना चाहिये। परन्तु गद्य-पद्य का

वह मिश्रण कथा एवं नाटक की प्रकृति नहीं है–पूर्वाग्रहजन्य पद्य का (उनमें) प्रयोग होने के कारण।

अङ्केनसहितेति साङ्का। कविस्वाभिप्रायनिवेदयितृशब्दसमूहविशेषाधिष्ठितेत्यर्थः। यथा नलचम्प्वां प्रतिसर्गान्तपद्यं 'हरिचरणसरोजद्वन्द्वमौलि' पदावल्याः प्रयोगः। सोच्छ्वासा उच्छ्वासैर्विभक्ता। परं नियमातिरेकोऽपि दृश्यते। तद्यथा–भोजप्रणीतरामायणचम्पूः काण्डेषु विभक्ता। मदालसाचम्पूश्चाप्युल्लासेषु विभक्ता।

उक्तिप्रत्युक्तिराकाशभाषितम्। विष्कम्भकश्चापि भूतभाविघटनासूचकः कश्चिदर्थोपक्षेपकविशेषो नाटकेषु। ताभ्यां शून्या विरहिता भवति चम्पूरिति गद्यपद्यानुबन्धिनाटकादस्याः पार्थक्यम्।

किञ्च, मुक्तकप्रबन्धाभ्यां चम्पूरपि द्विधा। तत्र करम्भकविरुदजयघोषणादिकं मुक्तकम्। करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितमिति साहित्यदर्पणकारः। निदर्शनभूता तदुपज्ञैव षोडशभाषामयी प्रशस्तिरत्नावली।

गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते इत्यपि साहित्यदर्पणकारः। यथा विरुदमणिमाला। जयघोषणाद्युदाहरणं गवेषणीयम्।

अंक से जो युक्त हो उसे 'साङ्का' कहते हैं। कवि के स्वाभिप्राय (पहचान) को निवेदित करने वाले शब्द-समूह-विशेष से अधिष्ठित होना-यह अर्थ है साङ्क होने का। जैसे नलचम्पू में प्रत्येक उच्छ्वास के अन्तिम पद्य में-हरिचरणसरोजद्वन्द्वमौलि पदावली का प्रयोग मिलता है।

सोच्छ्वासा का अर्थ है-उच्छ्वासों में विभक्त। परन्तु इस नियम का अतिरेक भी दीखता है। उदाहरणार्थ-भोजप्रणीत रामायणचम्पू काण्डों में विभक्त है। मदालसाचम्पू भी उल्लासों में विभक्त है।

उक्तिप्रत्युक्ति कहते हैं आकाशभाषित को। विष्कम्भक भी नाटकों में भूत तथा भावी घटनाओं की सूचना देने वाला कोई अर्थोपक्षेपक-विशेष माना गया है (जिसमें उक्ति-प्रत्युक्ति का सहारा लिया जाता है) उन दोनों से (उक्ति-प्रत्युक्ति तथा विष्कम्भक) शून्य होती है चम्पू, इस प्रकार गद्यपद्यानुबन्धी नाटक से इसका पार्थक्य सिद्ध होता है (नाटक में विष्कम्भक होता है)

पुनश्च, मुक्तक तथा प्रबन्ध के भेदों से चम्पू भी दो प्रकार की होती है। उनमें करम्भक, विरुद, जयघोषणादि मुक्तककोटि की चम्पू हैं।

करम्भक विविध भाषाओं से निर्मित होता है ऐसा साहित्यदर्पणकार का कहना है। करम्भक का उदाहरण है उन्हीं की रचना **प्रशस्तिरत्नावली**, जो सोलह भाषाओं को मिला कर लिखी गई है।

गद्यपद्यमिश्रित राजस्तुति को **विरुद** कहते हैं, ऐसा साहित्यदर्पणकार ही कहते हैं। उदाहरण है–विरुदमणिमाला। जयघोषणादि का उदाहरण (अभी) गवेषणीय है।

प्रबन्धात्मकचम्पूदाहरणं यथा नलचम्पूमदालसाचम्पूयशस्तिलक-जीवन्धररामायणभारतनृसिंहचम्पवादिकं पूर्वविरचितम्।

साम्प्रतिकं यथा ममैवाऽभिराजचम्पूः यथा वा राघवेन्द्राचार्य-पञ्चमुखिप्रणीता विरूपाक्षवसन्तोत्सवचम्पूः, विट्ठलोपाध्यायकृता प्रह्लादचम्पूः, रुद्रदेवत्रिपाठिनश्चतुर्वेदचरितचम्पूः मोहनचरितचम्पूः राजेन्द्रचन्द्रोदयचम्पूश्च, श्रीनिवासप्रणीताऽनन्दरङ्गविजयचम्पूः, के० कृष्णजोइसकृता शरन्न-वरात्रचम्पूः, गोविन्दभट्टकृता सर्वज्ञेन्द्रचम्पूः वनेश्वरविद्यालंकारकृता चित्रचम्पूश्चेति।

प्राक्प्रतिष्ठां समादृत्योपलब्धिञ्चापि नूतनीम्।
मिश्रोऽभिराजराजेन्द्रो निर्मितिं प्रत्यपादयत्।।१३९।।

प्रीयतां तेन वागम्बा धृतशब्दार्थविग्रहा।
बुद्धिर्मे राजहंसीव यया स्वैरं प्रवर्त्यते।।१४०।।

इति निर्मितिप्रकरणम। अत्र कारिकाणां संख्या -१४०

।। इति श्रीमद्गौतमगोत्रोत्पन्नस्य भभयाख्यमिश्रवंशावतंसस्य।।
श्रीमद्दुर्गाप्रसादाऽभिराजीतनूजस्य पण्डितप्रकाण्डश्रीमदाद्या-प्रसाद मिश्रभ्रात्रीयस्य त्रिवेणीकविसंज्ञितस्याभिराज-राजेन्द्रस्याभिनवे काव्यशास्त्रेऽभिराजयशोभूषणे निर्मितितत्त्वोन्मेषाख्यश्चतुर्थोंशः।

प्रबन्धात्मक चम्पूकाव्य का उदाहरण जैसे नलचम्पू, मदालसाचम्पू, यशस्तिलकचम्पू, जीवन्धरचम्पू, रामायणचम्पू, भारतचम्पू, नृसिंहचम्पू–जो पूर्वकाल में प्रणीत किये गये हैं।

वर्तमानयुग के चम्पूकाव्य का उदाहरण जैसे मेरी ही कृति अभिराजचम्पूः। अथवा जैसे राघवेन्द्राचार्य पञ्चमुखि–प्रणीत विरूपाक्षवसन्तोत्सवचम्पूः,

विट्ठलोपाध्यायकृत प्रह्लादचम्पूः, रुद्रदेवत्रिपाठिकृत चतुर्वेदचरितचम्पूः, मोहन-चरितचम्पूः, राजेन्द्रचन्द्रोदयचम्पूः, श्रीनिवासप्रणीत आनन्दरङ्गविजयचम्पूः, के० कृष्णजोइसकृत शरन्नवरात्रचम्पूः, गोविन्दभट्टकृत सर्वज्ञेन्द्रचम्पूः तथा वनेश्वरविद्यालंकारकृत चित्रचम्पूः।

पूर्वकालीन (साहित्यिक) प्रतिष्ठाओं तथा अर्वाचीन उपलब्धियों का समादर करते हुए अभिराजराजेन्द्रमिश्र ने निर्मिति का प्रतिपादन किया है।।१३९।।

शब्दार्थरूपी कलेवर को धारण करने वाली वागधिष्ठात्री सरस्वती उस (वाङ्मय-प्रतिपादन) से प्रसन्न हो जिसके द्वारा मेरी बुद्धिरूपी राजहंसी स्वेच्छया प्रवर्तित की जाती है।।१४०।।

निर्मिति-प्रकरण समाप्त हुआ। इस उन्मेष में कारिकाओं की संख्या-१४०

इस प्रकार श्रीमद्गौतमगोत्रोत्पन्न भभया नामक मिश्रवंश के अलंकार-स्वरूप महाभागवत पं० रामानन्द मिश्र के पौत्र, श्रीमान् पं० दुर्गा-प्रसादमिश्र एवं अभिराजी के पुत्र, विद्वद्धुरीण प्रो० आद्याप्रसाद मिश्र के भ्रात्रीय त्रिवेणीकवि के रूप में विख्यात अभिराजराजेन्द्र के अभिनव काव्यशास्त्र अभिराजयशोभूषण में निर्मितितत्त्वोन्मेष नामक चौथा अंश परिपूर्ण हुआ।

***

अभिराजयशोभूषणम्
।।प्रकीर्णतत्त्वोन्मेषः।।

अथ गीतप्रकरणम्-

यच्च गीतिषु सामाख्येत्युक्तमासीत्पुरातनैः।
तेनैव गीतितत्त्वस्य महत्त्वं धुरि संस्थितम्।।१।।

देवानपि समर्थं यत्प्रीणितुं लयमूर्च्छनैः।
गीतमेव तदेकं यन्नृत्यवाद्यसमन्वितम्।।२।।

मद्भक्ता यत्र गायन्ति तत्राऽहमिति नारदम्।
सान्त्वयत्येव गीतायां भगवान्नन्दनन्दनः।।३।।

न तथा व्यञ्जनैस्तृप्तिर्यथा हि चषकाम्भसा।
ननु धर्माभितप्तस्य पथिकस्याभिजायते।।४।।

तथैव रसिकस्यापि महाकाव्यानुशीलनात्।
जायते न तथाऽऽनन्दो यथा गीतेन तत्क्षणम्।।५।।

अलङ्काररसौचित्यध्वनिवक्रोक्तिरीतिभिः।
तस्मादलं यतो गीतं काव्यस्यात्मेति निश्चितम्।।६।।

अलङ्कारादयस्सर्वे कल्लोला इव चञ्चलाः।
उद्भवन्ति विलीयन्ते सन्ततं गीतसागरे।।७।।

तस्मादद्यतने काव्ये गीतमेव महीयते।
अमन्दानन्दसन्दोहस्रोतस्त्वादधिसंस्कृतम्।।८।।

गीतिर्गीतञ्च गेयञ्च गानमेतन्मिथस्सममम्।
प्रत्ययाच्छब्दवैभिन्न्यं न पुनर्धातुयोगतः।।९।।

प्राचीन आचार्यों के द्वारा जो यह कहा गया कि 'गीतियों की ही साम संज्ञा हैं' उसी से गीतितत्त्व का महत्त्व शिखरारूढ सिद्ध होता है।।१।।

जो (अपनी) लयों तथा मूर्च्छनाओं से देवताओं तक को वशीभूत कर लेने में समर्थ है वह एकमात्र नृत्य एवं वाद्य से समन्वित गीत (तत्त्व) ही है।।२।।

'मेरे भक्तगण जहाँ मेरा गुणानुवाद करते हैं मैं वहीं रहता हूँ' इस प्रकार श्रीमद्भगवद्गीता में भगवान् नन्दनन्दन देवर्षि नारद को सान्त्वना देते हैं।।३।।

घाम से जले-भुने बटोही को व्यञ्जनों (पकवानों) से भी वैसी तृप्ति नहीं प्राप्त होती जैसी कि एक गिलास पानी से।।४।।

ठीक उसी प्रकार, सहृदय पाठक को भी (वृहत्कलेवर) महाकाव्य के अनुशीलन से वैसी आनन्दानुभूति नहीं हो पाती जैसी कि तत्क्षण ही गीतश्रवण से।।५।।

इसलिये अलंकार, रस, औचित्य, ध्वनि, वक्रोक्ति एवं रीति की चर्चा व्यर्थ है क्योंकि यह निश्चित है कि गीत ही काव्य की आत्मा है।।६।।

अलंकारादि सारे के सारे काव्यतत्त्व गीत में उसी प्रकार उठते-गिरते रहते हैं जैसे महासागर में चंचल लहरें बनती-बिगड़ती रहती हैं।।७।।

इसलिये संस्कृत-वाङ्मय में, आज की कविता में, अमन्द आनन्द-सन्दोह का स्रोत होने के कारण गीत-तत्त्व ही महिमामय सिद्ध होता है।।८।।

गीति, गीत, गेय और गान-ये सब परस्पर एक जैसे हैं। मात्र प्रत्यय की भिन्नता से इन शब्दों (के आकार) में भेद है न कि धातु की दृष्टि से (धातु तो सबमें एक ही है-गै धातु)।।९।।

गीतिर्भवति रागस्य सन्ततं परिवाहिणी।
रागहारि च गीतं स्यात्कालिदासमतेन वै।।१०।।
गेयं विरचितपदं गोत्राङ्कञ्च भवेत्पुनः।
वक्ति विद्योत्तमाजानिरित्यपि क्वचिदन्यतः।।११।।
रक्तं स्फुटं समञ्जैव मधुरञ्च मनोहरम्।
भावान्वितं भवेद्गीतं ललितञ्चेति शूद्रकः।।१२।।

गीतिषु सामाख्येति राजशेखरः। सामयति तोषयति देवानिति साम। साम्नां वेदस्सामवेदः। साम्नि यद्देवतोषकरं तत्त्वं तद्गीतमेव। किञ्च, गीतं न केवलं देवानां मानवानामेव तोषकरमपितु पशुपक्षिमृगादीनामपि चेतोहरं तत्त्वम्। आहितुण्डिकस्तु मधुकरीवाद्यलयैः फणिनं भृशं नर्तयन् स्ववशी-करोति। वन्यगजा वीणानादसम्मोहिता निगृह्यन्ते। किरातगीतवाद्यवशीकृत-चेतना मृगा विततां वागुरामपि न पश्यन्ति।

नृत्यवाद्यसमन्वितं तदेव गीतं सङ्गीतं तौर्यत्रिकं वाऽप्युच्यते। नृत्यं गीतञ्च वाद्यञ्च त्रिभिस्सङ्गीतमुच्यते। यथा वा तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिति त्रयमित्यमरः।

गीतं गानमिमे समे इत्यमरः। तद्वदेव गीतिर्गेयं वाऽपि गीतसाम्यं बिभर्ति। कविकुलगुरुकालिदासविरचितेऽभिज्ञानशाकुन्तलनाम्निनाटके पञ्चमाङ्के हंसपदिकाया गीतमाकर्ण्य दुष्यन्तः सप्रशंसं कथयति-अहो रागपरिवाहिणी गीतिरिति। तेन रागपरिवाहित्वमेव गीतिवैशिष्ट्यं प्रतिभाति।

तत्रैव नाटकारम्भे सूत्रधारो नटीं ब्रूते-

गीति होती है राग का निरन्तर प्रवाह धारण करने वाली। इसी प्रकार राग से चित्त को (बरबस) आकृष्ट कर लेने वाला होता है **गीत**। ऐसा कालिदास का मत है।।१०।।

विद्योत्तमाजानि (कविकुलगुरु कालिदास) ही किसी अन्य स्थल पर यह भी कहते हैं कि **गेय** गोत्राङ्क से युक्त तथा मर्मस्पर्शी पदों वाला होता है।।११।।

गीत रागयुक्त, स्फुट (स्पष्टाक्षर) सम, मधुर, मनोहर, भाव-संवेदना से अन्वित तथा ललित होता है-ऐसा शूद्रक का अभिमत है।।१२।।

गीतियों की ही संज्ञा साम है-ऐसा राजशेखर कहते हैं। जो देवताओं को (भी) सान्त्वना दे, परितोष दे, वही सामन् है। साममंत्रों के संकलनभूत वेद को ही सामवेद कहते हैं। साममंत्रों में भी, जो देवताओं को भी सन्तुष्ट करने वाला तत्त्व है-वह गीत ही है।

पुनश्च, गीत केवल देवताओं तथा मनुष्यों का ही तोषकर नहीं होता है अपितु पशुओं, पक्षियों तथा मृगादिकों का भी हृदय चुराने वाला तत्त्व होता है। सँपेरा महुअर-वाद्य के लयों से फणी (सर्प) को जीभर नचाता हुआ स्व-वशीभूत कर लेता है। वनैले हाथी (भी) वीणा के नाद से सम्मोहित होकर ही पकड़ लिये जाते हैं। किरातों (कोल-भीलों) के गायन-वादन से वशीकृत चेतना वाले (बेचारे) हिरन फैली हुई जाल की रस्सी को भी नहीं देखते हैं।

नृत्य और वाद्य से समन्वित वही गीत **सङ्गीत** (क) अथवा **तौर्यत्रिक** भी कहा जाता है। नृत्य, गीत एवं वाद्य-इन तीनो के समन्वय से संगीत कहा जाता है। अथवा जैसा कि अमरकोषकार ने कहा है-तौर्यत्रिक कहते हैं नृत्य, गीत, वाद्य एवं नाट्य इन तीनों को।

गीत एवं गान-ये दोनो एक सरीखे हैं, ऐसा अमरकोष में कहा गया है। ठीक उसी प्रकार गीति अथवा गेय भी गीत से (पूर्णतः) साम्य रखता है।

कविकुलगुरु कालिदास-प्रणीत अभिज्ञानशाकुन्तल नामक नाटक के पंचम

अंक में (रानी) हंसपदिका के गीत को सुन कर (राजा) दुष्यन्त, प्रशंसा करते हुए, कहता है–अहो, यह गीति तो राग को प्रवाहित करने वाली है!

इस कथन से राग का परिवाहित्व ही गीत का वैशिष्ट्य सिद्ध होता है।

अभिज्ञान शाकुन्तल के ही प्रारम्भ में सूत्रधार नटी से कहता है–

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा।।

अत्रापि गीतरागस्य वैशिष्ट्यं प्रसह्य चित्तहारित्वमेव प्रोक्तम्। तस्माद् गीतम्महीयते स्वेन चेतोहरेण गीतरागेणैवेति स्पष्टम्। किञ्च, मेघदूतेऽपि यक्षिणीवीणावादनप्रसङ्गे कालिदासो गेयवैशिष्ट्यं प्रतिपादयति–

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चि–
द्भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती।।

आलोके ते निपतति पुरा सेति शेषः। तदारम्भादेवाध्याहार्यम्। अथाऽत्र गेयसमीक्षा। तत्र वैशिष्ट्यद्वयम्–गोत्राङ्कं विरचितपदञ्चेति। मम गोत्रं नामेति मद्गोत्रं तदेवाऽङ्कश्चिह्नं वैशिष्ट्यं यस्य तद्गेयं मद्गोत्राङ्कम्। वस्तुतो नायकं प्रति नायिकया नायिकां प्रति नायकेन च गीयमाने गेये गोत्राङ्केन स्वाभिप्रायप्रकाशनेनावश्यमेव भवितव्यम्। यथा दुष्यन्तं प्रति लिखिते गेयात्मके स्वमदनलेखे शकुन्तलाऽत्माभिप्रायं प्रकाशयति–

तव न जाने हृदयं मम पुनः कामो दिवाऽपि रात्रावपि।
निर्घृण! तपति बलीयस्त्वयि वृत्तमनोरथाया अङ्गानि।।इति।

(हृदय को बरबस) आकृष्ट कर लेने वाले तुम्हारे गीत के राग से मैं यूँ ही झटिति वशीभूत कर लिया गया हूँ जैसे अत्यन्त वेगगामी इस सारंग (मृग) द्वारा यह राजा दुष्यन्त!

इस सन्दर्भ में भी गीत के राग का वैशिष्ट्य बरबस चित्त को चुरा लेना ही बताया गया है। इसलिये, अपने चित्तावर्जक गीतराग से ही गीत प्रतिष्ठित होता है, यह सुस्पष्ट हो गया।

पुनश्च, मेघदूत काव्य में भी, यक्षिणी के वीणावादन–प्रसंग में (महाकवि) कालिदास गेय का वैशिष्ट्य प्रतिपादित करते हैं–

हे सौम्य! मलिन वस्त्रों वाली गोद में वीणा को स्थापित कर, मेरे गोत्राङ्क (नामोल्लेख) से युक्त तथा विशेष रूप से रचित (अर्थात् मर्मस्पर्शी) पदों वाले किसी गेय को गाने की आकांक्षा करती (परन्तु भावावेश के कारण गिरते) नयनाश्रुओं के कारण गीली हो जाने वाली वीणा की तंत्री को यथाकथञ्चित् सुखा कर, अपने ही द्वारा बनाई गई गीत की मूर्च्छना (आरोह तथा अवरोह को) को बार-बार भूलती-बिसरती (मेरी प्रिया संभवतः तुम्हारी दृष्टि में आ पड़ेगी)।

'वह (मेरी प्रिया यक्षिणी) तुम्हारे दृष्टिपथ में समक्ष ही आपड़ेगी' ऐसा श्लोक में कहना शेष है। उसे प्रारम्भ में ही अध्याहृत कर लेना चाहिये।

अब इस श्लोक में (प्रयुक्त) गेय (शब्द) की समीक्षा। गेय के यहाँ दो वैशिष्ट्य दिये गये हैं-गोत्राङ्क और विरचितपदत्व। मेरा गोत्र अर्थात् नाम है मद्गोत्र। वही है अंक या चिह्न अर्थात् वैशिष्ट्य जिसका ऐसा गेय (गीत) मद्गोत्राङ्क कहा जायेगा।

वस्तुतः नायक के प्रति नायिका द्वारा अथवा नायिका के प्रति नायक द्वारा गाये जाने वाले (विरहोद्दीपक) गेय में गोत्राङ्क अर्थात् स्वाभिप्राय का प्रकाशन अवश्य ही होना चाहिये। जैसे कि दुष्यन्त के प्रति लिखे गये गेयात्मक अपने मदनलेख (प्रेमपत्र) में शकुन्तला आत्माभिप्राय (गोत्राङ्कता) को प्रकाशित करती है-

मैं तुम्हारा हृदय (तो) नहीं जानती (कि उसमें मेरे प्रति क्या भाव है?) परन्तु तुम्हीं को लक्ष्य बनाकर अपने मनोरथों का वरण करने वाली मेरे अंग-प्रत्यंग को तो कामदेव दिन में और रात में भी हे निष्ठुर! अतिशय सन्तप्त कर रहा है।

अत्र शकुन्तलायाः स्वाभिप्रायनिवेदनमेव तद्गोत्राङ्कत्वम्। किञ्च, गेयं भवति विरचितपदम्। विशेषेण रचितानि स्वसमीहितार्थसम्पादनक्षमाणि पदानि यस्मिंस्तत्। अनेनैतदुक्तं भवति यद्गेयप्रयुक्तैः पदैर्मर्मस्पर्शिभिरेव भवितव्यम्। तदिदं विरचितपदत्वं राजमहिष्या हंसपदिकाया गीताक्षरेषु द्रष्टव्यम्-

अभिनवमधुलोलुपस्त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर! विस्मृतोऽस्येनां कथम्??

अत्र शकुन्तलासक्तहृदयं पूर्वोपभुक्तनिजयौवनमाधुरीकं दुष्यन्तं प्रत्यभिव्यक्तो हंसपदिकोपालम्भः निश्चप्रचमतीव मार्मिको विरचित-पदत्वात्। तत्र सहृदया एव प्रमाणम्। अलं भूयः प्रतननेन।

मृच्छकटिकप्रकरणेऽपि रेभिलगीतं प्रशंसन् नायकश्चारुदत्तो गीतवैशिष्ट्यान्याख्याति। तद्यथा-

रक्तञ्च नाम मधुरं च समं स्फुटञ्च
भावान्वितञ्च ललितञ्च मनोहरञ्च।
किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तै-
रन्तर्हिता यदि भवेद् वनितेति मन्ये।।-मृच्छ० ३।४

अथ गीतभेदनिरूपणम्-
(शास्त्रीयगीतं लोकगीतञ्च)

धातुमातुसमायुक्तं यद्धि नादाऽक्षरात्मकम्।
कर्णामृतं विभक्तञ्च द्विधा गीतं प्रशस्यते।।१३।।

धातुजं वेणुवीणादियन्त्रसञ्चयनिस्सृतम्।
मातुजं मुखजं प्रोक्तं गानरूपेण संस्थितम्।।१४।।

गीतमेतद्यदा रागैर्गीयते शास्त्रसम्मतैः।
काव्यं तादृशगीतानां रागकाव्यं समुच्यते।।१५।।

यत्पुनर्गीयते स्वैरं यथाकण्ठं यथासुखम्।
यथाजनपदग्रामकुलजातिपरम्परम्।।१६।।

इस पद्य में शकुन्तला का (दुष्यन्त के प्रति) अपने मनोभावों का निवेदन ही उसकी गोत्राङ्कता है।

पुनश्च, गेय होता है-विरचितपद! विशिष्टरूप से (खूब सोच-समझ कर) विन्यस्त किये गये हों, अपने समीहित मनोभाव को सम्पादित कर पाने में समर्थ पद-समूह जिसमें, उसे कहेंगे विरचितपद!

इसका यह अर्थ हुआ कि उस गेय मेंप्रयुक्त पदों को मर्मस्पर्शी होना चाहिये। (गेय अथवा गीत की) यह विरचितपदता राजमहिषी हंसपदिका के गीताक्षरों में देखी जा सकती है-

हे मधुकर! नूतन मधु के लोभी हो तुम जो कि आम्रमञ्जरी का उस आसक्ति के साथ परिचुम्बन (रसपान) कर अब (विना मधुपान के) कमल-वन में निवासमात्र से सन्तुष्ट होकर इसे भला क्यों भूल बैठे हो?

यहाँ शकुन्तला में आसक्त हृदय वाले तथा उससे पूर्व अपनी यौवन-माधुरी का उपभोग करने वाले दुष्यन्त के प्रति हंसपदिका का उलाहना प्रकट

जो कि निश्चित रूप से अत्यन्त मार्मिक है-मर्मस्पर्शी पदों का प्रयोग कारण। इस सन्दर्भ में सहृदय जन ही प्रमाण हैं। अधिक विस्तार करने नहीं।

च्छकटिक प्रकरण में भी रेभिल के गायन की प्रशंसा करते हुए नायक गीत की विशेषताओं को गिनाता है। उदाहरणार्थ-

रेभिल का गायन) रक्त (सुरीला) मधुर (मिठास भरा) सम (कर्णसुखद) स्पष्ट आशय वाला) संवेदनाओं से ओत-प्रोत, ललित एवं हृदयावर्जक मेरे द्वारा कहे गये अतिशय प्रशंसा-वचनों से क्या लाभ? मैं तो ऐसा ूँ मानो उसके कण्ठ में कोई वनिता (गायिका) ही प्रतिष्ठित हो गई थी।-३।४

गीतभेद का निरूपण (शास्त्रीयगीत-लोकगीत)

र्ण-कुहरों के लिये जो गीत अमृततुल्य होता है वह धातु एवं मातु से होकर नादात्मक एवं अक्षरात्मक-इन दो रूपों में विभक्त है।।१३।।

ातुज गीत उसे कहते हैं जो वेणु तथा वीणा आदि यंत्र-समूह से त होता है। मातुज गीत को मुखज अर्थात् मुँह से कढने वाला भी कहते क गायन के रूप में विद्यमान है।।१४।।

ही गीत जब शास्त्र-सम्मत रागों (भैरवी, केदार, धनाश्री आदि) के से गाया जाता है तो उस प्रकार के गीतों का काव्य **रागकाव्य** कहा ।१५।।

ौर जो गीत स्वतंत्र रीति से सम्प्राप्त कण्ठध्वनि के अनुसार सुखपूर्वक पद, ग्राम, कुल, जाति की परम्परा के अनुसार गाया जाता है।।१६।।

च्च सद्योरसानन्ददायकं गतबन्धनम्।
ास्त्रनियमनिर्मुक्तं लोकगीतं समुच्यते।।१७।।
गकाव्यगता रागा यथा गान्धर्वसम्मताः।
थैव लोकगीतानां रागा लोकानुमोदिताः।।१८।।
ोकगीतमपि स्वैरं शास्त्ररागेण गीयते।
ास्त्ररागाश्रितं गीतं लोकरागैस्तथैव च।।१९।।
र्वमेतद्धि गान्धर्वविद्याकुशलकौशलम्।
ोकशास्त्रोभयोत्तीर्णो यद्यसौ भवति ध्रुवम्।।२०।।

प्रमाणं लोकगीतानां लोक एव हि केवलम्।
यथावदङ्गीकर्तव्यं ततस्तद्धि यथास्थितम्।।२१।।

धातुजमेव यन्त्रजम्। तच्च चतुर्विधं प्रोक्तं प्राक्तनग्रन्थेषु। तद्यथामरकोषे-

ततं वीणादिकं वाद्यमानद्धं मुरजादिकम्।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्।
चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्।।

यथा वा भरतप्रणीते नाट्यशास्त्रे-

ततं चैवावनद्धं च घनं सुषिरमेव च।
चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम्।।
ततं तन्त्रीकृतं ज्ञेयवनद्धं तु पौष्करम्।
घनं तालस्तु विज्ञेयः सुषिरो वंश एव च।।

संगीतशास्त्रीय नियमों से विनिर्मुक्त, किसी भी प्रकार के बन्धन (बन्दिश) से परे, तत्क्षण रस एवं आनन्द से सराबोर कर देने वाला वही **लोकगीत** कहा जाता है।।१७।।

जैसे रागकाव्य में प्रयुक्त राग-समूह संगीतशास्त्र-सम्मत होते हैं ठीक उसी प्रकार लोकगीतों के भी राग लोक-सम्मत होते हैं।।१८।।

(यह बात और है कि) लोकगीत को भी स्वेच्छापूर्वक किसी शास्त्रीयराग पर गाया जा सकता है और उसी प्रकार शास्त्रीयरागाश्रित किसी गीत को लोकरागों पर भी गाया जा सकता है।।१९।।

यह सबका सब संगीतशास्त्र में प्रवीण (गायक) का कौशल मात्र है बशर्ते कि वह निश्चित रूप से लोकगीतों तथा शास्त्रीयगीतों की परम्परा में समानरूप से उत्तीर्ण हो।।२०।।

लोकगीतों का प्रमाण इसलिये एकमात्र लोक (Folk) को ही यथावत् स्वीकार किया जाना चाहिये जिस किसी भी रूप में वह विद्यमान हो।।२१।।

धातुज को ही **यन्त्रज** भी कहते हैं। वह प्राचीन ग्रंथों में चार प्रकार का बताया गया है। जैसा कि अमरकोष में-

वीणा इत्यादि (तंत्रवाद्यों को) को **तत**, मुरज (मृदंग) आदि को **आनद्ध** (कसा जाने वाला) वंशी आदि को **सुषिर** (छिद्रयुक्त) तथा कांस्यताल आदि

को घन (ताडित होने वाला) कहते हैं। इस प्रकार वादित्र एवं आतोद्य नामक यह वाद्य चार प्रकार का होता है।

अथवा जैसे आचार्य भरत-प्रणीत नाट्यशास्त्र में-

तत, अवनद्ध, घन तथा सुषिर-ये चार प्रकार के आतोद्य होते हैं जिनके पृथक् लक्षण हैं। तंत्रियों (तारों) से निर्मित (वाद्य)तत कहा जाता है। पौष्कर (नगाड़े) आदि को अवनद्ध कहते हैं। ताल को घन जानना चाहिये तथा वंश को सुषिर।

मातुजमेव मुखजमपि स्मृतम्। तदेव गानरूपेण स्थितम्।

रागकाव्यं तावद् विविधैः शास्त्रोक्तरागैर्गीयमानं गीतसङ्कलनभूतं काव्यम्। रागकाव्यमधिकृत्य भणत्यभिनवगुप्तपादाचार्योऽभिनवभारत्याम्-

राघवविजयमारीचवधादिकं रागकाव्यम्-.... तथा हि राघवविजयस्य हि ढक्करागेणैव विचित्रवर्णनीयत्वेन निर्वाहः। मारीचवधस्य ककुभग्रामरागेणैव। अतएव रागकाव्यान्युच्यन्त एतानि। अभि० अ० ४

सम्प्रत्युपलब्धं रागकाव्यस्य प्रथमोदाहरणं जयदेवप्रणीतं गीतगोविन्दम्। तत्परम्परायामेव विद्यन्ते ताललयाश्रितानि गीतगिरीश-गीतगौरीश-गीतपीतवसन-गीतगङ्गाधर-रामगीतगोविन्दादीनि रागकाव्यानि। रागकाव्येष्वेषु ध्रुवकप्रयोगोऽनिवार्यः। यथोक्तं रागार्णवे-

न विवेको विना ज्ञानं ध्यानं नात्र रसं विना।
श्रद्धया न विना दानं न गानं ध्रुवकं विना।।

नव्यो हि राधावल्लभो लक्षयति रागकाव्यम्-

विविधै रागैर्गेयं ध्रुवकान्वितगीतिसंयुतं रागकाव्यम्(अभि० ३।१।६) तद्रोचते मह्यमपि । द्विवेदी रहसविहार्यपि तुल्यमेव भणति-

रागलक्षणसंयुक्तं गेयं गीतं ध्रुवान्वितम् ।
एकस्मिन् विषये रागे गीतानां तु समुच्चयः।।

अथ लोकगीतप्रकरणम्।

लोकेन सङ्गीतशास्त्रज्ञानविरहितेन प्राकृतजनेन गीतं लोकगीतम्। यद्वा लोकानां ग्रामग्रामटिकाग्रहाराणां गीतं लोकगीतम्। किमस्य लोकगीतत्वमिति सम्प्रत्युच्यते-यदिदं गीतं यथाजनपदग्रामकुलजातिपरम्परं

किञ्च, यथाकण्ठं यथासुखं गीयते। तत्र जनपदोदाहरणं यथा रसिकाख्यं लोकगीतं व्रजेष्वेव गीयते न तावत्कोसलेषु। बाउलगीतं बङ्गेष्वेव, पण्डवानीगीतं महाकोसलेष्वेव, रागिणीगीतं हरियाणाक्षेत्रेष्वेव, सूतगृह-नक्तक-प्रचरण-वटुक-स्कन्धहारीय-चैत्रक-फाल्गुनिकादीनि उत्तर-प्रदेशेष्वेव, दण्डरासकगीतं (डाँडियेति भाषायाम्) गुर्जरेष्वेव, अभङ्गाख्यं गीतं महाराष्ट्रेष्वेव गीयन्ते। कुलजातिपरम्परापराणि गीतान्यपि मिथो भिद्यन्ते। उत्तरभारते आभीर-नापित-कुम्भकार-रजकादीनां पृथग्जातीय-गीतानि भवन्ति।

मातुज को ही मुखज भी कहा गया है। वही गान के रूप में प्रतिष्ठित है।

रागकाव्य विविध संगीतशास्त्रीय रागों से गाये जाने वाले गीतों का संकलनभूत काव्य है। रागकाव्य के विषय में आचार्य अभिनवगुप्तपाद ने (नाट्यशास्त्र की अपनी टीका) अभिनवभारती में लिखा है-

राघवविजय तथा मारीचवध आदि रागकाव्य हैं...। जैसा कि राघवविजय में ढक्करराग के माध्यम से ही विलक्षण वर्णनीयता का निर्वाह मिलता है। मारीचवध में भी ककुभराग के द्वारा। इसीलिये इनको रागकाव्य कहते हैं।-अभिनव० अ० ४

वर्तमान युग में उपलब्ध रागकाव्य का प्रथम निदर्शन है जयदेव-प्रणीत गीतगोविन्दम्। उसी परम्परा में आते हैं ताल और लय पर आश्रित गीतगिरीशम्, गीतगौरीशम्, गीतपीतवसनम्, गीतगङ्गाधरम्, गीतरामगोविन्दम् आदि।

इन समस्त रागकाव्यों में ध्रुवक का प्रयोग अनिवार्य है। जैसा कि रागार्णव में कहा गया है-ज्ञान के अभाव में विवेक, रस (तन्मयता) के अभाव में ध्यान, श्रद्धा के अभाव में दान तथा ध्रुवक के अभाव में गान संभव नहीं होता।

नये काव्यशास्त्री राधावल्लभ रागकाव्य को परिभाषित करते हैं-

विविध शास्त्रीय रागों द्वारा गेय, ध्रुवक से अन्वित गीतों के संकलन को रागकाव्य कहते हैं।-अभिनव० अ० ४

यह लक्षण मुझे भी पसन्द हैं। रहसविहारीद्विवेदी भी कुछ ऐसी ही बात कहते हैं-ध्रुवक से अन्वित, रागों के लक्षण से युक्त जो गीत गेय हों, ऐसे गीतों का जहाँ एक ही विषय अथवा राग में संकलन हो, उसे रागकाव्य कहते हैं।

अब **लोकगीत** का प्रकरण-

लोक के द्वारा अर्थात् संगीतशास्त्र के ज्ञान से विरहित सामान्य जनों (ग्रामवासियों) द्वारा गाया जाने वाला (गीत) **लोकगीत** (Folk Song) है। अथवा लोक का (जवार अथवा गाँव-गिराँव-पुरवे) का गीत लोकगीत है। इसका लोकगीतत्व क्या है? अब इसे बताया जा रहा है-

चूँकि यह गीत जनपद, गाँव, कुल तथा स्वजातीय परम्परा के अनुसार, कण्ठध्वनि-वैशिष्ट्य के साथ, स्वाभाविक पद्धति से गाया जाता है (इसीलिये) इसे लोकगीत कहते हैं।

जनपद का उदाहरण जैसे **रसिक** (रसिया) नामक लोकगीत व्रजक्षेत्र (मथुरा-वृन्दावन) में ही गाया जाता है न कि कोसल क्षेत्र में। **बाउल** गीत बंगाल में ही, **पण्डवानी** गीत महाकोसल (छत्तीसगढ़) में ही, **रागिणी** गीत हरियाणा इलाके में ही, सूतगृह (सोहर) नक्तक (नकटा) प्रचरण (पचरा) वटुक (बरुआ) स्कन्धहारीय (कहँरवा) चैत्रक (चैता) फाल्गुनिक (फाग) आदि उत्तरप्रदेश में ही, **दण्डरासकगीत** (जनभाषा में डाँडिया रास) गुजरात में ही, तथा **अभंग** नामक गीत महाराष्ट्र क्षेत्र में ही गाया जाता है।

कुल, जाति की परम्परा वाले (लोक) गीत भी एक-दूसरे से भिन्न होते हैं। उत्तर भारत में आभीर (अहीर) नापित (नाई) कुम्भकार (कुम्हार) तथा रजकादि (धोबियों) के पृथक्-पृथक् जातीय गीत होते हैं।

ऋतूनामागमं पर्व गृहमङ्गलमुत्सवम्।
धर्मसंस्कृतिरीतिं वा लोकगीतं समञ्चति।।२२।।

अथ कजरीगीतम्-

कोसलेषु च काशीसु गीयते हि घनागमे।
गीतिका कजरीनाम्नी नैकरागसमाश्रिता।।२३।।

वियोगिन्या हि गीतेऽस्मिन् प्रोषितं नायकं प्रति।
उपालम्भाः प्रदीयन्ते विस्मृतिक्षोभकारकाः।।२४।।

कं पतिसाहचर्यजनितं सुखं जरयतीति भावबोधिनी गीतिः कजरीति मया व्याख्यातं स्वोपज्ञायां वाग्वधूट्याम्। घनागम एव गीयत इत्युपलक्षणम्। नैकरागसमाश्रितेति सोदाहरणं निरूपयिष्यते।

तत्र प्रथमरागाश्रितमुदाहरणं यथा मम वाग्वधूट्याम्-

रौति कोकिला मदालसा रसालतरौ
गोपिता तमालतरौ रे!
क्वचित्पल्लवे निलीय, मञ्जरीरसं निपीय
स्तौति सम्मुखं वसन्तकं रसालतरौ
गोपिता तमालतरौ रे!!

लोकगीत (प्रायः) नूतन ऋतुओं की अगवानी, पर्व (तीज-त्योहार) घरेलू मंगल एवं उत्सव अथवा धर्म-संस्कृति एवं रीति-रिवाज के उपलक्ष्य में गाये जाते हैं।।२२।।

कजरी गीत-

पावस ऋतु आने पर (सावन-भादों के महीनों में) कोसल एवं काशी क्षेत्र में, अनेक रागों पर आश्रित कजरी नामक लोकगीत गाया जाता है।।२३।।

परदेशी नायक के प्रति विरहिणी नायिका के उलाहने इस गीत में अभिव्यक्त होते हैं जो कि नायक की विस्मृतिशीलता के प्रति (नायिका के) क्षोभ को प्रकट करते हैं।।२४।।

'कम्' अर्थात् पति-साहचर्यजनित (रति) सुख को नष्ट करने वाली, वियोगभाव का बोध कराने वाली गीति **कजरी** है ऐसी व्याख्या मैंने अपनी (पूर्वप्रकाशित) कृति **वाग्वधूटी** में की है। वर्षाऋतु में ही कजरी गाई जाती है, यह उपलक्षण-मात्र है(अन्यथा कभी भी गाई जा सकती है)।

अनेक रागों (लयों) पर समाश्रित होती है (कजरी) इसका (अब) सोदाहरण निरूपण किया जायेगा।

उनमें **प्रथम** राग पर आधारित उदाहरण जैसे मेरी **वाग्वधूटी** में-

मद में अलसाई तथा तमाल की शाखाओं में छिपी-बैठी कोकिला आम के पेड़ पर कूक रही है।

कभी आम्रपल्लवों में छिप कर, मञ्जरियों का रसपान करती, चौतरफा पसरे वसन्त का मानो अभिनन्दन कर रही है।

द्वितीयरागाश्रितमुदाहरणं यथा तत्रैव वाग्वधूट्याम्-

राधा वादयति मुरलीमये! माधव!
राधा वादयति मुरलीमये! माधव!!

रासमण्डलस्मृतेन
काऽपि गोपिका करेण
धीरा धारयति मुरलीमये माधव!!

तृतीयरागाश्रितमुदाहरणं यथा मम मृद्वीकायाम्-

व्यालीव दशति धनरजनी
दयितो नन्दनन्दनो न सदने!
नदति निशीथे पापी विपिने कलापी
भयमेति गृहे विधुवदनी
दयितो नन्दनन्दनो न सदने!!

चतुर्थरागाश्रितमुदाहरणं यथा तत्रैव मृद्वीकायाम्-

लघु लघु जलद! सलिलमभिवर्षय
हर्षय जगदविरामं रे!
घोरं शब्दय शतशतवारम्
विस्फूर्जय नादय परिवारम्
बहु बहु वितर सुधामभिलषितां
नन्दय सकृदभिरामं रे!!

द्वितीय रागाश्रित उदाहरण भी वहीं वाग्वधूटी में ही-

हे माधव! वृषभानुनन्दिनी राधिका (तुम्हारी) मुरली बजा रही हैं। राधा वंशी बजा रही है माधव!

रासोत्सव की स्मृति आ जाने के कारण, धीरभाव से राधा (तुम्हारी) मुरली ग्रहण कर लेती है माधव!

तृतीय राग पर आश्रित (कजरी का) उदाहरण जैसे मेरी मृद्वीका में-

काली रात साँपिन की तरह डँस रही है (परन्तु) प्रियतम नन्दनन्दन भवन में नहीं हैं।

आधीरात के समय पापी कलापी (मोर) वन में कुहक रहा है (जिसे सुन कर) चन्द्रमुखी नायिका (सूने) घर में भयभीत हो रही है। प्रियतम नन्दनन्दन भवन में नहीं हैं।

चतुर्थ राग पर आश्रित उदाहरण जैसे वहीं मृद्वीका में ही-

हे मेघ! जल्दी-जल्दी पानी बरसो और संसार को जीभरकर हर्षित कर दो। गरजो जोर-जोर से सैकड़ों बार, मचाओ धमाचौकड़ी और अपने संगी-साथियों से भी शोर मचवाओ। अपार मात्रा में (जनता के) मनचाहे अमृत का वितरण करो और एक बार सज-धज के साथ धरती को खुश कर दो।

पञ्चमरागाश्रितमुदाहरणं यथा मृद्वीकायामेव-

सखि रे! समागच्छति श्रावणमास उदारोऽयं
संवर्धयत्यनङ्गं मानसे!
चित्तं चोरयते ननु चन्द्रः
मेघो भीषयते ननु मन्द्रः
सखि रे! स्फुरति दामिनी गगने कृताभिसारेयं
संवर्धयत्यनङ्गं मानसे!!

षष्ठरागाश्रितमुदाहरणमपि मृद्वीकायामेव-

रिमझिम् वर्षति सजलजलधरो
नृत्यति केकी कानने!
गर्जति धावति नदति च कूर्दति
तारापथे पयोदो बाले!
अयि भोः शिशुरिव नटति जलधरो
नृत्यति केकी कानने!!

सप्तमरागाश्रितमुदाहरणं यथा ममैव वाग्वधूट्याम्-

नन्दनन्दनेन गोकुलं निकेतनीकृतम!
इतस्ततः परिलुठन् धूलिधूसरीभवन्।
क्वचिन्नृत्यति प्रगायति स्वमन्दिरे द्रुतम्!!

पञ्चमरागाश्रित उदाहरण जैसे (मेरी कृति) मृद्वीका में ही-

हे सखि! यह मनभावन सावन का महीना आ गया है और मन में कामभावना को अंकुरित करने लगा है।

चन्द्रमा भी तो मन को चुराने लगा है (अपनी लुका-छिपी से) और मन्द-मन्द गरजता मेघ भयभीत करने लगा है।

हे सखि! (मेघरूपी नायक के साथ) अभिसार करने वाली यह दामिनी भी अम्बर में कौंधने लगी है। मन में काम जागृत हो रहा है।

षष्ठरागाश्रित उदाहरण भी मृद्वीका में ही-

जल से भरा-पुरा बादल रिमझिम बरस रहा है और मयूर वन में नाचने लगा है।

हे बाले! मेघ आकाश-मण्डल में गर्जता है, भाग-दौड़ करता है, दहाड़ता है तथा उछल-कूद मचा रहा है।

अरी सखि! बच्चे की तरह लीला कर रहा है बादल और नाच रहा है वन में मोर!

सप्तमरागाश्रित उदाहरण जैसे मेरी ही कृति वाग्वधूटी में-

नन्दनन्दन कृष्ण द्वारा (अब) गोकुल को ही अपना घर बना लिया गया है।

इधर-उधर उठते-गिरते हुए तथा धूलि-धूसर होते हुए कन्हाई, अपने घर में कहीं वेगपूर्वक नाचते हैं तो कभी गाते हैं।

अष्टमरागाश्रितमुदाहरणं यथा मम मधुपर्ण्याम्-

मेघो वितरति बहु बहु वारि भुवनसुखमातनुते!
भाति धरणी विशाला धृतशाकतृणमाला
मेघो वितरति बहु बहु वारि नयनसुखमातनुते!!
शाखा विमलपलाशा मञ्जुकलरवहासा
मेघो वितरति बहु बहु वारि विहगसुखमातनुते!!

नवमरागाश्रितमुदाहरणं यथा ममैव-

कान्तो नहि भवने जलदो हन्त गगने
जीवति दीनदीना विजने विरहिणी!
जनको न जननी न वा दयितभगिनी
गमयेदथ रजनीं कथमिह तरुणी??

रागान्तरसमाश्रितान्यप्युदाहरणानि सम्भवन्ति। कविप्रतिभया सर्वमिदं शक्यम्। सर्वाण्यपि गीतान्येतानि तानलयाश्रितानि लोकपरम्परामेव प्रमाणीकृत्य गीयन्ते। तद्यथाऽस्मदन्तेवासिरत्नभूतैर्जनार्दनपाण्डेयैः स्वोपज्ञायां निस्यन्दिन्यामुक्तम्-गीतिर्नाम लयतालयोर्नैसर्गिकसङ्गतौ समुच्छ्वसितानां भावप्रवणचित्तस्य रससान्द्राणां तासां निश्छलाभिव्यक्तीनां शब्दार्थसंस्पन्दनमयी काचिद् रागात्मिका क्रीडा। नूनं ललितललितां

छान्दसीं काञ्चन साङ्गितिकीं वीणां वादयन्ती कवेरात्मोत्कलिकावधूटी विवृतावगुण्ठना भवन्ती यदापातमधुरं वाचोऽमृतं सृजति तदेव गीतिरिति।

तदहमप्योमिति ब्रवीमि।

अष्टमराग पर आश्रित कजरी का उदाहरण जैसे मेरी मधुपर्णी में-

बादल, बरस रहा है ढेर सारा जल और कर रहा है संसार को सुखी!

विशाल धरती (नानाविध) शाकों तथा तृणों की माला को धारण करती शोभा- सम्पन्न हो उठी है। बादल बरस रहा है ढेर सारा जल और दे रहा है आँखों को सुख!

वृक्षों की शाखायें निर्मल पत्तों वाली हो गई हैं तथा (पक्षियों के) मञ्जु कलरवरूपी हँसी को धारण करने लगी हैं। बादल बरस रहा है ढेर सारा जल और देने लगा है पंछियों को सुख!

नवम रागाश्रित उदाहरण जैसा मेरा ही (यह गीत)

बादल आकाश में छाये हैं (परन्तु) प्रियतम घर में नहीं हैं। इस सुनसान में विरहिणी नायिका अतिशय दीनभाव से जैसे-तैसे जी रही है।

(संग में) न माँ है, न बाप है, नही प्रिय भगिनी! तो फिर युवती नायिका रात कैसे काटे?

अन्यान्य रागों पर भी आधारित (कजरी के) उदाहरण सम्भव हो सकते हैं। यह सब कवि की प्रतिमा से होना संभव है। ये सारे के सारे गीत (विविध) ताल एवं लय पर आश्रित हैं तथा लोकपरम्परा को ही प्रमाण मान कर गाये जाते हैं। जैसा कि मेरे शिष्यप्रवर जनार्दनपाण्डेय मणि ने अपनी कृति निस्यन्दिनी में लिखा है-

गीति होती है लय और ताल की नैसर्गिक संगति में समुच्छ्वसित, भावप्रवण चित्त की रस से सराबोर उन निश्छल अभिव्यक्तियों की शब्दार्थ-संस्पन्दनमयी कोई रागात्मिका क्रीडा! निश्चित रूप से कवि की अपनी उत्कलिका-वधूटी जब घूँघट खोल कर, अतिशय लालित्यभरी किसी छान्दसी साङ्गीतिकी वीणा को बजाती हुई आपात-मधुर वाणी के अमृत की सृष्टि करती है तो वही होती है गीति!

मैं भी इस मन्तव्य का अनुमोदन करता हूँ।

अथ रसिकम्-

रासोत्सवं समालक्ष्य मुकुन्दराधिकाश्रितम्।
रसिकं गीयते प्रीत्या व्रजेषु शरदागमे।।२४।।

तत्रोदाहरणं यथा हरिदत्तशर्मणो गीतमिदम्-

श्रृणु रे मातः! श्रावणमासोऽप्यायातः
नाद्य प्रेयानायातः स्फुरति गगनतले दामिनी!!
दृश्यन्ते परितोऽम्भः श्यामा मेघाडम्बरमालाः
अविरलवर्षणगहनगर्जनैः कम्पन्ते नवबालाः
धनतमसाछन्ने गगने, चलिते सुखशीतलपवने
भवति कामेहा मे स्वामिनी!!

यथा वाऽवस्थिनो बाबूरामस्य गीतमिदम्-

मङ्गलदिनमिदमद्य शिशुर्गेहे खेलति रे
ए हो शीघ्रं चल सखि! नन्दभवनमभिनन्दति रे!!
श्यामश्चलति सलीलं पतति भुवि तिष्ठति रे
ए हो नृत्यति लसति कदापि हसति बहु रोदिति रे!!

अथ फाल्गुनिकम्-

गीयते फाल्गुने मासे फाल्गुनिकं गृहे-गृहे।
चतुस्तालादिभिर्भेदैर्होलिकोत्सवसङ्गतम्।।२५।।
होलीगीतमपि प्रोक्तं ततो हर्षौघसम्भृतम्।
कुङ्कुमैः पटवासैश्च वर्धितानन्दमङ्गलम्।।२६।।

अब रसिकगीत (रसिया)-

कृष्ण और राधा पर समाश्रित रासोत्सव को उपलक्षित कर शरद्ऋतु की अगवानी में, व्रजमण्डल में रसिक (रसिया) गाया जाता है।।२४।।

इसका उदाहरण है हरिदत्त शर्मा का यह गीत-

सुन री मेरी माँ! सावन का महीना भी आ गया, परन्तु प्रियतम घर नहीं लौटा। आकाश में बिजली कौंध रही है। चारों ओर कारी कजरारी बदलियाँ दीख रही हैं। लगातार बारिश और घनगर्जन से कोमल अवस्था की रमणियाँ काँप उठती हैं।

घने अन्धकार से आच्छन्न आकाश में सुखदायी शीत पवन के चलते ही मेरी गृहस्वामिनी सरस हो उठती है। सुन मेरी माँ!!

अथवा जैसे बाबूराम अवस्थी का यह गीत-

आज है यह मंगलमय दिन (क्योंकि) शिशु क्रीड़ा कर रहा है। अरी सखि! शीघ्र चलो। बाबानन्द का भवन (सबका) अभिनन्दन कर रहा है।

साँवरे सलोने किशन कन्हाई लीलापूर्वक चलने लगे हैं। कभी धरती पर गिरते हैं (तो) कभी उठ खड़े होते हैं। अरी सखि! कभी नाचते हैं, मटकते हैं तो कभी खिलखिला कर हँसते अथवा रोते हैं।

अब फाल्गुनिक (फाग)

होलिकोत्सव के उपलक्ष्य में, फागुन के महीने में, घर-घर में चौताल आदि भेदों वाला फाग (फगुआ) गाया जाता है।।२५।।

इसीलिये, कुङ्कुम और अबीर मलने से आनन्द एवं मंगल बढ़ाने वाले तथा हर्षसम्भार से ओत-प्रोत इस गीत को होलीगीत भी कहते हैं।।२६।।

असह्यशीतकम्पेभ्यो मुक्तो लोकोऽभिनन्दति।
फाल्गुनं हि वसन्तर्तुमण्डितं शीतहारकम्।।२७।।

चतुस्तालोदाहरणं यथा मम मृद्वीकायाम्-

करकमले लसति पिच्कारी
विहरति मुरारिः!!
नहि रक्षति परिचयं न शीलम्
पश्यति न वयो गिरिधारी
विहरति मुरारिः!!
नयनसमक्षं मिलति य एव
रञ्जयति तमेव विहारी
विहरति मुरारिः!!

रागान्तराश्रितमुदाहरणं यथा मृद्वीकायामेव-

मधुमासोऽभूद् वृन्दाविपिने
कोकिलोच्चारयति कुहूरुतम्!!
कान्तिर्नवा पलाशपलाशे
नवगन्धः कुसुमे-कुसुमे
कोकिलोच्चारयति कुहूरुतम्!!

चर्चरिकां नृत्यति वनमाली
स्मितं द्रवति राधावदने
कोकिलोच्चारयति कुहूरुतम्!!

रागान्तराश्रितमुदाहरणं यथा मम श्रुतिम्भरायाम्-

मदयति हृदयं सुखयति सदयं
श्रियमुद्गिरति वनाय
वसन्तो भुवमवतरति सुखाय!!
दिशि-दिशि पीता मधुकरगीता लसति रसालवनाली
'कुहू कुहू' कूजति परभृतिका दयितं मनसि निधाय
वसन्तो भुवमवतरति सुखाय!!

असह्य शीत की कँपकपी से मुक्त हुआ समाज, ठंडक से मुक्ति देने वाले तथा वसन्त ऋतु से श्रीमण्डित फाल्गुन का अभिनन्दन करता है।।२७।।

चतुस्ताल (चौताला) का उदाहरण जैसे मेरी कृति मृद्वीका में-

कमल जैसे (कोमल) हाथों में पिच्कारी (रंग फेंकने वाला यंत्र-विशेष) शोभित है और नन्दनन्दन कृष्ण क्रीडा कर रहे हैं।

(शरारती) कृष्ण न परिचय की परवाह कर रहे हैं, न ही (अपने) शील (आचरण) की। गिरिधारी कृष्ण (किसी की) अवस्था भी नहीं देख रहे हैं।

जो कोई भी आँखों के सामने दीख जाता है बिहारी कृष्ण उसी को रंग से सराबोर कर दे रहे हैं। कृष्ण क्रीडा कर रहे हैं।

एक अन्य राग पर आधारित चौताल का उदाहरण मृद्वीका में ही-

वृन्दावन में उतर आया है वसन्त, कोयल कुहू-कुहू गाने लगी है। नई गन्ध रच-बस गई है। कोयल कुहू-कुहू गाने लगी है।

वनमाली कृष्ण चर्चरिका (स्वाँग) नाचने लगे हैं और राधिका के मुखमण्डल पर मुस्कान तैरने लगी है। कोयल कुहू-कुहू गाने लगी है।

एक अन्य राग पर आश्रित फाल्गुनिक मेरी श्रुतिम्भरा में-

हृदय को मदमत्त बनाता है, कृपापूर्वक आनन्द वितरित करता है तथा कानन को सुन्दरता प्रदान करता है। वसन्त सुख देने के लिये पृथ्वी पर उतर आया है।

दिशा-दिशा में पीले रंग वाली तथा भ्रमरों के गुञ्जन से ओत-प्रोत अमराई शोभित हो उठी है। कोयल भी अपने प्रियतम को मन में अनुभव करती 'कुहू-कुहू' स्वर में कूजने लगी है। वसन्त सुख देने के लिये उतर आया है धरती पर।

अथ चैत्रकम्-

चैत्रकं गीयते चैत्रे हर्षसम्मोदनिर्भरम्।
नवाऽन्नागमसम्भारसम्पदिङ्गितवैभवम्।।२८।।

चैत्रकेऽपि क्वचिद् बाला कापि प्रोषितवल्लभा।
व्यनक्ति स्वीयमातङ्कं स्मरजं मार्मिकैः पदैः।।२९।।

चैत्रकोदाहरणं यथा ममैव वाग्वधूट्याम्-

विधुमभिसरति कुमुदिनी रे मातः किमु करवाणि?
प्रोषितपतिका विरहिणी रे मातः किमु करवाणि?

पवनो वहति मलयगिरिसूतः
रेवातटगतवञ्जुलपूतः
वितरति सुममधु नलिनी रे मातः किमु करवाणि?

अथ सूतगृहगीतम्-

पुत्रजन्मविवाहादिमङ्गलावसरे पुनः।
गीयते ननु नारीभिर्गीतं सूतगृह्मभिधम्।।३०।।

उदाहरणं यथा ममैव वाग्वधूट्याम्-

दुरितानि विधुतानि कुरुते शुभानि साधु विदधाति रे।
गङ्गे! तव नीरगाहनं वितनुते विवुधलोकमनुयाति रे!!
कमलारमणचारुचरणाब्जजनिते त्रिपथगे! त्वया।
गङ्गे! विहितं न कस्य पापहरणं मनुजदेवदनुजस्य रे!!
धवलाम्बुलसितानि पुलिनानि सिकताविकसितानि रे।
गङ्गे! बकहंससारसविलसितानि नयनानि जडयन्ति रे!!
तव नीरमुकुरे विलसितं निशीथिनीशमवलोक्य रे।
गङ्गे! प्रतिभाति मानसाम्बुनिवहे तरति हंसशिशुको यथा!!

अब चैत्रक (चैता) गीत-

चैत के महीने में, हर्ष एवं आह्लाद से ओत-प्रोत तथा नई फसल की

समृद्धि से गार्हस्थ्य-वैभव की सूचना देने वाला **चैता** नामक गीत गाया जाता है। इस चैता नामक गीत में भी कभी-कभी परदेश गये प्रियतम वाली नवयौवना नायिका मर्मस्पर्शी शब्दों में अपने कामजनित आतंक को अभिव्यक्त करती है।।२८, २९।।

चैत्रक (चैता) का उदाहरण जैसे मेरी ही कृति वाग्वधूटी में-

कुमुदिनी चन्द्रमा के साथ अभिसार कर रही है। हायरी माँ! क्या करूँ मैं? मैं हूँ परदेस छाये प्रियतम वाली बिरहिन। हाय री माँ! क्या करूँ मैं?

मलयपर्वत से जनमा पवन बह रहा है जो नर्मदा के तटवर्ती वंजुलकुञ्जों से पवित्र हो उठा है।

कमलिनी फूलों की मदिरा बाँटने लगी है हाय री माँ! क्या करूँ मैं?

अब **सूतगृहगीत** (सोहर)

पुत्रजन्म तथा विवाहादि मंगल अवसरों पर, महिलाओं द्वारा गाया जाने वाला गीत **सूतगृह** (सोहर) गीत कहा जाता है।।३०।।

उदाहरण जैसे मेरी गीतकृति वाग्वधूटी में-

पापों का विध्वंस करता है तथा पुण्यों का भलीभाँति सम्पादन करता है। माँ गंगे! तुम्हारा जलस्नान स्वर्ग-सौख्य प्रदान करता है तथा मुक्ति देता है।

कमलारमण विष्णु के रम्य चरण-कमलों से जनमी हे त्रिपथगे! हे गंगे! तुमने किस मानव, देव अथवा दानव के पापों का विनाश नहीं किया?

हे गंगे! बक, हंस तथा सारस पक्षियों से शोभित, धवल जलराशियों वाले, बालुकामय तुम्हारे तट-प्रदेश दृष्टियों को बाँध लेते हैं।

तुम्हारे जलरूपी दर्पण में प्रतिबिम्बित चन्द्रमा को देखकर हे गंगे! ऐसा प्रतीत होता है मानो मानसरोवर की जलराशि में कोई हंस-शिशु सन्तरण कर रहा है।

अथ वटुकम्-

यज्ञसूत्रोत्सवे रम्यं वटुभिक्षाशयात्मकम्।
वटुकं वटुगीतं वा लोकगीतं महीयते।।३१।।

तत्रोदाहरणं यथाऽवस्थिनो बाबूरामस्य-

अरे अरे श्यामसुरभिके! किमिति परिखिद्यसि रे।
किं तव तनयो न मिलति न तृणमधिगच्छसि रे!!
तनयो ममास्ति समीपे सुतृणमपि रोहति रे।
स्वामी मम महतापि महेन स्वसुतमुपनेष्यति रे!!
यथा वा ममैव गीतमिदम्-
अवलोक्य वामनवटुकमदितिरथ कथयति रे।
नाथ! तनयमिमं पठनाय गुरुभवनमुपनय रे!!
आनय पलाशकुशेन्धनमधुघृततिलमपि रे।
नाथ! विदधे मखं कुशलाय सुदिनमपि शोधय रे!!

अब बटुक गीत (बरुआ)

यज्ञोपवीत (उपनयन) संस्कार के अवसर पर, वटु की शिक्षा के आशयों को प्रकाशित करने वाला रमणीय वटुक अथवा वटुगीत (बरुआ गीत) गाया जाता है।।३१।।

बरुआ का उदाहरण जैसे बाबूराम अवस्थी का यह गीत-

अरी अरी ओ श्यामा गऊ! उदास क्यों दीख रही है? क्या तुम्हारा बछड़ा (कहीं) खो गया है? अथवा (खाने को) घास नहीं मिल रही है?

बछड़ा तो मेरा, मेरे पास ही है। घास भी अच्छी उगी हुई है (चारों ओर) मेरे मालिक, बड़े आनंद-उछाह के साथ अपने बेटे का उपनयन-संस्कार संपन्न करेंगे।

अथवा जैसे मेरा ही यह गीत-

वटु वामन को देखकर माता अदिति (अपने पति महर्षि कश्यप से) कहती हैं-स्वामी! इस बच्चे को (अब) पढ़ने के लिये आचार्य के घर पहुँचा दीजिये।

ले आइये पलाश-दण्ड, कुश, यज्ञ की लकड़ी, मधु, घृत और तिलधान्य। हे स्वामी! कोई अच्छा मुहूर्त देख लीजिये (ताकि) बच्चे के कुशल-मंगल हेतु यज्ञ पूर्ण कर लिया जाय।

अथ प्रचरणगीतम्-

समागते विवाहेऽथ विविधाशयभाञ्जि हि।
लोकगीतानि गीयन्तेऽङ्गनाभिः प्रायशो निशि।।३२।।

तत्रादौ प्रचरणं तद्गीयते मङ्गलात्मकम्।
सर्वदेवकुलग्रामदेवताऽऽमन्त्रणात्मकम्।।३३।।

यतो ह्यनेन गीतेन प्रचारः क्रियते मुदा।
मङ्गलोत्सवकृत्यस्य ततश्चेदं प्रचारणम्।।३४।।

उदाहरणं यथा ममैव-

कस्य पादपोऽयमस्ति कस्य वाऽथ दोरकं विभाति मञ्जुलम्
का नु दोलनाधिरूढा साम्प्रतं विराजते?
निम्बपादपोऽयमस्ति, दोरकं दुकूलतन्तुभिर्विनिर्मितम्
अम्बा दोलनाधिरूढा चण्डिका विराजते!!
दोलनाधिरूढा देवी विन्ध्यवासिनी पिपासया समाकुला
कापि भो दयामयी जलं मदर्थमानयेत्!!
निस्सृता गृहान्तराद्दयालुरेषा गेहिनी जलेन मातरं
तोषयत्यहो शनैः शनैर्हि विन्ध्यवासिनीम्!!

अब **प्रचरण** (पचरा) गीत-

विवाह का अवसर आ जाने पर, नाना प्रकार के आशयों वाले लोकगीत महिलाओं द्वारा प्रायः रात में गाये जाते हैं।।३२।।

उन (मंगलमय) गीतों में भी प्रारंभ में मंगलात्मक प्रचरणगीत (पचरा) गाया जाता है जो कि समस्त देवताओं (गौरी, गणेश आदि) कुलदेवता, तथा ग्रामदेवता को निमंत्रित करने वाला होता है।।३३।।

चूँकि इस गीत से (घर के) मंगलोत्सव-कार्य का उछाह के साथ प्रचार किया जाता है (पूरे जवार में) इसलिये इसे **पचरा** कहते हैं।।३४।।

उदाहरण, जैसे मेरा ही यह गीत-

किसका है यह पेड़ और शोभायमान हो रही है किसकी (बनी) यह रमणीय डोरी? और इस झूले पर बैठी कौन इस समय शोभित हो रही है?

नीम का है यह पेड़ और रेशम की बनी हुई है यह डोरी। और इस झूले पर बैठी मैया चण्डिका शोभित हो रही हैं।

झूले पर बैठी-बैठी मैया विन्ध्यवासिनी देवी प्यास से व्याकुल हो उठी हैं (और कहती हैं) अरे! है कोई दयामयी? मेरे लिये जल तो लाये।

घर के भीतर से निकली है यह दयामयी गृहिणी जो कि माता विन्ध्यवासिनी को जल पिला कर धीरे-धीरे परितुष्ट करती है।

अथ नक्तकम्-

कन्यागृहं गतेष्वेव पुरुषेषु गृहस्त्रियः।
नृत्यन्त्यो निशि गायन्ति लोकगीतं हि नक्तकम्।।३५।।

रागैर्लयैश्च शब्दार्थैर्विविधैर्हि मनोहरैः।
सनृत्यं गीयते स्त्रीभिर्नक्तकं ललितक्रमम्।।३६।।

तत्रोदाहरणं यथा ममैव-

त्वदीयवदनं मया दिने-दिने पीतम्!!
वदनमिदं मृगलाञ्छनकल्पम्
स्नेहसुधामुद्गिरति विजल्पम्
त्वदीयवचनं मया दिने-दिने पीतम्!!
वचनमिदं हृतनिखिलविषादम्
भवभयहरणं शमितविवादम्
त्वदीयनयनं मया दिने-दिने पीतम्!!

यथा वाऽन्यदुदाहरणं ममैव-

भ्रमर! तव चिन्तितं नहि जाने!
भ्रमर! तव काङ्क्षितं नहि जाने!!
सुमकलिकामनुसरसि किमर्थम्
गायसि नृत्यसि नटसि किमर्थम्
भ्रमर! तव मन्त्रितं नहि जाने!
भ्रमर! तव चिन्तितं नहि जाने!!

अब नक्तक (नकटा) का लक्षण-

(विवाह के अवसर पर) बारातियों के वधू के घर चले जाने पर घर की महिलायें, रात में नृत्य करती हुई (मनोविनोदार्थ) जो लोकगीत गाती हैं उसे नक्तक कहते हैं। इन स्त्रियों द्वारा नाना प्रकार के मनोहर रागों द्वारा, लयों द्वारा और अभिप्रायों वाला गीत, ललित भावभंगियों के साथ, नृत्यसहित गाया जाता है।

चूँकि यह गीत रात्रिवेला में ही गाया जाता है, संभवतः इसीलिये इसे नक्तक (नकटा) कहा जाता है।

इसका उदाहरण जैसे मेरा ही यह गीत-

तुम्हारी मुख (मदिरा) मैंने दिन-प्रतिदिन पी!

तुम्हारा यह मुख है चन्द्रमा जैसा जो उगलता रहता है प्रेम का अमृत बिना कुछ कहे। तुम्हारी बातों का रस मैने दिन-प्रतिदिन पिया।

तुम्हारी ये बातें विषाद को हरने वाली हैं। सांसारिक भयों को नष्ट करने वाली तथा विवादों को शान्त करने वाली हैं। तुम्हारी चितवन को मैने दिन-प्रतिदिन पिया।

अथवा, दूसरा उदाहरण मेरा ही यह गीत-

भौंरे! तेरी सोच को मैं नहीं समझ पा रहा! भौंरे! तेरे मन की लगी को मैं नहीं समझ पा रहा।

तू फूल की कली के पीछे क्यों पड़ा हुआ है? क्यों (उसे रिझाने के लिये) गा रहा है, नाच रहा है, अंग मटका रहा है?

भौंरे! तेरी मंशा को मैं नहीं समझ पा रहा। भौंरे! तेरी सोच को मैं नहीं समझ पा रहा।

यथा वा तृतीयमुदाहरणं ममैव मधुपर्ण्याम्-

मनो नित्यं विधत्ते तव स्मरणम्!
यथा दीनोऽसहायो व्रजति शरणम्!!
यदा पर्येति भृङ्गो जलजकलिकाम्!
मनोऽधीरं विधत्ते तव स्मरणम्!!
यदाऽऽकाशे प्लवन्ते सजलजलदाः
मनो भ्रान्तं विधत्ते तव स्मरणम्!!

अथोत्थापनम्-

रमण्यः प्रतिवेशिन्य उत्सवस्य समापने।
उत्तिष्ठन्त्योऽपि गायन्ति किमप्यन्तिमगीतकम्।।३७।।

हास्याभिनयनाट्यादिसन्ततं मोदसम्भृतम्।
गीतं तदुच्यते रम्यं मङ्गलोत्थानगीतकम्।।३८।।

उदाहरणं यथा मम मृद्वीकायाम्-

अभिरुचितं सततं कृतम्मया
अभिरुचितम्!
अन्यैः पठिता भगवद्गीता

रम्भाशुकचरितं श्रितम्मया
अभिरुचितम्!!
अन्यैर्गृहे धृतो धनराशिः
ताम्बूलं वदने धृतम्मया
अभिरुचितम्!!

अथवा एक तीसरा उदाहरण, मेरी ही मधुपर्णी में-

मन रोज़ करता रहता है तुम्हारा स्मरण, जैसे कोई असहाय दीन किसी की शरण में (जाने को उतावला रहता है)।

जब भौंरा मँडराने लगता है कमल की कली के चारों ओर, तब मन अधीर होकर करने लगता है तुम्हारा स्मरण!

जब जल-भरे मेघ मचाते हैं धमाचौकड़ी आसमान में, तब मन भ्रान्त होकर करने लगता है तुम्हारा स्मरण!

अब उत्थापन (उठान) का लक्षण-

पड़ोसिन महिलायें, उत्सव की समाप्ति के बाद, उठते-उठते भी कोई अन्तिम (मंगल) गीत गाती हैं जो कि हँसी-ठट्ठे और अभिनय-नाट्यादि से भरा-पुरा तथा आह्लाद से युक्त होता है। उस रमणीय गीत को मंगलमय उत्थापनगीत (उठान) कहा जाता है।।३७, ३८।।

उदाहरण जैसे मेरी (गीत-संकलना) मृद्वीका में-

जो मन को रुचा, मैने सदैव वही किया। जो मन को रुचा!

औरों ने तो पढ़ी श्रीमद्भगवद्गीता (पर) मैने बाँचा रम्भाशुक-संवाद! जो मन को रुचा!

औरों ने ने गाड़ा घर में खजाना, पर मैने भरी गालों में पान की गिलौरी। जो मन को रुचा मैने वही किया!

यथा वाऽन्यदुदाहरणं ममैव-

विकसति नहि कुसुमं दिने-दिने!
विलसति नहि विपिनं दिने-दिने!!
प्रज्ज्वलितनिदाघे धूसरितम्
जलदागममासे घनभरितम्

रमयति नहि गगनं दिने-दिने!
विकसति नहि कुसुमं दिने-दिने!!
मालाकारेण कदापि हृतम्
शिशिरेण कदाचिन्निर्मथितम्
मदयति नहि नलिनं दिने-दिने!
विकसति नहि कुसुमं दिने-दिने!!

अथ लाङ्गलिकम्-

लाङ्गलेन धरां कर्षन् स्वेदसिक्तकलेवरः।
हलवाहोऽपि यद्गीतं गायति प्रोन्मदो मुदा।।३९।।

खेदं स्वकं लघूकर्तुं मन्ये वृषभयोरपि।
श्रृण्वताञ्च मनोरञ्जि लाङ्गलिकं तदुच्यते।।४०।।

उदाहरणं यथा ममैव मृद्वीकायाम्-

विद्याध्ययनं विना व्यतीतम्
यस्याभिमतं नो सङ्गीतम्
यस्मिन् कला न कापि निलीना धिक्तादृक्षं जीवनम्
ब्रूते धिग्धिग्धिगिति मृदङ्गो धिक्तादृक्षं जीवनम्!!
ईष्याऽमर्षे गतिः प्रवृत्ता
स्वप्नेऽपि न वराटिका दत्ता
शक्तिः कोशसञ्चये युक्ता धिक्तादृक्षं जीवनम्!
ब्रूते धिग्धिग्धिगिति मृदङ्गो धिक्तादृक्षं जीवनम्!!

या फिर (उठान) दूसरा उदाहरण, मेरा ही यह गीत-

रोज-रोज नहीं खिला करता है फूल! रोज-रोज नहीं मन को भाता है बगीचा!

जलती-तपती गर्मी में (धूलि से) धूसरित और पावस के दिनों में बादलों से भरा-पुरा! रोज-रोज अच्छा नहीं लगता है आसमान!

माली द्वारा कभी तोड़ा गया और कभी झुलसा दिया गया पाले द्वारा! रोज-रोज आँखों को नहीं तृप्त करता कमल का फूल!

अब लाङ्गलिक (लाँगुरिया) का लक्षण-

लाङ्गल (हल) से जमीन जोतता हुआ, पसीने से लथपथ शरीर वाला,

मस्ती में डूबा हलवाहा प्रेमपूर्वक जो गीत गाता है-अपनी थकान को मिटाने के लिये, सुनने वालों के मन को आनन्दित करने के लिये और मैं तो मानता हूँ कि (हल खींचने वाले) बैलों की भी थकान को कम करने के लिये उसे लाङ्गलिक (लाँगुरिया) कहते हैं।।३९, ४०।।

उदाहरण, जैसे मेरी ही मृद्वीका में-

जो विना विद्याध्ययन के ही बीत गया, जिसे गीत-संगीत नहीं आया और जिसमें कोई कला तक अंकुरित नहीं हुई, धिक्कार है उस जीवन को! (निर्जीव) मृदङ्ग भी उसे 'धिग्-धिग्' बोलता है। धिक्कार है उस जीवन को!

जिसकी रुझान सदा ईर्ष्या और अमर्ष (की ओर) रही, जिसने कभी किसी को एक कौड़ी भी नहीं दी, जिसकी सारी शक्ति खर्च हो गई खजाना जुटाने में, धिक्कार है उस जीवन को। मृदंग भी उसे 'धग्-धिग्' ही बोलता है। धिक्कार है उस जीवन को!

अथ स्कन्धहारीयम्-

वहन्तश्शिविकां गुर्वीमेवमेव हि वाहकाः।
गायन्ति स्कन्धहारीयं समवेतस्वरोच्चयैः।।४१।।

अध्वश्रमापनोदीदं गीयमानं क्रमेण च।
स्कन्धहारीयमाख्यातं वधूट्याश्चापि मोददम्।।४२।।

तदुदाहरणं यथा मम वाग्वधूट्याम्-

नभसि विभाति चमत्कृतचन्द्रो भाति चन्द्रमसि छाया।
सरसि विभाति सरागकमलिनी कमलिन्यामलिजाया!!
भाति भवने वधूटी षोडशी सदङ्गना
भाति गगने मुदी सतारका निरञ्जना!!
देहे भाति मनो दुर्ललितं प्रीतिर्मनसि विभाता
प्रीतौ निष्ठा भाति पुराणी सैव पिता सा माता
भाति विजने वसन्तकलकण्ठीवन्दना!!

यथा वाऽन्यदुदाहरणं ममैव मृद्वीकायाम्-

मन्दं मन्दं विरावं रे कुरुतेऽयं पिकः
चित्रं चित्रं प्रभावं रे कुरुतेऽयं पिकः!!

विरहिजनानां स्मरपल्लवनम्
द्विगुणीकृतरतिभावं रे कुरुतेऽयं पिकः!!
युवतिजनानां प्रत्यङ्गं ननु
शतशतहावं भावं रे कुरुतेऽयं पिकः!!

अब स्कन्धहारीय (कँहरवा) का लक्षण-

ठीक इसी प्रकार (अर्थात् लाङ्गलिक की ही भाँति) भारी-भरकम पालकी को ढोने वाले वाहक (कहार) कोरस-स्वर में स्कन्धहारीय गीत को गाते हैं।।४१।।

मार्ग की थकान को बहलाने वाला, क्रम से गाया जाने वाला यह गीत स्कन्धहारीय (कँहरवा) कहा जाता है जो (पालकी में बैठी) वधू का भी मनोरंजन करता है।।४२।।

इसका उदाहरण मेरी वाग्वधूटी में-

आकाश में शोभा पाता है चमत्कारों से भरा चन्द्रमा और चन्द्रमा में शोभा पाता है काला दाग! सरोवर में शोभा पाती है लालिमा से भरी कमलिनी और कमलिनी में शोभा पाती है भ्रमर-वधू!

भवन में शोभा पाती है सोलवाँ साल लगी सुन्दर बहू! और आकाश में शोभा पाती है तारों भरी दूधिया चाँदनी! देह में शोभा पाता है दुलारा मन और मन मे शोभा पाती है प्रीति! प्रीति में शोभा पाती है सांस्कारिक निष्ठा और वही होती है माता-पिता! वन में शोभा पाती है वासन्तिक कोयल की कूक!!

अथवा दूसरा उदाहरण जैसे मेरी ही मृद्वीका में-

धीरे-धीरे कूक रहा है यह कोकिल। चित्र-विचित्र प्रभाव पैदा कर रहा है यह कोकिल!

कामभावना को द्विगुणित कर देने वाले, वियोगी जनों के स्मर को पल्लवित कर रहा है यह कोकिल!

युवतियों के अंग-प्रत्यंग में निश्चित रूप से सैकड़ों हावों-भावों को उत्पन्न कर रहा है यह कोकिल!

अथौष्ट्रहारिकम्-

रात्रौ क्रमेलकारूढाः सार्थवाहा यथाक्रमम्।
तन्द्रां निद्रामपाकर्तुं यच्च गायन्ति गीतकम्।।४३।।

तदौष्ट्रहारिकं गीतं लयवाहि समुच्यते।
श्रृण्वतां पामराणां च हृदयोन्मादकारकम्।।४४।।

उदाहरणं यथा ममैव-

नयने न करुणा हृदि न तव ममता रे! प्रियतम! किमसि कठोर!
दयिता विरहिणी सलिलहीनशफरीव विकलीभवति चित्तचोर!!
वनिका मधूकसुममदिरामदिरिता रे तदपि रमसे यतिशान्त!
मदनदहनपरिगतजगदिदमहो स्मरसि न कथमयि कान्त!!

अथ गीतसन्दर्भोपसंहारः-

अतः परं किमुच्येत लोकगीतप्रथाम्प्रति।
जेजीव्यते समाजोयं लोकगीतैर्हि केवलम्।।४५।।

जीवनस्य न तत्कृत्यं न च कश्चिदुपक्रमः।
आरभेत न यो गीतैः सर्वमङ्गलकारकैः।।४६।।

कण्डिनीपेषिणीगीतं बाल्यकाले मया श्रुतम्।
गीयमानं ममाम्बाभिर्हन्त ते दिवसा गताः।।४७।।

अब **औष्ट्रहारिक** (उँटहारा गीत) का लक्षण-

रात्रिवेला में ऊँटहारे व्यापारी (अपने) आलस्य एवं नींद को दूर रखने के उद्देश्य से जो गीत गाते हैं वही लयवाही गीत औष्ट्रहारिक (ऊँटहारागीत) कहा जाता है जो कि सुनने वाले गाँव-गिराँव के लोगों के भी कलेजे में हूक सी उठा देता है।।४३, ४४।।

उदाहरण, जैसे मेरा ही यह गीत-

आँखों में नहीं रही करुणा, हृदय में नहीं रही ममता। प्रीतम! तू क्यों बन गया है कठोर? तेरी विरहिन घरवाली हे चितचोर! जलविहीन मछरी सी तड़प रही है।

सारा जंगल शराबी-शराबी सा हो उठा है महुवे के फूलों की मदिरा में डूबकर! फिर भी तू जोगियों जैसा शान्त हुआ बैठा है? हे मेरे प्रियतम! तू क्यों नही स्मरण करता मदनदाह की लपटों से घिरे इस संसार का?

गीतसन्दर्भ का उपसंहार-

अब इससे आगे लोकगीत-परम्परा के प्रति क्या कहा जाय? यह समाज तो मात्र लोकगीतों के ही सहारे जीवित है (ऐसा प्रतीत होता है)।।४५।।

जीवन का वह कोई कार्य नहीं है, कोई ऐसा अनुष्ठान नहीं है जो कि समस्त मंगलों को सिद्ध करने वाले गीतों से न प्रारंभ होता हो।।४६।।

मैने अपने बचपन में माँ (और चाचियों-मामियों) द्वारा गाये जाते हुए जो जँतसारी और कुँटसारी (चक्की पीसने तथा धान कूटने) के गीत सुने थे हाय! वे दिन अब कहाँ??४७??

क्षेत्रे भृत्याङ्गनाश्चापि कृषिकर्मसमन्विताः।
गायन्तिस्म किमप्येव गीतकं लोकसम्मुदे।।४८।।

योगिनो भिक्षुका भण्डाश्चारणा नटनर्तकाः।
श्रावणिकाश्च गाङ्गेया भवानीभैक्ष्ययाचकाः।।४९।।

विशिष्टैर्गीतकैः सर्वे मनांसि ग्रामवासिनाम्।
हरन्तोऽथ सदाभूवन्समाजे परमादृताः।।५०।।

लोकगीतोत्थतत्सौख्यं गतं हा स्मृतिशेषताम्।
निस्सुखोऽथ समाजोऽयं साम्प्रतं नीरसोऽभवत्।।५१।।

श्रावणिकाः श्रवणकुमारचरितं करुणकरुणं गीतात्मकं श्रावयन्तो भिक्षुकविशेषाः। गाङ्गेया हरगङ्गेपदवाच्या याचका ये हरगङ्गे इति प्रतिपादान्त-गीतं गायन्तः भैक्ष्यमाचरन्तिस्म। भवानीभैक्ष्ययाचका भिक्षाटनपराः स्त्रीपुरुष-समूहा ये भिक्षान्नमूल्यैरेव विन्ध्याचलयात्रां सम्पादयितुं कृतसङ्कल्पा अभूवन्।

अथ गलज्जलिकाप्रकरणम्-

यत्पारसीकभाषायामङ्कुरितं कदाचन।
पश्चात्कन्दलितं जातं पुष्पितं फलितं तथा।।५२।।

गजलाख्यं हि तद्गीतं भारतेऽपि प्रतिष्ठितम्।
तुरुष्कशासने जाते पारसीके प्रतिष्ठिते।।५३।।

पारसीकात्ततोऽप्युर्दूभाषायां समवातरत्।
तदेव गजलं गीतं मौगले शासनावधौ।।५४।।

खेती-बारी के काम में लगी हुई मजदूरिने भी खेत में (काम करती) कोई न कोई गीत, सबके आनन्द के लिये गाती ही रहती थीं।।४८।।

जोगी, भिखारी, भाँड़, भाँट, नट एवं नर्तक, श्रवणकुमार का चरित सुनाने वाले (सरवन) गंगा मैया का गीत गाने वाले (जयगंगे) तथा भवानी की भीख माँगने वाले।।४९।।

सबके सब विशिष्ट गीतों से ग्रामवासियों के चित्त को आवर्जित करते हुए समाज में अतिशय आदर प्राप्त करते थे।।५०।।

लोकगीतों से प्राप्त होने वाला वह आनन्द आज स्मृतिशेषता को प्राप्त हो उठा है जिसके कारण सुखविहीन यह समाज आज नीरस बन गया है।।५१।।

श्रावणिक (सरवन) का अर्थ है अतिशय करुण तथा गीतात्मक श्रवणकुमार के चरित को सुनाने वाले विशिष्ट प्रकार के भिक्षुक। **गाङ्गेय** का अर्थ है हरगंगे नाम से जाने-पहचाने जाने वाले वे भिखारी जो हरगंगे शब्दों से प्रति वाक्य समाप्त होने वाले गंगापरक गीत को गाते हुए भीख माँगा करते थे। भवानी की भीख माँगने वाले वे स्त्री-पुरुष-समूह होते थे जो भिक्षान्न के मूल्य से ही विन्ध्याचल-धाम की यात्रा सम्पन्न करने का संकल्प लेते थे।

गलज्जलिका (गज़ल) का सन्दर्भ-

जो कभी फारसी भाषा में उत्पन्न हुआ था और बाद में (क्रमशः) कन्दलित, पुष्पित एवं फलित होता रहा।।५२।।

गज़ल नाम वाला वही गीत, मुस्लिमों के शासनकाल में फारसी भाषा के प्रतिष्ठित होने पर, भारतवर्ष में भी प्रतिष्ठित हुआ।।५३।।

इसके बाद वही गज़ल नामक गीत मुगलों के शासनकाल में फारसी भाषा से उर्दू भाषा में (भी) अवतीर्ण हुआ।।५४।।

आङ्ग्लशासनकालेऽथ कविपण्डिततल्लजः।
जयपत्तनवास्तव्यः फारसीसंस्कृतोद्भटः।।५५।।
भट्टोऽसौ मथुरानाथशास्त्री गजलपारगः।
संस्कृतेऽपि ससर्जेदं गीतं तुल्याभिशंसया।।५६।।
एवं हि भट्टवर्योऽयं देववाणीकवीश्वरः।
संस्कृतगजलोद्गाता प्रथमो हि मया मतः।।५७।।
ततश्चेमां प्रथामग्रे बच्चूलालः कवीश्वरः।
पारसीवाचि निष्णातो निनाय प्रतिभोद्धुरः।।५८।।
वस्तुतस्त्वनयोरेव सारस्वतसमुद्यमैः।
गजलं सुरभारत्यामपि सम्यक्प्रतिष्ठितम्।।५९।।

गजलगीतिविकासस्येयं लध्वी गाथा। भारतवर्षे हि सल्तनतशासने

स्थैर्यमुपगते सति शासनतन्त्रे पारसीकभाषाऽपि प्रतिष्ठामुपगता। गुलाम-खिलजीतुगलकलोदिमुगलाख्यवंशीयेषु शासकेषु दिल्ल्यां शासत्सु फारसीभाषेयं शासनकार्यस्य साहित्यसंरचनायाश्च भाषा जाता। मुगलवंशोत्पन्नेऽन्तिमशासके बहादुरशाहजफरे शासति गालिबनामा महान् कविः समुत्पन्नो यो हि गजलचक्रवर्तीति समुच्यते। तत्परम्परायामेव मीरप्रभृतयो लब्धप्रतिष्ठा गजलकाराः समभूवन् ये फारसीसजातीयाया-मुर्दूभाषायां गजलान् रचयाञ्चक्रुः।

किञ्च, उर्दूभाषायाः सैव गजलपरम्परा ख्रैस्तविंशशताब्दस्य प्रथमचरण एव संस्कृतवाच्यपि समवततार यदा जयपुरवास्तव्यो विविधभाषापारङ्गतो महाकविर्भट्टमथुरानाथशास्त्री प्रायेण द्वाविंशतिमितान् 'बहरान्' (बन्धप्रस्तारान्) अवलम्ब्य शतमितानि गजलगीतानि प्रणिनाय। साहित्यवैभवाख्ये गीतवीथीनाम्नि च काव्यसंग्रहद्वये सङ्कलिता एता गजलगीतयः १९३० मिते ख्रिस्ताब्द एव मुम्बईस्थनिर्णयसागरमुद्रणालयात् प्रकाशिताः। भट्टोपज्ञगजलगीतान्यग्रे समुदाहरिष्यन्ते।

अंग्रेजी शासनकाल में जयपुर में रहने वाले, फारसी एवं संस्कृत दोनो ही भाषाओं में निष्णात, श्रेष्ठ कवि-पण्डित।।५५।।

गज़ल-विधा में पारंगत लोकविश्रुत (महामहोपाध्याय) भट्ट मथुरानाथ शास्त्री ने इस गज़लगीत को, फारसी गज़लकारों जैसी ही प्रतिष्ठा के साथ, संस्कृतभाषा में भी प्रणीत किया।।५६।।

इस प्रकार, देववाणी संस्कृत के कविमूर्धन्य उन भट्ट मथुरानाथ शास्त्री जी को ही मैं संस्कृत गज़लों का प्रथम उद्गाता (गायक रचनाकार) मानता हूँ।।५७।।

इसके अनन्तर, इस गज़ल-परम्परा को, फारसी भाषा में पारंगत, प्रतिभापटिष्ठ कविश्रेष्ठ आचार्य बच्चूलाल अवस्थी जी ने विकसित किया।।५८।।

वस्तुतः इन्हीं दोनो (महाकवियों) के सारस्वत प्रयत्नों से फारसी गज़ल आज सुरभारती संस्कृत में भी सम्यक् रूप से प्रतिष्ठित है।।५९।।

गज़लगीति के विकास की यह संक्षिप्त गाथा है। भारतवर्ष में सल्तनत शासन के स्थिरता प्राप्त कर लेने पर, शासनतंत्र में (दरबारी काम-काज में) फारसी भाषा भी प्रतिष्ठित हो गई। गुलाम, खिलजी, तुगलक, लोदी और मुगलवंश के दिल्ली में शासन करते समय यही फारसी भाषा शासनकार्य तथा साहित्य-संरचना का माध्यम बन गई।

मुगल-वंश में उत्पन्न अन्तिम बादशाह बहादुरशाह ज़फर के शासन करते समय मिर्जा गालिब नाम के महान् कवि पैदा हुए जो कि गज़ल के बादशाह कहे जाते हैं। उन्ही की परम्परा में मीर आदि लब्धप्रतिष्ठ गज़लकार हुए जिन्होंने कि फारसी से ही मिलती-जुलती उर्दू भाषा में गज़लें लिखीं।

पुनश्च, उर्दूभाषा की वही गज़ल-परम्परा बीसवीं शताब्दी ईसवी के ही प्रथम चरण में संस्कृतभाषा में भी अवतरित हुई जब जयपुर-निवासी विविध भाषाओं में पारंगत महाकवि भट्ट मथुरानाथ शास्त्री ने प्रायः बाईस बहरों का प्रयोग करते हुए सैकड़ों गज़ल-गीतियाँ लिखीं। साहित्यवैभव तथा गीतवीथी नामक दो काव्यसंग्रहों में संकलित वे गज़ल-गीतियाँ १९३० ई० में बाम्बे स्थित निर्णयसागर प्रेस से प्रकाशित हुईं। भट्टजी द्वारा प्रणीत गज़ल-गीतियों का उदाहरण आगे प्रस्तुत किया जायेगा।

गजलपरम्परामिमां पुरस्सारितवान् आचार्यप्रवरोऽवस्थी बच्चूलालः (१९१८-२००५) यमधिकृत्य मया प्रतानिनीभूमिकायां लिखितम्-

किञ्च, प्राकृतजनाऽनास्वाद्योऽपि यःपिचुमन्द इव सर्वरोगहरः, बाह्यक्लिष्टोऽपि नारिकेलमिव निसर्गमधुरः, माकन्द इव प्रियजनपरिरम्भादुल्लसितः, मन्दार इवात्मगोत्रवतां नर्मवचनैर्विकसितः, पुरोनर्तनाच्च स्ववशंवदशिशूनां कर्णिकार इव प्रतिवृन्तपुष्पितः दुर्निरीक्ष्योऽपि मार्तण्ड इवाऽन्धकारहरः, दुष्प्रवेशोऽपि कान्तारोद्देश इव महासत्त्वः सान्द्रच्छायश्च। स हि-

बाल्ये कणादतामेतो यौवने च वसिष्ठताम्।
अत्रितामेत्य वार्द्धक्ये बच्चूलालो महीयते।।

मया सम्पादितायां प्रतानिन्यां ज्ञानोपाह्वानामाचार्यबच्चूलालानां गजलगीतयः प्रकाशिताः वर्तन्ते। कतिपयमासपूर्वमेव कीर्तिशेषतामुपगतानुपाध्यायचरणानवस्थिमहाभागान् भूयोभूयः प्रणमामि। किञ्च-

करेण खलु केनचित्सरसकाव्यशास्त्राऽमृतं
प्रगूढशतचिन्तनं ननु परेण षड्दर्शनम्।
दधच्च पदशासनं किमुत भाषिकालोचनं
चतुर्भुजमहीसुरं कमपि बच्चुलालं भजे।।

संवेदनमयी गीतिर्गजलाख्या, न संशयः।
यत्र प्रणयगाम्भीर्यं नैष्ठिकत्वञ्च वर्णिते।।६०।।

प्राणानपि पणीकृत्य सोढ्वा च शतलाञ्छनम्।
वैरिभूतेऽपि चात्मीये प्रीतिबन्धानुपालनम्।।६१।।

तथैव रागबन्धस्य परित्यागोऽवमाननम्।
प्रियेण प्रियया वापि कृच्छ्रं तत्परिणामजम्।।६२।।

शाठ्यकैतवदुर्भावच्छलमायाप्रवञ्चनम्।
अनुकम्पासमासक्तिममताशपथादिकम्।।६३।।

इस गज़ल परम्परा को आगे बढ़ाया आचार्य-प्रवर पं० बच्चूलाल अवस्थी जी (१९१८-२००५ ई०) ने जिनके विषय में मैने **प्रतानिनी** की भूमिका में लिखा है-

और अधिक क्या, अज्ञानी जनो द्वारा स्वाद न लेने योग्य, समस्त रोगों को हरने वाले निम्ब के समान जो मूर्खों द्वारा दुष्प्राप्य तथा समस्त (बुद्धि) रोगों का हरण करने वाले हैं, बाहर से कठोर होते हुए भी जो भीतर से अत्यन्त वत्सल हैं, प्रियजन (दोहदवती नायिका) द्वारा आलिङ्गित होने के कारण उल्लसित आम्रवृक्ष की तरह जो प्रिय शिष्यों को आलिङ्गित कर हर्षविभोर हो उठते हैं, अपनी पसन्द के लोगों के नर्मवचनों से पोर-पोर खिल उठने वाले मन्दार की भाँति जो अपनी पसन्द के प्रिय शिष्यों-मित्रों के हास-परिहास से आह्लादित हो उठने वाले हैं, (नायिका द्वारा) समक्ष नृत्य करने से पोर-पोर पुष्पित हो उठने वाले कनेर की भाँति, वंशवद शिशुओं की समक्ष-क्रीडा से जो अंग-प्रत्यंग पुलकित हो जाते हैं, कठिनाई से देखने योग्य होते हुए भी अन्धकार हरने वाले सूर्य की भाँति जो (तेजस्विता के कारण) दुर्निरीक्ष्य होते हुए भी अज्ञानरूपी अन्धकार को हरने वाले हैं। दुष्प्रवेश होते हुए भी विशाल वन्य जीवों से युक्त तथा घनी छाया वाली कानन-भूमि के समान जो (वैदुषी के कारण) दुर्ग्राह्य होते हुए भी महान् आत्मबल से सम्पन्न तथा प्रगाढ संरक्षण देने वाले हैं। वह आचार्य श्रीबच्चूलाल जी-

बचपन में **कणादता** को, युवावस्था में **वसिष्ठता** को तथा वृद्धावस्था में **अत्रिता** को प्राप्त कर शोभा प्राप्त कर रहे हैं (अर्थात् बचपन उनका दैन्य एवं अकिञ्चनता में बीता, युवावस्था में वह इन्द्रियनिग्रही रहे तथा वृद्धावस्था में काम-क्रोध तथा लोभ इन तीनों से विरहित हो गये)।

मेरे द्वारा सम्पादित **प्रतानिनी** में आचार्य बच्चूलाल अवस्थी 'ज्ञान' की गज़ल-गीतियाँ प्रकाशित हैं। कुछ ही महीने पूर्व कीर्तिशेष हो उठने वाले गुरुचरण आचार्य अवस्थी को मैं बारम्बार प्रणाम अर्पित करता हूँ। पुनश्च,

किसी एक हाथ से सरस काव्यशास्त्र का अमृत, दूसरे हाथ से प्रगूढ अनन्त चिन्तन वाले षड्दर्शन, तीसरे हाथ से व्याकरण और चौथे हाथ से भाषाशास्त्रीय समीक्षा को धारण करने वाले उन महनीय चतुर्भुज द्विजेन्द्र बच्चूलाल की वन्दना करता हूँ।

गज़ल नाम की गीति संवेदना से ओतप्रोत होती है इसमें कोई संशय नहीं है जिसमें वर्णित होती है प्रेम की गम्भीरता एवं प्रेम की नैष्ठिकता।।६०।।

प्राणों की भी बाजी लगाकर, सैकड़ों लांछनों को भी सहकर तथा अपने लोगों के वैरी हो जाने पर भी प्रीति के अनुबन्ध का पालन करना।।६१।।

और उसी प्रकार किसी के साथ बाँधे गये प्रीति-अनुबन्ध को प्रेमी अथवा प्रेमिका द्वारा तोड़ देना या (अपने किसी कृत्य से) कलंकित कर देना और फिर उसके परिणामवश उत्पन्न व्यथा को झेलना।।६२।।

शठता, धूर्तता, दुर्भावना, छल, माया, प्रवञ्चना, अनुकम्पा, अतिशय आसक्ति, ममत्व, शपथादि का आश्रय।।६३।।

एवमेवेतरे भावा मानवीयाः परात्पराः।
मर्मस्पृशोऽतिसूक्ष्माश्च चेतनान्दोलनक्षमाः।।६४।।

भङ्गीभणितिमाश्रित्य मान्यमान्यैः कवीश्वरैः।
परिकल्प्य प्रकाश्यन्ते नूनं गजलगीतके।।६५।।

श्रावं श्रावञ्च गीतार्थं नयने वारि वर्षतः।
ध्रुवं हर्षविषादाभ्यां सचेता यदि पाठकः।।६६।।

तत एव मया गीतिराख्यातेयं गलज्जला।
गलन्नेत्रजलत्वाद्वा सा गलज्जलिका पुनः।।६७।।

गजलगीतेः कृते गलज्जलिकेति संज्ञा मयैवेदम्प्रथमतया स्वोपज्ञरचनायां वाग्वधूट्यां १९७८ मितख्रिस्ताब्दे प्रकाशितायामुपकल्पिता।

द्विपादिकाभिर्निबद्धा गीतिर्गजलमुच्यते (अभि० ३।१।९) इति यदुक्तं राधावल्लभत्रिपाठिना, न तावता गजलस्वरूपं ज्ञातुं शक्यते। अक्षमोऽयं लक्षणसंक्षेपः।

इसी प्रकार, अन्यान्य भी एक से एक (श्रेष्ठ) चेतना को झिंझोड़ देने वाले अत्यन्त सूक्ष्म, मर्मस्पर्शी मानवीय भाव।।६४।।

अत्यन्त माननीय कवीश्वरों द्वारा परिकल्पित कर, भंगीभणिति (वाक्कौशल) के सहारे निश्चित रूप से गज़ल-गीति में प्रकाशित किये जाते हैं।।६५।।

गज़ल-गीति के अभिप्राय को सुन-सुन कर, यदि पाठक सहृदय है तो निश्चित रूप से हर्ष एवं विषाद से प्रभावित आँखें आँसू बरसाती हैं।।६६।।

इसीलिये मैंने इस गीति को **गलज्जला** नाम दिया है। नेत्रजल (अश्रु) की वृष्टि कराने के कारण उसी गीति को **गलज्जलिका** भी कहते हैं।।६७।।

(फारसी) गज़लगीति के लिये **गलज्जलिका** नाम सर्वप्रथम मैने ही अपनी कृति **वाग्वधूटी** में, जो १९७८ ई० में प्रकाशित हुई है, कल्पित किया है।

द्विपदियों (शेरों) से निर्मित गीति गजल कही जाती है-यह जो कहा राधावल्लभ त्रिपाठी ने, उतने भर से गजल का स्वरूप ज्ञात नहीं हो पाता। परिभाषा की यह संक्षिप्तता असमर्थ प्रतीत होती है।

अथगजलसंविधानकनिरूपणाम्-

विविधो बन्धविस्तारो दृश्यतेऽत्र हि गीतके।
बन्धदैर्ध्यपरस्सोऽयं फारस्यां बहरो मतः।।६८।।

लघीयान् बहरः क्वापि द्राघीयानथवा क्वचित्।
प्रयोगक्षमतादर्शी सत्कवेश्चात्र दृश्यते।।६९।।

संस्कृतेऽक्षरविस्तारे गणानां यादृशी स्थितिः।
बहरेऽपि तथैवाऽस्ते कश्चिद्रम्यो गणक्रमः।।७०।।

'मुत्कारबे मुसम्मन सालिमेति' क्वचिद्धि सः।
क्वापि 'बहरे कामिल मुसम्मन' इतीर्यते।।७१।।

मफऊल-फऊलून फाइलुन्निति संज्ञकाः।
गणाश्चापि प्रसिद्धास्ते बहरेष्वेषु सम्मताः।।७२।।

कस्मिन्नु बहरे को वा गणक्रमः प्रयोक्ष्यते।
फारसीच्छन्दोविचितौ सर्वमेतत्सुनिश्चितम्।।७३।।

बन्धविस्तारो नाम गणप्रस्तारः। संस्कृतच्छन्दश्शास्त्रे यथा वार्णिकच्छन्दसां विस्तार एकाक्षरात् षड्विंशत्यक्षराणि यावदवलोक्यते। यथाह नाट्यशास्त्रकारः-

एकाक्षरं भवेदुक्तमत्युक्तं द्वयक्षरं भवेत्।
मध्यं त्र्यक्षरमित्याहुः प्रतिष्ठा चतुरक्षरा।।

सुप्रतिष्ठा भवेत्पञ्च गायत्री षड्भवेदिह।
सप्ताक्षरा भवेदुष्णिगष्टौ चानुष्टुबुच्यते।
नवाक्षरा तु बृहती पङ्क्तिश्चैव दशाक्षरा।
एकादशाक्षरा त्रिष्टुप् जगती द्वादशाक्षरा।।
त्रयोदशातिजगती शक्वरी च चतुर्दश।
अतिशक्वरी पञ्चदश षोडशाष्टिः प्रकीर्तिता।।

नाना प्रकार का बन्धविस्तार इस गीत में दृष्टिगोचर होता है। बन्ध (composition) की दीर्घता को प्रदर्शित करने वाला यह (विस्तार) फारसी में **बहर** कहा जाता है।।६८।।

श्रेष्ठ गज़लकार की प्रयोग-क्षमता को प्रदर्शित करने वाली यह बहर इस गज़ल गीति में कहीं छोटी तो कहीं बड़ी दिखाई पड़ती है।।६९।।

संस्कृत कविता में गणों के अक्षर-विस्तार (scanning) में जैसी स्थिति दिखाई पड़ती है उसी तरह फारसी गज़ल की बहर में भी एक रमणीय गण-व्यवस्था दृष्टिगोचर होती है।।७०।।

कहीं पर तो वह बहर **मुतकारबे मुसम्मन सालिम** कही जाती जाती है और कहीं **बहरे कामिल मुसम्मन**!।७१।

इन बहरों में **मफऊल-फऊलून-फाइलुन** आदि संज्ञा वाले प्रसिद्धगण भी व्यवस्थित होते हैं।।७२।।

(गज़ल की) किस बहर में कौन गणक्रम प्रयुक्त किया जायेगा, फारसी छन्दश्शास्त्र में यह सब सुनिश्चित है।।७३।।

बन्धविस्तार का अर्थ है गणों का विस्तार (फैलाव) संस्कृत के छन्दश्शास्त्र में जैसे वार्णिक छन्दों का विस्तार **एक अक्षर** से (प्रारंभ होकर) **छब्बीस अक्षर** तक देखा जाता है। जैसा कि नाट्यशास्त्रकार ने कहा है-

एक अक्षर के बन्ध को **उक्त**, दो अक्षर के बन्ध को **अत्युक्त**, तीन अक्षर के बंन्धको **मध्य** तथा चार अक्षर के बन्ध की **प्रतिष्ठा** कहते हैं।।

पाँच अक्षर के बन्ध को **सुप्रतिष्ठा**, छ के बन्ध को **गायत्री**, सात अक्षर के बन्ध को **उष्णिक्** और आठ अक्षर के बन्ध को **अनुष्टुप्** कहते हैं।

नौ अक्षर का **वृहती**, दस अक्षर का **पंक्ति**, ग्यारह अक्षर का **त्रिष्टुप्** तथा बारह अक्षर का बन्ध **जगती** कहा जाता है।

तेरह अक्षर की अतिजगती, चौदह की शक्वरी, पन्द्रह की अतिशक्वरी और सोलह अक्षर का बन्ध अष्टि कही जाती है।

अत्यष्टिः स्यात्सप्तदश धृतिरष्टादशाक्षरा।
एकोनविंशतिर्धृतिः कृतिर्विंशतिरेव च।।
प्रकृतिश्चैकविंशत्या द्वाविंशत्याकृतिस्तथा।
विकृतिश्च त्रयोविंशा चतुर्विंशा च संकृतिः।।
पञ्चविंशत्यतिकृतिः षड्विंशत्युत्कृतिर्भवेत्।
अतोधिकाक्षरं यत्तु मालावृत्तं तदिष्यते।।

एवं हि एकाक्षरादुक्तादारभ्य षड्विंशत्यक्षरात्मिकामुत्कृतिं यावत्प्रस्तारः संस्कृतच्छन्दसाम्। अस्मिन्नेव बहरपर्याये प्रस्तारेऽगणितानि वृत्तानि जायन्ते। तद्विषये कथयति नाट्यशास्त्रकारः-

छन्दसां तु भवेदेषां भेदोऽनेकविधः पृथक्।
असंख्यपरिमाणानि वृत्तान्याहुरथो बुधाः।।-नाट्य० १४।५८

गजलस्य त्रयो भागास्तद्विद्भिः परिभाषिताः।
मतला-शेर-मक्ताख्यास्तदिदानीं प्रतन्यते।।७४।।

गजलारम्भि यद्वाक्यं मूलभावप्रकाशकम्।
तदेव फारसीवाचि मतलेति समुच्यते।।७५।।

अन्तिमश्चापि यो बन्धः कविनामाङ्कितः खलु।
सोऽपि गजलतत्त्वज्ञैर्मकतेति निगद्यते।।७६।।

सत्रह अक्षर की अत्यष्टि, अठारह अक्षर की धृति, उन्नीस अक्षर की अतिधृति तथा बीस अक्षर का बन्ध कृति कही जाती है।

इक्कीस अक्षर की प्रकृति, बाईस अक्षर की आकृति, तेईस अक्षर की विकृति तथा चौबीस अक्षर का बन्ध संकृति कही जाती है।

पच्चीस अक्षर की अतिकृति तथा छब्बीस अक्षर का बन्ध उत्कृति कही जाती है। इससे अधिक (सत्ताईस, अट्ठाईस आदि) अक्षरों वाला जो बन्ध होता है उसे मालावृत्त कहते हैं।।-नाट्य० अ० १४

इस प्रकार एक अक्षर वाले उक्त से प्रारंभ कर छब्बीस अक्षरवाली उत्कृति तक प्रस्तार (फैलाव, विस्तार) होता है संस्कृतच्छन्दों का।

बहर-रूप पर्याय वाले इसी प्रस्तार में अगणित वृत्त जन्म लेते हैं। उस विषय में नाट्यशास्त्रकार का कथन है-

इन छन्दों का अनेक प्रकार वाला पृथक्-पृथक् भेद हुआ करता है जिनकी संख्या असंख्य है। विद्वानों ने इन्हें वृत्त कहा है।।-नाट्य० १४।५८

गज़ल के रहस्य जानने वालों ने गज़ल के तीन भागों को परिभाषित किया है। मतला, मक्ता और शेर नामवाले वे तीनो भाग अब व्याख्यात किये जा रहे हैं।।७४।।

मूलभाव (central theme) को प्रकाशित करने वाला, गज़ल का जो प्रारंभिक वाक्य (युगल) होता है वही फारसी भाषा में मतला कहा गया है।।७५।।

और जो अन्तिम बन्ध (वाक्ययुग्म) होता है कवि के उपनाम (तखल्लुस) से अंकित वह भी गज़ल-तत्त्वज्ञों द्वारा मक्ता कहा गया है।।७६।।

मतलामक्तयोर्मध्ये मूलभावैकपोषिणः।
बन्धा भिन्नाशया वापि कथिताः शेरसंज्ञकाः।।७७।।

फारसीसंविधानेन सर्वेणैतेन चाप्यलम्।
गजलेन च कस्तोषो देववाणीविपश्चिताम्।।७८।।

तस्माद्गलज्जलेत्याख्या स्याद्गलज्जलिकाऽथवा।
रोचतां संस्कृतज्ञेभ्य इति प्रस्तूयते मया।।७९।।

मतलाऽऽरम्भिका वाच्या शेर उच्येत मध्यिका।
अन्त्यिका च तथैवास्तु मकतेति मतम्मम।।८०।।

तदेतदुक्तं भवति यत्फारसीगजलगीतिरेव संस्कृतगलज्जलिका-ऽऽरम्भिकामध्यिकाऽन्त्यिकासमन्विता। आरम्भिका यथा ज्ञानोपाह्वा-ऽवस्थिबच्चूलालानाम्-

पिकाः कूजन्ति माकन्देषु कूजेयुः किमायातम्?
समीरा दाक्षिणात्या मन्दमञ्चेयुः किमायातम्?

मध्यिका : काश्चन यथाऽस्यामेव गलज्जलिकायाम्-

इदं पाणौ सुरापात्रं सुरा कुम्भेऽन्तिके रामा
उदन्वन्तः समे सर्वत्र शुष्येयुः किमायातम्?

अतन्त्रं लोकतन्त्रं वा विवादो नामनि व्यर्थः
सुमन्त्रा यान्त्रिके तन्त्रे न सिध्येयुः किमायातम्?

स्वतन्त्रत्वं भजेल्लोकः स्वतन्त्रत्वं परो धर्मः
युवानो यौवतं सम्भूय दीव्येयुः किमायातम्?

अन्त्यिका यथाऽत्रैव-

न हि ज्ञानेन सिध्यत्यर्थ इत्याश्रित्य विज्ञानम्
कदर्या आर्यमर्यादां विलुम्पेयुः किमायातम्?

ज्ञान इति कवेरुपनाम। तेनाङ्किताऽन्त्यिका। अनेके कवय उपनामाऽप्रयुञ्जाना अपि दृश्यन्ते। एतत्कविस्वातन्त्र्यमेव मन्तव्यं नपुनस्तेषां निरङ्कुशत्वम्।

मतला और मक्ता के बीच, मूलभाव को ही पोषित करने वाले अथवा भिन्न-भिन्न अभिप्रायों वाले भी जो बन्ध (वाक्ययुग्म) आते हैं, वे शेर कहे जाते हैं।।७७।।

बहरहाल, इस सारे के सारे (गज़ल के) फारसी संविधान (टेकनीक) से क्या लाभ? देववाणी के विद्वज्जनो को गज़ल से भला क्या परितोष??७८।।

इसलिये **गलज्जला** अथवा **गलज्जलिका** संज्ञा ही संस्कृतज्ञों को रुचे, इस मंशा से मैं उसे प्रस्तुत कर रहा हूँ।।७९।।

मतला को **आरम्भिका**, शेर को **मध्यिका** तथा मक्ता को **अन्त्यिका** कहना चाहिये, ऐसा मेरा मन्तव्य है।।८०।।

तो फिर निर्गलितार्थ यह हुआ कि फारसी भाषा की गज़ल गीति ही आरम्भिका-मध्यिका-अन्त्यिका से समन्वित संस्कृत **गलज्जलिका** है।

आरम्भिका का उदाहरण बच्चूलाल अवस्थी 'ज्ञान' का यह बन्ध-

कोकिल कूक रहे हैं अमराइयों में, कूकें! क्या मिलने वाला है उससे? दक्षिण-पवन मन्दगति से बह रहे हैं, बहें। क्या मिलने वाला है उससे?

मध्यिका के कुछ उदाहरण इसी गज़ल में-

हाथ में है वह मदिरापात्र, सुराही में है मदिरा और पास में है रामा (प्रणयिनी) अब सारे के सारे समुद्र सर्वत्र सूख भी जाँय तो क्या हुआ उससे?

अ-तंत्र (शासनाभाव) हो अथवा लोकतंत्र हो। नाम के विषय में विवाद करना व्यर्थ है। इस यांत्रिक तंत्र में (मशीनी युग में) अच्छे संकल्प सिद्ध होने वाले नहीं हैं।

समाज को चाहिये स्वतंत्रता। स्वतंत्रता ही सबसे बड़ा धर्म है। युवक लोग युवतियों के समूह के समान दीखें! क्या हानि है भला?

अन्त्यिका का उदाहरण जैसे इसी गजल में-

'ज्ञान' मात्र से काम सिद्ध नहीं होता इस तर्क का आश्रय लेकर कापुरुष लोग आर्य-मर्यादा को विलुप्त करें। क्या हानि है?

'ज्ञान' कवि (आचार्य बच्चूलाल अवस्थी) का उपनाम है। उस (उपनाम) से अंकित है (यह) अन्त्यिका। बहुतेरे गज़लकार ऐसे भी हैं जो उपनाम का प्रयोग न करते हुए भी देखे जाते हैं। इसे कवि-स्वातंत्र्य ही माना जाना चाहिये न कि उनकी निरंकुशता।

शब्द आरम्भिकाबन्धवाक्ययोरन्तिमोऽथ सः।
एक एव भवेद् गीते काफियाख्योऽनुवर्तितः।।८१।।

किन्तु नात्र गुणः कश्चिद्रूढिमात्रमिदं किल।
यथाभिरुचितं प्राज्ञस्ततस्स्वैरं प्रयोजयेत्।।८२।।

विवर्ता इतरे चापि संस्कृतप्रकृतिङ्गताः।
गलज्जलासु योक्तव्याः संस्कृतज्ञकवीश्वरैः।।८३।।

प्रतिभानसमुल्लासः कवित्वविबुधद्रुमः।
किमप्यभिनवं स्रष्टुं लीलयैव हि शक्नुते।।८४।।

'काफिया' यथोपर्युदाहृते गीत एव किमायातम् इत्यंशः। अयमेवांशः प्रतिबन्धमनुवर्त्यते गलज्जलिकायाम्।

काफियाख्योऽयमन्तिमशब्दांशः क्वचिदारम्भिकाबन्धस्य द्वितीय-पङ्क्तावेव दृश्यते, न पुनरुभयोः। यथा ममैव गीतिकायाम्-

यथाशक्ति पानीयवर्षाभिरुर्वीम्
समुद्य प्रणश्यामि धाराधरोऽहम्!!

अत्र धाराधरोऽहमित्यंशो द्वितीयपङ्क्तावेव प्रयुक्तः। इदं तावत्कवित्वस्वातन्त्र्यम्। अन्यत्र तावत्पस्परानुपालनमेव संलक्ष्यते। यथा-

तनुते न विस्मयं किं राष्ट्रस्य राजधानी?
कुरुते न दुर्नयं किं राष्ट्रस्य राजधानी?

आरम्भिका-बन्ध के दोनो वाक्यों का वह दुहराया जाने वाला अन्तिम शब्द, गज़ल में एक ही होना चाहिये जिसे काफिया कहा जाता है।।८१।।

परन्तु इस (नियम) में कोई गुणवत्ता नहीं है प्रत्युत यह एक रूढिमात्र है। इसलिये बुद्धिमान् गज़लकार को अपनी रुचि के अनुसार ही, स्वतंत्रतापूर्वक प्रयोग करना चाहिये।।८२।।

इसी प्रकार (फारसी गज़ल-नियमों की तुलना में) अन्यान्य परिवर्तन भी, जो संस्कृत गज़ल-गीति के अनुकूल हों, संस्कृत कवीश्वरों द्वारा गज़लों में प्रयुक्त किये जाने चाहिये।।८३।।

कवित्व-कल्पतरु प्रतिभा का समुल्लास कुछ भी अभिनव (विलक्षण) निर्मित करने में, खेल-खेल ही में समर्थ हो जाता है।।८४।।

काफिया, जैसे ऊपर उदाहृत किये गये गीत में ही **किमायातम्** यह अंश-विशेष। यही अंश गलज्जलिका के प्रत्येक बन्ध (शेर) में दुहराया जाता है।

काफिया-नामक यह अन्तिम शब्दांश कभी-कभी **आरम्भिका-बन्ध** की दूसरी पंक्ति में ही दृष्टिगोचर होता है, दोनो पंक्तियों में नहीं।

जैसे मेरी ही गज़ल-गीति में-

जल-वृष्टियों के द्वारा यथाशक्ति धरती को भिंगोकर नष्ट हो जाऊँगा।
धाराधर हूँ मैं!!

इस गज़ल में **धाराधर हूँ मैं** यह अंश दूसरी ही पंक्ति में प्रयुक्त है। फिलहाल, इसे कवि की स्वतंत्रता मानना चाहिये। अन्य गज़लों में तो परम्परा का पालन ही दिखाई पड़ता है। उदाहरणार्थ-

विस्मय कौन नहीं सिरजत्री **राष्ट्र की राजधानी!** दुराचार कौन नहीं करती **राष्ट्र की राजधानी!!**

संविधानकमात्रं हि फारसीगजलाश्रितम्।
ग्राह्यं न च प्रतिपाद्यमित्यभिराजसम्मतम्।।८५।।

फारसी गज़लों का संविधानकमात्र (Technique only) ही (संस्कृत कवियों द्वारा) ग्राह्य है न कि (उनका) प्रतिपाद्य (भी) ऐसा अभिराज का मन्तव्य है।।८५।।

क्वासावुच्छृङ्खलो रागः फारसीकाव्यवर्णितः।
रागबन्धः क्व चास्माकमखण्डपुण्यसत्फलम्।।८६।।

क्व चषकाः मदिरोन्मादा उत्पथा मदिरालयाः।
क्व च वासगृहायत्ता समर्चा पुष्पधन्वनः??८७??

तुरुष्कसंस्कृतिः क्वासौ समुदाचारलङ्घिनी।
संस्कृतिश्चास्मदीयेयं क्व पुनश्शीलरक्षिणी।।८८।।

अतो हि विश्वरक्षित्री कविभिस्सैव संस्कृतिः।
गलज्जलिकया वर्ण्या तौरुष्की न कथञ्चन।।८९।।

मदिरालयचर्चाभिश्शारदामथवाऽर्चताम्।
कवीनां ननु कल्याणं स्वयमम्बा विचिन्तयेत्।।९०।।

साम्प्रतं भिन्नविस्तारा विभिन्नसंविधानका।
सा गलज्जलिका यत्नात्समुद्धृत्य समीक्ष्यते।।९१।।

संविधानकमात्रं ग्राह्यं न पुनः फारसी-उर्दूगजलप्रतिपाद्यं तत्सगन्धं वा प्रतिपाद्यं भारतीयाचारमर्यादाविसंवादित्वात्। कस्यचिद्राष्ट्रस्य साहित्यं तत्संस्कृतिदर्पणकल्पं भवतीति दिक्।

फारसी (तथा उर्दू) गज़लों में वर्णित कहाँ वह उच्छृङ्खल प्रेम और कहाँ अखण्ड पुण्यों का सत्फलभूत हमारा (भारतीय) रागबन्ध!!८६!!

कहाँ वे शराब के जाम, शराब की उन्मत्तता और अमर्यादित मदिरालय? और कहाँ वासगृह में सम्पादित (भगवान्) पुण्यधन्वा की समर्चना!!८७!!

समुदाचार (code of conduct) का उल्लंघन करने वाली वह तुरुष्क-संस्कृति कहाँ? और शील की रक्षा करने वाली कहाँ हमारी भारतीय संस्कृति?

इसलिये विश्व की रक्षा करने वाली वही भारतीय संस्कृति कवियों द्वारा संस्कृत गज़लों द्वारा वर्णित की जानी चाहिये, मुस्लिम संस्कृति किसी भी कीमत पर नहीं।।८९।।

अथवा मदिरालयों की चर्चाओं से ही भगवती सरस्वती की समर्चना करते (ऐसे) कवियों का कल्याण (मंगल) स्वयं माँ सोचेगी।।९०।।

अब भिन्न-भिन्न विस्तार (बहर) वाली तथा पृथक् संविधानक वाली गलज्जलिकाओं की, प्रयत्नपूर्वक उद्धृत कर, समीक्षा की जा रही है।।९१।।

संविधानक (तकनीक) मात्र ही ग्रहण करना चाहिये न कि फारसी अथवा उर्दू गज्जलों की वर्ण्य-सामग्री अथवा उससे मिलती-जुलती सामग्री लेनी चाहिये, भारतीय आचार-मर्यादा से मेल न खाने के कारण! किसी भी राष्ट्र का साहित्य उस राष्ट्र की संस्कृति का दर्पण होता है। इतना ही पर्याप्त है।

तत्र चतुर्दशमात्रा गलज्जलिका यथा मम शालभञ्जिकायाम्-

सत्यरक्षणे यत्नपरः
श्रुतिकटुदोषो गिरोऽभवम्।।
शक्तिर्मिता धराऽनन्ता
धावन्धावन् स्थिरोऽभवम्।।
चरितं दृष्ट्वा पुरोधसां
परित्यक्तमन्दिरोऽभवम्।।
रक्तं लिखितं भाललिपौ
यतः कालिकाऽजिरोऽभवम्।।
का मेऽपूर्णतया हानिः।
शिवभाले चन्दिरोऽभवम्।।
अभिराजश्शारदाऽत्मजः
रसगुणधमनीशिरोऽभवम्!!

षोडशमात्रा गलज्जलिका यथा ममैव मत्तवारण्याम्-

नाऽहमस्मि सूर्यो, दीपोऽहम्
मनोराज्यनवधरणीपोऽहम्।।
सिन्धोरिव न च मे विस्तारः
सर्वसुलभमृदुजलकूपोऽहम्।।
नन्दनवनसुरतरुरपि नाऽहम्
घनच्छायजनपथनीपोऽहम्।।
अलमिह मम निष्ठापरीक्षया
तनुमपि दास्यामि दिलीपोऽहम्।।
किञ्चिदक्षतं तिष्ठति गर्भे
महितैतिह्यनिधिः स्तूपोऽहम्!!

अब उस सन्दर्भ में १४ मात्राओं की गलज्जलिका का उदाहरण जैसे (मेरी कृति) शालभञ्जिका में-

सत्य की रक्षा में प्रयत्न करने वाला मैं भाषा का श्रुतिकटु दोष (नित्य एवं अक्षम्य) बन गया।

पृथ्वी का ओर-छोर नहीं और (यात्रा की मेरी) सामर्थ्य सीमित है। अतः दौड़ते-दौड़ते (मैं थक कर) खड़ा ही हो गया।

पुरोहितों का (दुः) चरित देख मैने मन्दिर ही जाना छोड़ दिया।

मेरी तो भाललिपि में ही रक्त लिखा था क्योंकि मैं था महाकाली-मन्दिर का आँगन!

अपूर्ण (अधूरा) रह जाने से भी भला मेरी क्या हानि? क्यों कि मैं तो देवाधिदेव शिव के मस्तक की चन्द्रकला हूँ।

मैं हूँ **अभिराज**, भगवती शारदा का पुत्र! मेरी तो शिरा और धमनियों में भी रस एवं गुण विद्यमान हैं।

१६ मात्राओं की गलज्जलिका जैसे मेरी ही मत्तवारणी में-

मैं सूर्य तो नहीं (परन्तु) दीपक तो हूँ। मनोराज्य रूपी नई धरती का शास्ता हूँ मैं!

समुद्र जैसा मेरा विस्तार तो नहीं है (परन्तु) सर्व-सुलभ मीठे पानी का कुआँ तो हूँ मैं!!

मैं नन्दनवन में स्थित पारिजात भी नहीं (परन्तु) घनी छाया वाला जनपथ (आम रास्ते) का अशोक वृक्ष तो हूँ।

मेरी निष्ठा की परीक्षा मत करो। मैं (अपना) शरीर भी दे दूँगा (नन्दिनी की रक्षा हेतु आत्मार्पण कर देने वाला) दिलीप हूँ मैं!!

मेरे गर्भ (अन्तराल) में कुछ न कुछ तो 'अक्षत' सुरक्षित है। अत्यन्त मूल्यवान् ऐतिहासिक निधि को संजोने वाला स्तूप हूँ मैं!!

सप्तदशमात्रा गलज्जलिका यथाऽऽचार्यबच्चूलालावस्थिनाम्-

अर्जितानां समर्जनं भूयः
नार्जवं किन्तु कर्जनं भूयः।।
अद्य केयं दशाऽस्ति मेघानां
वर्षणं नैव गर्जनं भूयः।।
भस्मसाद् भावयन्ति का हानिः
भर्जितस्यैव भर्जनं भूयः।।
कुक्कुरस्य स्वभावतो बुक्का
किं वराकस्य वर्जनं भूयः??
व्याकुलोऽर्थः क्व याति, का चिन्ता
शब्दजालस्य सर्जनं भूयः!!

एकोनविंशतिमात्रा गलज्जलिका यथा मम शालभञ्जिकायाम्-

अमी ध्वाङ्क्षास्तथापि न मां सहन्ते
पिकोऽहं साममाधुर्यं मदन्ते।।
पुरे ग्रामे वने पथि मरुवणे वा
क्व यामि प्रायिकाः परितः प्लवन्ते।।
रहसि सम्प्रेक्ष्य चरितं वैष्णवानां
मया श्रद्धार्पिता सम्प्रति भदन्ते।।
कृतघ्ना लक्षकोटिमिताः समाजे
कृतज्ञः कः कलावस्मिन् दुरन्ते!!
नभस्यभिराजगीतकथानिबन्धाः
क्व नो सम्प्रति खगीभूयोड्डयन्ते??

१७ मात्राओं की गज़ल जैसे आचार्य बच्चूलाल अवस्थी की-

अर्जितों का ही पुनः समर्जन? आर्जव नहीं, परन्तु बार-बार कर्जन!

क्या हालत हो गई है आज बादलों की कि बरसना तो दूर परन्तु गर्जन-मात्र बार-बार?

जो भस्म हो चुका है उसी को भावित (पुनरुज्जीवित) कर रहे हैं। हानि ही क्या है इसमें! यह तो भुने हुए को ही पुनः भूनना हुआ।

कुत्ते का स्वभाव है भूँकते रहना। उस वेचारे को बार-बार मना करने का क्या लाभ?

व्याकुल अर्थ कहाँ जा रहा है? इसकी क्या चिन्ता? बस जोर-शोर से शब्दजाल की सर्जना करते रहिये।

१९ मात्राओं की गलज्जलिका जैसे मेरी शालभञ्जिका में-

हैं तो वे (हीन-गुण) कौवे, फिर भी मुझे बर्दाश्त नहीं कर पाते। मैं हूँ कोकिल, साममंत्रों जैसी मधुरिमा भरी है मेरे कण्ठ में!

नगर, गाँव, वन, मार्ग तथा मरुवण! कहाँ जाऊँ! प्रेत-पिशाच चारों ओर घूम-टहल रहे हैं।

एकान्त में वैष्णवों का चरित देखकर अब मैने अपनी श्रद्धा (आचरणशील, तपस्वी) भदन्तों (जैनमुनियों) के प्रति अर्पित कर दी है।

समाज में (आज) कृतघ्न तो लाखों-करोड़ों है। परन्तु इस दुरन्त कलिकाल में कृतज्ञ कौन है?

अभिराज कवि के गीत, कथायें तथा आलेख आज आकाश में पंछी बन कर कहाँ नहीं उड़ रहे हैं?

विंशतिमात्रा गलज्जलिका यथैहिकोपाह्वस्य महराजदीनपाण्डेयस्य-

औरसेनाऽसृजा पोषिता लेखनी
लोकरागोष्मणा शोधिता लेखनी।।
प्राकृता नाम ये पूर्वमवहेलिताः
तैरभाग्यैरियं योजिता लेखनी।।
पुनरितो नैतु कश्चिद्रथस्सन्दलन्
चिन्तयन्निति सृतौ रोपिता लेखनी।।
नो कुबेरस्य कस्यापि वशवर्तिनी
रामगिर्याश्रमे प्रोषिता लेखनी।।
ईश्वरादेशपरिपन्थिनी मानुषी
साहसेनैहिकी घोषिता लेखनी।।

द्वाविंशतिमात्रा गलज्जलिका यथा जगन्नाथपाठकस्य पिपासायाम्-

सार्धं न हन्त कोऽपि गतः सर्वतो मया।
आसादितो न कोऽपि निजः सर्वतो मया।।
एकाकिनो जनस्य हि दिवसा न यान्त्यमी
एवञ्च यापितो दिवसः सर्वतो मया।।
अहमेव दुःखहेतुरमीषां तु यद्यपि
दुःखीकृतो न कोऽपि जनः सर्वतो मया।।
आत्मीयतां गतेऽपि सकलेऽपि कोऽप्यहो
नैव श्रुतो मदीयजनः सर्वतो मया।।

२० मात्राओं की गज़ल जैसे महराज दीन पाण्डेय 'ऐहिक' की-

अपने खून से सींचा है मैने (अपनी) कलम को। लोक-राग की ऊष्मा से शोधित किया है (मैने अपनी) लेखनी को।

जो लोग पहले अवहेलित (कदर्थित) किये गये वे (निश्चय ही) सामान्य लोग थे। उन अभागों द्वारा यह लेखनी प्रयुक्त की गई।

अब पुनः पददलित करता कोई रथ इधर न आ निकले ऐसा सोच कर ही मैने मार्ग में (अवरोधरूप में) खड़ी कर दी है लेखनी!

किसी कुबेर की वशवर्तिनी नहीं है (क्योंकि) रामगिरि-आश्रम में प्रवास कर चुकी है (मेरी वह) लेखनी।

ईश्वर के आदेश का भी विरोध करने वाली घोषित कर दी गई है मानव-कोटिक ऐहिक-कवि की यह लेखनी।

२२ **मात्राओं** की गज़ल जैसे जगन्नाथ पाठक की **पिपासा** में-

ओफ् कोई भी मेरे साथ सर्वत्र नहीं गया। पूर्ण प्रयत्न के बावजूद किसी को मैने 'अपना' नहीं पाया।

अकेलेपन में, व्यक्ति के ये दिन नहीं बीत पाते। फिर भी मैने यूँ ही (इसी स्थिति में) अपने दिन काट दिये।

उनके दुःखों का कारण यद्यपि मैं ही हूँ फिर भी (अपनी जान) मैने किसी व्यक्ति को दुखी नहीं बनाया।

समझा तो मैने सबको आत्मीय (अपना) फिर भी नहीं सुना मैने कि कोई व्यक्ति 'मेरा अपना' है।

त्रयोविंशातिमात्रा गलजजलिका यथा मणेर्जनादनप्रसादपाण्डेयस्य-

केवलं श्रोत्रविनोदं विचिन्त्य सत्कुरुषे।
गीतिका तेऽस्मि शताब्द्या न पक्ष्मभिश्चिनुषे।।
कृष्ण गीताऽपि वृता हा! त्वयाऽनृते शपथे।
गोखुराङ्कस्थजलाब्धौ निपत्य न म्रियसे।।
राजनीतेस्तु महापङ्किले विलासरसे।
प्राप्तनिर्वाणसुखस्त्वं प्रभुं न चेतयसे।।

२३ मात्राओं की गजल जैसे जनार्दनप्रसाद पाण्डेय मणि की-केवल कर्णसुख के विचार से वाहवाही कर रहे हो? अरे, मै तुम्हारी शताब्दी की गीतिका हूँ (फिर भी) मुझे आत्मसात् नही कर रहे हो।

हाय! कृष्ण की गीता को भी तुमने झूठी कसम खाने के लिये उठा ही लिया! अरे, चिल्लू भर पानी मे डूब कर मर नहीं जाते!

राजनीति के महापंकिल विलास-रस में मुक्ति-सुख प्राप्त करते हुए तुम परमेश्वर प्रभु का स्मरण नही कर रहे!

चतुर्विंशतिमात्रा गलज्जलिका यथा ममैव मृद्वीकायाम्-

लोकानुरागमूलं लोकाभिशापशूलं
शीर्षे निधाय सर्वं जीवामि भूतलेऽहम्!!
क्वचिदपि ललाटपट्टे सौभाग्यबिन्दुरासं
दिवसा गता हि ते नो जीवामि भूतलेऽहम्!!
भवनाङ्गणे कदाचिद् दृष्टा पयोदमाला
प्रपलायिताऽप्यवृष्टिर्जीवामि भूतलेऽहम्।।
निर्मापितं न जाने केनेदमूर्ध्वहर्म्यं
मम खण्डितावशेषे जीवामि भूतलेऽहम्।।
मन्ये कृतान्तगेहे भ्रान्ताऽस्ति मृत्युबाला
यस्मादहोऽभिराजो जीवामि भूतलेऽहम्।।

अष्टाविंशतिमात्रा गलज्जलिका यथा दीक्षितपुष्पायाः-

नभःस्पर्शक्षमे शङ्खोदरश्वेते वसन् सौधे
तृणावासं मदीयं वीक्ष्य संमृद्नाति लोकोऽयम्।।
मया मूर्ध्ना नतेनास्मिन् कुटीरे यापितः कालः।
तथाप्याहृत्य तालं योद्धुमग्रे याति लोकोऽयम्।।
असह्यं वेदनं सूते स्वदेहे कण्टकस्याग्रं
शरीरं मे शराकीर्णं क्रमित्वा याति लोकोऽयम्।।
न सूपे सम्प्लुता दर्वी रसं सूपस्य जानीते
वसंल्लोके व्यथां लोकस्य नो जानाति लोकोऽयम्।।

२४ मात्राओं की गज़ल जैसे मेरी ही मृद्वीका में-

लोकानुराग का मूल और लोकाभिशाप का शूल! सब को सिरमाथे लगाकर धरती पर जी रहा हूँ मैं!

कभी मैं भी किसी के ललाटपट्ट पर उभरा सौभाग्य-तिलक था! परन्तु खो गये मेरे वे दिन (और) जी रहा हूँ धरती पर मैं!

अपने घर की अँगनाई में भी मैने कभी देखी थी घनघटा। परन्तु गल गई वह बिना बरसे ही (और) जी रहा हूँ धरती पर मैं!

मेरे खँडहरों के ऊपर न जाने किसने बनवा ली है यह गगनचुम्बी इमारत (और) जी रहा हूँ धरती पर मैं!

मैं तो समझता हूँ कि मृत्युरूपी बाला यम के भवन में कहीं रास्ता भटक गई है जिसके परिणाम-स्वरूप मैं अभिराज जी रहा हूँ धरती पर!

२८ मात्राओं की गज़ल जैसे पुष्पा दीक्षित की-

शंख के समान लकदक गगनचुम्बी महल में रहते हुए भी समाज मेरी घास-फूस की झोपड़ी देख तिलमिलाता है।

मैने तो सिर झुकाकर ही इस कुटीर में (अपनी) ज़िन्दगी काट ली फिर भी यह समाज ताल ठोंक कर (मुझसे) लड़ने के लिये अग्रसर होता रहा है।

काँटे की नोक अपनी देह में असह्य पीड़ा पैदा करती है, फिर भी तीरों से छलनी हुई मेरी देह को लाँघ कर जाता रहा है यह समाज।

जो करछुल दाल की बटलोई में घुसी नहीं वह दाल का स्वाद क्या जानेगी? फिर भी, समाज में ही रहता हुआ यह समाज, समाज की व्यथा को नहीं जानता।

त्र्यष्टाविंशतिमात्रा गलज्जलिका यथा प्रणवोपाह्वस्य इच्छा-रामद्विवेदस्य-

धनुस्ते कीदृशं कियदद्भुतं बन्धो! कथं जाने?
विना नाराचसन्धानं व्रणं कुरुते कथं जाने?
मया शास्त्रे श्रुतं मन्दस्मितैर्नन्दन्ति सत्पुरुषाः
मनो मे दूयते ते सुस्मितैर्बन्धो! कथं जाने?
कटाक्षैस्ते विचित्रैरीदृशं सम्पादितं कृत्यम्
जडीभूतं मनो मे चञ्चलं बन्धो! कथं जाने??

२८ मात्रा की (ही) गजल जैसे इच्छाराम द्विवेदी 'प्रणव' की। बन्धु! तुम्हारा धनुष कैसा है, कितना अद्भुत है-भला कैसे जानूँ! बिना शरसन्धान के ही घाव कर देता है, कैसे जानूँ। शास्त्रो में सुना है कि मन्द मुस्कान से सज्जन बाग-बाग हो उठते हैं। परन्तु तुम्हारी तो हसीन मुस्कानो से भी मेरा कलेजा बैठ जाता है।

तुम्हारे विचित्र कटाक्षों ने कुछ ऐसा काम कर डाला कि मेरा घुड़दौड़ करता मन अड़ियल बन गया है यह (रहस्य) कैसे जानूँ?

द्वात्रिंशन्मात्रा गलज्जलिका यथा भट्टमथुरानाथशास्त्रिवर्याणाम्-

अयि चित्त! चिरेण विचिन्तयतोऽपि च चञ्चलता न गता न गता
अपि नाम निरन्तरयत्नशतैस्तव निष्ठुरता न गता, न गता।।

अभिनन्दसि शास्त्रगतं न मतं नहि विन्दसि सन्ततमात्महितम्
बत निन्दसि लोकमतं विमतं तव मत्सरता न गता, न गता।।

यथा वा ममैव मत्तवारण्याम्-

कीदृशमहो विलक्षणलोचनयुगलं मञ्जुलमतनुत मीरा
अभितः परितो येन सन्ततं दयितमुकुन्दमपश्यन्मीरा।।
पिटकपरीतं दारुणफणिनं प्रेषितवान् रोषोद्धुरराणा
माधवरागनिमग्नमानसा शालग्राममपद्यत मीरा।।

अथच्छन्दोमुक्तकाव्यप्रकरणम्-

छन्दः पादौ तु वेदस्येत्युचितं प्राहुरागमाः।
छन्दसैव हि काव्यस्य कथायात्रा प्रवर्तते।।९२।।

छन्दस्तद् द्विविधं ख्यातं वार्णिकं मात्रिकं तथा।
वार्णिकं त्रिविधं भूयोऽदस्समाऽर्धसमाऽसमैः।।९३।।

वार्णिकं गण्यते वर्णैर्मात्राभिश्चापि मात्रिकम्।
सर्वज्ञेयं हि तच्छन्दो लक्षणाश्रयि यत्पुनः।।९४।।

३२ मात्राओं की गज़ल जैसे भट्ट मथुरानाथशास्त्री की-

चिरकाल से ही चिन्तन करते रहने पर भी हे मेरे मन! तेरी चंचलता नहीं, गई, नहीं गई। निरन्तर सैकड़ों उपाय करते रहने पर भी तेरी निष्ठुरता नहीं गई, नहीं गई।

शास्त्रानुमोदित मन्तव्य का तुम अभिनन्दन नहीं करते, निरन्तर अपने कल्याण की बात तुम नहीं सोचते। खेद है कि अपने को पसन्द न लगने वाले लोकमत की तुम निन्दा करते हो। तुम्हारी मत्सरता (ईर्ष्या-द्वेष की भावना) न गई, न गई।

अथवा (दूसरा उदाहरण) मेरी ही मत्तवारणी में-

आश्चर्य है, देवी मीराबाई ने कैसा विलक्षण पावन नेत्रयुगल प्राप्त कर लिया था जिससे उन्होंने निरन्तर अपने दायें-बायें, चारों ओर प्रियतम मुकुन्द का दर्शन किया।

क्रोध में अन्धे हुए राणा ने पिटारी में बन्द करके दारुण नाग को भेजा। (परन्तु) माधव के अनुराग में डूबी चित्तवृत्ति वाली मीरा ने (उस पिटारी में भी) शालग्राम को प्राप्त कर लिया।

अब **छन्दोमुक्त** काव्य का प्रकरण-

आगमों में यह उचित ही कहा गया है कि छन्द वेद (पुरुष) के चरणयुगल हैं (क्योंकि) छन्दों के ही सहारे काव्य की कथायात्रा विकसित होती है।।९२।।

वह छन्द दो प्रकार का बताया गया है-वार्णिक तथा मात्रिक। वार्णिक छन्द पुनः तीन प्रकार का होता है-सम, अर्धसम और असम (विषम) भेदों के कारण।।९३।।

वार्णिक छन्द में (गण) वर्णों द्वारा गिना जाता है (जबकि) मात्रिक छन्द में मात्राओं द्वारा। इस प्रकार का वह छन्द सर्वज्ञेय होता है। लक्षणों पर आश्रित होने के कारण।।९४।।

वार्णिकमात्रिकाभ्यां हि किन्तु तद्वै विलक्षणम्।
छन्दस्त्वं यत्प्रतिशब्दं तिष्ठत्येव निसर्गतः।।९५।।

छन्दस्त्वं गद्यबन्धेऽपि बुधास्तस्माद्धि मन्वते।
वार्णिकं मात्रिकं वापि काममेव न तद्भवेत्।।९६।।

छन्दोमुक्तं किमप्येव वाङ्मये नहि विद्यते।
वस्तुतः परमार्थोऽयं प्रतिषेद्धुं न शक्यते।।९७।।

एवम्भूतेऽपि यत्काव्यं वर्णमात्रागणक्रमैः।
न प्रणीतं, तदेवाद्यच्छन्दोमुक्तं समुच्यते।।९८।।

काव्यसृष्टिप्रयोज्यत्वान्मनः प्रीत्यैसचेतसाम्।
छन्दोमुक्तं हि तत्काव्यं सोदाहरणमुच्यते।।९९।।

छन्दः पादौ तु वेदस्येति पाणिनीयशिक्षा। यथा कश्चिज्जनः पादाभ्यामेव यात्रां सम्पादयति तथैव काव्यपुरुषोऽपि शब्दार्थपादाभ्यां स्वकथायात्रां निर्वर्तयति। तच्चच्छन्दो द्विविधं वार्णिकं मात्रिकञ्चेति। वार्णिकं भवति चतुष्पादात्मकम्। तच्च त्र्यक्षरात्मकैरष्टगणैर्लिख्यते। ते च गणाः-

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुः पुनरादिलघुर्यः।
जो गुरुमध्यगतो रलमध्यः सोऽन्तगुरुः कथितोऽन्तलघुस्तः।।

यथा वा-

आदिमध्यावसानेषु भजसा यान्ति गौरवम्।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम्।।

परन्तु वार्णिक एवं मात्रिक छन्दों से भी विलक्षण एक छन्दोमयता प्रत्येक शब्द में निसर्ग से ही विद्यमान रहती है।।९५।।

इसीलिये विद्वज्जन गद्यबन्ध में भी छन्दस्त्व स्वीकार करते हैं भले ही गद्यबन्ध वार्णिक अथवा मात्रिक गणों से युक्त नहीं होता है।।९६।।

(इस प्रकार) वाङ्मय में कुछ भी ऐसा नहीं है जो (सर्वथा) छन्दोमुक्त हो। वस्तुतः इस परमार्थ (सचाई) का अपलाप नहीं किया जा सकता।।९७।।

ऐसा होने पर भी जो काव्य वार्णिक अथवा मात्रिकगणों द्वारा प्रणीत न किया गया हो उसी को आज छन्दोमुक्त काव्य कहते हैं।।९८।।

काव्यरचना में प्रयोज्य होने के कारण, सहृदयों की मनःप्रीति के लिये वह छन्दोमुक्त काव्य सोदाहरण निरूपित किया जा रहा है।।९९।।

छन्द है वेद का चरण ऐसा पाणिनीय शिक्षा में कहा गया है। जैसे कोई व्यक्ति दो पैरों से ही यात्रा सम्पन्न करता है उसी प्रकार काव्यपुरुष भी शब्द एवं अर्थरूपी चरण-युगल द्वारा ही अपनी कथारूपी यात्रा को सम्पन्न करता है। वह छन्द दो प्रकार का होता है-वार्णिक और मात्रिक। वार्णिक छन्द होता है चार चरणों वाला। वह तीन अक्षरों वाले आठ गणों द्वारा लिखा जाता है। वे गण हैं-

मगण जिसमें तीनो अक्षर गुरु होते हैं। **नगण** जिसमें तीनो अक्षर लघु होते हैं। **भगण** जिसमें आद्यक्षर गुरु होता है। **यगण** जिसमें आद्यक्षर लघु होता है। **जगण** जिसमें मध्याक्षर गुरु होता है। **रगण** जिसमें मध्याक्षर लघु होता है। **सगण** जिसमें अन्त्याक्षर गुरु होता है और **तगण** जिसमें अन्त्याक्षर लघु होता है।

अथवा (दूसरा लक्षण) भगण-जगण तथा सगण क्रमशः आदि, मध्य तथा अन्त्य स्थानों पर गुरुता को प्राप्त करते हैं (इसी प्रकार) यगण-रगण तथा तगण (क्रमशः आदि, मध्य एवं अन्त में) लघुता को प्राप्त करते हैं। मगण में तीनो गुरु तथा नगण में तीनो लघु अक्षर होते हैं।

वार्णिकमपिच्छन्दस्त्रिविधं भवति समाऽर्धसमविषमभेदैः। मात्रिकं छन्दश्चतुर्मात्रात्मकैर्गणैर्व्यवस्थाप्यते यथाऽऽर्यागीत्यादीनि।

अलन्तावद्वार्णिकमात्रिकच्छन्दोभ्याम्। प्रतिशब्दं किञ्चिन्नैसर्गिकं छन्दस्तिष्ठतीति नाट्यशास्त्रकारो भरतः। स आह-

छन्दोहीनो न शब्दोऽस्ति न च्छन्दः शब्दवर्जितम्।
तस्मात्तूभयसंयुक्ते नाट्यस्योद्योतके स्मृते।।-नाट्य० १४।४०

तस्माद् गद्येऽपि तिष्ठत्येव किञ्चित्स्वाभाविकं छन्दस्त्वमित्यङ्गीकार्यम्। अयमेव परमार्थः। एवं व्यवस्थिते सति कोऽयं छन्दोमुक्तकाव्यप्रस्ताव इति पृच्छायां समुच्यते यद् वर्णमात्रागणक्रमैरप्रणीतमेव काव्य-मुपचारतश्छन्दोमुक्तमुच्यते।

तदेवं छन्दोमुक्तं गद्यमेवेति चेदुच्येत तन्न। गद्यं तावत्पद्यप्रतियोगि काव्याभिधानम्। छन्दोमुक्तं तावद् गद्यपद्योभयगुणसंवलितं विशिष्टमेव वाग्वस्तु। छन्दसामप्रयोगाद्गद्यनिर्विशेषमिदम्। छन्दोगुणोपस्थितिवशात्पद्य-निर्विशेषमपीदम्। एवं हि गद्यपद्योभयरसायनसम्भृतं छन्दोमुक्तमित्यभिराज-सम्मतम्। किञ्च-

गद्यपद्योभयात्मेदं छन्दोमुक्तं हि वाङ्मयम्।
पद्यात्मकलयेनैव यद्धि गद्येन लिख्यते।।१००।।

वार्णिक छन्द भी तीन प्रकार का होता है-सम, अर्धसम एवं विषम भेदों के कारण। **मात्रिक** छन्द की व्यवस्था चार मात्राओं वाले गणों द्वारा होती है जैसे आर्या एवं गीति आदि।

अब वार्णिक एवं मात्रिक छन्दों का निरूपण यहीं स्थगित करते हैं। प्रत्येक शब्द में कोई नैसर्गिक (सहजात) छन्द विद्यमान होता है, ऐसा नाट्यशास्त्रकार **आचार्य भरत** मानते हैं। उनका कहना है-कोई भी शब्द छन्दोहीन नहीं होता और न ही छन्द शब्द-वर्जित होता है। इसलिये शब्द एवं छन्द-दोनों ही समवेत रूप से नाट्य के उद्योतक माने गये हैं।-नाट्य० १४।४०

इसलिये (पद्येतर) गद्य में भी कोई स्वाभाविक छन्दोमयता विद्यमान रहती ही है ऐसा स्वीकार किया जाना चाहिये। यही परमार्थ (सत्य) है।

ऐसी स्थिति में यदि कोई पूछे कि यह **छन्दोमुक्त** काव्य का प्रस्ताव क्या है? तो उसका उत्तर हम देना चाहेंगे कि वार्णिक एवं मात्रिकगणों के माध्यम से न प्रणीत किये गये काव्य को ही (शब्दों में विद्यमान सहजात छन्दोमयता के कारण) उपचारतः **छन्दोमुक्त** (काव्य) कहा जाता है।

तो फिर, इस दृष्टि से तो **छन्दोमुक्त** (काव्य) गद्य ही हुआ, यदि ऐसा कोई कहे तो वैसा नहीं है (क्योंकि) क्योंकि **गद्य** पद्य के प्रतियोगी काव्य की संज्ञा है। परन्तु **छन्दोमुक्त** तो गद्य एवं पद्य-दोनों के गुणों से संवलित कोई विलक्षण ही वाग्वस्तु (अभिव्यक्ति) है। छन्दों का प्रयोग न होने के कारण

(छन्दोमुक्त) गद्य का सजातीय (गद्य जैसा) है परन्तु छन्द के गुणों (लयादि) की उपस्थिति के कारण यह पद्य का सजातीय (पद्य जैसा) भी है।

इस प्रकार, गद्य एवं पद्य दोनो के रसायन (रसवत्ता) से भरपूर होता है छन्दोमुक्त काव्य, ऐसा अभिराज का मन्तव्य है। पुनश्च,

गद्य एवं पद्य दोनो के जीवातु को धारण करने वाला होता है यह छन्दोमुक्त वाङ्मय जो कि पद्यात्मक लय के (Poetic Rhythm) द्वारा गद्य-विधा में लिखा जाता है।।१००।।

वस्तुतो लयवाहीदं गद्यमेव न चापरम्।
प्रसिद्धमाङ्ग्लभाषायां रिद्मिकप्रोज़संज्ञया।।१०१।।

प्राचीनजावीभाषायामपि गद्यं तदीदृशम्।
सुलुकं नाम गेयात्म वायाङ्गेषु महीयते।।१०२।।

तदेवं छन्दोमुक्तं परिभाषितम्। लयवाहिगद्यमेव च्छन्दोमुक्तमिति वाच्यम्। तच्च गद्यपद्योभयात्मकं भवति, गद्यपद्योभयगुणाधानत्वात्। तदेवाङ्ग्लवाचि रिद्मिकप्रोज़ (Rhythmic Prose) इत्युच्यते। कविभाषायां (Old Javanese) चापि सुलुकपदवाच्यमिदम्। वस्तुतः वायाङ्गप्रदर्शने डलङ्गाऽपरनामा सूत्रधारो लयवाहिगद्यशैल्या यामाख्यां (commentary) पात्रसंवादात्मिकां प्रसारयति साऽपि सुलुकगायन-मित्युच्यते। वस्तुतो हिन्दुशासनसत्ताकालीनं श्लोकगायनमेव सप्तनतकाले सप्तदशशततमे ख्रिस्तशतके यवद्वीपे सुलुकगायनं सञ्जातम्।

प्रायेण सर्वाण्येतानि सुलुकगायनानि दुष्यन्तशकुन्तलाकथाद्यवलम्बीनि पाकिमाख्यनाट्यशास्त्रग्रन्थेषु पूर्वत एव लिखितानि वर्तन्ते। डलङ्गः केवलमेतानि कण्ठस्थीकृत्य यथावसरं गायन्निव प्रस्तौति। सहृदया-नाम्मनोरञ्जनाय समुदाह्रियते सुलुकम्-

मंकत् लिङ् सङ् शकुन्तला सुमहुर् महाराज दुष्यन्त-कासि त्वं दुष्टतापसि? मंकत् लिङ् महाराज दुष्यन्त अनंगिस् त संग शकुन्तला सवेत् निंग ङरङ्ग ङर् मोजर्त सिर मुनह्-अत्यन्त काभिमानन्त महाराज! साक्षात् पश्यन्ति कर्माणि। सिर त तुमिङ्गल डंग व्यापाराहल-हयु समंकत त संग देवा ततन् केन हिमिमुर्-हिमुर् इति।

वस्तुतः यह (छन्दोमुक्त काव्य) लयवाही गद्य (Rhythmic Prose) ही है, कुछ और नहीं। इसी को अंग्रेजी भाषा में रिद्मिकप्रोज़ कहा जाता है।।१०१।।

प्राचीन जावी भाषा में भी इसी प्रकार के गद्य को गेय प्रकृति वाला **सुलुक** (श्लोक) कहा जाता है जो कि **वायांगों** (नाट्यों) में विशेष महत्त्व रखता है।।१०२।।

इस प्रकार **छन्दोमुक्त** को परिभाषित किया गया। लयवाही गद्य ही छन्दोमुक्त काव्य है, ऐसा कहना चाहिये। वह छन्दोमुक्त काव्य–गद्य एवं पद्य दोनों के गुणों का आधान (ग्रहण) करने के कारण गद्यपद्योभयात्मक होता है। इसी को अंग्रेजी भाषा में **रिद्मिक प्रोज** कहा जाता है। कविभाषा (जावा और बालीद्वीपों की प्राचीन भाषा) में भी इसे **सुलुक** कहा जाता है। वस्तुतः **वायांग** (नाट्य) के प्रदर्शन में **डलंग** नामक सूत्रधार लयवाही गद्यशैली में, पात्रों के संवादों से युक्त जिस आख्या को प्रसारित करता है उसे (बाली एवं जावा के समाज में) **सुलुक–गायन** ही कहा जाता है। वस्तुतः हिन्दू शासनसत्तायुगीन **श्लोक–गायन** ही सल्तनत काल में (१७, १८वीं शती ई०) यवद्वीप में **सुलुक–गायन** बन गया।

दुष्यन्त एवं शकुन्तला की कथा पर आश्रित प्रायः ये सारे के सारे **सुलुक–गायन** पाकिम नामक नाट्यशास्त्रीय ग्रंथों में पहले से ही लिखे हुए सुरक्षित हैं। डलंग, इन्हें केवल कण्ठस्थ करके, यथावसर, गाता हुआ सा प्रस्तुत करता है। सहृदयों के मनोरञ्जनार्थ (एक) सुलुक–गायन उद्धृत किया जा रहा है–

महाराज दुष्यन्त ने सकुन्तला से पूछा–दुष्ट तापसी! तू है कौन? महाराज दुष्यन्त के इस असभ्य व्यवहार को देख व्यथित होकर सकुन्तला बोली–हे राजन्! बड़ा घमण्ड हो गया है आपको? सारे देवगण जीवों के कर्मों को प्रत्यक्ष देखते हैं कि वह कब, क्या करता है!!

तत्र प्रथमोदाहरणं त्रिपाठिनो राधावल्लभस्य सम्प्लवे–

पलाण्डुच्छेदने निर्गतं
नयनयोर्लावण्यमयं बाष्पजलम्
सहैव चैव विच्छुरितं
मधुरमधुरं स्मितं तथोष्ठयोः
एतद् द्वयमपि सम्मेल्य कटाहे
घृतेन भर्ज्यते यदा
उत्तिष्ठति धूमस्तदा कषायमधुरो रसवत्यां
देवानामावाहनं विधत्ते

अथ हरिद्रासदृशमुज्ज्वलं रूपं धृत्वा
सौगन्ध्यकं वितन्वाना कुस्तुम्बर्याः
अवतरत्यन्नपूर्णा साक्षाद्रसवत्यामस्याम्
अन्नब्रह्म साकारयन्ती!!

द्वितीयं छन्दोमुक्तोदाहरणं के० राजन्नशास्त्रिणः। यथा-

लुब्धानां प्रीतयः
चलचित्राणां गीतयः
अपरिपक्वमतीनां नीतयः
अन्यायोपार्जितमुद्राणां स्फीतयश्चिरस्थायिन्यो न भवन्ति।
निशीथे सञ्चार
कपटपूर्णो व्यवहारः

सुहृदामत्युपचारः
विरक्तानां शृङ्गारः शङ्कनीयो भवति!!
गङ्गाजलस्य पानेन किम्
व्रतानामनुष्ठानेन किम्
स्तुतीनां गानेन किम्
तीर्थानां यातेन किं यदि भावशुद्धिर्नास्ति!!

छन्दोमुक्त का प्रथम उदाहरण राधावल्लभ त्रिपाठी की कृति सम्प्लव में द्रष्टव्य है-प्याज काटने में नेत्रों से निकला खारा आँसू और उसके साथ ही साथ होठों पर फैली मीठी-मीठी मुस्कान। इन दोनों को परस्पर मिलाकर जब कड़ाही में घी से छौंक लगाई जाती है तब रसोई में उठता है कषाय-मधुर धुआँ जो आवाहन करता है देवों का। तदनन्तर हल्दी के समान उज्ज्वल रूप धारण कर, धनियाँ की मँहक बिखेरती साक्षात् अन्नपूर्णा ही इस रसोई में अवतरित होती हैं- अन्नब्रह्म को साकार करती!

द्वितीय छन्दोमुक्त (काव्य) का उदाहरण के० राजन्नशास्त्री का। उदाहरणार्थ लोभियों की प्रीतियाँ, चलचित्रों की गीतियाँ, अधकचरी बुद्धिवालों की नीतियाँ, अन्याय से कमाई गई सम्पत्ति की स्फीतियाँ (बढ़ोत्तरी) चिरस्थायी नहीं होती हैं।

आधी रात में संचार, कपटपूर्ण व्यवहार, मित्रों का अत्युपचार, विरागियों का शृङ्गार शंकनीय होता है।

गंगाजल के पान से क्या? व्रतों के अनुष्ठान से क्या? स्तुतियों के गान से क्या? तीर्थों के गमन से क्या? यदि भावशुद्धि नहीं है तो।

तृतीयं छन्दोमुक्तोदाहरणं त्रिपाठिनः कमलेशदत्तस्य। यथा-

अयि सुतनुके! कलातत्त्वे भाविते ऐन्दवि!
सुतनुके!
अपि शृणोषि, परिचिनोषि समागतं तं
यं कमपि वाराणसेयं परावृत्तम्!
भेदिता अब्दाः शिलीभूताः
अर्णवप्रसराः परस्तात् सममजन्मा अग्रतस्त्वम्
स्वरहिमानी परश्शतवर्षाणि यावज्जडीभूता
स्पन्दतेऽथ श्रूयते

त्वन्नूपुराणां मन्दमन्दो रवश्शनकै-

राहतो मुरजो घनोऽयं तालधारी
झङ्कृता तन्त्री पूरयन्नालापचारं
वंशकोऽपि
तरति वायौ स्वरस्ते परिदेवनार्द्रः!!

चतुर्थं छन्दोमुक्तोदाहरणं प्रभाकरनारायणकवठेकरस्य। यथा-

अतीतकाले कालकवलिता अनेकराजानः
लोकालोकविहीना विस्मृतितमोऽवतीर्णाः
स्वसिंहासनस्थसिंहैरेव कवलिताः
तान् स्मृत्वाऽमी हसन्ति सारनाथसिंहाः!!
प्रथितं भारतराष्ट्रं
व्यथितं कथं जनजीवनम्?
केचन मनसाऽकिञ्चना
विस्मृतराष्ट्रस्वाभिमानाः
तानद्यापि हसन्ति सारनाथसिंहाः!!

तृतीय छन्दोमुक्त काव्य का उदाहरण जैसे कमलेशदत्त त्रिपाठी का-

अयि सुतनुके! भावनामयी चन्द्रकलातत्त्व सरीखी अयि सुतनुके! सुन रही हो तुम? पहचान रही हो उस वाराणसी से आये तथा आकर पुनः लौट गये

मेहमान को? कितने ही वर्ष बीत गये। शिला बन गये समुद्रों के प्रसार! तुम्हारी स्वर-हिमानी भी सैकड़ों वर्षों तक जड़ बनी रही (परन्तु) आज स्पन्दित हो रही है, सुनाई पड़ रही है तुम्हारे बिछुवों की मन्द-मन्द झङ्कार हौले-हौले। बज रहा है ताल को धारण करने वाला यह चण्ड मृदंग! और झंकृत हो रही है आलाप को व्यवस्थित करने वाली वीणा और वंशी! और तैर रहा है पवन में तुम्हारा परिदेवन में भींगा स्वर!

चतुर्थ छन्दोमुक्त काव्य का उदाहरण प्रभाकरनारायण कवठेकर का। उदाहरणार्थ-अतीत काल में काल-कवलित हो उठे अनेक भूपतिगण! लोक-विश्रुत कीर्ति से विरहित, विस्मृति के अँधियारे में डूबे (वे बेचारे) अपने सिंहासन में विद्यमान सिंहो द्वारा ही निगल लिये गये। उनका स्मरण कर हँस रहे हैं ये सारनाथ के सिंह! भारतराष्ट्र तो प्रख्यात है, फिर जनजीवन व्यथित क्यों? कुछ लोग तो मन से ही दरिद्र हो चले हैं, भूल चुके हैं राष्ट्र के स्वाभिमान को। उन पर आज भी हँस रहे हैं सारनाथ के सिंह!!

पञ्चमं छन्दोमुक्तोदाहरणं घईवेदकुमार्याः। यथा-

या खलु निस्पन्दा निर्वचना
मणिनिर्मितनेत्री हिरण्मयी
तव साम्राज्यप्रतीकमश्वमेधं द्रक्ष्यतीव
वस्तुतस्सा मदीया प्रतिकृतिर्न द्रक्ष्यति
न श्रोष्यति, न वदिष्यति
तव कठोरानुशासने भरतलक्ष्मणशत्रुघ्नास्ते
भ्रातरोऽपि मूका बधिरा इव
मौनिन एव स्थास्यन्ति।
परं स्मरणीयमिदं राजन्!
राज्यविस्तारलोभेन चक्रवर्तित्वप्राप्त्यर्थं
मेध्यमश्वं प्रेषयिष्यसे चेत्
मम भाविसन्तत्याः क्षेत्रे
सा न मर्षयिष्यते तवाक्रमणं
नैव च स्थास्यति दीना मूका
तया पराजितो यदि भविष्यसि
स्वावमानना नहि मन्तव्या

बलवती सा सन्ततिस्तु ममापि तवापि
एष एव मे सन्देशः!!

षष्ठं छन्दोमुक्तोदाहरणं कृष्णलालस्य। तद्यथा-

श्मसानसविधे मया गच्छता
रक्तिमसन्ध्यालोके दृष्ट्वा
तत्र ज्वालाः शवस्य कस्यचित्
चिताया दन्दह्यमानायाः
वृद्धः कश्चिन्मयानुयुक्तः
कस्यायमद्य शवो दह्यते, जिज्ञासा मे!
मामुपरिष्टान्नीचैर्दृष्ट्वा
कुपितेनेव जल्पितं जरठेन
तवैवायं शवो दह्यते

पञ्चम छन्दोमुक्त काव्य का उदाहरण वेदकुमारी घई का। उदाहरणार्थ-

जो निश्चित रूप से स्पन्दनहीन है, वाणीविहीन है, मणिनिर्मित नेत्रों वाली, सुवर्ण-प्रतिमा मात्र है वह (सीता) तुम्हारे साम्राज्य के प्रतीकभूत अश्वमेघ को मानो देख रही है। वस्तुतः मेरी वह प्रतिमा (कुछ भी नहीं) देख सकेगी, न सुनेगी, नही बोलेगी। हे राम! तुम्हारे कठोर अनुशासन में वे (तुम्हारे भाई) भरत, लक्ष्मण और शत्रुघ्न भी-गूँगों और बहरों की तरह चुप ही खड़े रहेंगे।

परन्तु यह स्मरणीय है राजन्! कि राज्य-विस्तार के लोभ में (अथवा) चक्रवर्तित्व प्राप्त करने के लिये मेध्य अश्व को यदि आप छोड़ते हैं मेरी भावी सन्तति के क्षेत्र में तो वह आपके आक्रमण को क्षमा नहीं करेगी। वह असहाय और गूँगी बनी खड़ी नहीं रहेगी। यदि उससे पराजित होते हैं तो अपना अपमान मत मानियेगा। क्योंकि वह बलवती सन्तति मेरी भी है (और) आपकी भी। बस, यही है मेरा सन्देश!

षष्ठ छन्दोमुक्त काव्य का उदाहरण कृष्णलाल का। उदाहरणार्थ-

श्मशान के पास से गुजरते मेरे द्वारा, रक्तिम सन्ध्या के प्रकाश में, वहाँ किसी (जलती) लाश की ज्वालाओं को देखकर, किसी बूढ़े से पूछा गया-दादा! मैं जानना चाहता हूँ कि किसकी यह लाश आज जल रही है? मुझे ऊपर से नीचे तक देख कर, कुपित से हुए (उस) बूढ़े ने कहा-यह तुम्हारी ही लाश जल रही है।

ततश्च वृद्धस्तूर्णं यातो मामनवेक्ष्य चिन्तावह्नौ पुनर्दहन्तम्
मन्दं क्रामन्नहमचिन्तयं किमसाधु भणितं जरठेन
ममैव मन्ये शवो दह्यते
मृषा जीवनम्
मिथ्या मयि प्राणसद्भावः!!

सप्तमं छन्दोमुक्तोदाहरणं सनातनोपाह्वरेवाप्रसादद्विवेदस्य। तद्यथा-

अहं स्वतन्त्रः परं निन्दितुं
यदि वात्मानं स्तोतुं तर्पयितुं मम मानसगृद्धं
पोषयितुं मम कायं
धातुमात्रसङ्कायम्
अहं स्वतन्त्रः परस्य कण्ठे करपत्रं चालयितुं
अर्थः सिध्यतु न वा मदीयः
परस्य मार्गं रोद्धुं
जननेतृत्वं बोद्धुं
बहुमतलब्ध्यै यथाकथञ्चित्
कूटगवीमपि दोग्धुम्!
अहं स्वतन्त्रः पटु प्रवक्तुं यमनियमानामर्थान्
लब्धुं ततो दक्षिणाद्रव्यं
निर्मक्षिकमिदमत्तुं
बलीवर्द इव, किञ्च गेहिनीं समां समीनां कर्तुं
गोत्रं स्वं वर्धयितुम्!!

इसके बाद, विना मुझे देखे, बुड्ढा वहाँ से फुर्र हो गया। चिन्ता की आग में जलता, मंदगति से आगे बढ़ता मैं सोचने लगा-क्या बुरा कहा उस बूढ़े ने? सचमुच मेरी ही तो लाश जल रही है। झूठा है मेरा जीवन। इसमें प्राण का होना भी मिथ्या ही तो है।

सप्तम छन्दोमुक्त काव्य का उदाहरण रेवाप्रसाद द्विवेदी 'सनातन' का। उदाहरणार्थ-

स्वतंत्र हूँ मैं परन्तु निन्दा करने के लिये। अथवा अपनी स्तुति करने के लिये, (अपने) मनरूपी गृद्ध को सन्तुष्ट करने के लिये अथवा धातुमात्र-संकाय वाली अपनी देह को पोषित करने के लिये!

स्वतंत्र हूँ मैं दूसरे के गले पर आरी चलाने के लिये। स्वार्थ मेरा सिद्ध हो या नहीं (परन्तु) दूसरे का रास्ता रोकने के लिये, लोगों का नेतृत्व ग्रहण करने के लिये, जैसे-तैसे बहुमत प्राप्त करने के लिये तथा कृत्रिम गाय को भी दुहने के लिये!

स्वतंत्र हूँ मैं यमों-नियमों के अर्थों को पटुतापूर्वक बताने के लिये और उससे दक्षिणाद्रव्य बटोरने के लिये और उस (दक्षिणा) को निर्मक्षिक निगलने के लिये बैल की तरह। अथवा घरवाली को प्रतिवर्ष प्रसविनी करने के लिये, अपना खानदान बढ़ाने के लिये।

अष्टमं छन्दोमुक्तोदाहरणं पाण्डेयामरनाथस्य। यथा-

भिक्षुकीव भिक्षमाणा
असहाया वराकी
केवलं व्याधिर्न निदानम्
वैचित्येन मूर्छिता
परस्यापि सद्मनि सत्सङ्गतौ स्तोत्रेषु
सुरधुनीप्रवाहेऽपि
व्यथां विभावयन्ती
लिखन्ती कस्यापि बुभुक्षितस्य बालस्य
मात्रा पित्रा वियुक्तस्य
पदानि स्मरन्ती विवर्णा प्रतिहता
तथापि जननीव रक्षिका
कविता मदीया!!

नवमं छन्दोमुक्तोदाहरणं भट्टिनो देवदत्तस्य। यथा-

मृत्युरेको वटवृक्षः
यस्याधो जीवनं शममधिगच्छति
मृत्युर्नवजीवनस्य प्रथमः श्वासः
मृत्युर्दुःखितमालिङ्गति
तस्य दुःखञ्च निरस्यति
मृत्युर्जीवनस्य पश्चिमः स्वरः
मृत्युरनिल इवायाति जीवनं चापहरति
मृत्युर्दुःखितजीवितविलापस्यान्तः

जीवनस्यागाधा प्रगाढा शान्तिः
मृत्युर्जीवनस्य स्वापगीतिः
स जीवनं स्वापयति!!

अष्टम छन्दोमुक्त काव्य का उदाहरण अमरनाथ पाण्डेय का। जैसे-

भिखारिन की तरह भीख माँग रही, असहाय, बेचारी, केवल व्याधिस्वरूपा निदान नहीं, अचेतना से मूर्छित, दूसरे के घर में भी, सत्संगति में, स्तुतियों में, गंगा के प्रवाह में भी व्यथा का अनुभव करती, माता-पिता से बिछड़े किसी भूखे-प्यासे बच्चे की कथा लिखती, पदों का स्मरण करती विवर्ण एवं प्रतिहत! फिर भी जननी की तरह रक्षा करने वाली है मेरी कविता!

नवम छन्दोमुक्त काव्य का उदाहरण देवदत्त भट्टि का। जैसे-

मृत्यु है एक बरगद का पेड़ जिसके नीचे जीवन शान्तिलाभ कर पाता है। मृत्यु नई जिन्दगी की पहली साँस है। मृत्यु दुखी का आलिंगन करती है। उसके दुःख को समाप्त कर देती है। मृत्यु जीवन का पश्चिम (अन्तिम) स्वर है। मृत्यु हवा की तरह आती है और अपहृत कर लेती है जीवन को! मृत्यु दुःखमय जीवन के विलाप का अन्त है, जीवन की अगाध एवं प्रगाढ़ शान्ति है। मृत्यु जीवन की लोरी है, वह जीवन को सुला देती है।

दशमं छन्दोमुक्तोदाहरणं त्रिपाठिभास्कराचार्यस्य। यथा-

सुखं जीवति कामकामी
खर्वगात्रो बर्बरः
क्वचिदर्ववक्त्रीवक्रतामवलम्बमानः
क्वापि नयने मीलयित्वा
गद्गदो दर्शितरदो विगलत्त्रपो बहुमद्यपो
जल्पतितरां प्रातिशोधकामी!
रूपधृक्च कृतघ्नतायाः
पूर्वतो जनकस्य कैशोरे गुरूणामद्य सुहृदां
लाभचयमादाय वचः प्रदाय
वृत्तिमवाप्य लोकं व्याप्य
भुक्तविसृष्टकल्पान् क्रमवितल्पान्
तामयं विनिहन्ति नामी
सुखं जीवति कामकामी!!

एकादशतमं छन्दोमुक्तोदाहरणं चट्टोपाध्यायजयश्रियः। यथा-

अम्बरे शृङ्गारी चन्द्रः
अद्याप्यमलिना ज्योत्स्ना
कवे! तव विरहे विषण्णा रोदिति घनश्यामा रात्रिः
अद्यापि विद्युत्स्फुरति
अद्यापि शोभते कान्ता
वसन्तो विलसति कानने
तथापि वसुन्धरा रिक्ता
अद्यापि भाति तारा
तन्वी तटिनी तरङ्गिणी
विस्मयो विशालस्समुद्रे
कीर्तिस्तवैका शोचति!!

दशम छन्दोमुक्त काव्य का उदाहरण भास्कराचार्य त्रिपाठी का। जैसे-

सुख की ज़िन्दगी जीता है लम्पट व्यक्ति। ठिगना कद तथा बर्बर-स्वभाव, कभी घोड़े जैसे मुँहवाला, वक्रता से युक्त, आँखे भींचता हुआ, दाँत दिखाता हुआ, लज्जा को ताख पर रखे, छक कर शराबपिये हुए प्रतिशोध की भावना से बड़बड़ाता रहता है। कृतघ्नता का साकार स्वरूप, बचपन में बाप का, जवानी में गुरुओं का तथा अब मित्रों का लाभ लेता हुआ, बात देकर, नौकरी प्राप्त कर, समाज को व्याप्त कर, भोग कर छोड़ दिये गये क्रमिक सम्बन्धों को यह नष्ट करता रहता है। सुख की ज़िन्दगी जीता है लम्पट व्यक्ति!

एकादश छन्दोमुक्त काव्य का उदाहरण जयश्री चट्टोपाध्याय का-

आकाश में है शृङ्गारी चन्द्रमा! अभी भी है निर्मल चाँदनी। हे कवि! तुम्हारे वियोग में सन्तप्त होकर रो रही है घनश्यामा रजनी! आज भी कौंध रही है बिजली, शोभित हो रही है प्रियतमा, वन में विलसित है वसन्त! फिर भी धरित्री सूनी-सूनी है! आज भी शोभित है नक्षत्रमण्डल, तरंगों से भरी कृशकाय सरिता, समुद्र में विशाल विस्मय है! एक तुम्हारी कीर्ति ही चिन्तामग्न है।

द्वादशतमं छन्दोमुक्तोदाहरणं हर्षदेवमाधवस्य। यथा-

शनैः शनैः वर्षाबिन्दवः पतन्ति
मम मृत्तिका शनैः शनैः क्लिन्ना भवति

मम रिक्ततायां जलं प्रविशति
मम तमसि विद्युन्नीडं रचयति
मम पिहितहृदयद्वारे वात्यासारस्य चरणशब्दः श्रूयते
तदा वातायनवत्
किञ्चिदुद्घाट्यते मय्यपि
एकं प्रभ्रष्टं व्योम
मया प्राप्तमधुना!!

त्रयोदशतमं छन्दोमुक्तोदाहरणं केशवचन्द्रदाशस्य। यथा-

निमग्नजनोऽहं
निमज्जने व्रणितोऽपि करमहं प्रसारयितुं न शक्नोमि!
निमज्जन्तं प्रति
ईर्ष्याया जातके मम हि
अवसितं स्नेहस्य जीवितम्
ममाण्डतो निःसरति शिशुः
नाऽहं वक्तुं प्रभवामि पवनं कदाचित्
वाहयितुं सकृद् दूरदेशम्
अहङ्कारपरिसरे हि मे
महीयसां प्रवेशो निषिद्धः
आतङ्कमात्मसात्कृत्याऽहन्तु जीवामि
मितवेतनवतो निर्वाग्द्वारपालस्येव
प्रवेशप्रस्थानयोः कृते 'नमः' अर्पयितुम्
त्वमिह निर्मीयसे मदीयमृदुविषादतः
मधुमान् आवयोः सम्पर्कः
निमग्नः कश्चिद्दहनाभिषेकः
त्वच्चुम्बनसुलभावसरः
मत्परिचयस्य प्रहरः!!

बारहवाँ छन्दोमुक्त काव्य-उदाहरण हर्षदेव माधव का। जैसे-

धीरे-धीरे गिरती हैं वर्षा की बूँदे। धीरे-धीरे गीली होती है मेरी माटी। मेरे रन्ध्रों में प्रवेश करता है जल। मेरे अन्धकार में घोंसला बनाती है बिजली। मेरे हृदय के बन्द दरवाजे पर हवा के झोंके की पदध्वनि सुनाई पड़ती है। तब

खिड़की की तरह मेरे भीतर भी कुछ खुलता है। एक गिरा हुआ आसमान का टुकड़ा अब मैंने (भी) प्राप्त कर लिया है।

तेरहवाँ छन्दोमुक्त काव्य का उदाहरण केशवचन्द्रदाश का। जैसे-

डूबा हुआ व्यक्ति हूँ मैं। डूबने में घायल हुआ भी मैं हाथ फैला पाने में समर्थ नहीं। डूबने वाले के प्रति ईर्ष्या से ओतप्रोत मेरा स्नेह का जीवन ही समाप्त हो गया है। मेरे अण्डे से निकलता है शिशु। मैं कभी भी हवा से नहीं कह पाता कि वह मुझे कहीं दूर देश में ले जाय। मेरे अहंकार की चौहद्दी में महनीयों का प्रवेश निषिद्ध है। मैं तो जीवित हूँ आतंक को गले लगाकर। अल्प वेतन वाले, मौन रहने वाले सन्तरी की तरह मेरा काम ही है बस आने-जाने वालों को सैल्यूट मारते रहना। मेरे मीठे विषाद से तुम बनाये गये हो। मधुमान् है हम दोनो का सम्पर्क। कोई आग का अभिषेक निमग्न है तुम्हारे चुम्बन में अवसर प्राप्त कर। मेरे परिचय का क्षण है यह।

चतुर्दशतमं छन्दोमुक्तोदाहरणं यथा ममैव मधुपर्ण्याम्-

अभिलषामि
कश्चिन्महातपा जाबालि-
र्ममापि पूर्वजन्मवृत्तमाचक्षीत
यदाकर्ण्य, सर्वं विस्मृत्य
अहमपि स्वपूर्वजन्मप्रियां कामपि महाश्वेतां
सन्द्रष्टुकामो
मुक्तविहायसि समुत्पतेयम्!!
यथा वा-रदनिके! मामपहाय क्व गताऽसि?
किं स्वमृषासान्त्वनाभिर्भीताऽभूः?
अद्याप्यहं त्वदाश्वासनं न विस्मृतवानस्मि
आशङ्कामग्नः कौतूहलाक्रान्तः आनन्दान्दोलितः
चञ्चलशिरोधरः पारावतशावक इव
उपर्युपरि, अधोऽधस्तिर्यगवेक्षमाणोऽस्मि
हा दैव! न जाने कस्माद्दिगञ्चलादवतरेत्
सुवर्णशकटिका!!

चौदहवाँ छन्दोमुक्त काव्य का उदाहरण जैसे मेरी ही मधुपर्णी में-

चाहता हूँ कि कोई महातपस्वी जाबालि मेरा भी पूर्वजन्म-वृत्त वर्णित करे जिसे सुनकर, सब कुछ भूलकर, मैं भी अपनी पूर्वजन्म की प्रियतमा किसी महाश्वेता को देखने की इच्छा से, मुक्त आकाश में उड़ जाऊँ।

अथवा (दूसरा उदाहरण)

रदनिके! मुझे (अकेला) छोड़ कर तू कहाँ चली गई? क्या अपनी झूठी तसल्लियों से भयभीत हो उठीं? आज भी मैं नहीं भूल पाया हूँ तुम्हारे आश्वासनों को। आशंकाओं में डूबा, कौतूहलों से आक्रान्त, आनन्दों से आन्दोलित चञ्चल ग्रीवा वाले कपोत-शिशु की तरह ऊपर-ऊपर, नीचे-नीचे, अगल-बगल निहार रहा हूँ। हे प्रभो! न जाने किस दिग्भाग से (धरती पर) उतर आये सोने की गाड़ी!

यथा वा-

तरुमूलं वसुन्धरागर्भे-

ननु कियद् गभीरं कियद्दृढम्?
कियदुत्तुङ्गं नीलाकाशे गिरिशिखरं
कियत्पुनस्तीक्ष्णम्?
शैतल्यं कियत्कीदृशं वा
निर्झरसरिदम्बुदबिन्दूनाम्?
दाहश्च कीदृशः सूर्यवह्निवाडवसन्तापज्वालानाम्?
द्राक्षापेक्षयापि हन्त कियन्माधुर्यं जननीचुम्बानाम्?
कुलिशापेक्षया कियच्चण्डं
दुस्सहप्रहरणं दुर्वचसाम्?
इत्येवमादिशत-शतनिगूढपृच्छाममर्माऽहं परिचिनोमि
प्रस्तूय समाधानं शनकैः
स्तिमितं कोविदवृन्दं करोमि
जातोऽस्मि जगति केवलमेको जीवोऽहं बन्धो!
स्वलक्षणः
कविरस्मि संसृतौ विलक्षणः!!

॥अथ ग्रन्थोपसंहारः॥

एवं प्रपूर्यते ग्रन्थस्त्रिवेणीकविना मया।
नव्यानामुपकारार्थं प्रत्नानाञ्चापि तुष्टये।।१०३।।

नूतने काव्यशास्त्रेऽस्मिन् समादृत्य पुरातनम्।
मयाऽऽत्मनीनमन्तव्यं यावत्किञ्चित्प्रकाशितम्।।१०४।।

अथवा (तीसरा उदाहरण)

धरती के भीतर वृक्ष की जड़ कितनी गहरी है, कितनी मजबूत है? नीले आसमान में पर्वत का शिखर कितना ऊँचा है, कितना नुकीला है? झरनों, नदियों तथा बादलों के जलविन्दुओं की शीतलता कितनी है, कैसी है? सूर्य, अग्नि, वाडवाग्नि और सन्ताप की ज्वालाओं की जलन कैसी होती है? और द्राक्षा (अंगूर) की भी अपेक्षा कितनी (अधिक) मिठास होती है माँ के चुम्बनों की। वज्रपात की भी अपेक्षा कितना चण्ड (दुस्सह) होता है दुर्वचनो का प्रहार?

इस प्रकार के सैकड़ों गूढ प्रश्नों का मर्म मैं पहचानता हूँ और उनका समाधान बड़ी सरलता से प्रस्तुत कर विद्वत्समुदाय को आश्चर्य-चकित कर देता हूँ। बन्धो! इस धरती पर अपने जैसा मैं एकमात्र जीव पैदा हुआ हूँ (मेरे जैसा दूसरा कोई नहीं) इस संसार में विलक्षणता से ओतप्रोत कवि हूँ मैं।

ग्रंथ का उपंसहार

इस प्रकार त्रिवेणी कवि मेरे द्वारा यह ग्रन्थ, नई पीढ़ी के उपकारार्थ तथा पुरानी पीढ़ी के भी परितोष-हेतु यत्नपूर्वक पूर्ण किया जा रहा है।।१०३।।

इस अभिनव काव्यशास्त्र में, प्राचीन (सिद्धान्तों) का समादर करते हुए मैने अपना जो कुछ भी मन्तव्य प्रकाशित किया है।।१०४।।

चित्रकाव्यगुणीभूतव्यङ्ग्यदोषादिविस्तरः।
पिष्टपेषणदृष्ट्यैव नो मयाऽत्र विवेचितः।।१०५।।

न च तेषु प्रसङ्गेषु ममेदम्प्रथमं पुनः।
आसीत्किमपि वक्तव्यं यद्वा पूर्वबुधाधिकम्।।१०६।।

यन्नूतनयुगापेक्षि काव्यशास्त्रविवेचनम्।
स्वतः प्रामाण्यमाश्रित्य तदेवात्र निरूपितम्।।१०७।।

विश्वभाषापदारूढा साम्प्रतं सुरभारती।
ततश्चाद्यतनं रूपं ध्रुवमस्या बृहत्तमम्।।१०८।।

प्रभावितवती सेयं भाषा अन्या यथा स्वयम्।
प्रभाविताऽन्यभाषाभिस्तथेयं परिलक्ष्यते।।१०९।।

पाश्चात्त्यकाव्यसिद्धान्ता अनेके हि यथायथम्।
व्यङ्ग्यार्थमथ वक्रोक्तिं संस्पृशन्ति न संशयः।।११०।।

हाइॅकूतानकासीजोसॉनेटलीरिकादयः।
काव्यभेदा विजातीयाः प्रणीयन्तेऽधिसंस्कृतम्।।१११।।

आदानं च प्रदानञ्च सम्भवत्येव साम्प्रतम्।
नैकभाषानदीष्णेषु सत्सु संस्कृतसूरिषु।।११२।।

कवयो नाऽवरोद्धव्या एवम्प्रणयिनस्ततः।
अभिनन्द्यस्तदुत्साह इत्यभिराजसम्मतम्।।११३।।

लोको भिन्नरुचिस्तस्माद्रुचिरेकाऽभिनन्द्यताम्।
रोचयेत्काममन्येषां रुचिं साऽप्यथवा न वा।।११४।।

चित्रकाव्य, गुणीभूतव्यङ्ग्य और दोष आदि का विस्तार, पिष्टपेषण की दृष्टि से ही मैने यहाँ विवेचित नहीं किया है।।१०५।।

उन सारे प्रसंगों में, मेरा अपनी ओर से कोई सर्वथा नया वक्तव्य नहीं था जो कि पूर्वाचार्यों के वक्तव्यों की तुलना में अधिक होता।।१०६।।

इसलिये वर्तमानयुग की अपेक्षा रखने वाला जो काव्यशास्त्रीय विवेचन आवश्यक था मैने, स्वतः प्रमाण्य का आश्रय लेकर, मात्र वही निरूपित किया है।।१०७।।

आज देववाणी संस्कृत विश्वभाषा के पद पर आरूढ है। इसलिये संस्कृत का अद्यतन स्वरूप निश्चित रूप से (पहले की अपेक्षा) वृहत्तम है।।१०८।।

इस भाषा ने जिस प्रकार अन्यान्य (देसी-विदेशी) भाषाओं को स्वयं प्रभावित किया उसी प्रकार (आज) यह स्वयं भी अन्य भाषाओं से प्रभावित परिलक्षित हो रही है।।१०९।।

अनेक पाश्चात्त्य काव्यशास्त्रीय सिद्धान्त, जैसे के तैसे, व्यङ्ग्यार्थ अथवा वक्रोक्ति की अवधारणा का संस्पर्श करते हैं, इसमें कोई संशय नहीं।।११०।।

हाइॅकू, तान्का, सीज़ो, सानेट तथा लीरिक आदि विजातीय काव्य भेद भी आज संस्कृत भाषा में प्रणीत किये जा रहे हैं।।१११।।

संस्कृतेतर अन्यान्य विदेशी भाषाओं में भी पारंगत संस्कृत विद्वानों में आदान-प्रदान की प्रक्रिया तो चल ही रही है।।११२।।

इसलिये, इस प्रकार की काव्य-रचना करने वाले कवियों को रोकना नहीं चाहिये प्रत्युत उनके उत्साह (उपक्रम) का अभिनन्दन किया जाना चाहिये, ऐसा **अभिराज** का मत है।।११३।।

लोक तो भिन्न रुचि वाला होता ही है। अतएव एकमात्र रुचि का ही स्वागत किया जाना चाहिये। वह रुचि अन्य विद्वानों की रुचि का पोषण करे अथवा न भी करे।।११४।।

वाञ्छन्त्यात्ममतं सर्वे सर्वलौकैः समर्थितम्।
परन्तु विघ्नितोत्साहा दृश्यन्तेऽन्यसमर्थने।।११५।।

स्वार्थवृत्तिरियं नूनं न प्रशस्तेति वच्म्यहम्।
आत्मवद् व्यवहर्तव्यो मान्योऽमान्योऽथवा परः।।११६।।

सहसाऽन्यमतं दूष्यं नैव पूर्वाग्रहादपि।
तद्वै गुणज्ञतां हन्ति सहृदयत्वलक्षणम्।।११७।।

आत्मसंस्थापनीयात्तु नूनं दशगुणाधिकम्।
परेषामथ श्रोतव्यं मननीयञ्च सद्दृशा।।११८।।

सरणिर्नैव हातव्या पूर्वसूरिप्रदर्शिता।
अन्यथा देववाणीयं नैव वाणी भविष्यति।।११९।।

मूलं न दृश्यते कामं धरागर्भे निगूहितम्।
समग्रपादपास्तित्वं तदधीनं तथाप्यहो।।१२०।।

पुरातनं तथास्माकं समग्रास्तित्वधारकम्।
गर्भात्पुरातनस्यैव नूतनं वस्तु जायते।।१२१।।

अहञ्चाप्यस्मि सर्वत्र नूतनत्वप्रशंसकः।
नूतनत्वमहोन्मादः किन्तु मह्यं न रोचते।।१२२।।

देववाणीसमीक्षायामपि केचिद् विपश्चितः।
पाश्चात्त्यशब्दसन्दोहानिह सम्मेल्य हर्षिताः।।१२३।।

आधुनिकतावादो हि तेषामन्यतमो मतः।
अन्ये च तादृशाः शब्दाः सरलीकरणादिकाः।।१२४।।

सब लोग यही चाहते हैं कि उनके (ही) मन्तव्य का समर्थन सबके द्वारा किया जाय। परन्तु वही लोग दूसरे के मत का समर्थन करने में निरुत्साह दिखाई पड़ते हैं।।११५।।

निश्चित रूप से यह स्वार्थवृत्ति है और प्रशस्त नहीं है। वह मैं खुलकर कह रहा हूँ। अपने जैसा ही व्यवहार (औरों के साथ भी) करना चाहिये। भले ही दूसरा मत आपको मान्य हो अथवा अमान्य हो।।११६।।

पूर्वाग्रह हो तो भी अकस्मात् (अविवेक के साथ) दूसरे के मत को दूषित नहीं करना चाहिये। ऐसा व्यवहार गुणवत्ता को नष्ट करता है और नष्ट करता है सहृदयता के लक्षण को।।११७।।

अपनी संस्थापनाओं से भी दस गुना अधिक शोभन दृष्टि के साथ दूसरों के मन्तव्यों को सुनना चाहिये तथा (उस पर) मनन करना चाहिये।।११८।।

पूर्वसूरियों द्वारा प्रदर्शित (परमत-सहिष्णु) सरणि का परित्याग नहीं करना चाहिये अन्यथा यह देव-वाणी वाणी भी नहीं रह जायेगी।।११९।।

धरती के गर्भ में तिरोहित (वृक्ष की) जड़ भले ही प्रत्यक्ष दृष्टिगोचर नहीं होती फिर भी, आश्चर्य है कि सम्पूर्ण वृक्ष का अस्तित्व उसी के अधीन होता है।।१२०।।

ठीक उसी प्रकार हमारा जो कुछ भी पुरातन है वही (हमारे) समग्र (वर्तमान) अस्तित्व का धारक है। पुरातन के गर्भ से ही नूतन वस्तु का जन्म होता है।।१२१।।

मैं भी सर्वत्र नूतनता का प्रशंसक (पक्षधर) हूँ परन्तु नूतनता का महोन्माद (नग्ननृत्य) मुझे पसन्द नहीं।।१२२।।

देववाणी की समीक्षा में भी कुछ विद्वान् पाश्चात्त्य तकनीकी शब्दों को घुसेड़ कर प्रसन्न हो रहे हैं आज।।१२३।।

उनमें से एक शब्द है-आधुनिकतावाद! और भी उसी प्रकार के शब्द हैं जैसे-सरलीकरण आदि।।१२४।।

कोऽयम्भो अधुनावादः केन कस्मात्प्रकल्पितः।
कश्चोत्तराधुनावादस्तस्याप्यनुसहोदरः??१२५??

किमप्याधुनिकं नास्ति काव्यसृष्टौ यतस्त्विदम्।
काव्यं भवति कूटस्थं शाश्वतं नु चिरन्तनम्।।१२६।।

कवयः कालिदासाद्याः किन्नाऽभूवन्निजे युगे।
आधुनिका नवाचारास्तथैव क्रान्तदृष्टयः।।१२७।।

सर्व एव कविर्जीवन् भवत्येवाऽधुनातनः।
कीर्तिशेषो व्रजत्येव परन्तु शाश्वताङ्गताम्।।१२८।।

हन्ति व्याकरणं वादश्चेदयं नव्यतोन्मदः।
समुल्लङ्घ्यते यद्वा नाट्यशास्त्रस्य देशनाः।।१२९।।

मृतं काव्यं मृतं नाट्यं मृतं सर्वं पुरातनम्।
यद्युत्तराऽधुनावादो घुष्यतीति गतत्रपः।।१३०।।

तर्हि तं प्रणमाम्येव धर्मारण्यघ्नसिन्धुरम्।
प्रणमामि च सिद्धान्तानुरक्तानथ कोविदान्।।१३१।।

कालदृष्ट्यैव कामं स्यादतीतं भावि साम्प्रतम्।
तथापि किञ्चिदस्त्येव त्रिष्वेष्वपरिवर्तितम्।।१३२।।

मैं पूछता हूँ, भाई लोगों! यह **आधुनिकतावाद** क्या है? यह किसके द्वारा और क्यों कल्पित किया गया है? और उसका भी छोटा भाई **उत्तर आधुनिकतावाद** क्या है??१२५??

क्योंकि (मेरी दृष्टि में तो) काव्य की सृष्टि में यह **आधुनिक** जैसा तो कुछ भी नहीं होता है। काव्य तो कूटस्थ, शाश्वत एवं चिरन्तन (Eternal) होता है। (उसमें नये-पुराने का भेद कैसा?)।।१२६।।

कालिदास आदि कवि क्या अपने-अपने युग में नवाचार-सम्पन्न, क्रान्त दृष्टि वाले **आधुनिक** नहीं हुए होंगे??१२७??

हर एक कवि अपने जीवन काल में **आधुनिक** तो होता ही है। परन्तु कीर्तिशेष होते ही वह शाश्वतता का प्रतीक बन जाता है।।१२८।।

नूतनता के मोह में उन्मद यह (आधुनिकता का) सिद्धान्त यदि व्याकरण के नियमों को परिवर्तित करता है कि द्विवचन अनावश्यक है आदि। अथवा नाट्यशास्त्र की देशनाओं का समुल्लंघन करता है।।१२९।।

काव्य मर गया, नाट्य मर गया, पुराना सब कुछ मर गया-इस प्रकार की घोषणा यदि करता है **उत्तर आधुनिकतावाद** लज्जा को ताख पर रखकर।।१३०।।

तो धर्मारण्य की सुख-शान्ति नष्ट करने वाले वन्यगज-सरीखे उस सिद्धान्त को मैं प्रणाम ही करता हूँ और प्रणाम करता हूँ उन सिद्धान्तों में अनुरक्त विद्वानों को।।१३१।।

काल-प्रवाह की ही दृष्टि से भले ही (कविता में) अतीत, भविष्य एवं वर्तमान का भेद हम कल्पित कर लें फिर भी इन तीनों कालखण्डों में भी कुछ तो ऐसा होता ही है जो अपरिवर्तित (स्थिर) बना रहता है।।१३२।।

तदेव शाश्वतं यन्नो कदापि परिवर्तते।
शाश्वतेनैव तेनेदं धृतं काव्यञ्च जीवनम्।।१३३।।

ततश्शाश्वततावादे श्रद्धा मम महीयसी।
येन प्रवर्तते सृष्टिः काव्ये धर्मेऽथ संस्कृतौ।।१३४।।

श्वसितिचयहवींषि प्रत्यहं वाङ्मखाग्नौ
सरसकवनमन्त्रैरात्मसृष्टैः समर्प्य।
हिमसितवरटस्था शारदा साऽर्चिता मे
व्यतरदिह ममत्वं यत्फलं ग्रन्थ एषः।।१३५।।

निगमविशदमन्त्रैरागमप्रोक्ततन्त्रै-
र्विबुधचरितगाथास्थापितैर्लोकलक्ष्यैः।
ननु जगदुपकारं कुर्वती कामधेनु-
र्महितसुरगवीयं स्थेमहेम्ना चकास्तु।।१३६।।

दृग्रसाकाशयुग्माख्ये वैक्रमाब्देऽधिसन्ध्यकम्।
आषाढे सुदि भौमाह्नि ग्रन्थ एष प्रपूर्यते।।१३७।।

उन्मेषेऽस्मिन् कारिकासंख्या-१३७

।। इति श्रीमद्गौतमगोत्रोत्पन्नस्य भभयाख्यमिश्रवंशावतंसस्य।।
श्रीमद्दुर्गाप्रसादाऽभिराजीतनूजस्य पण्डितप्रकाण्डश्रीमदाद्या-
प्रसादमिश्रभ्रात्रीयस्य त्रिवेणीकविसंज्ञितस्याभिराज-
राजेन्द्रस्याभिनवे काव्यशास्त्रेऽभिराजयशोभूषणे
प्रकीर्णतत्त्वोन्मेषाख्यः पञ्चमोऽशः।

वही है शाश्वत (तत्त्व) जो कभी बदलता नहीं है। उसी शाश्वतता द्वारा धारण किया जाता है काव्य और यह जीवन!!१३३!!

इसलिये शाश्वततावाद में ही मेरी सर्वाधिक श्रद्धा है जिसका आश्रय लेकर काव्य में, धर्म में और संस्कृति में सृष्टि प्रवर्तित होती है।।१३४।।

स्वयं निर्मित, रसमय कवितारूपी मंत्रों के उच्चारण के साथ, वाणीरूपी मखाग्नि में श्वासपरम्परारूपी हविष् को प्रतिदिन हुन कर समर्चित की गई,

हिमधवल राजहंस पर आसीन उस भगवती शारदा ने मुझे वत्सलता प्रदान की जिसका सत्फल है यह ग्रंथ-**अभिराजयशोभूषणम्!**!१३५!!

वेद-संहिता में प्रकाशित मंत्रों, आगम-प्रोक्त तंत्रों, देवचरितात्मक गाथाओं द्वारा स्थापित सांसारिक (उदात्त) लक्ष्यों द्वारा भूतल का उपकार करने वाली कामधेनु-कल्पा यह देववाणी (संस्कृत भाषा) स्थिरतारूपी सौवर्ण-प्रभा से देदीप्यमान बनी रहे।।१३६।।

दृक् (=२) रस (=६) आकाश (=०) युग्म (=२) अर्थात् २०६२ विक्रमसंवत् में आषाढ शुक्ल मंगलवार के दिन, सन्ध्याकाल में यह ग्रंथ पूर्ण हो रहा है।।१३७।।

इस उन्मेष में कारिकाओं की संख्या-१३७

श्रीमद् गौतमगोत्रोत्पन्न भभया नामक मिश्रवंश के अलंकरण-स्वरूप महाभागवत पण्डितरामानन्द मिश्र के पौत्र, विद्वत्प्रकाण्ड आचार्य आद्याप्रसादमिश्र के भ्रातृज तथा श्रीमद् दुर्गाप्रसाद एवं अभिराजी देवी के मध्यमपुत्र त्रिवेणीकवि अभिराजराजेन्द्र के अभिनव काव्यशास्त्र अभिराजयशोभूषण में यह प्रकीर्णतत्त्वोन्मेष नामक पाँचवाँ अंश पूर्ण हुआ।

***

।।ग्रन्थकृत्परिचयः।।

यत्पादाम्भोरुहाणां हिमशिशिरघनच्छायया वारितोष्णः
काव्यं नाट्यञ्च शास्त्रं तदितरदधिकं मुक्तियुक्त्याध्यगच्छम्।
वन्दे तान्कोविदेन्द्रान्मयि विततदयान् मिश्रमाद्याप्रसादं
लक्ष्मीकान्तं सुरेशं विबुधातरुनिभं शुक्लचण्डीप्रसादम्।।१।।

प्रणीयेदमभिराजयशोभूषणमञ्चितम्।
भूयः प्रवर्तये रुद्धां काव्यशास्त्रपरम्पराम्।।२।।

सदुक्तिगुणलुब्धेन मया नूनमनुष्ठितम्।
साहसमकलिङ्गेन श्रियं हन्त लभे न वा।।३।।

क्व सूर्याः मम्मटाद्यास्ते क्व चाहं लघुदीपकः।
तुल्यं किन्तूभयोर्लक्ष्यं शारदासौधकाशनम्।।४।।

प्रीयतां वागधिष्ठात्री कालिदासयशोधरा।
ममैतेन विलासेन सात्त्विकेनाऽनुरञ्जिता।।५।।

जिनके चरण-कमलों की हिम-शीतल घनी छाँव में (विद्याध्ययन-जनित) आतप का शमन करते हुए मैने काव्य एवं नाट्य, शास्त्र औरउनसे भी कहीं अधिक मुक्ति-प्राप्ति की युक्तियों का अध्ययन किया, मेरे प्रति अतिशय वत्सल सुरतरु-सरीखे उन विद्वद्धुरीणों-आद्याप्रसाद मिश्र, लक्ष्मीकान्त दीक्षित, सुरेशचन्द्र पाण्डे एवं चण्डिकाप्रसाद शुक्ल जी को प्रणाम अर्पित करता हूँ।।१।।

इस रमणीय (सांगोपांग) अभिराजयशोभूषणम् का प्रणयन कर मैं अवरुद्ध (संस्कृत) काव्यशास्त्र की परम्पराका पुनः प्रवर्तन कर रहा हूँ।।२।।

सदुक्तियों एवं गुणों के प्रति लुब्ध मैने निश्चय ही, कलिङ्गाभिजन न होते हुए भी, साहस ही किया है (जब कि प्रसिद्ध है-कलिङ्गस्साहसिकः) पता नहीं यश प्राप्त होगा अथवा नहीं।।३।।

कहाँ वे सूर्य-आचार्य मम्मटादि? और कहाँ मैं-एक लघु दीपक! परन्तु (सूर्य एवं दीपक) दोनो का लक्ष्य तो एक ही है-शारदामन्दिर को प्रकाशित करना!!४!!

कविकुलगुरु कालिदास के यश को धारण करने वाली तथा मेरे इस सात्त्विक विलास (उपक्रम) से अनुरञ्जित वागधिष्ठात्री (मुझ पर) प्रसन्न हो।।५।।

***

यशोभूषणकारिकानुक्रमणी

अ

अकस्माद्धि परीहारः २३६
अंकश्चेत्युपदिष्टानि १९८
अंगीभूतो रसः काव्ये ९४
अचिन्त्यचिन्तने शक्तः १३
अतति व्याप्नुते सर्वं १४६
अतात्त्विको यथा भेदः ६१
अतो हि विश्वरक्षित्री २८९
अतः परं किमुच्येत २७५
अथ काव्यात्ममीमांसा १८४
अथ काव्यार्थरूपस्य १८६
अथ वाक्याङ्गभूतानां ८५
अदृष्टाः पूर्वदृष्टा वा ५९
अधिष्ठितोऽप्यनेनैव १८८
अध्यवसायसिद्धत्वे ११६
अध्वश्रमापनोदीदं २७६
अनन्वयोऽसौ यत्रस्यात् १०९
अनुप्राणनधर्मत्वात् १४६
अन्तिमश्चापि यो बन्धः २८४
अन्यथाऽपि समाख्यातं १७७
अन्यथा बुद्धिविस्फोटे ४७
अन्यथा को न जानाति १६५
अन्यन्निखिलवैशिष्ट्यं २०४
अन्यापदेशकाव्यं तत् २२३
अप्रस्तुतप्रस्तुतयोरेक ११९
अप्रस्तुतप्रशंसा सा . १२५
अभाववादिनां तर्काः १७८
अभिधानं बह्वर्थानां १०५
अभिधारुचिका लोकाः ७२
अर्थप्रकाशनोद्देश्या ६१
अर्थवन्तो हि ये शब्दाः ६१
अर्थापत्तिरलंकारो यत्र १३९
अलंकारादयस्सर्वे २४७
अलंकाररसौचित्य २४७
अलंकाररसौ तस्मात् १८१
अलं धनैरलंकारैः १३
असमस्तपदं मुक्तं २२७
असह्यशीतकम्पेभ्यः २६३
अहञ्चाप्यस्मि सर्वत्र ३१५

आ

आख्यायिकोपलब्धार्था २३१
आङ्गिकवाचिकाहार्याः १९७
आंग्लशासनकालेऽथ २७७
आत्मतुष्ट्यर्थमद्यत्वे १९५
आत्मनैव भवेच्छूरः ९४
आत्मसंस्थापनीयात्तु ३१५
आत्मापि स्यात्सजातीयः १८४
आदानं च प्रदानं च ३१४
आदिपादस्तृतीयेन २०६
आदौ तत्र नमस्कारः २३०
आदौ देशाश्रिता रीतिः ८९
आधिक्यमुपमेयस्य १२१
आधुनिकतावादो हि ३१५
आनन्दवर्धनाचार्यः १७८
आनन्दवर्धनोदिष्टा २३९
आर्यावक्त्राऽपवक्त्रैश्च २३१

इ

इतिवृत्तानुरोधात्तु वर्णनीया २१७

ई

ईश्वरेच्छाभिजातोऽयं ६५
ईश्वरेच्छा महर्षीच्छा ६५

उ

उक्तैः परिकरः प्रोक्तः १२८
उत्तमं यदि चेदं ४९
उत्तरोत्तरवाक्येषु यत्र १०८
उद्वेगाऽमङ्गलव्रीडा १९९
उपमानप्रतिषेधात् ११५
उभयोर्मिश्रणं मिश्रं २०६
उभयोरविनाभावः ६१
उल्कापिण्डसदृक्षाभा २३६
उल्लेखोऽनेकधोल्लेखः ११३

ए

एकधर्मेण सम्बन्धः १३६
एकमेव समुद्दिश्य २३९
एकं यत्राप्यनेकस्मिन् १३८
एकस्यैवोपमेयस्य १०८
एकाहचरितं चैव लघुनाट्ये २०३
एतान्यष्टादशोक्तानि १९८
एवं काव्यात्मसिद्धान्तौ १७३
एवं काव्यात्मसिद्धान्तान् १८१
एवं प्रपूर्यते ग्रन्थः ३१२
एवं भूतेऽपि यत्काव्यं २९७
एवमेवेतरे भावाः २८१
एवं स्थितेऽपि पूर्वेषां ८९
एवं हि भट्टवर्योऽयम् २७७
एष राजेन्द्रमिश्रोऽहं ०८

ऋ

ऋतूनामागमं पर्व २५७

क

कण्डिनीपेषिणीगीतं २७५
कथाख्यायिकयोः कश्चित् २३२
कथा तत्र भवेद्रम्या २३०
कथायां कमप्यादर्शं २४१
कथायां नाटकस्यापि २४१
कथायां नाटके चापि २४०
कथावैशिष्ट्यमालक्ष्य २२०
कन्यागृहं गतेष्वेव २६९
कवयः कालिदासाद्याः ३१६
कवयो नावरोद्धव्या ३१४
कविः किन्तु १२
कल्पिताः पूर्वमाचार्यैः ९८
कस्मिन्नु बहरे को वा २८२
कस्यचित्पुरुषार्थस्य २१७
कस्यचित्पुरुषार्थस्य २२२
का कथा ध्वनिकारस्य १७२
कामं कालक्रमेणायं १८१
कामं सहृदयास्वाद्यं ५६
कार्यकारणयोर्भिन्न १३५
कार्यकारणसामान्य १२७
कार्योत्पत्तिर्विना हेतुं १३२
कालखण्डविशेषस्य २३२
कालदृष्ट्यैव कामं स्यात् ३१७
काव्यं चेन्निरलंकारं ९८
काव्यप्रयुक्तशब्दानां १८४
काव्यप्रयुक्तशब्दानां १८४
काव्यमेतत्ततो २६
काव्यमंगीकृतं तज्ज्ञैः १४६
काव्यं रसात्मकं चेदं १९३
काव्यलिङ्गञ्च हेतुत्वे १२९
काव्यं लोकोत्तराख्यानं ३६
काव्यं सहृदयास्वाद्यं ४८
काव्यशास्त्राब्धिमन्थोत्थ ०८
काव्यात्मत्वसमीक्षायां १६०
काव्यात्मत्वसमुद्घोषे १४७
काव्यात्मत्वं हि वक्रोक्तेः १६४
काव्यात्मापि तथैवायं १८४
काव्यसृष्टिप्रयोज्यत्वात् २९७
काव्यस्य ये प्रभेदाः प्राक् १९४
काव्यार्थभूतकाव्यस्य १८७
काव्ये यदा स वाच्यार्थः ७३

किञ्च वापी सरित् ५७
किञ्च शब्दार्थ ३६
किन्तु तद्विषये तूष्णीम् १६५
किन्तु तत्र न विद्वेषः १७८
किन्तु नात्र गुणः कश्चित् २८७
किन्तु नैवं भवत्येव १८४
किन्तु लावण्यतत्त्वन्तु १८८
किमन्यद् ब्रह्म ५९
किमप्याधुनिकं नास्ति ३१६
कुन्तकेनापि तत्सर्वं १६५
कुन्तकात्पूर्वमेवैता १६५
कुलालरुचिभेदाद्धि १९३
कुलालो हि भ्रमच्चक्रे १९३
केचित्काव्यप्रकाराश्च १९४
केन संकेतसम्बन्ध ६५
केनापि कर्मणा १२
केवलं शब्दमात्रेण ५९
केवलेऽपि यथाख्याते ६१
को न्वसौ खलु काव्यार्थः १८६
कोऽयम्भो अधुनावादः ३१६
कोशलेषु च काशीषु २५७
कौन्तिकी चापि वक्रोक्तिः १८१
क्व चषका मदिरोन्मादा २८८
क्वचित्पात्रमुखेनैव २३४
क्वचित्सामाजिकी क्रान्तिः २३२
क्वणन्मुखरवल्लकी ०७
क्व सूर्या मम्मटाद्यास्ते ३२०
क्वासावुच्छृङ्खलोरागः २८८

ख

खण्डकाव्यमिदं चैव २२३
खण्डकाव्यसदृक्षैव २३९
खेदं स्वकं लघूकर्तुं २७२

ग

गजलस्य त्रयो भागाः २८४
गजलाख्यं हि तद्गीतं २७६
गजलारम्भि यद्वाक्यं २८४
गद्यं चतुर्विधं प्रोक्तं २२७
गद्यपद्योभयात्मेदं २९९
गृहीत्वा किमप्युद्देश्यं २३४
गद्यं चतुर्विधं प्रोक्तं २२७
ग्रामाश्रमपुराऽराम २१७
गीतमेतद्यदा रागैर्गीयते २५२
गीतिर्गीतञ्च गेयञ्च २४७
गीतिर्भवति रागस्य २४८
गीयते फाल्गुने मासे २६३
गेयं विरचितपदं २४८
गुणानां नित्यसम्बन्धः ९४
गुणानुप्राणिता रीतिः ८९
गुणालंकाररीतीनां १६३
गुह्यकेशमपि स्वैरं १३

च

चतुर्भिश्च समैः पादैः २०६
चम्प्वामपि तथा कर्त्रा २४२
चित्रकाव्यगुणीभूतव्यङ्ग्य ३१३
चैत्रकेऽपि क्वचिद्बाला २६५
चैत्रकं गीयते चैत्रे २६५

छ

छन्दः पादौ तु वेदस्य २९६
छन्दोमुक्तं किमप्येव २९७
छन्दोऽलंकारसन्दर्भाः २१९
छन्दस्तद् द्विविधं ख्यातं २९६
छन्दस्त्वं गद्यबन्धेऽपि २९७

ज

जयन्तु मतभेदास्ते १९५
जात्यादीनां मिथश्चैव १३३
जीवनस्य न तत्कृत्यं २७५
जीवनसूत्रविधात्रीं ०७

त

तच्च नाऽनुचितं मन्ये १९५
तच्च सद्योरसानन्द २५३
तच्च सारस्वतं किञ्चित् ९८
तत एव मया गीतिः २८१
तत्तत्कृपालवोद्दीप्त ०८
तथैव काव्यशास्त्रेऽपि १६२
तथैव रसिकस्यापि २४७
तथैव रागबन्धस्य २८०
ततश्चेमां प्रथामग्रे २७७
ततः पञ्चशती ख्याता २१०
तत्र क्वचिद्भवेदार्या २१०
तत्र शब्दः स्ववाच्यार्थ ७३
ततस्सहृदयास्वाद्य ४९
तत्राद्यामभिधामेव ६३
तत्र शब्दाश्रिताः शब्दाः ९८
तत्रादौ प्रचरणं तत् २६८
ततश्शाश्वततावादे ३१८
तत्तदेवाऽनुवदति कुन्तकः १६५
तथापि ध्वनिसिद्धान्तः १८१
तथैवाचरितेऽभ्यासे ३५
ततश्चेदं नु वैषम्यं १९६
ततश्चैव समाख्यातः १८८
तदादाय विवेकेन १९६
तदा तल्लहरीकाव्यं २२४
तदौष्ट्रहारिकं गीतं २७४
तदेव शाश्वतं यन्नो ३१८
तर्हि तं प्रणमाम्येव ३१७
तद्विलोक्य ध्रुवं चित्ते १६४
तद्विषयको विस्तारः ८६
तस्माद्गलज्जलेत्याख्या २८५
तस्मादद्यतने काव्ये २४७
तस्मात्काव्यार्थ एवासौ १८४
तस्मात्प्रतीयमानार्थ ७३
तस्मात्पूर्वाग्रहोन्मुक्तै ८९
त्रयाणां पुरुषार्थानां २१९
तादृग्गुणविशिष्टान्वै १९४
तादृग्गुणविशिष्टोऽयं १८८
तात्पर्याख्यां विदन्त्येनां ८५
तिस्र एव भवन्तीह ६३
त्रिवर्गेऽसंशयं सिद्धे १३
तुरुष्कसंस्कृतिः क्वासौ २८९

द

दृग्रसाकाशयुग्माख्ये ३१८
दृश्यकाव्यमिदं भूयः १९७
दृश्यं तत्राभिनेयं स्यात् १९६
दृश्यश्रव्यप्रकाराभ्यां १९६
दृष्टान्तो वाक्ययोर्यत्र १२१
दीप्तत्वान्मसृणत्वाच्च ८९
दूतकाव्यमिदं प्रोक्तं २२३
देववाच्यपि तन्नूनं २०२
देववाणीसमीक्षायां ३१५
देवस्तुतिप्रवृत्त्या च २२३
देवानपि समर्थं यत् २४७

ध

धनाढ्याश्च हतात्मानः ९४
धर्मराजनयार्थानां २३३
धराजातीय एवात्मा १८४
धरित्र्यामटितुं ४६
ध्रुवं काव्यविशेषोऽसौ १८८
ध्वनेः काव्यात्मता तस्मात् १७८
ध्वनेः काव्यात्मतासिद्धौ १८१
ध्वन्यध्वनि विराजन्ते १७३
ध्वनिस्सैव न तद्भिन्ना १८२
धातुजं वेणुवीणादि २५२
धातुमातुसमायुक्तं २५२
धीरोदात्तो भवेन्नेता १९९

न

न न वा युक्तिं १७८
व्येतरत् २६
प्रसंगेषु ३१३
पूर्वपक्षस्य १६५
यञ्जनैस्तृप्तिः २४७
न न पुण्याय २६
यार्थवती ५६
पि किम्मूल्यं १३
प्रकरणं १९७
यातवृत्तं स्यात् १९९
भाणिका गोष्ठी १९८
त्पादिसम्बद्धं २०४
तसन्दर्भाः २३६
यद् गुणो धर्मः ९४
त्र भवेद् भूपः २०२
त्र देवः स्यात् २१७
ापने तत्र लिङ्ग १९९
ो न वा रीतिः १७७
दमन्त्रैः ३१८
माख्यातं २०६
राऽभोगे ५६
व शब्दस्य ६४
विषये १११
पशास्त्रेऽस्मिन् ३१३
धौरेयाः १९४
ानोऽर्थो १८९
श्लाध्यो १८७
थथा भक्तेः १७८
ः कोऽपि २४२
ना कार्यः २१८

प

थथा कश्चित् २४२
र्थानां ८५

पदानां मेलनैर्वाक्यं ८५
पदानां योग्यताकाङ्क्षा ८५
पदानां रचना कापि ८९
पदार्थजीविनश्शब्द १८६
पदार्थोऽथ च वाक्यार्थः १८६
पद्यगद्यमयं श्रव्यं २०५
पद्यत्रयेण सन्दृब्धं २०९
पद्यं पुनर्द्विधा ख्यातं २०८
पद्यान्तरनिरपेक्षं २१७
परस्परं समासक्ता लहर्य २२४
परुषा परुषत्वे स्यात् ९०
पश्यन्त्येव यदि प्राज्ञाः २६
पर्यायेण द्वयोर्यत्र ११०
पारसीकात्ततोऽप्युर्दू २७६
पाश्चात्त्यकाव्यसिद्धान्ताः ३१४
पितृकल्पं भवेच्छास्त्रं ४६
पुरस्करोति सिद्धान्तपक्षं १७८
पुरातनं तथाऽस्माकं ३१४
पुरुषार्थविशेषस्या- २१७
पुष्कला खलु सामग्री १९३
पूर्वापरसन्दर्भाभ्यां २०९
पूर्वपूर्वस्य हेतुत्वं १३५
प्रकृतेऽप्युपमानस्य ११२
प्रकाशमेव तत्सर्वं न किल १७८
प्रज्ञा बीजं कवित्वस्य ३४
प्रज्ञां विना कवित्वस्य ३५
प्रत्नं यच्चाप्युपादेयं १९६
प्रणीयेदमभिराजः ३२०
प्रतितत्त्वं समीक्षायां ८९
प्रतिभानसमुल्लासः २८७
प्रतिष्ठा क्व नु कार्यस्य १००
प्रतिष्ठाधुरमध्यास्ते २३४
प्रतिष्ठापयितुं नूत्नं २२०
प्रतिवस्तूपमा गम्यं सादृश्यं ११९

प्रतिषिध्योपमेयं चेत् ११४
प्रबन्धमुक्तकाभ्यां च २४३
प्रबन्धकाव्यमेतद्धि २१७
प्रबन्धात्मकगद्यस्य २३०
प्रभावितवती सेयं भाषा ३१३
प्रभेदाबहवस्तत्र सन्ति १९३
प्रमाणं लोकगीतानां लोक २५४
प्रमुखा ये ऽप्यलंकाराः ९८
प्रयुङ्क्ते नाट्यकारोऽसौ २४१
प्रस्तुतानां पदार्थानां ११८
प्रस्तुतेऽप्रस्तुतस्यैव १२४
प्रश्नतोऽप्रश्नतो वापि १३८
प्रवृत्त्यभिधया ख्याताः ८९
प्रवृत्तयश्चतस्रः स्युः ८९
प्राक्प्रतिष्ठां समाहृत्य २४५
प्राचीनजावीभाषायां ३००
प्रातस्सन्ध्यानिशीथेन्दु २१८
प्राणानपि पणीकृत्य २८०
प्राभाकरास्तदन्ये ते ८६
प्रीयतां तेन वागम्बा २४५
प्रीयतां वागधिष्ठात्री ३२०
प्रोक्तस्सोऽर्थान्तरन्यासः १२७

फ

फारसी संविधानेन २८५

ब

बान्धवौ ननु शब्दार्थौ १४
ब्राह्मणश्रमणन्यायेन १८०
बोध्यते योऽनयैवार्थः ६६

भ

भक्तिशृंगारसन्दर्भा २२४
भङ्गीभणितिमाश्रित्य २८१
भट्टोऽसौ मथुरानाथशास्त्री २६६
भरतभामह ०७
भावोन्येषो विवर्तोवा २३६
भासते पुनरुक्त्येव १०१
भूपेतरोऽपि नेता स्यात् २०४
भूयोऽपि साभिधामूला ७७

म

मतलामक्तयोर्मध्ये २८५
मतलाऽऽरम्भिका वाच्या २८५
मदिरालयचर्चाभिः २८९
मृत्तिकाजलवायूनां ३४
मृतं काव्यं मृतं नाट्यं ३१७
मृल्लोष्ठो दृश्यते दृग्भ्यां १८९
मन्ये नाऽभिमतं जातं १७२
मन्वते केचिदाचार्याः ९५
मफऊल-फऊलून २८२
मद्भक्ता यत्र गायन्ति २४६
महाकाव्यवदेवाऽयं २३२
महाकविप्रणीतत्वात् ७३
माधुर्यादिगुणाः काव्ये ९४
माधुर्यौजः प्रसादास्ते ९५
मिश्रकाव्यमिति प्रोक्तं २४०
मिश्रणं किन्तु चम्प्वां तत् २४१
मुकुल लोल्लटशंकुक ०७
मुत्कारबे मुसम्मन २८२
मुनिना भरतेनादौ ९८
मूलं न दृश्यते कामं ३१५
मेघो दूतीकृतो यस्माद् २२३
मोहध्वान्तमपाकर्तुं ६२

य

यच्च गीतिषु सामाख्या २७७
यच्छिवं यच्च सत्यं स्यात् २१८
यच्च सत्यं शिवं भूयात् १९९
यज्ञसूत्रोत्सवे रम्यं २६७
यत्पारसीकभाषायां २७६
यत्पादाम्भोरुहाणां ३२०

यत्पुनर्गीयते स्वैरं २५२
यतो ह्यनेन गीतेन २६८
यथा गौरिति शब्दस्य ६६
यथा काव्यात्मरूपेण १६५
यथा गन्धो हि मृल्लोष्टे १८८
यथा दर्शनशास्त्रेषु ब्रह्म १६२
यथा नोत्पतितुं शक्तः २६
यत्पदाब्जमधुप्रीत्या ०८
यन्निसर्गाद् बहिर्भूतं २६
यथा शौर्यादयोऽस्माकं ९४
यन्नूतनयुगापेक्षि ३१३
यत्र ख्यातोपमानस्य १४०
यत्रैकेन विना नाऽन्यत् १२३
यत्रैक एव शब्दोऽसौ १२३
यत्रापि वस्तुसम्बन्धः १२१
यत्रात्मान्वयसिद्ध्यर्थं ७०
यत्रार्पणं निजार्थस्य ७०
यत्साहित्यमहिम्नैव ६२
यत्रार्थसहकारेण ७७
यद्यप्यनित्यधर्मा हि ९८
यद्धि वस्त्वन्तरज्ञानं ११३
यत्र यत्र तदात्मत्वं ९४
यत्र श्लेषेण काक्वा वा १०३
यत्रशब्दः स्वसंकेतार्थ १८८
यत्र संभावना दृष्टा ११५
यात्राकाव्यं नर्मकाव्यं २२३
याऽन्तः प्रविश्य ६२
या वक्रातिशयो ५६
युज्यते च समारंभे २३१
येन लोकोत्तरार्थेन ७२
येन स्पष्टमिदं प्रोक्तं १७२
योगिनो भिक्षुका भण्डाः २७६
योऽपि कश्चिद्भवेन्नेता २०३
योऽर्थः सहृदयश्लाघ्यः ७२
यो हि प्रत्नं कथावस्तु १९६
यो हि प्रतीयमानार्थः १८१

र

रक्तं स्फुटं समं चैव २४८
रसः कोऽपि भवेदंगी २०४
रागकाव्यगता रागाः २५३
रागैर्लयैश्च शब्दार्थैः २६९
रात्रौ क्रमेलकारूढाः २४६
रासोत्सवं समालक्ष्य २६२
राष्ट्रोदयं गुणैश्चर्यं १९९
रीतिं नैव गुणाद्भिन्नां ८९
रीत्यलंकारयोः काव्या १७७
रुचिवैचित्र्यमूलैव १९६
रूढमेषां स्वरूपं हि १७७
रूपदृष्ट्यापि काव्यानि १९३
रूपं दृश्यतयाऽऽख्यातं १९६

ल

लघीयान् बहरः क्वापि २८२
लक्षणेऽप्युपरूपाणां २०१
लक्षणैवोदिता भक्तिः ६९
लक्षणाथ द्वितीया सा ६७
लक्ष्यते चेदमुख्यार्थः ६७
लक्ष्यार्थोऽपि स काव्यार्थः १८७
लहरीकाव्यमप्येतत् २२३
लहरीसन्निभा भावाः २२४
लाङ्गलेन धरां कर्षन् २७२
लावण्यप्रतिमः सोऽर्थः ७२
लोकगीतोत्थतत्सौख्यं २७६
लोकगीतमपि स्वैरं २५३
लोकोत्तरगुणादर्शः २१९
लोको भिन्नरुचिस्तस्मात् ३१४
लोकोत्तरविभुत्वस्य १४२

लोकवृत्तं न हातव्यं २१८
लोकास्वादवती ५६
लोकास्वाद्यापि ५७

व

वक्तृबोद्धव्यवाक्यान्य ८१
वक्त्रनेत्रकपोलादि १८९
वचो वागुरया बद्धाः १००
वपुस्तत्त्वसमीक्षायां ८९
वर्ण्यते किन्तु चेन्नेतुः २१७
वर्णिता स्यादियं २३२
वहन्तः शिविकां गुर्वीं २७३
वस्तुतस्त्वनयोरेव २७७
वस्तुतस्तस्य कर्मैतत् २६
वस्तूत्तरोत्तरोत्कर्षो १३७
वस्तुतो लयवाहीदं ३००
वाच्यार्थोऽयं पदेनानेति ६५
वाच्याभ्यां स्तुतिनिन्दाभ्यां १४३
वाच्यवाचकयोर्भिन्नाः ७३
वाच्यार्थेन स काव्यार्थः १८६
वाच्यार्थात्सर्वथा भिन्नाः १८१
वाजपेयमखैश्चापि १३
वाच्छन्त्यात्ममतं सर्वे ३१५
वार्णिकं गण्यते वर्णैः २९६
वार्णिकमात्रिकाभ्यां २९७
विच्छित्तिमतुलां स्रष्टुं २४१
विद्यमानस्तथैवायं १८८
विमानयात्रानुभवैः २२३
वियोगिन्या हि गीतेऽस्मिन् २५७
विविधाः काममैतिह्ये १७५
विवर्ता इतरे चापि २८९
विविधो बन्धविस्तार २८२
विविधाः सन्त्युपन्यासाः २३३
विश्वभाषापदारूढ़ा ३१३
विशिष्टैर्गीतकैः सर्वे २७६
विशेषणतया यत्र १३६
विशेषप्रतिपत्त्यर्थ १३१
वेदाः सर्वे पुराणानि ६२
वैधर्म्यरहितं साम्यं १०६
वैशिष्ट्याद्व्यङ्ग्यमर्थं ८२
वृत्तं प्रकरणादीनां २०१
व्यङ्ग्यार्थः किन्तु सोऽयं १९०
व्यङ्ग्यार्थावगमे ४९
व्यङ्ग्यार्थविषये द्वैधं १६०
व्यङ्ग्यार्थविषये यद्यत् १६५
व्यङ्ग्यस्तथैव काव्यार्थः १८९
व्यञ्जना प्रतिभामूला ७२
व्यतीतलक्षवर्षाणां ५९
व्याजोक्तिर्गोपनं व्याजात् १४०

श

शक्त्या ह्लादयते चन्द्रः ६३
शक्त्याशोषयते वायुः ६३
शक्यते हि ययेत्येव ६३
शक्तिशक्तिमतोरैक्यं ६३
शब्दार्थयोः सहितयोः ६२
शब्दार्थसंगमेनैव ३६
शब्दब्रह्मपदेनापि ६१
शब्दब्रह्ममये चास्मिन् ६३
शब्दशक्तिर्न तात्पर्या ८६
शब्दार्थयोः पौनरुक्त्यं १०३
शब्दार्थसंश्रितं काव्यं १४६
शब्दसाम्यमनुप्रासः १०१
शब्दार्थसंश्रिता ये वै ९८
शब्दा लोके भवन्त्येव ६०
शब्द आरम्भिकाबन्ध २८९
शब्दार्थसाहिती काव्यं १८४
श्वसितिचयहवींषि ३१८
शृङ्गारः करुणो वीरः १९९
शृङ्गारवीरशान्तानां २१९

श्रव्यकाव्यमथेदानीं २०५
शारदासत्कृपावाप्ता ५७
शाठ्यकैतवदुर्भाव २८२
शास्त्ररीतिरियं नव्या १६५
श्रावं श्रावं च गीतार्थं २८१
श्लाघ्यमारोहणं वृक्षे १००
शिल्पान्तरैरनेकैश्च २३४
शिवोऽपि शवतां याति ६३
श्रीमदाद्याप्रसादाख्यं ०८

स

सगुणत्वमदोषत्वं ३६
स चास्ति ध्वनिसिद्धान्तः १८१
सदृशोऽसदृशाद्वापि ११०
समक्रमेणैवावृत्तिः १०३
सप्तकं चाष्टकं ख्यातं २१०
समागते विवाहेऽथ २६८
सरणिर्नैव हातव्या ३१५
सहसाऽन्यमतं दूष्यं ३१५
सर्व एव कविर्जीवन् ३१६
सर्वमेतद्धि गान्धर्व २५३
सर्गबन्धो महाकाव्यं २१६
सर्गा अष्टाधिकाः सन्तु २१८
सम्पादनाच्च नीतीनां २२३
सर्वे प्रत्यभिज्ञायन्ते १६२
सम्बन्धं रीतिगुणयोः ८९
स शब्दः प्रातिपदिक ८५
संकेतितं तमेवार्थं ६५
संकेतितस्स एवार्थः ६४
संचिनोति यथाभृङ्गः ०८
संलापकं श्रीगदितं १९८
संवादप्रचुरे नाट्ये २४१
संवेदनमयी गीतिर्गजला २८०
सदुक्तिगुणलुब्धेन ३२०
संविधानकमात्रं हि २८८
संस्कृतेऽक्षरविस्तारे २८४
साहित्यं तादृशं नौमि ६२
साहित्यं निखिलं ६२
सादरं सार्जवं चैव १७८
सृष्टिः सारस्वती ४९
साम्प्रतं भिन्नविस्तारा २८९
साङ्गाऽप्यथ च सोच्छ्वासा २४२
स्थापयेन्नाटकं नूनं १९९
स्वाभाविकं न कुत्रापि २४१
स्वाभाविकं तच्चम्पवां २४२
स्तम्बेरमवदनं तं ०७
स्वरव्यंजनसंयोगाद् ८५
स्वमतं ये ऽभिदधते १४७
स्थाने स्थाने यथा काये ८९
स्वार्थवृत्तिरियं नूनं ३१५
स्वतंत्राः कवयः सर्वे १९९
सिद्धशब्दार्थसम्बन्ध ६५
सुग्रहणमग्राह्यस्य २३६
स्त्रीप्राया चतुरंका स्यात् २०४
सेयं द्विधा बुधैः ख्याता ७०
सोपेक्षं नामाभिः प्रोच्य १६४
स्वेच्छापि चेत्कवेः काचित् १७५

ह

हन्ति व्याकरणं वादः ३१७
हाइकू-तानका-सीजो ३१४
हिन्दीप्रभृतिभाषासु २०२
हेतुद्वारेण विच्छित्त्या १३०
होलीगीतमपि प्रोक्तं २६३

क्ष

क्षयं याति जगद्रूपं १२
क्षेत्रे भृत्याङ्गनाश्चापि २७६
क्षेमेन्द्रोऽपि यथैवासौ १७२
क्षेमेन्द्रहेमचन्द्रौ ०८

***

उदाहरणपद्याऽनुक्रमणिका

अ

अङ्गैर्भूतिं विवुधतटिनीं ११८
अतीतकाले कालकवलिताः ३०३
अद्यापि मे स्मृतिपथं ११०
अभिरुचितं सततं मया २७१
अभिलषामि कश्चिन्महातपा ३११
अम्बरे शृङ्गारी चन्द्रः ३०९
अमी ध्वाङ्क्षास्तथापि न मां २९२
अयि चित्त चिरेण विचिन्तयतोऽपि २९६
अयि सुतनुके ! कलातत्त्वे ३०३
अयुताऽयुतदेवमन्दिरैः १४२
अर्जितानां समर्जनं भूयः २९१
अरे अरे श्यामसुरभिके २६७
अवलोक्य वामनवटुकमदिति २६७
अविद्यमानाऽपि भुजाङ्कपाशे १३२
अहं स्वतन्त्रः ३०६

आ

आकाश एष दयितः परिभूः ११५
आदौ प्रसाद्य कलमञ्जुल १२५

इ

इतीव तास्ता घटना अनेकाः २१४

उ

उत्कोचराशिमवगत्य २१३
उत्तिष्ठ मा शुचमुपैहि १२१

ए

एषा रम्या मरकतचिता ११६

ऐ

ऐरावतं विवुधसिन्धुर- २१५

औ

औरसेनाऽसृजा योषिता २९३

क

क इह जगति भुङ्क्ते १२७
कृत्वा हिमाचलमसौ २१५
कथं मनस्ते तुलयेदथाब्धिं १२१
कथं लिखित्वाऽधिशिलं २१४
कमण्डलुं पूर्णजलं सुमेखलां २१३
करकमले लसति पिच्छारी २६४
करेण खलु केनचित् २७९
कलिकाल ! महात्मन् ! नमो १२८
कलेव चान्द्री स्फुटचारु- १०९
कवयतुतरां लोकः किञ्चित् ३५
कस्य पादपोऽयमस्ति २६८
कान्ताधररसात्तृप्तिः १०३
कान्तासंस्पर्शशैतल्यं ११८
कान्तो नहि भवने जलदो २६१
कामं सन्तु गृहे कुटुम्बिन ८२
कासारसैरिभकडङ्गर- १४४
किमनन्तवसोः साम्यं १२२
किमाकाशे चन्द्रावुदय- ११२
कीदृशमहो विलक्षण २९६
क्रीणन्तीमवलोक्य मां ८२
कुमुदाम्भोजहेमन्त- १०५

ग

गगनं मधुवेश्म किं शशी ११२

घ

घना नैवाकाशे तिमिर- ११५

च

चञ्चत् त्रपां वचसि मन्दरयं च १३०
चलद्रुचिरहंसका ४०

चाणूरं प्रणिहत्य वेगमहितः ५४, ११९
चौर्ये शर्विलकेन याति तुलनां ११३

छ

छलयसि मदयसि लोकं १३२

ज

जयन्ति शम्भुगेहिन्याः १३५
जलचारिविहङ्गमव्रजैः २१२
जलजपुञ्जविजृम्भण- १०३
ज्वालाभिः कवलीकृते ८३

ड

डिण्डिमेन किन्न भूतले १०५

त

तरङ्गभ्रूभङ्गैर्नटपति- ९६
तरुणतरणिदीप्तां नील- २०८
तरुमूलं वसुन्धरागर्भे ३१२
त्वदीयवदनं मया दिने-दिने २६९
त्वन्निर्दयाश्लेषनिमित्त- २१४
त्वद् भ्रूभंगतुलामहो नु १२४
तस्मै दत्तवती कथञ्चन शुभे! २१२
ताडय मामतिकामं १२५
तापयन् सततं लोकान् १३०
तावन्मलीमसजुगुप्सित- २१३
तीक्ष्णा सा बडिशी तवास्ति ५०

द

ददददोऽदुदै दाददेऽदद् १८५
द्वारि द्वारि गतो गवेषितु ९६
दिनानि यातानि विना भवन्तं १२३
दिव्यं पशुं स विदधे २१४
दिव्यां लतां स वृतवान् २१५
दिव्यं पयोधिमवृणोत् २१५
दृष्टिसंगाद्रतिर्जाता १३५
दुरितानि विधुतानि कुरुते २६६
दूर्वेव प्रतिपर्व रोहतितरां १०६

ध

धत्ते यो वारिधारां ५२, १०५
धम्मिल्लं स्वं घनवनगतं ५५
धिक्तेऽक्षियुग्ममदिरच्छवि- १३३
धूमोद्गारमवाप्य दृष्टि- १११
धेनुं स्वां मनुते जनोऽथ ११३

न

न तद्गृहं यन्न विकीर्ण- १३६
नन्दनन्दनेन गोकुलं २६०
नभसि विभाति चमत्कृत- २७३
नभः स्पर्शक्षमे शंखोदर- २९४
नयने न करुणा हृदि न २७४
नायं पार्वणचन्दिरोऽस्ति ३५
नाऽहं करोमि कवितां
नाऽहमस्मि सूर्यो दीपोऽहं २९०
निमग्नजनोऽहम् ३१०
निरात्मदेहापि शिला- १३२
निलिम्पा लिम्पन्तु प्रसभ- ३९

प

पञ्चानन! त्वमिव कोऽस्त्यपरः १४४
पल्यङ्कतल्पशयितो ५१
पलाण्डुच्छेदने निर्गत ३०१
पश्यन्त्या हृदयं निविश्य ५३
प्रथमं दृगपाङ्गशालयोर्ददृशे १३८
प्राग्जन्मार्जितपुण्य-
प्राणप्रियां प्रियतमां ननु १२३
प्राप्ता मया परिणते वयसी- १३०
प्राप्ता सोमवती गृहे न पुरुषाः ८२

ब

बकुलैः सुमकोरकाञ्चितैः २१२
बाला न सा वरतनुर्न च १३७

भ

भवभयजलनिधितरुणतरणि १२९

भ्रमर! तव चिन्तितं नहि जाने २६९
भिक्षुकीव भिक्षमाणा ३०७

म

मङ्गलदिनमिदमद्य शिशुः २६२
मदयति हृदयं सुखयति सदयं २६४
मधुमासोऽभूद् वृन्दाविपिने २६४
मन्दं मन्दं विरावं रे कुरुते २७३
मनो नित्यं विधत्ते २७०
मृत्युरेको वटवृक्षः ३०७
मानोज्ञकं विविधवर्णयुतं ११९
मालिन्यं गृहवह्निधूम १३८
मा वह गर्वमपारं नवतृण १२५
मुखं सदाऽऽह्लादि दृशौ च १४०
मेघो वितरति बहु-बहु वारि २६१

य

यदा पर्येति भृङ्गो जलज ११०
या खलु निस्पन्दा निर्वचना ३०४
या जाता भवतां सदा सुखकरी ८४
यावत्त्वसौ स्फुरति नृत्यति २१३
यास्याम्यन्यत एव भामिनि! १०३

र

रजोभारनता वल्ल्यः १३५
रागो मे जङ्गमीतात् ५३
राजीवमिव राजीवं ११०
राधा वादयति मुरलीमये २५८
राधे ते करुणाकटाक्षलहरी १०७
रिमझिम् वर्षति सजलजलधरो २६०
रोमाञ्चकण्टकैः जुष्टा १२५
रौति कोकिला मदालसा २५८

ल

लघु लघु जलद! सलिल २५९
लीलाविलासितसरत् १११
लुब्धानां प्रीतयः ३०३
लोकानुरागमूलं लोका २९४

व

वत्सत्वेऽति बुभुक्षितां ५५
वृन्ते यान्ति पिपीलिकाः ५०
वृन्दारण्योद्भवासु प्रचलद ९६
वन्दारुक्लृप्तहरिचन्दन १४३
वाणी मुक्तेव यस्यासीत् ११०
वात्योत्थधूलिनिचयैः १३३
व्यालीव दशति घनरजनी २५९
विकसति नहि कुसुमं दिने-दिने २७२
विकचकुमुदनेत्रा यूथिका ११७
विकचपाटलपुष्पकदम्बकं १०३
विघातशंकाऽहतदीन २१३
विच्छायो हिमपातशातित १२७
विद्याध्ययनं विना व्यतीतं २७२
विद्युल्लेखाकशाघात १३०
विधुमभिसरति कुमुदिनी रे मातः २६५
विन्ध्यायते मत्तगजः १०८
विभावसुर्लोकतमो २१३
वियोगे ते तन्व्या १३४
विलोक्य मेघान्तरितं २१४
विलोक्य सौन्दर्यविधानमद्भुतं २१३

श

शृणु रे मातः श्रावणमासः २६३
शनैः शनैः वर्षाबिन्दवः ३१०
शम्भुर्दक्षसुताहीनः १४०
श्मसानसविधे मयाऽऽगच्छता ३०५
शरत्सु हंसा दिवसेषु १०८
श्रीगोवर्धनशैलमण्डप १४०
श्रीसम्पूर्णसुवर्णतत्त्वललिता १०१

स

सखि रे समागच्छति श्रावणमास २५९
सत्यरक्षणे यत्नपरः २९०
सत्त्वोर्जितो विजनसौध ८०
सन्दृष्टा नवमालिका फलवती १२७
समागतो वारय गोपुरान्ते १३८
समायाता इमा वर्षाः १२५
समुन्नतत्वादवतंसतां गता ११६
स्मरमित्रवसन्तेऽस्मिन् १०१
स्पृशेत्पुरोवर्ति तटं प्रतीर्य का १४२
स्फटिकायितगोपुरैः क्वचित् १४२
सम्पूर्णनग्नशिशवो ननु १४२
सह परभृतभृङ्गैश्चित्त १२३
सार्धं न कोऽपि हन्त गतः २९३
सारं विरञ्चिरचने ननु १३७
सारस्वतानन्दविनोदितानां १२१
सितास्वाद्यमहो काव्यं १२०
सुखं जीवति कामकामी ३०८
सुस्वापसौख्यमनुभूय निशि १४१

ह

हृद्दर्पणोदितचलच्छवि १४३
हृद्यं हारि हरिप्रियं १०१
ह्यो यदीयपादकण्टकाः १३५
हासयन्ती क्वचिद्रोदयन्ती ११९
हिमार्तौ सप्तार्चिः प्रतपति ११३

क्ष

क्षणं नृपेषु क्षणमुन्मुखेषु १३८

***